Barcode : 99999990293445
Title - Abhijnana Sakuntalam A Sanskrit Drama
Author - Kalidasa
Language - sanskrit
Pages - 341
Publication Year - 1888
Barcode EAN.UCC-13



ABHIJNÁNA SÁKUNTALAM:

A

SANSKRIT DRAMA.

BY

KÁLIDÁSA.

EDITED

WITH NOTES AND FULL EXPLANATION

BY

KRISHNA NÁTHA NYÁYAPANCHÁNANA.

SECOND EDITION

CALCUTTA:

PRINTED BY P M SOOR AND CO, AT THE CROWN PRESS,
NO 2, GOABAGAN STREET

PUBLISHED BY THE SANSKRIT PRESS DEPOSITORY,
168 BARANASI GHOSHE S STREET, JORASANKO CALCUTTA.

1888.

CALCUTTA :
Printed by P. M. Bose & Co., Crown Print
2, Goabagan Street.

अभिज्ञानशाकुन्तलम् ।

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।

नमो गणेशाय ।

देवोऽनीगोऽपि नेत्रत्रितयपरिलसच्चन्द्रिनेलोङ्गवश्यो-
र्भोगासक्तैर्दुरापोऽप्यनघमतिसुलभो दृश्यते भोगिभिर्यः ।
पुष्पेषुः प्रीतिकारः दधदपि नितरां यश्च पुष्पेषुरोषी
मालाधत्ते स्वयम्भूरपि हरतु हरः कोऽशुभं वस्तुतो नः ॥
यन्माध्यापनमहिमा सञ्चारयति विबुधेतरञ्च पियम् ।
सोऽखिलशास्त्रविचाराच्छालभ्जालि गुरुर्जयति ॥
सम्यग्दर्शनधर्मशास्त्रनिपुणो व्युत्पत्तिसम्पत्तिमान्
नानागोलविचारणैकचतुरः सिद्धान्तसिद्धे पथि ।
काव्यानाट्यविनाटकेषु च मतिर्लीलायतश्चप्रजो
भ्राताऽसौ मम कालिदासकविकोरत्नावलीश्रोत्रिकः ॥
यदुच्चैर्लयतालरागनिचये गीतेषु न व्याहृता
मध्यस्थो नृपपूरुषप्रतिनिधिर्वादेषु यस्याभवत् ।
यः सर्वं प्रियमप्युवाच सततं शास्त्रैरनेकैर्हितो
येनादौ च विमुच्य लोकमनुजस्नेहेन रामो जितः ॥
तस्यानुजः कौणपचन्द्रसूनुर्विदेहजन्माऽर्जुनमिश्रवंश्यः ।
टीकामभिज्ञानशकुन्तलस्य श्रीलक्ष्मणनाथः कुरुतेऽस्यजन्मा ॥
येषामेतद्दिदृक्षूणां च प्रबन्धोऽस्ति नाटकम् ।
अपि प्रवेशयेदेतानेषा टीका प्रवेशिका ॥
व्याख्यायते प्रमाणेन सर्वं साधोरुमादितः ।
पूर्वं व्याख्यानिवादः चाल्यव्यक्तः प्रपञ्चतो ॥
याचे साञ्जलिबन्धोऽहं यो यो दोषोऽत्र वर्तते ।
तत्संस्कारस्मभिया सर्वं भोमेत्यनुकुर्वे ॥

यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥(१)

---

(१) यद्यपि नटाभिनीतमेव कर्म्म नटकर्म्मत्वेन नाटकशब्देनाभिधीयते तथापि तदाप्तानसम्बन्धात्, अन्योऽपि नाटकपदेन लक्षणीय । तदिदानीं अन्यात्मक किमपि नाटकं प्रणेष्यन् कवीश्वरो अन्यसमाप्तिमतिमङ्गकविघ्नक्षयहेतुमङ्गलं प्रबन्धादनुनिबध्नन् अभिनेतव्यक्रियां मान्दीमेव निर्दिशति या सृष्टिरिति । या तनुः स्रष्टु परमात्मनः आद्या सृष्टि आदौ सृष्टा । तदभिहितो भावो द्रव्यवत् प्रकाशत इति न्यायात् । अनुमयो । तथा च मनु । सोऽभिध्याय शरीरात् स्वात् सिसृक्षु र्विविधा प्रजा । अप एव ससर्जादौ तासु बीजमवासृजत् । तदण्डमभवद्धैम सहस्रांशुसमप्रभम् । तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामह इति । या तनु र्विधिवत् हुतं विधानेन हुतं हविर्हव्यं वहति अग्निर्हविर्देवता प्रापयति अग्निमयीत्यर्थः । जातवेदा देवेभ्यो हव्यं वहतीति श्रुतेः । या तनु र्होतो यजमानरूपा यजमानस्यैव होमसम्बन्धो विद्यात् । तथा च श्रुत्य । स्वयं होमे फलं यत् तु तदन्येन न जायते इति । अतएव कविनापि धूमोद्वहादिदृष्टो हि यजमानस्य यावत्या एव दृष्टे आहुतौ निबध्नतो यजमानस्यैव होमफलं स्वदभीप्सितम् । यत्तु आदित्या स्वर्गं यन्तो यष्टा च यजमानस्येत्यादौ तद् बहुविधस्वर्गादिसाधनकर्म्मणि व्याप्तत्वया 'स्वयं' होमा-
साधनत्वात् तत्रैव प्रतिनिधेरेव न्यायेनादरणदर्शनात् । ये तु तत्र अहोरात्रमग्नि निर्वप

नान्द्यन्ते सूत्रधारः॥ अलमतिविस्तरेण। नेपथ्याभिमुखमवलोक्य॥ आर्ये त्र यदि नेपथ्यविधानमवसितं तदिहागम्यताम्। (२)

नटी प्रविश्य॥ अज्ज इअ म्हि। आणवेदु अज्जो को णिओओ अनुचिट्ठीअदुत्ति। (३)

सूत्र॥ आर्ये त्र इयं हि रसभावविशेषदीक्षागुरो विक्रमादित्यस्य

रसतु। तथाच विष्णुपुराणं सूर्यो जलं भूमौ वह्निर्वायुराकाशमेव च। दीक्षितो ब्राह्मण सोम इत्येतास्तनवः स्मृता इति। इदं खण्डरा नाम वृत्तम्। तदुक्तं चत्वारो यत्र वर्णाः प्रथममनघवः षष्ठकः सप्तमोऽपि ह्यौ तद्वत् षोडशाद्यौ सगमदशदिते षोडशान्त्यौ तथान्त्यौ। रत्नास्तम्भोरुकान्ते शनिशुनिशुनिभि र्दृश्यते चेत् विरामो वाणे रुद्रैः कवीन्द्रैः सुतनु निगदिता खण्डरा सा प्रसिद्धा इति॥

(२) नान्द्यन्त इति। नाटकीयविघ्नविघातायादौ क्रियमाणाशी र्नान्दी सा चाय या सृष्टिरित्यादिश्लोकमयी। यदाह भरतः। यद्यप्यङ्गानि भूयांसि पूर्वरङ्गस्य नाटके। तथाप्यवश्यं कर्त्तव्या नान्दी विघ्नप्रधानये। देवद्विजन्नृपादीनामाशीर्वादपरायणा। नन्दन्ति देवता यस्मात् तस्मान्नान्दीति कीर्त्तिता इति। तदन्ते तत्पाठान्ते तां पठित्वेत्यर्थः। तदुक्तं मालतीमाधवटीकायाम्। सूत्रधार पठेच्चान्दीं मध्यमस्वरसंश्रित इति। सूत्रधारो नाटकीयकथासूत्रसूचको नटप्रधानभूतः पुमान् वाहेति शेषः। एवमुत्तरत्रापि सर्व्वत्र कर्त्तृपदमाहेति क्रियया वाध्याहर्त्तव्यया योजनीयम्। उक्तं हि नाटकीयकथासूत्रं प्रथमं येन सूच्यते। रङ्गभूमिं समाक्रम्य सूत्रधार स उच्यते इति। तद्वचनमाह व्यतमिति। व्यतिविस्तरेण वाविस्तरेण व्यक्तं स वारणीय इत्यर्थः। वारणार्थेन सतीया। विस्तारो विषयो व्यासः स च ग्रन्थस्य विस्तर इति व्यक्तं भूषणपर्य्यायिग्रन्थिवारणबाधकमिति चामरः। नेपथ्यं वेगरचना। व्याकुलवेषो नेपथ्यमित्यमरः। यत्र तु तदर्थं व्यवधानवत्स्थानं सूच्यते। तदभिमुखं यथा स्यात् तथावलोक्य दृष्ट्वा स एव पुनराह आर्य्ये इति। आर्य्ये श्वेते सा याव नटी बोध्या उत्तरत्र नटीप्रवेशात्। नेपथ्यविधानं वेगरचनं व्यवसितं व्यवसानं गतं समाप्तमिति यावत्। तत् तद्वा॥

(३) नटीति। प्रविश्य रङ्गभूमिमिति शेषः। अज्जेत्यादि। आर्य्य इयमस्मि। आज्ञापयत्वार्य्यः को नियोगोऽनुज्ञीयतामिति। इयमस्मि अहमिति शेषः। को नियोगो निदेशो अनुज्ञीयतां मयेति शेषः। इति आज्ञापयतु आर्य्यः॥

(४) सूत्रेति। रसाः शृङ्गारादयः। भावयन्ति रसान् जनयन्तीति भावा रसायङ्ग्यभूताः। यदाह भरतः। नानाभिनयसम्बन्धान् भावयन्ति रसानिमान्। तस्मात् भावाभि

अभिरूपभूयिष्ठा परिषत् । अस्याश्च कालिदासग्रथितवस्तुना नवेनाभिज्ञानशकुन्तलनामधेयेन नाटकेनोपस्थातव्यमस्माभिरतः प्रतिपात्रमाधीयतां यत्नः । (४)

नटी ॥ सुविदितप्रयोगतयार्यस्य न किमपि परिहास्यते । (५)

सूत्र ॥ सस्मितम् ॥ आर्ये शृणोषि ।

•ग्नापरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥ (७)

भावा विज्ञेया नाटकोक्तिरिति । तथा पुराणे नाट्यशास्त्रे च द्वयोस्तु रतिभावयोः समानार्थतया चात्र द्वयमैक्येन लक्ष्यत इति । तद्विशेषस्य तत्प्रभेदस्य दीक्षागुरूपदेष्टुर्विक्रमादित्यस्य उज्जयिनीनाथस्य हि यस्मादियं अभिरूपभूयिष्ठा पण्डितबहुला । प्राप्तरूपसुरूपाभिरूपा बधमनोज्ञयोरित्यमरः । परिषत् सभा । तथा यस्यां परिषदि कालिदासेन ग्रथितं प्रबद्धं वस्तु पदार्थो यत्र तत् तेन । भावे पदार्थो धर्म्म स्यात् सत्त्वं तत्त्वञ्च वस्तु चेति त्रिकाण्डशेषः । नवेनाविरभूतेन अभिज्ञान शकुन्तलाख्या यत् तदभिज्ञानशकुन्तलम् तन्नामधेयेन तदाख्येन नाटकेनास्माभिरुपस्थातव्यमुपासितव्यञ्च तत् तस्मात् प्रतिपात्रं प्रतिव्यक्ति यत्न आधीयतामुत्पाद्यताम् । अत्र शकुन्तलालक्षितत्व सूत्रत्वेन्या शकुन्तलापदं तात्स्थ्यादि न तु कुन्तलप्रयुक्तिमतीति व्युत्पत्त्या इत्यादि । तदाह महाभारते । (निर्जने तु वने यस्मात् शकुन्ते परिरक्षिता । शकुन्तलेति नामास्या लोकेषापि ततो गयेति ॥)

(५) नटीति । सुविदितेत्यादि । सुविदितप्रयोगतया चार्यपुत्रस्य न किमपि परिहास्यते । आर्यस्य भवत सुविदितप्रयोगतया सुशिक्षितप्रयोगतया किमपि नाट्यादिकं न परिहास्यते हेयं स्यात् ॥

(६) सूत्रेति । सस्मित मन्दहासयुक्तम् । ते इति सम्बन्धमात्रविवक्षया षष्ठी । भूतार्थं मुचितार्थं । भूत शब्दादौ विधाधादौ जन्तौ क्लीव त्रिषूचिते इति मेदिनी ॥

(७) तमेवार्थं माह आपरितोषादिति । विदुषां धीमतामापरितोषात् सम्यगुपपत्त्यान्त प्रयोगविज्ञान अभिनयनैपुण्य आत्मन इति शेष । साधु उत्कृष्ट न मन्ये । शिक्षितानां विज्ञानां । प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिता इत्यमर । बलवत् शक्तासीवेति प्रौढ्या ज्ञानविषयमपि चेतश्चित्त आत्मनि स्वसम्बन्धे अप्रत्यय अविश्वसनीयम् यद्वा मनवत् शिक्षितानामपीव शिक्षितानामपि चेत आत्मनि अप्रत्यय न विश्वासवत् । अत्र सामान्येन विशेषसमर्थनादर्थान्तरन्यासोऽलङ्कार । तदुक्त काव्यप्रकाशे । सामान्य वा विशेषो वा

नटी॥ सविनयम्॥ एवमेतत्। अनन्तरकरणीयं दाणीं अज्जो आणवेदु। (८)

सूत्र॥ आर्ये अत्र किमन्यदस्याः परिषदः श्रुतिप्रमोदहेतो र्गीतात् करणीयमस्ति। (९)

नटी॥ अध कदमं उण उदुं अधिकरिअ गाहूस्सं। (१०)

तदनेन समर्थयते। • यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वेति। दृयंसार्या नाम जातिः। यदुक्तं। यद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा। वृत्तमक्षरसंख्यानं जाति र्मात्रालक्षता भवेदिति। यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीये सप्त। यष्टादश द्वितीये चतुर्थके पञ्चदश सार्या स्मृति च। अत्र गणनियमो यथा लक्ष्मैतत् सप्त गणा गोपेता भवति नेह विषमे ज। षष्ठो जश्च न लघु वा प्रथमार्द्धे नियतमार्यायाः॥ षष्ठे द्वितीयलात् परके नले सुखलाच्च सयतिपदनियम। • चरमेऽर्द्धे पञ्चमके तस्मादिह भवति षष्ठो लः॥ आर्यायाः पूर्वार्द्धे सप्त गणाः सप्तरन्ते गुरुवर्ण एकः। अत्र विषमे प्रथमतृतीयपञ्चमसप्तमरूपे मध्यगुरु र्गणो न स्यात्। षष्ठो गणो मध्यगुरु र्लघुचतुष्टयात्मको वा स्यात्। तत्र षष्ठे नले लघुचतुष्टयात्मके सति द्वितीयलघुवर्णादारभ्य सयति पदं प्रवर्त्तते। परके सप्तमे लघुचतुष्टयात्मके सति प्रथमलघुवर्णादारभ्य पदं प्रवर्त्तते। तथा परार्द्धे पञ्चमगणे लघुचतुष्टयात्मके सति तत्रापि तस्मात् प्रथमाक्षरादारभ्य पदप्रवृत्ति स्यात्। तथा चरमार्द्धे षष्ठो गण एकलघुवर्णात्मक एव स्यात् न पूर्वार्द्धवत् मध्यगुरुः सर्वलघु र्वा स्यादित्यर्थः। एवमेव पिङ्गलाचार्यैरुक्तवृत्तौ कृष्णायुधः। यतो व्याख्यानान्तरमनुपादेयम्। गणस्तु चतुर्मात्रात्मकः पञ्चविधः। ज्ञेयाः सर्वान्त्यमध्यादिगुरवोऽत्र चतुष्कलाः। गणाश्चतुर्भ्य एतेभ्यः पञ्चार्य्यादिषु विश्रुता वृत्तके। सर्वगुरु-र्गुरुवर्णद्वयम्। अन्तगुरु र्गुरुवर्णान्तं लघुवर्णद्वयम्। मध्यगुरु र्लघुवर्णद्वयपुटितो गुरुवर्णः। आदिगुरु र्गुरुवर्णपूर्वकं लघुवर्णद्वयम्। तथा लघुवर्णचतुष्टयात्मकः। नकारादिरिङ्गितः पश्चाद्वक्ष्यते। एषा रीतिरन्यत्राप्यनुसन्धातव्या॥

(८) नटीति। सविनयं विनीतभावमवज्ञब्धेति भावः। एवमेतदित्यादि। एवमिदं। अनन्तरकरणीयमिदानीमार्य आज्ञापयतु। एवमिदमिति सूत्रधारोक्तिस्वीकारः। अनन्तर-करणीयमुत्तरकालकर्त्तव्यम्॥

(९) सूत्रेति। अस्याः परिषदः श्रुतिप्रमोदहेतोः श्रवणानन्दहेतो र्गीतादन्यत् किं करणीयमस्ति तदेव कर्त्तव्यमिति भावः॥

(१०) नटीति। अथेत्यादि। अथ कतमं पुनः कं तमधिकृत्य गास्यामि। अथशब्दः प्रश्न द्योतकः। अङ्कानन्तरारम्भप्रश्नात्सूत्रधारो अथ इत्यमरः। कतमं कं किंशब्दे कतमः॥

सूत्र ॥ आर्ये त्र नन्विममेव तावदचिरप्रवृत्तसुपभोगक्षमं ग्रीष्म समयमधिकृत्य गीयताम् । सम्प्रति हि । (११)

सुभगसलिलावगाहा. पाटलसंसर्गसुरभिवनवाता ।
प्रच्छायसुलभनिद्रा दिवसा परिणामरमणीयाः ॥ (१२)

नटी ॥ तह ॥ इति गायति । (१३)

•खणसुम्बिआइ भमरेहिं उह सुउमारकेसरसिहाइं ।
ओदंसअन्ति दअमाणा पमदाओ सिरीसकुसुमाइं ॥ (१४)

---

(११) सूत्रेति । नन्वत्रार्थे । प्रच्छायप्रधानानुष्णानुनयामन्त्रणे नन्वित्यनेन । अचिरप्रवृत्त सम्पृत्यापतितम उपभोगक्षममनुपभोगार्हमिम ग्रीष्मसमयमेव तावदधिकृत्य गीयताम् । ग्रीष्मप्रवृत्ति दर्शयति सम्प्रति हीति । हि यस्मात् समतीदानीं दिवसा एवमेवमिति लोकीयेनान्वय ॥

(१२) सुभगेति । सुभगोऽतिशयित सलिलेषु जलेष्ववगाहो मज्जन येषु ते तथा पाटलस्य तत्कुसुमस्य स संसर्गेण सुरभि सुगन्धि वनवातो येषु ते तथोक्ता तथा प्रवृद्धा छाया यत्र तत प्रच्छाय तत्र सुलभा च्यत्रागमा निद्रा येषु ते तथाभूता । तथा परिणामे परिपाके यो पदगायामिति यावत रमणीया मनोरमा दिवसा वर्त्तन्त इति शेष । इयमार्या जाति । चत्र पूर्वार्द्धे षडगणस्य लघुवर्णपतृतीयत्वकत्वाद् द्वितीयचतुर्थयोर्वर्णादारभ्य पदान्तरप्रवृत्ति । प्रथमलघुवर्णस्तु पदान्तरीयो निवर्तित । तत्प्रमाण तु आर्यालक्षणे प्राग द्रष्टव्यम ॥

(१३) नटीति । तह तथा । स्वीकारार्थ ॥

(१४) गानमाह खणेति । खणसुम्बितानि भ्रमरै पद्म सुकुमारकेसरशिखानि । यावत सद्यन्ति दयमाना प्रमदा शिरीषकुसुमानि ॥ खण खण्डे खण्डे खदवा खण्डेन निर्व्यापारस्थित्या भ्रमरैरुम्बितानि खण्डीदानि । निर्व्यापारस्थितौ कालविशेषोऽयमो खण्ड इत्यमर । तथा सुकुमारा कोमला केसराख्या किञ्जल्कानां शिखा येषां तानि । सुकुमारान्तु कोमलमित्यमर । शिरीषकुसुमानि प्रमदा युवतयो दयमाना सद्या इव । कोकुमाद्यादतिशयोगे नेयम् । खवत सद्यन्ति कर्णपूरीभवन्ति यत्र । उद्यानसखा यत सो हो कर्णपूरोऽपि शेखर इत्यमर । दयमद्यानां नाम गीति । उक्ता सा पिङ्गले । पुष्पद्वे उक्तद्वे मत्ता गोसन्ति सुभगम भणिथा । सो सग्गाहो सुनो पिङ्गलकरहि सट्टिमत्तहो ॥ पूर्वार्द्धे उत्तरार्द्धे मात्रास्ति यदिति सुभगस भणिता । सा उद्यानयोक्ता पिङ्गलकविरचितपङ्क्तिमात्राङ्का इत्यर्थ ॥

सूत्र॥ आर्येऽत्र साधु गीतम्। अहो रागापहृतचित्तवृत्ति रालिखित इव विभाति सर्व्वतो रङ्गः। तदिदानीं कतमं प्रयोग-मास्थितेऽनमाराधयामः। (१५)

नटी॥ णं पढमं ज्जेव्व अज्जेण आसत्तं अहिज्ञाणसउन्तल णाम अउव्व णाडअं अहिणीअदु त्ति। (१६)

सूत्र॥ आर्येऽत्र सम्यगनुबोधितोऽस्मि। अस्मिन् क्षणे खलु विस्मृतं मयैतत्, कुतः (१७)

तवास्मि गीतरागेण हारिणा प्रसभं हृतः।
एष राजेव दुष्मन्तः, मारङ्गेणातिरंहसा॥ (१८)

इति निष्क्रान्तौ।

प्रस्तावना। (१९)

---

(१५) सूत्रेति। अहो विस्मये रङ्गो नाट्यसभा रागेण स्वरविशेषेणापहृता चित्तवृत्तिर्मनोवृत्तिर्यस्य स तथोक्तः सन् आलिखितस्त्रलित इव सर्वतः सर्वत्र विभाति प्रकाशते। तत् तावत् कतमं क प्रयोगं नाटकाभिनयमास्थितेऽनेन रङ्गं आराधयाम अनुरञ्जयाम वयमिति शेषः॥

(१६) नटीति। णमित्यादि। नन्वु प्रथममेवार्य्येणाभिज्ञानशकुन्तलं नाम अपूर्वं नाटकमभिनीयतामिति। नन्वुरनुप्रश्ने। नन्वयञ्चो विनिग्रहे अनुप्रश्ने इति मेदिनी। अपूर्वं नव। इति आभिज्ञानमित्यन्वयः॥

(१७) सूत्रेति। सम्यगनुबोधित सम्यक् स्मारित। स्वेति शेषः। अस्मिन् क्षणे खलु अस्मिन् क्षण एव हेतुमाह कुत इति॥

(१८) तवेति। अतिरंहसा वेगातिशयिना मारङ्गेण मृगेण। चातके हरिणे पु सि मारङ्ग शबले चित्रित्यमरः। एष राजा दुष्मन्त इव हारिणा मनोहारिणा तव गीतरागेण गीतस्वरेणाह प्रसभं बलात् हृतोऽपहृतचित्तवृत्तिरस्मि। राजपक्षे हृत शब्दः प्रापित इत्यर्थः। इदमानुष्टुभं नाम वृत्तम। तदुक्तं पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः। षष्ठं गुरु विजानीयादित्यानुष्टभलक्षणमिति॥

(१९) इतीति। निष्क्रान्तौ रङ्गभूमेरपगतौ नटीनटाविति शेषः। प्रस्तावना प्रस्तुतोद्घाटनम। तल्लक्षणं यथा। नटो विदूषको वापि पारिपार्श्विक एव वा। सूत्रधारेण सहितान् संलापं यत्र कुर्व्वते। चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्मिथः। आमुखं तत् विदुस्तज्ज्ञा प्रस्तावनापि सेति। सा चात्रावगतिसंज्ञा। तदुक्तं यत्रैकस्य समावेशात् कार्य्यमन्यत् प्रसाध्यते। प्रयोगे खलु तज्ज्ञेयं सा चावगतिसंज्ञिता बुधैरिति। समर्पणात् साङ्गस्योद्घाटनात्॥

तत प्रविशति रथारूढ शरचापहस्तो मृगमनुसरन् राजा सूतश्च ॥ (२०)

सूत ॥ राजान मृगञ्चावलोक्य ॥ आयुष्मन् । (२१)

कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्याकार्मुके ।
मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम् ॥ (२२)

राजा ॥ सूत दूरमनुसारेण वयमाकृष्टाः । सोऽयमिदानी-
मपि (२३)

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम् ।
दर्भैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥ (२४)

---

(२०) तत इति । अनुसरन् अनुगच्छन् । सूत सारथे । सूत यत्ता च
सारथिरित्यमरः ॥

(२१) सूत इति । सप्तविद्यस्यैव सारथ्योचित्रात तदुक्ति च कृतेनाह आयुष्म-
न्निति । आयु प्रशस्तिरस्यास्तीति आयुष्मान् । अत्र मत्वर्थीयः । निमित्तयकुलशालो
हयविद्याविशारद । स्वामिभक्तो ऽनहोत्वादि धर्मैपाख्य प्रियवद । सूतश्च सप्तविद्यश्च
सारथि परिकीर्तित इति ॥

(२२) कृष्णसार इति । कृष्णसारे मृगविशेषे यथा जन्तौ गुणमधिकृत्य वर्त्तमान
कार्मुक धनु र्यस्य स तथाभूते । मौर्वी ज्या विज्ञिनी गुण इत्यमरः । त्वयि च चक्षु-
र्दत्त पातयता इह मृगानुसारिण मृगमनुगच्छन साक्षात् प्रत्यक्ष पिनाकिन हरमिव
पश्यामि । साक्षात् प्रत्यक्षतुल्ययोरित्यमरः ॥

(२३) राजेति । अद्यना सारथ्येन मृगेण वय दूरमाकृष्टा आनीता । सोऽय मृग
इदानीमपि दूरमाकृष्याधि एव प्रयातीति स्वोक्तीयमाश्चर्य ॥

(२४) ग्रीवेति । अवदनति पश्चात् पतति स्यन्दने रथे । दत्तदृष्टि स्थापित
दृष्टि यस्य सः । ग्रीवाया कन्धरायाः भङ्गेन परिवर्तेन अभिराम रमणीय यथा स्यात् तथा
मुहु पुन पुन ईक्षा निविष्टा दृष्टि र्येन स । तथा शरस्य बाणस्य पतनभयात् भूयसा बहुत
तेन पश्चार्द्धेन देहस्य पश्चाद्भागेन कटीपादादिना सकोचनिपात । पूर्वकाय
देहपूर्वभाग प्रविष्ट । मुखप्रोतकरणद्वयाभ्यासे प्रवेशितकुशसूचीकान्ताभ्यन्त इति भाव ।
अर्द्धावलीढैर्द्वं कथञ्चित्तेलया त्रसेण विवृतात् व्यात्ताद्भुखात् भ्रंशिभिः पतद्भिः दर्भैः कीर्ण
सर्वे । मुख व्यात्तवक्त्रमित्यमरः । क्वीर्णं व्याकीर्णं वर्त्म यस्य स तथोक्त सन् उदग्र

सविस्मयम् ॥ कथमनुपतत एव मे प्रयत्नप्रेक्षणीय संवृत्तोऽयं रङ्ग । (२५)

सूत ॥ उद्घातिनी भूमिरिति रश्मिसंयमनात् रथस्य मन्दीभूतो वेग तेनैष रङ्गो विप्रकृष्टः संवृत्त । सम्प्रति हि समदेशवर्त्ती न ते दुरासदो भविष्यति । (२६)

राजा ॥ तेन हि सुचत्रन्तामभीषव । (२७)

सूत ॥ यथाज्ञापयत्यायुष्मान् ॥ इति भूयो रथवेग सूचयित्वा ॥ आयुष्मन् पश्य पश्य । एते हि (२८)

सुक्तेषु रश्मिषु निरायतपूर्वकायाः
स्वेदामपि प्रसरता रजसामलङ्घ्याः ।
निष्कम्पचामरशिखाश्चुतकर्णभङ्गा.
धावन्ति वर्त्म नि तरन्ति नु वाजिनस्ते ॥ (२९)

उच्च प्लुत भक्त्कगति र्यस्य स तथाभूतत्वात् । उच्चप्राप्लुतोद्प्लोच्छ्रुताप्लुङ् इत्यमर । वियति व्याकाश वङ्कतर उर्व्या भुवि स्तोकमल्प प्रयाति गच्छति पश्य । इद खघरा नाम वृत्तम् । यति स्वभावोक्तिरलङ्कार । तदुक्त दण्डिना । नानावस्त्र पदार्थाना रूप साक्षाद् विदृश्यती । स्वभावोक्तिश्च जातिश्चेत्यादा सालङ्कृतिरिति ॥

(२५) सविस्मयमिति । विस्मयसङ्कितमाङ्केत्यर्थ । प्रयत्नप्रेक्षणीय कृच्छ्रान्निरीक्षणीय । संवृत्त सम्भूत ॥

(२६) सूत इति । उद्घातयति पादस्खलन जनयतीत्युद्घातिनी निम्नोन्नता । उद्घात कथ्यते पादस्खलन इति विश्व । इति हेतो । रश्मिसंयमनात् प्रग्रहाकर्षणात् । किरण प्रग्रहो रश्मो इत्यमर । मन्दीभूतोऽल्पीभूत । मूढाल्पापटु निर्भाग्या मन्दा इत्यमर । विप्रकृष्टो दूरवर्त्ती । सम्प्रति इदानीम् । समदेशवर्त्ती समतलभूमिवर्त्ती रथ इति शेष । दुरासदो दुष्प्राप ॥

(२७) राजेति । अभीषव प्रग्रहा । अभीषु प्रग्रहे रश्मावित्यमर ॥

(२८) सूत इति । यथेत्यादि तत् क्रियते इति शेष । इति उक्त्वेत्यर्थ । भूयो रथवेगमतिशयेन रथवेगम् । सूचयित्वा कथयित्वा । एते इति लोकीयवाजिन इति विशेषणम ॥

(२९) सुक्तेष्विति । रश्मिषु प्रग्रहेषु सुक्तेषु शिथिलीकृतेषु सत्सु निरायतो अतिदीर्घ पूर्वकायो देहपूर्वभागो येषा ते तथोक्ता । 'तथा प्रसरता वीप्सासमयोचित

राजा॥ सहर्षम्॥ नूनमतीत्य हरिणं हरयो वर्त्तन्ते। यतः (३०)

यदालोके स्थूलं व्रजति सहसा तद्विपुलता
यदङ्गे विच्छिन्नं भवति कृतसन्धानमिव तत्।
प्रकृत्या यद्वक्रं तदपि समरेखं नयनयो-
र्न मे दूरे किञ्चित् क्षणमपि न पार्श्वे रथजवात्॥ (३१)

दक्षिणवातार्हितोत्तराभिमुखवेगयता खेदा खखुरोत्थाना रजसा पाण्डूनामपि व्यक्त्या अनतिक्रमणीया व्यक्त्यानासुत्तराभिमुखगमनादेतेन विशेषणेन वातादधिको वेगो दर्शितः। तथा निष्कम्पा वेगातिशयात् स्थिरीभूतास्वामराणां शिरोगतानां शिखा अग्राणि येषां ते। तथा शुद्धा अपगता कर्णानां शङ्का व्यक्तनयो येषां ते ऊर्ध्वीकृतकर्णा इति यावत्। ते तव एते वाजिनश्चत्वारस्खुरगां वर्त्मनि मार्गे धावन्ति खु किं तरन्ति प्लवन्ते इति पश्य पश्येति पूर्वेणान्वयः। व्यक्तं निष्कम्पचामरशिखा निभृतोर्द्धकर्णो धावन्त्यमी मृगजवाद्यमेव रथ्या

सूत ॥ पश्यैनं व्यापादयम् । (३२)

राजा ॥ शरसन्धानं नाटयति ॥ (३३)

नेपथ्ये ॥ भो भो राजन् आश्रमसृगोऽयं न हन्तव्यो न हन्तव्यः । (३४)

सूत ॥ आकर्ण्य अवलोक्य च ॥ आयुष्मन् अस्य खलु ते बाणपातपथवर्त्तिन ऋषिकुमारस्यान्तरायौ तपस्विनौ संवृत्तौ । (३५)

राजा ॥ ससम्भ्रमम् ॥ प्रगृह्यतामिषुधिः । (३६)

सूत ॥ यथाज्ञापयति चायुष्मान् ॥ इति तथा करोति ॥ (३७)

॥ तत प्रविशति सशिष्यो वैखानस ॥ (३८)

वैखा ॥ हा सत्यव्रत्य ॥ भो भो राजन् आश्रमसृगोऽयं न हन्तव्यो न हन्तव्यः (३९)

अत्र प्रथमपादार्धं पुरोवर्त्तिविषय द्वितीयतृतीयपादार्धौ पश्चाद्वर्त्तिविषयाविति कश्चित् । वस्तुतो द्वितीयतृतीयपादाभ्या पार्श्वस्य वर्ण्यते । इद [illegible] नाम वृत्तम् । तदुक्तम् । [illegible] एवगुणोपेत [illegible] कलितकमले पञ्च गुरवस्तत्रे [illegible] सार्व्वभौम पुलमाहुरिह सभस्र । छन्दोभङ्गप्रसङ्गे पुरुशब्दोऽत्र लघ्वादि । तथाच विश्व । प्राज्यपरागयो । पुरु खर्लोकश्चपयो रिति । अन्यत्र दीर्घादिरपि दृश्यते तथाच मत्स्यपुराणम । तस्मादेव च राजर्षे शर्म्मिष्ठा वार्ष पर्व्वणी । इ छत्रश्चाण्डश्च पूरुश्च त्रीन् कुमारानजीजनदिति । अतएव वक्ष्यति सेवपूरुम वाक्षत्रयीति ॥

(३५) इतर इति । इतरो वैखानसशिष्य । सर्व्वथा वार्त्तमित्यर्थ । सर्व्वथा हेत वाद्योरिति मेदिनी ॥

(३६) राजेति । प्रतिगृह्यतां लभ्यम ॥

(३७) वैखेति । समिधा न्यग्रियरक्षानामाहरणाय वय प्रस्थिता गच्छाम । वर्त्तमाने क्त । व्यग्रियेषणशब्द इति षष्ठवचनम । अतुमालिनीतीर मालिन्या मद्राक्षीरस्य समीपे । सामीप्यार्थेऽव्ययीभाव । अकुन्नलयेत्र साधिदैवत साधिष्ठातृजम । धान्येन धन धानिति वत् अकुन्नलयेत्यभेदे तृतीया । एषोऽस्माक गुरोरुपाध्यायस्य कण्वस्य तदाख्यस्य कुलपते र्षेऽक्षात्राध्यापकस्य व्याश्रमो मठश्च दृश्यते । अङ्गपर्य्यादिचतुष्के मठादौ चाश्रमो ऽस्त्रियामिति रुद्र । चेद् यदि चान्यकार्य्यस्य कर्म्मान्तरस्यातिपातोऽतिक्रमो न स्यात् तत् तदा अत्र व्याश्रमे प्रविश्य अतिथिसत्कारोऽतिथिसपर्य्या प्रतिगृह्यताम । उत्साह यितुमाह अपि चेति ॥

(३८) धर्म्म इति । तप एव धर्म वेद ते तपोधनास्तपस्विनस्तेषा प्रतिकूला अप

राजा ॥ अपि सन्निहितोऽत्र कुलपतिः ॥ (४९)

वैखा ॥ इदानीमेव दुहितरं शकुन्तलामतिथिसत्कारायादिश्य दैवमस्याः प्रतिकूलं शमयितुं सोमतीर्थं गतः (५०)

राजा ॥ भवतु तामेव द्रक्ष्यामि । सा खलु विदितभक्तिं मां निवेदयिष्यति ॥ (५१)

वैखा ॥ साधयामस्तावत् ॥ इति सर्षियो निष्क्रान्ताः । ५२)

राजा ॥ सूत चोदयाश्वान् पुण्याश्रमदर्शनेनात्मानं पुनीमहे । (५३)

सूतः ॥ यदाज्ञापयत्रायुष्मान् ॥ इति भूयो रथवेगं रूपयति (५४)

गता विघ्ना यासां तास्तथोक्ताः धर्म्या धर्म्मादनपेताः क्रियाविच्छितकर्म्माणि समवलोक्य सम्यग् दृष्ट्वा मौर्व्यां गुणस्य यः किणस्तदाघातजनितगुष्कव्रणः । घांटा इति यस्य प्रसिद्धिः । सोऽङ्गुश्चिह्नं यस्य स तथाभूतो मे भुजो बाहुः स्त्रियदु रक्षति इति घास्यसि ध्रुवमुभविष्यसि । किणः गुष्कव्रणेऽपि चेति त्रिकाण्डशेषः । दृषदाद्यां । चस्य द्वितीयचतुर्थपादान्तगयोर्घयोरपि वर्णयोर्गुरुत्वमङ्गीकर्त्तव्यम् । तदाह । सानुस्वारस्य दीर्घो च विसर्गी च गुरुर्भवेत् । वर्णः संयोगपूर्वश्च लघुः पादान्तगोऽपि वेति ॥

(४९) राजेति । त्वयि प्रश्ने । गर्हासत्क्रियाप्रश्नयज्ञाधम्मायनास्वपोत्यमरः । कुलपतिः कण्वः । सन्निहितोऽवस्थितः । कुलपतिलक्षणं यथा । मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात् । अध्यापयति विप्रर्षिः स वै कुलपतिः स्मृत इति ॥

(५०) वैखेति । दुहितरं शकुन्तलामतिथिसत्काराय अतिथिसपर्य्यायै आदिश्य यथा दुहितुः प्रतिकूलमनिष्टकृद् दैवं पौर्व्वदैहिककर्म्मदोषं । तथाचोक्तम् । तत्र दैवमभिव्यक्तं पौरुषं पौर्व्वदैहिकमिति । शमयितुं स्वस्त्ययनादिभिर्विहन्तुं इदानीमेव सोमतीर्थं गतः । मत्स्यपुराणम् । प्रतिकूलं यदा दैवं पौरुषेण विहन्यते । मङ्गलाचारयुक्तानां नित्यमुत्थानशीलिनामिति ॥

(५१) राजेति । भवतु तदिति शेषः । तां शकुन्तलां । सैव शकुन्तलैव । विदितभक्तिरवगतभक्तिर्मामेति शेषः । सत्कर्त्तव्ये कण्वाय। त्वत्र भक्तिशब्दस्य भावप्रत्ययान्तत्वात् तस्मिन् परे विदितशब्दस्य पुंवद्भावः सुघटः । कर्म्मव्युत्पत्तभक्तिशब्दविशेषणस्यैव तद्विधेधात् ॥

(५२) वैखेति । साधयामो गच्छामः । प्रायेण खल्वन्तकः साधिर्गमेः स्थाने प्रयुक्त इति दर्शनात् ॥

(५३) राजेति । चोदय प्रेरय । पुनीमहे पवित्रीकुर्म्मः ॥

(५४) सूत इति । भूयः पुनः । भूयांश्चिरेषु बहुतरे पुनरर्थे स्वदोऽव्ययमिति मेदिनी ॥

राजा ॥ समन्ताद्वलोक्य ॥ सूत अकथितोऽपि ज्ञायत एवायमाभोग-सपोवनस्य। (५५)

सूत ॥ कथमिव। (५६)

राजा ॥ किं न पश्यति भवान्। दृढ हि। (५७)

नीवाराः शुककोटरार्भकमुखभ्रष्टास्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा-
स्तोयाधारपथाश्च वल्कलशिखा निष्यन्दरेखाङ्किताः (५८)

अपि च। (५९)

---

(५५) राज्ञेति। समन्तात् सर्वतः। अकथितोऽपि केनापि तपोवनमिदमित्यनुपदिष्टोऽपि। ज्ञायतेऽनुभूयते। आभोग परिपूर्णता। आभोग परिपूर्णतेत्यमरः। तपसे मुनिभिरास्थित वन तपोवन तस्य॥

(५६) सूत इति। कथमिव किं सूत्रमिति प्रश्नः।

(५७) राजेति। न पश्यति तपोवनधर्मानिति शेषः। हि यस्मात् दृढ घने एते एवमेवमिति श्लोकीयेनान्वयः॥

(५८) नीवारा इति। तस्या दुष्यन्तस्य अधरक्षिप्तं नीवारास्तृणधान्यानि शुकानां पक्षिविशेषाणां ये कोटरार्भका कोटरस्थशावकास्तेषां मुखेभ्यो भ्रष्टा विगलिता दृश्यन्त इति शेषः। तपस्विभिरेवानायासिकतया नीवारा उप्यन्ते। क्वचिदुपला प्रस्तरा इङ्गुद्यास्तापसतरो फलानि भिन्दन्ति इङ्गुदीफलभिदः सूच्यन्ते अनुमीयन्ते यत प्रस्निग्धास्तैलवन्तः। इङ्गुदी तापसतरुरित्युक्तेस्तपोवनानुमानम्। विश्वासोपगमादाजन्मविश्वासलाभात् मृगा अभिज्ञा विशेषमप्राप्ता यथामुखं विहरन्त्य इति यावत् गतयो येषां ते तथोक्ता सन्त शब्द रथध्वनि सहन्ते असम्भ्रम शृण्वन्ति। विश्वस्तमृगसञ्चारादपि सानुमानात् तपोवनानुमानम्। तथा तोयाधाराणां जलाशयानां पन्थानश्च वल्कलाग्र परिहितवल्कचा शिखाभाश्च निष्यन्देन जलधारया रेखाङ्किता सरेखा दृश्यन्त इति शेषः। एतेन स्नातोत्तीर्णं तापसगति र्दर्शिता। इद शार्दूलविक्रीडित नाम वृत्तम। तदुक्तम। सूर्याश्वैर्यदि सप्तभिर्मसजसास्तैः शार्दूलविक्रीडितं सन्ध्येकादशतस्त्रयस्तदनु चेद्दष्टादशाद्यौ ततः। मार्कण्डेयमुनिर्निरीक्ष्य मरुतं विरति पूर्णेन्दुं विम्बानने तद् वृत्तं प्रवदन्ति काव्यरसिका शार्दूलविक्रीडितमिति॥

(५९) अनन्तरोपपत्तिभिरित्यभिधानादन्यदपि दर्शयितुमाह अपिचेति। अन्यत्रेत्यर्थः॥

कुल्याम्भोभिः पवनचपलैः शाखिनो धौतमूल
भिन्नो रागः किशलयरुचामाजभ्रधूमोद्गमेन ।
एते चार्य्यानुपवनभुवि च्छिन्नदर्भाङ्कुरायां
नष्टाशङ्का हरिणशिशवो मन्दमन्दं चरन्ति ॥ (६०)

सूत ॥ सर्व्वमुपपन्नम् । (६१)

राजा ॥ स्तोकमन्तरं गत्वा ॥ आश्रमोपरोधो माभूत्, तदिहैव रथं स्थापय यावदवतरामि । (६२)

सूतः ॥ धृताः प्रग्रहाः, अवतरत्वायुष्मान् । (६३)

राजा ॥ व्यवतीर्य आत्मानमवलोक्य च ॥ सूत ! विनीतवेशेन प्रवेष्टव्यानि तपोवनानि तदिमानि तावद् गृह्यन्तामाभरणानि धनुश्च ॥ इति सूतस्यार्पयति ॥ (६४)

---

(६०) कुल्याम्भोभिरिति । पवनचपलै र्वायुना तरङ्गितै· कुल्यानां कृत्रिमाल्पसरिता-मम्भोभिः सलिलै: शाखिनस्तीरभूरुहा धौतमूलाः प्रक्षालितपादा भवन्तीति शेष । कुल्याल्पा कृत्रिमा सरिदित्यमर· । तथाविधजनप्रणाल्यस्तपोवन एव जलनिर्गमाय कल्पन्त इति भाव· । तथा व्याख्यस्य ऊतरविषो धूमोद्गमेन किशलयरुचां पल्लवप्रभाणां रागो रक्तिमा भिन्नो भेदं गत· । रागः क्लेशादिके रक्ते मात्सर्य्ये लोहितादिष्विति शाश्वतः । तथा एते हरिणशिशवो मृगशावकाश्च नष्टाशङ्का व्याजन्मप्राप्तप्रोढ़जनतया निर्भीकाः सन्तः छिन्नो सूचिभि· कृतो दर्भाङ्कुर· कुशाङ्कुरो यस्यां सा तथोक्तायामुपवनभुवि च्यर्य्यागस्याकं समीपे मन्दमन्दं खैरं खैरं चरन्ति । पूर्व्वत्र मृगाणामत्र तु मृगशिशूनां यथापूर्व्वगति-र्हिंसितेत्यपौनरुक्त्यम् । इदं मन्दाक्रान्ता नाम वृत्तम् । तदुक्तम् । चत्वार· प्राक् ततनु गुरवो हौ दशैकादशौ चेन्मुख्यौ वर्णौ तदनु कुकुभामोदिनि द्वादशान्त्यौ । सप्तम्यन्त्यौ युगरसहयै-र्यत्र कान्ते विरामो मन्दाक्रान्ता प्रबलकवयस्तत्र तां सङ्गिरन्ते ॥

(६१) सूत इति । उपपन्नं युक्तम् ॥

(६२) राजेति । स्तोकमल्पम् । स्तोकाल्पक्षुल्लकाः क्षणमित्यमरः । अन्तर· तपोवनाभ्यन्तरम् । आश्रमोपरोध आश्रमपीडा । यावदवतरामि अवसरप्रतीक्षं तिष्ठामीत्यर्थः ॥

(६३) सूत इति । प्रग्रहा अश्वरज्जव । वाग्डोर इति प्रसिद्धाः । तुलाकूटेऽश्वादि-रश्मौ प्रग्राह· प्रग्रहोऽपि चेत्यमर· ॥

(६४) राजेति । विनीतवेशेन सभ्यवेशेन अनुद्धतवेशेनेति यावत् । प्रवेष्टव्यानि गन्तव्यानि । आभरणानि किरीटकुण्डलादीनि । सूतस्येति सम्बन्धमात्रविवक्षायां षष्ठी ॥

सूत॰ ॥ गच्छति । (६५)

राजा ॥ यावदाश्रमवासिनः प्रत्यवेक्ष्य निवर्त्तिष्ये तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः । (६६)

सूत ॥ यथाज्ञापयत्यायुष्मान् ॥ इति निष्क्रान्तः । (६७)

राजा ॥ परिक्रम्यावलोक्य च ॥ इदमाश्रमपदं तावत् प्रविशामि । (६८)

भविष्यं प्रवेष्टकेन निमित्तं सूचयित्वा ॥ अये (६९)

शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य ।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्व्वत्र ॥ (७०)

नेपथ्ये ॥ इतो इतो पित्रसखीभ्यो । (७१)

राजा ॥ कर्णं दत्त्वा ॥ अये दक्षिणेन चूतवाटिकामालाप इव श्रूयते यावदेतत् गच्छामि । (७२) परिक्रम्यावलोक्य च ॥ अये एतास्तापस्यिकन्यकाः

---

(६५) सूत इति । गच्छति आभरणादीनीति शेषः ॥

(६६) राजेति । यावत् यावता कालेन । प्रत्यवेक्ष्य सत्तावधारणेनावलोक्य । निवर्त्तिष्ये प्रत्यागमिष्यामि । तावत् तत कालं व्याप्य । आर्द्रपृष्ठाः आर्द्राणि पृष्ठस्थवस्त्वप सारणेनोष्मापगमात् शीतलानि पृष्ठानि येषां ते तथोक्ताः ॥

(६७) सूत इति । सुगमम् ॥

(६८) राजेति । परिक्रम्य इतस्तत सञ्चर्य । आश्रमपदं आश्रमस्थानम् । पद व्यवसितित्राणस्थानलक्ष्माघिवस्तुष्वित्यमर । तावत् तदा ॥

(६९) प्रविशेति । प्रवेष्टकेन बाहुना । भुजबाहू प्रवेष्टो दोरित्यमर । निमित्त शुभलक्षण स्यन्दनमिति यावत् । निमित्त हेतुलक्षणोरित्यमर । सूचयित्वा कथयित्वा । अये इति सम्भ्रमे । अये क्रोधे विषादे च सम्भ्रमे स्मरणेऽपि चेति मेदिनी ॥

(७०) शान्तमिति । इदमाश्रमपदमाश्रमस्थानं शान्त शान्तिरसाश्रयं न त्वादिरसाश्रितमिति भाव । बाहुर्दक्षिणो भुजश्च स्फुरति स्यन्दते इह आश्रमे कुतो हेतोरस्य दक्षिणबाहुस्फुरणस्य फल स्त्रीलाभरूप स्यात् । तथोक्तमद्भुतसागरे । यामितर-भुजस्पन्दो वरस्त्रीलाभसूचक इति । सम्भावनामपि दर्शयति अथवेति । भवितव्यानामवश्य भाविनामर्थानां सर्व्वत्र द्वाराणि व्यापतनोपाया भवन्ति सन्ति । भवतिरत्रास्तिसमानार्थो न लाक्षणिक । इयमार्य्या जाति ॥

(७१) नेपथ्य इति । इत इत्यादि । इत इत प्रियसख्यौ । इत इत अस्माभिरा दिगि यौक्षाया द्विर्वचनम् । व्यागच्छतमिति शेषः ॥

(७२) राजेति । कर्णं दत्त्वा श्रोत्रं कर्णं नियोज्य । अय इति सम्भ्रमे । दक्षिणस्या

स्वप्रमाणानुरूपैः सेचनघटैर्बालपादपेभ्यः पयो दातुमित एवाभिवर्तन्ते । (७३) निरूप्य ॥ अहो मधुरमाकृतिदर्शनम् । (७४)

शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य ।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः ॥ (७५)

यावदेतान्छायामिमामाश्रित्य प्रतिपालयामि ॥ इति विलोकयन् स्थितः । (७६)

॥ ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला ॥ (७७)

एका ॥ हला सउन्तले तुमं वि तादकस्स आसमकुडुम्बअस्स पिअदरा त्ति तक्केमि, जेण णोमालिआ-कुसुम-परिपेलवा वि तुमं एदाणं आलवालपरिजरणे णिउत्ता । (७८)

दिशीति दक्षिणेन । वैनोऽपीति दक्षिणशब्दात् सप्तम्या एन । वृक्षवाटिकासमीपवनम् । धिक्समवेत्येनप्रत्ययान्तेन द्वितीया । अमात्यगणिकागेहोपवने वृक्षवाटिका इत्यमरोक्तमुपलक्षणम् । आलाप आभाषणम् । स्वादाभाषणमालाप इत्यमर । यावद्धारणे । यावत् तावच्च साकल्येऽवधौ मानेऽवधारणे इत्यमर । अत्र वृक्षवाटिका दक्षिणेन ॥

(७२) परिक्रम्येति । परिक्रम्य सञ्चर्य । दर्शनोपजातसम्भ्रमादये इति । स्वप्रमाणस्य स्वाकृतीनामल्पाल्पभावस्य अनुरूपैः योग्यैरल्पाल्प रिति यावत सेचनघटैस्तरुसेकार्थकलसैः । बालपादपेभ्य अनुद्भूतरूभ्य । इतोऽत्र । अभिवर्तन्ते आयान्ति ॥

(७४) निरूप्येति । निरूप्य सविशेषावलोकनाद् विचार्य । अहो विस्मये । अहो ही च विस्मय इत्यमर । आसां कन्यकानां दर्शनं मधुरं प्रियं । रसवत्स्वादुप्रियेषु मधुरोऽन्यवदिति विश्व ॥

(७५) शुद्धान्तेति । आश्रमवासिनो वनवासिनो जनस्य इदं वपु शरीरं यदि शुद्धान्तेषु नृपाणामन्तःपुरेषु, दुर्लभं दुर्लभोपमम । अदृष्टपूर्त्वादीदृगुरूपमेति भाव । क्षत्रागार भूभुजामन्तःपुरं स्यादवरोधनम् । शुद्धान्तश्चावरोधश्चेत्यमर । तदा खलु तस्य सेव उद्यानस्य नृपोपवनस्य लता शतशो वर्णिता इति भाव । पुमानाक्रीड उद्यानं राज्ञ साधारण्य वनमित्यमर । वनलताभिरयम्भूताभि गुणैः ...सौन्दर्यादिभि दूरीकृता पराजिता । अत्र निर्दर्शनालङ्कार । लक्षणन्तु वक्ष्यते । इयमार्या ॥

(७६) यावदिति । एतास्तपस्विकन्यका । प्रतिपालयामि प्रतीक्षे ॥

(७७) तत इति । ततस्तस्मात् परम । यथोक्तव्यापारा सेचनघट यद्वत्ती ॥

(७८) एकेति । एका शकुन्तलाया इति शेष । हलेत्यादि । अयि शकुन्तले

शकु॥ हला अणसूए ण केवलं सादस्स णिओओ ममम्हि एदेसुं सहोअरसिणेहो॥ इति हस्तेनेत्रं नाटयति। (७९)

द्वितीया॥ सहि सउन्तले उदअं लम्भिदा एदे गिम्हमालवुसुम-दाइणो अम्हमइक्कमा। दाणिं अदिअन्तकुसुमसमए वि रुक्खके सिञ्चम्ह, तेन अणभिसन्धिगुरुओ धम्मो भविस्सदि। (८०)

शकु॥ हला पिअम्वदे रमणिज्जं मन्तेसि॥ इति भूयो हस्तनेत्रं नाटयति। (८१)

राजा॥ निर्व्वर्ण्य चात्मगतम्॥ कथमियं सा कण्वदुहिता शकुन्तला।(८२)

त्वत्तोऽपि तातकण्वस्य चाश्रमवृक्षा प्रियतरा इति तर्कयामि येन नवमालिकाकुसुम परिपेलवापि त्वम् एतेषामालवालपरिपूरणे नियुक्ता। त्वत्तः इति युष्मच्छब्दात पञ्चम्यास्तसु एकत्वाय षष्ठ्यात् त्वदादेश। त्वामपेक्ष्येत्यर्थः। येन तातकण्वेन। नवेति। नवमालिकाया नवमल्लिकाया कुसुमवत परिपेलवापि सुकुमारापि। पेलव कोमलमिति त्रिकाण्डशेषः। एतेषा पादपानाम्। आलवालाना मूलगतपरिखाणाम्। परिपूरणे तोयैरिति शेषः। हण्डे हञ्जे हलाह्वान नीच चेटीं सखीं प्रतीति नाद्योक्तावमर॥

(७९) शकु इति। हलेत्यादि अयि अनसूये न केवल तातस्य नियोगो ममाप्येतेषु सहोदरस्नेह। नियोग आदेश सेकप्रवर्त्तक इति शेषः। एतेषु पादपेषु मम एकतो वनगर्भसम्भूततया सहोदरवत् स्नेहोऽपि सेकप्रवर्त्तक। नाटयति नाट्येन दर्शयति॥

(८०) द्वितीयेति। द्वितीया सखीत्यर्थः। सहीत्यादि। सखि शकुन्तले उदक लम्भिता एते योग्यकालकुसुमदायिन आम्रमवृक्षा इदानीमतिक्रान्तकुसुमसमयानपि वृक्षान् सिञ्चामस्तेन अनभिसन्धिगुरुको धर्म्मो भविष्यति। लम्भिता प्रापिता। अतीति। अति क्रान्तोऽतिवाहित कुसुमाना पुष्पाणा समयो यैस्तान्। तेन सेकेन। अनभिसन्धिगुरुक अनभिसन्धिना प्रयोजनोद्देशाभावेन गुरु महान। गुरु महति चान्यार्थदिति विश्व। धर्म्म श्रेय। यदाह हारीत। यच्च सोपध ददाति अन्यस्मावितमल्पफलमिति। सोपध प्रतिलाभेच्छया दत्तम्। तथाच नारद। पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम्। केवल धर्म्म बुद्धया तु धर्म्मदान तदुच्यत इति॥

(८१) शकु इति। हलेत्यादि। अयि प्रियवदे रमणीय मन्त्रयसे। रमणीयमिति क्रियाविशेषण। यन्त्रयसे कार्य्यमवधारयसि। भूय पुन॥

(८२) राजेति। निर्व्वर्ण्य निरीक्ष्य। निर्व्वर्ण्य नन्तु निर्ध्यान दर्शनालोकनेक्षण निमात्यर। आत्मगतमनतिप्रेष्यम्। सा तापसाभ्यमभिहित्व॥

सविस्मयम् ॥ अहो अस्मादृशीं खलु भगवान् कण्वः । य इमामात्मधर्मे नियुङ्क्ते । (८३)

इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति ॥(८४)

भवतु । पादपान्तरित एव विश्रब्धा तावदेनां पश्यामि ॥ इति तथा करोति ॥ (८५)

शकु ॥ हला अनसूए जदिपिअङ्गेण वक्कलेण पिअम्वदाए दढ पीडिदाम्हि ता सिढिलेहि दाव णं । (८६)

---

(८३) सविस्मयमिति । भगवान् माहात्म्यवान् । भग श्रीकाममाहात्म्यवीर्य-यत्नार्ककीर्त्तिष्वित्यमर । कण्वो मुनिरसाधुदर्शी चारुतादेषी यद्यवा वार्द्धक्यात् साधु शुद्धं न पश्यतीति यसाधुदर्शी । य कण्व इमा रमणीयाकृतिं बाला आश्रमधर्मे तापस-व्रते नियुङ्क्ते प्रेरयति ॥

(८४) इदमिति । अव्याजेन छद्मना विना चक्षुषेनेति यावत् मनो हरतीति अव्याज मनोहरमकृत्रिमशोभासम्पन्नमिति यावत् । कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे इत्यमर । इदं वपु शरीरं कर्म तपःक्षम तपःक्लेश साधयितुं सम्पादयितुं य ऋषिरिच्छति वाञ्छति । स ध्रुव निश्चितम् । ध्रुवो भमेदे स्तोवन्तु निश्चिते शाश्वते त्रिष्वित्यमर । नीलो-त्पलपत्रस्य इन्दीवरदलस्य धारया निशितसुखेन । खड्गादीनाञ्च निशितमुखे धारा प्रकीर्त्यत इति विश्व । शमीलता शमीशाखाम् । शमे शाखालते इत्यमर । यद्वा लताकारा शमीं छेत्तुं व्यवस्यति निश्चिनोति । अत्र तादृशवपुषा तपःक्षमसाधनेच्छा नीलोत्पलपत्रधारया शमीलताच्छेदनेच्छेवेति बिम्बप्रतिबिम्बभावपर्य्यवसानात् निदर्शनालङ्कार । सा चात्र सम्भ-वद्वस्तुसम्बन्धनिबन्धना । तदुक्तं दर्पणे । सम्भवद् वस्तुसम्बन्धोऽसम्भवद् यापि कुत्रचित् । यत्र बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शनेति । इदं व शस्यविल नाम वृत्तं । तदुक्तम् । उपेन्द्रवज्राचरणेषु सन्ति चेदुपान्तवर्णा लघव क्रमात् यदि । सदोक्षसद्भूजितकामकार्मुके वदन्ति व शस्यविल बुधास्तदेति । उपेन्द्रवज्रा प्रदर्शनीया ॥

(८५) भवतिति । पादपान्तरितस्तरुव्यवहितावयव । विश्रब्धा मदर्थमाशङ्क-र्जनत्वेन प्रत्ययवती । येन निरवद्येव विश्रम्भकथालाप श्रोष्यामीति भाव ॥

(८६) शकु इति । हलेसप्रादि । यदि अनसूये यतिपिनद्धेन वल्कलेन प्रियवदया इदं पीडितास्मि तत् शिथिलय तावदेनम । प्रियवदया यतिपिनद्धेन यतिबद्धेन वल्कलेन इदं बलवत् पीडितास्मि पीडा लब्धास्मि । तत् तस्मात् एन वल्कल शिथिलं कुरु । ते तपोध्याने शिथिलि भ्रि ॥

अन ॥ मिथिलयति । (८७)

प्रिय ॥ अहास ॥ एत्य दाव पओहरविथारहेतुअं अत्तणो जोव्वणा-रम्भं उवालहस्सु । (८८)

राजा ॥ सम्यगियमाह । (८९)

इदमुपचितस्थूलग्रन्थिना स्कन्धदेशे
चिरपरिणाहच्छादिना वल्कलेन ।
वपुरभिनवमस्या: पुष्यति स्वां न शोभां
कुसुममिव पिनद्धं पाण्डुपत्रोदरेण ॥ (९०)

अथवा काममननुरूपमप्यस्या वपुषो वल्कलं न पुनरलङ्कारश्रियं न पुष्यति । कुतः । (९१)

---

(८७) अनेति । सुगमम् ॥

(८८) प्रियमिति । एत्येति । अत्र तावत पयोधरविस्तारहेतुकमात्मनो यौवनारम्भ मुपालभस्व । अत्र बन्धनस्य दृढीभावे पयोधरयो स्तनयो र्विस्तारहेतु दृष्टिहेतुमात्मनो यौवनारम्भ यौवनोपक्रममुपालभस्व दुर्व्वचनीयता प्रापय । दुर्व्वाद स्वादुपालम्भ इति जटाधर ॥

(८९) राजेति । सम्यक् सत्यम । सत्र तथाभूत सम्यगितरमर । इय प्रिय वदा । अभिनवयौवनैवेयमिति भाव ॥

(९०) ननु प्रिय वदावचनादिदानीमेवास्या यौवनानुभवो जायते कथ स खत एव प्राङ्नासीदित्यत आह इदमिति । स्कन्धदेशे उपचितो दत्त स्थूलसन्धि र्यस्य स तेन । तथा स्तनयुगस्य य परिणाहो विशालता । परिणाहो विशालतेत्यमर । तदाच्छादिना वल्कलेन तत्तद्विधे यत्नचा हेतुना अस्या शकुन्तलाया इदमभिनव नवीन वपु शरीर पाण्डु पत्राणा परिणतदलानामुदरेण गर्भेण पिनद्ध बद्धम् अतस्यग् दृष्टमिति यावत् । कुसुम पुष्पमिव स्वाभाविकीयाम् । स्व तिष्वाभीय इत्यमर । शोभा कान्ति न पुष्यति न बिभर्त्ति । तथाच वल्कलाच्छन्नदेहतया न दृष्टिमात्रेणैव सारूप्यानुभव प्रागासीत् प्रिय वदोक्तेस्तु विशेषाभिनिवेशात् सम्यगवगम्यत इति भाव । अत्रोपमालङ्कार । यदुक्त चन्द्रालोके । उपमा यत्र साद्दश्यलक्ष्मीरुल्लसति द्वयोरिति । इद मालिनीवृत्तम् ॥

(९१) यौवनादृष्टमानसतया जनितानुराग पुन र्वल्कलेनैवास्या शोभा समर्थ्यते अपुष्यतीति । अस्या शकुन्तलाया वपुष शरीरस्य । अननुरूपमयोग्यमपि वल्कल पुनरल

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥ (८२)[1]

अपिच । (८३)

कठिनमपि शकुन्तावल्कलं कान्तरूपं
न मनसि रुचिभङ्गं स्वल्पमप्यादधाति ।
विकचसरसिजायाः शोकनिर्मुक्तकण्ठं
निशमिव कमलिन्याः कर्कशं रुन्तशालम् ॥ (८४)

चकु ॥ व्यपतोऽमलोक्य ॥ सहीओ एस वादेरिदपल्लवाङ्गुलीहिं किम्पि वाहरेदि विअ मं चूअरुक्खओ ता जाव णं सम्भावेमि ॥ इति तथा करोति । (९५)

प्रिय ॥ हला सउन्तले मुहुत्तअं चिट्ठ । (९६)

चकु ॥ किं णिमित्तं । (९७)

प्रिय ॥ तए समीवट्ठिदाए लदासनाधो विअ अअं चूअरुक्खओ पडिहादि (९८)

चकु ॥ अदो ज्जेव्व तुमं पिअम्वद त्ति भणीअसि । (९९)

राजा ॥ अवितथमाह प्रियंवदा । तथा ह्यस्याः । (१००)

निर्मुक्तस्यक्तस योगे मुक्तकञ्चुकभोगिनीति मेदिनी । निजं स्वीयम । स्वके नित्ये निज त्रिष्विलमर । कर्कंग कठिन दृन्नजानु दृन्नसमूह इव । जाल समूह व्यानाय इलमर । मनसि स्वल्प किञ्चिदपि क्षणिमङ्गमनुरागयति नादधाति न जनयति । व्यतीपमालङ्कार ॥

(९५) चकु इति । व्यपत पुरत । स्यात् पुर पुरतोऽग्रत इत्यमर । सहीओ इतत्रादि । सख्यो एष वातेरितपल्लवाङ्गुलीभि किमपि व्याहरतीव मा चूतवृक्ष । तद यावदेन सम्भावयामि । वातेति । वातेन वायुना ईरिता कम्पिता पल्लव एवाङ्गुलस्ताभि । ईड्ल कम्पगत्योरिति कविकल्पद्रुम । व्याहरतीव वक्तीव। व्याहार उक्तिरित्यमर । तत् तस्मात् । यावदवधारणार्थं । सम्भावयामि बहु मन्ये । तथा करोति बहुमान करोति ॥

(९६) प्रियमिति । इमेतत्रादि। त्वयि चकुनले इहैव मुहूर्त्तं तिष्ठ । मुहूर्त्तं कञ्चित् कालम ॥

(९७) चकु इति । किं णिमित्त । किं निमित्त किमर्थं तिष्ठामीतत्रर्थं ॥

(९८) प्रियमिति । तए इतत्रादि । त्वया समीपस्थितया लतासनाथ इव त्वय चूत इच्च प्रतिभाति । लतासनाथो लतायुक्त । सनाथशब्दो युक्तार्थेऽन्यत्रापि श्रूयते । यथा वासवदत्तायाम । उत्फुल्लकमलसनाथमिव गगनतल कुर्वंता इति तथा नरवाहनदत्त इव प्रियङ्गुश्यामासनाथ इतत्रादि । प्रतिभाति प्रकाशते ॥

(९९) चकु इति । अदो इतत्रादि । अतएव प्रिय वदेति भण्यसे । भण्यसे लोकै रभिधीयसे ॥

(१००) राजेति । अवितथ सतत्रम । वितथ त्वष्टत वच इतत्रमर । तदेवोप

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू ।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥ (१०१)

अन ॥ हला सउन्तले इयं सअम्बरबहू सहआरस्स तुए किदणामहेआ वणदोसिणी त्ति णोमालिआ णं विसुमरिदासि । (१०२)

शकु ॥ तदो अक्खाणम्मि विसुमरिस्सं । (१०३) लतामुपेत्य अवलोक्य च ॥

हला रमणीओ क्खु कालो इमस्स पादवमिहुणस्स रदिअरो सम्वुत्तो जेण णवकुसुमजोव्वणा णोमालिआ अअं पि वहुफलदाए उच्चभोअक्खमो सहआरो ॥ इति पश्यन्ती तिष्ठति । (१०४)

पादयितुमाह तथा हीति । हि यस्माद् अया शकुन्तलायास्तथा लताया इव । अनन्तर लौकीयवाक्यान्वय ॥

(१०१) अधर इति । अधरो दन्तच्छद किसलयवत् पल्लववत् रागो लौहित्य यस्य स तथोक्त । पल्लवोऽस्त्री किसलयमित्यमर । तथा बाहू कोमलविटपयो सुकुमारशाखयो अनुकारिणौ सदृशौ । विटपो न स्त्रियां स्तम्बगाछादिस्तारपल्लव इति मेदिनी । तथा लोभनीय यौवन कुसुममिवाङ्गेषु सदृश सन्नद्धम् । अत्रोपमालङ्कार । सदृशा दृष्टिरना । यथाकथञ्चित सादृश्य यत्रोद्भूत प्रतीयते । उपमा नाम सेति । आर्या जातिरियम ॥

(१०२) अनेति । हलेत्यादि । अयि शकुन्तले इयं सअम्बरबधू सहकारस्य त्वया लतानामधेया वनतोषिणीति नवमालिका एनां विस्मृतासि । सहकारस्यातिसौरभरसालस्य । रसालोऽस्त्री सहकारोऽतिसौरभ इत्यमर । सअम्बरबधू स्वयलताख्येयं पत्नीव । बधू स्नुषानवोढ्स्त्रीभार्यापृक्काङ्गनासु चेति विश्व । त्वया वनतोषिणीति लत नामधेय नाम यस्या सा इय नवमालिका नवमल्लिका । एना नवमालिकाम् । विस्मृतासि स्मार्थे-त्वाद् वर्त्तमाने क्त । अत्र हष्टो देव इतिवत् क्वचिदन्यतोपि कर्त्तरि क्तो वक्तव्य । यद्वा विसुमरिदेति प्राकृतत्वाद् वर्णव्यत्यय सो न दोषाय संस्कृतेन तु विस्मरसीति व्याख्यातव्यम् ॥

(१०३) तद इति । तदो इत्यादि । तदाऽऽख्यामपि विस्मरिष्यामि । तदा यदि वनतोषिणीं विस्मरिष्यामीत्ययं ॥

(१०४) लतामिति । लता वनतोषिणीम् । उपेत्य उपगम्य । हलेत्यादि । अयि अनसूये इमणीय खलु कालोऽस्य पादपमिथुनस्य रतिकर सदृश । येन हेतुना नवकुसुमयौवना नवमालिका अयमपि बहुफलतया उपभोगक्षम सहकार । अत्र पादपशब्द पादेन वृक्षेण पिबति रसमाकर्षतीति व्युत्पत्त्या इक्षवतासाधारण्या योगिको यत्र योगरूढ

प्रिय॥ श्रवितम्॥ अणसूए जाणासि किणिमित्तं सउन्तला वण-दोसिणी अतिमेत्तं पेक्खदि त्ति। (१०५)

अन॥ ण क्खु विभावेमि ता कधेहि मे। (१०६)

प्रिय॥ जइ वणदोसिणी अणुरूवेण पादवेण सङ्गदा तह अहम्पि अत्तणो अणुरूवं वरं लभेय्य त्ति। (१०७)

अङ्क॥ एस दे अत्तणो चिन्तगदो मणोरहो। इति कलसमावर्ज्जयति॥(१०८)

सरूपर। अस्य पादपमिथुनस्य पादपयुगलस्य पादपदम्पत्योरित्यपि व्यज्यते। मिथुनं दम्पती युगे इति विश्व। रमणीयो मनोरमो रतिकरो लोकानामनुरागकर पक्षे सुरतकर काल सहज्ञ सम्भूत। रति स्त्री प्यरदारेषु रागे सुरतयुग्मयोरिति मेदिनी। येन हेतुना इव नवमालिका नव कुसुम पुष्प पक्षे रजो यत्र तत् नवकुसुमम्। कुसुम पुष्पफलयो स्त्रीरजोनेत्ररोगयोरिति विश्व। तथाभूत यौवन वय स्वभावो यस्या सा तथोक्ता। तथा वय सङ्कारोऽपि वृक्षकत्वतया फलपूर्णतया च भोग्ये तस्य फलवत्त्वसम्भवात्। पक्षे वक्षत्वाभतया। फल जातीफले गुणे हेतुत्वे स्त्रष्टिलाभयोरिति मेदिनी। उपभोग क्षमो लोकोपभोगयोग्य-। पक्षे योषिद्भरण्यक्त। भोग सुखे स्वग्रादिस्पृतावहेय फण कायरोरित्यमर। यत्र प्रस्तुते पादपयुग्मे श्लिष्टविशेषणादिभिरप्रस्तुतस्य दम्पतिभावस्य व्यवहारारोपणात् समासोक्तिरलङ्कार। यदुक्त दर्पणे। समासोक्ति समै यत्र कार्य लिङ्ग विशेषणै। व्यवहारसमारोप प्रस्तुतेऽन्यस्य वस्तुन इति॥

(१०५) प्रियमिति। सस्मित स्मित सस्मेत्यर्थ। अणेत्यादि। अनसूये जानासि किं निमित्त शकुन्तला वनतोषिणीमतिमात्र प्रेक्षत इति। अतिमात्रमत्यर्थम्। प्रेक्षते पश्यति॥

(१०६) अणेति। णेत्यादि। न खलु विभावयामि तत कथय मे। विभावयामि अनुभवामि। मे इति सम्बन्धमात्रविवक्षाया षष्ठी॥

(१०७) प्रियमिति। जइत्यादि। यथा वनतोषिणी अनुरूपेण पादपेन सङ्गता तथाहमपि आत्मनोऽनुरूप वर लभेयेति। सङ्गता कृतसङ्गमा। अनुरूप रूपस्य योग्य। वर वरणीय जन। इतिनिमित्तमिति पूर्ववाक्येनान्वय॥

(१०८) अङ्क इति। एस इत्यादि। एष ते आत्मनश्चित्तगतो मनोरथ। चित्तगतो मनोगत। मनोरथोऽभिलाष। मनोरथ कामोऽभिलाष इत्यमर। स्वमेव तथा लब्धु मिच्छसीति भाव। आवर्जयति सूचयति। एस दे अत्तगदो मणोरहो इत्यन्यत्र पाठ। एष ते आत्मगतो मनोरथ इत्यर्थ॥

अन ॥ हला सउन्तले इअ तादकण्वेण तुम विअ सहत्थेण सम्वड्ढिदा माहवीलदा ता कध इमं विसुमरिदासि । (१०९)

अणु ॥ तदो अत्ताणम्पि विसुमरिस्सं । (११०)

लतामुपेत्यावलोक्य च सहर्षम् ॥ अम्मरीअ अम्मरीअं पिअम्वदे पिअ ं दे णिवेदेमि । (१११)

प्रिय ॥ • सच्चि किं मे पिअं । (११२)

अणु ॥ असमए क्खु एसा आमूलादो मुउलिदा माहवीलदा । (११३)

उभे ॥ सत्वरमुपगम्य ॥ सच्चि सच्चं सच्चं । (११४)

अणु ॥ सच्च किं ण पेक्खध । (११५)

प्रिय । सहर्षं निरूप्य ॥ सच्चि तेण हि पंडिप्पिअ दे णिवेदेमि । (११६)

---

(१०९) अणेति । हलेत्यादि । अयि शकुन्तले इय तातकण्वेन त्वमिव स्वहस्तेन संवर्द्धिता माधवीलता सत् कथमिमां विस्मरिष्यामि । त्वमिव यथा त्व स्वहस्तेन संवर्द्धिता तथेय माधवीत्यर्थ । सदित्यादि प्रश्न ॥

(११०) अणु इति । तदो इत्यादि । तदात्मानमपि विस्मरिष्यामि । आत्मनश्च कथ मपीय विस्मरणीयेत्युत्तराभिप्राय ॥

(१११) लतामिति । अम्मरीअमित्यादि । आर्यपुत्र माश्रयम । प्रियम्वदे प्रिय ते निवेदयामि । प्रियमाशुविधेयम् । निवेदयामि विज्ञापयामि ॥

(११२) प्रियमिति । सच्चीत्यादि । सच्चि किं मे प्रियम । सुगमम ॥

(११३) अणु इति । असमए इत्यादि । असमये खलु एषा आमूलात् मुकुलिता माधवी लता । असमये असन्निधाने खीत्व इति यावत् । वामनी माधवीलतेत्यमर । आमूलात् मूलमवधीकृत्य । आङ्मर्यादाभिविध्योरिति नियमात् तद योगादन्यारभ्य तद्योग पञ्चमी । मुकुलो जातोऽस्या इति मुकुलिता । इदमेव प्रियमित्युत्तरा भिप्राय ॥

(११४) उभे इति । उपगम्य लतामिति शेष । सच्चीत्यादि । सच्चि सत्य सत्य । एतत् किं सत्यमिति भाव ॥

(११५) अणु इति । सच्चमित्यादि । सत्य किं न प्रेक्षेथे । यद्यन्यापदि कथ मसावसौ मुच्यत इति भाव ॥

(११६) प्रियमिति । निरूप्य विचार्य । सच्चीत्यादि । सच्चि तेन हि प्रतिप्रिय

चतु ॥ किं मे पडिप्पिअं । (११७)

प्रिय ॥ आसण्णपाणिग्गहणासि तुमं । (११८)

चतु ॥ सास्रयमिव ॥ एस दे अत्तणो चित्तगदो मणोरहो ता ण दे वत्तुण सुणिस्सं । (११९)

प्रिय ॥ सहि ण क्खु परिहासेण भणामि सुदं मए तादकण्णस्स मुहादो तुह कल्लाणसूअअं एद णिमित्त त्ति । (१२०)

अन ॥ हला पिअम्वदे अदोज्जेव सहिणेहा सउन्तला माहवीलदां सिञ्चदि । (१२१)

चतु ॥ जदो वहिणी मे भोदि तदो किं त्ति ण सिञ्चेमि ॥ इति कलसमावेष्टयति ॥ (१२२)

राजा ॥ अपि नाम कुलपतेरियमसवर्णक्षेत्रसम्भवा भवेत् । अथवा कृतं सन्देहेन । (१२३)

ते निवेदयामि । तेन हि तेनैव आकालिकपुष्पोद्गमेन हेतुना । हि हेताववधारणे वा । मर । प्रतिप्रियमेतत्प्रतिरूपं प्रियम ॥

(११७) चतु इति । किमित्यादि । किं मे प्रतिप्रियम । सुगमम् ॥

(११८) प्रियमिति । आसन्नेत्यादि । आसन्नपाणिग्रहणासि त्वम् । आसन्नं निकटमविरभावीति यावत पाणिग्रहण विवाहो यस्या सासि त्वम ॥

(११९) चतु इति । सास्रयमिव प्रिय वदायां दोषारोपच्छेन सहेव । एस इत्यादि । एष ते आत्मनश्चित्तगतो मनोरथ तत्र ते वचन श्रोष्यामि । सुगमम् ॥

(१२०) प्रियमिति । सहीत्यादि । सखि न खलु परिहासेन भणामि श्रुत मया तातकण्वस्य मुखात तव कल्याणसूचकमिद निमित्तमिति । परिहासेन नर्म्मवाक्येन । सुखादिति निःसृतमिति शेष । घनाद् विद्योतते विद्युदितिवत् । कल्याणसूचक कल्याणस्य मङ्गलस्य परिचायकेति यावत सूचकमनुमापक । इद निमित्त साध्या अकालफुल्लनम । इति श्रुतमित्यनेनान्वितम ॥

(१२१) अनेति । हलेत्यादि । अयि प्रिय वदे अतएव सस्नेहा शकुन्तला माधवी लता सिञ्चति । अतएव अस्या मङ्गलसूचकत्वादेव । सस्नेहा सप्रणया सतीत्यर्थ ॥

(१२२) शकु इति । जदो इत्यादि । यतो भगिनी मे भवति तत किमिति न सिञ्चामि । भगिनी एकतातस्य वर्द्धितत्वादिति भाव । किमिति किंनिमित्तम ॥

(१२३) राजेति । अपि मन्ये । नाम सम्भावनाया । नाम प्राकाश्यसम्भाव्य

असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः ।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ॥ (१२४)
तथापि तत्त्वत एवैनामुपलप्स्ये । (१२५)

शकु ॥ सम्भ्रमम् ॥ अम्म सलिलसेअसम्मसुग्गदो णोमालिअं छड्डिअ वअणं मे मऊअरो अहिवट्टदि ॥ इति भ्रमरबाधां नाटयति । (१२६)

क्रोधोपगमकुत्सने इतश्चमर । कुलपुत्रे कण्वस्य । इयं शकुन्तला । क्षत्रवर्णं विप्रजातीतरत् यत् क्षत्र पत्नी तत्सम्भवा तद्गर्भं सम्भवा । क्षेत्र पत्नी शरीरशोणितश्चमर । क्षत्रायत्तमाश्रय । तदानीमासीद् विप्राणा चातुर्व्वर्ण्यं परिणयाधिकार । राजन्यानान्तु शूद्रान्तवर्णं त्रितयोपयमे । यदाह मनु । शूद्रैव भार्या शूद्रस्य सा च स्वा च विश स्मृते । ते च स्वा चैव राज्ञस्तु ताश्च स्वा चाप्रजन्मन इति । तथाचास्या सवर्णासम्भवत्वे जातया ब्राह्मणीत्येन परिणयपरीहार स्यात् क्षत्रियादिसम्भवत्वे तु पुत्रा येऽनन्तरस्त्रीजा क्रमेणोक्ता हि जन्मनाम । तासनन्तरनाम्नस्तु मातृदोषात् प्रचक्षत इति मनुवचनान्तरात् जातया क्षत्रियादित्वेन सिद्धत्यूह स्यादस्या परिणय इति । क्षणात् तदेव निश्चिनोति व्यवस्यतीति । क्षणमन्तम् । क्षत युगेऽन्तमर्थे चेति मेदिनी ॥

(१२४) अस संशयमिति । अस संशय निश्चित क्षत्रस्य क्षत्रियस्य परिग्रहक्षमा स्वीकारयोग्या पूर्ववाक्यस्थेन इदमितानेनान्वय । द्विजातिर्हि रूप क्षत्र क्षत्रिय इति त्रिकाण्डशेष । हेतुमाह यत् यस्मात् आर्य्य प्रमाणमप्रच्यवितपूर्व्वत्वेनातिमहत् मे मन अस्या कन्यकायामभिलाषि सस्पृहम् अत इतश्चार्थ । मन प्रवृत्ते निश्चायकत्व समर्थयति सतामित्यादि । हि यस्मात् सन्देहपदेषु संशयास्पदेषु वस्तुषु पदार्थेषु सर्वा सततबैधाधारिणामन्त करणस्य मनस प्रवृत्तयो गतय प्रमाण निश्चायिका । उक्त मनोबुद्धि रहङ्कारश्चित्त करणमान्तरमिति । प्रमाण नितान्तमर्य्यादागाह्येषु सतामादिनि । इयत्ता-यान्तु हेतौ च स्त्रीत्वैकत्वे प्रमातरीति मेदिनी । अत्र सामान्येन विशेषसमर्थनादर्थान्तर-न्यासोऽलङ्कार । उद्द व गस्त्वविल नाम वृत्तम् ॥

(१२५) तथेति । तथापि अनुमानसिद्धेऽपि । तत्त्वतो यथार्थत । उपलप्स्ये ज्ञास्यामि ॥

(१२६) शकु इति । सशम्भ्रममाप्तव्यवभावम । अम्मेत्यादि । अम्म सलिलसेक-सम्भ्रमोद्गतो नवमालिकामुज्झित्वा वदन मे मधुकरोऽभिवर्त्तते । अम्मेति विस्मये । विस्मये ऽनघे अम्म नितम्ब स्त्रीभि प्रयुज्यत इति भरत । सलिलसेकेन जलसेकेन य सम्भ्रमस्त्वरा । सम्भ्रमत्वरेतमर । तेनोद्गतो भ्रमरो नवमालिकामुज्झित्वा यत्रस्थ मे मम वदन अभि

राजा ॥ सम्यूह विलोक्य ॥ साधु बाधनमपि रमणीयमस्याः ।(१२७)

यतो यतः षट्चरणोऽभिवर्त्तते ततस्तत. प्रेरितवामलोचना ।
विवर्त्तितभ्रूरियमद्य शिक्षते भयादकामापि हि दृष्टिविभ्रमम् ॥ (१२८)

अपिच ॥ साकूयमिव । (१२९)

चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः ।
करं व्याधुन्वत्याः पिबसि रतिसर्व्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर कृतास्त्वं खलु कृती ॥ (१३०)

स्तच्योक्तत्र वर्त्तते । धिकसमेतत्रादिना चिह्नार्थे नाभिना द्वितीया । यथोक्त वीप्सेत्यभाव-चिह्नेऽभिस्तेषु भागे परिप्रती । चतुरस्तेषु सहार्थे च होनेऽनूपौ मतावितेति । भ्रमरबाधा भ्रमरजनितदुःखम् । पीडा बाधा व्यथा दुःखमित्रमर ॥

(१२७) राजेति । सम्यूह साकाङ्क्षम । साधु प्रलष्टम् । अस्या यत्कुन्तलाया बाधन भ्रमरपीडनमपि रमणीय मनोज्ञम् ॥

(१२८) पूर्व्वोक्तमुपपादयितु श्लोकेन हेतुमाह यत इति । हि यस्मात् यतो यतो यस्यां यस्या दिशि षट चरण षट्पद अभिवर्त्तते गच्छति ततस्ततस्तस्या तस्या दिशि प्रेरिते भ्रमिते वामे मञ्जुले नयने यस्या सा तथोक्ता । वामो वल्गुप्रतीपयोरित्रमर । तथा विवर्त्तिते साचीकृते भ्रुवौ यया सा तथोक्ता इय यत्कुन्तला अकामा अचिकीर्षमाणापि भयात् दृष्टि-विभ्रम दृष्टे विकार यद्वा दृष्टौ चित्तवृत्तिनवस्थान शिक्षते अभ्यस्यतीव । चित्तवृत्तिनव-स्थान दृष्टिविकारात् विभ्रमो भवेदिति । अत्रोत्प्रेक्षाव्यञ्जकेवादिशब्दविरहात् प्रतीयमानो त्प्रेक्षा । यदुक्त दर्पणे । भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना । वाच्या प्रतीयमाना सा प्रथम द्विविधा मता । वाच्येवादिप्रयोगे स्याद्प्रयोगेऽपरा पुनरिति । इद्द मयस्विलं नाम वृत्तम् ॥

(१२९) अपिचेति । अपरश्चेत्यर्थ । साकूयमसूयया साक्षिताभिव ॥

(१३०) चलेति । हे मधुकर कर पाणि व्याधुन्वत्याः धावयन्त्या यत्कुन्तलाया वेपथुमतीं सकम्पां तथा चलो लोलो अपाङ्गो अन्तभागो यस्या सा ताम् । अपाङ्गौ नेत्रयो रन्तावित्रमर । दृष्टि इव बहुशो वार वार स्पृशसि । तथा रहसि मम रहस्य गोप्य साधत्ते इति रहस्याख्यायी स इव कर्णान्तिकचर कर्णाभ्यर्णगत सन् मृदु अव्यक्ते यथा स्यात् तथा स्वनसि शब्दायसे । तथा रते इतस्य व्यक्ते सर्व्वस्व समग्रमस्मिन्निति तादृ

अपिच । (१२१)

लोलां दृष्टिमितस्ततो वितनुते सभ्रूलताविभ्रमा-
माभुग्नेन विवर्त्तिता बलिमता मध्येन कम्रस्तनी ।
हस्ताग्रं विधुनोति पल्लवनिभं गीत्कारभिन्नाधरा
जातेयं भ्रमराभिलङ्घनभिया वाद्ये विना नर्त्तकी ॥ (१२२)

शक्र ॥ हला परित्तायध परित्तायध मं दूमिणा दुट्ठमञ्जरेण अहिहूअमाणं । (१२३)

उभे ॥ अस्मितम् । का अम्हो परित्ताणे एत्थ दाव दुस्सन्तं आणन्द जदो राअरक्खिदाइं तवोवणाइं । (१२४)

तत्राज्यत्वेनातियाज्यनीयमिति यावत । अधर पिबसि । मत्त्वम्य इयमस्माभि परिणेया न वेत्यत्र दुष्यापार्थं य व्यवेयात मार्गणात मय हृता मनोहृता विफलप्रयत्ना जाता इति यावत । मनोहृत प्रतिहृत प्रतिबद्धो हृतस्य य इत्यमर इति केचित् तट्टीकाकृत । स्व खलु त्वमेव हृतो निपुण । व्यपिशेषणस्याधद इति वक्तव्याद् वयमितीत्यपि सङ्-गच्छनम् । इद विष्कम्भिरिष्यो नाम षष्ठम ॥

(१२१) अपीति । अपिच व्यन्यसाहेत्यर्थ ॥

(१२२) लोलामिति । कम्रौ कान्तौ स्तनौ यया सा कम्रस्तनी शकुन्तला । हि सदीमेति क्रमे कर्त्तरि र । भ्रूलताया विभ्रमेण कौटिल्येन भङ्गिता लोला चञ्चला दृष्टिमितस्तत आर्द्रोष्ठ पार्श्वेषु वितनुते विस्तारयति । या पुनर्भुग्नेन कौटिल्येन बलिमता बलिभ्यकुलटाङ्गलहृता मध्येन मध्यावयवेन विवर्त्तिता स्फीकृता सघा गीत्कारेण गीदिन्नि शब्देन भिन्नो विच्छिन्नो अधरो यया सा तथोक्ता च सती पल्लवनिभ पल्लवोपमम । हस्ताग्र पाणि विधुनोति कम्पयति । अत इय भ्रमरेणाभिलङ्घनमादभिभवाद् भिया भयेन वाद्ये विना नर्त्तकी जातेव जाता स इत्था । यतो भिक्षिता एव साध्यधर्मा दृश्यन्ते न तु नर्त्तक्य वाद्यानीति भाव । अत्र नर्त्तकीधर्म्मोष्यानुपादानाद् तुल्ययोगिताऽलङ्कार । यदुक्त चन्द्रालोके । वर्ण्यो-नामितरेषां वा धर्म्मैक्य तुल्ययोगितेति । इद वार्द्धभ्रकौटिल्य नाम हृत्तम् ॥

(१२३) शक्र इति । कृष्णेत्यादि । व्यपि परित्रायेथा परित्रायेथां मां त्वमेव दुष्टमधु-करेणाभिभूयमानाम् । परित्रायेथां इत्योकृतम् । त्वमिभूयमानामाकुलीक्रियमाणाम् ॥

(१२४) उभे इति । कित्यादि । का वय परित्राणे अत्र तावद् दुष्यन्तमाक्रन्द

राजा ॥ स्वगतम् सखेयमस्माकमात्मानं दर्शयितुम् । न भेतव्यं न भेतव्यम् ॥ इत्यर्द्धोक्तौ रागतम् ॥ एवं हि राजाहमस्मीति परिज्ञान भविष्यति भवतु अतिथिसमाचारमेवावलम्बिष्ये । (१२५)

शकु ॥ ण एसो दुव्विणीदो विरमदि ता अण्णदो गमिस्स । (१२६)

पदान्तरे सदृष्टिक्षेपम् ॥ हद्धी हद्धी कधं इदो वि म अण्णुसरदि ता परित्ताअध म । (१२७)

राजा ॥ सत्वरमुपगम्य ॥ आः । (१२८)

कः पौरवे वसुमती शासति शासितरि दुर्व्विनीतानाम् ।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु ॥ (१२९)

यतो राजरक्षितानि तपोवनानि । परित्राणे विषये वयं का न का व्यपीत्यर्थः । अत्र भ्रमरात परित्राणे । आक्रन्द आह्वय । आक्रन्द क्रन्दनाह्वाने मित्रदारुण्ययोरिति मेदिनी ॥

(१२५) राजेति । अवसरोऽवकाश । अर्द्धोक्ते अर्द्धश्लोक्तौ सत्याम् । अयमहमागतोऽस्मीत्यन्वाक्षयेति शेष । स्वगतमनतिस्पष्टम् । एव न भेतव्य न भेतव्य मयमहमागतोऽस्मीत्युक्तौ । परिज्ञान परिचय । अतिथिसमाचारमतिथेराचारम् । अव लम्बिष्ये धारयिष्यामि ॥

(१२६) शकु इति । एतत्रादि । न एष दुर्व्विनीतो विरमति तदन्यतो गमिष्यामि । दुर्विनीतो दुष्टश्च । विरमति निवर्त्तते । शेष परान्विति परस्मैपदम । अन्यतोऽन्य प्रदेशम ॥

(१२७) पदेति । पदान्तरे पदविन्यासावसरे । सदृष्टिक्षेप कृतनेत्रपात यथा स्यात् तथा व्याक्षेपक्रियाविशेषण । हद्धीत्यादि । हा धिक् हा धिक कथमितोऽपि मामनुसरति । तत् परित्रायेयां माम् । हाशब्देन पीडा धिक्शब्देनात्मनिर्भर्त्सन द्योत्यते । हा विषादेऽनुकम्पायां खिदि धिङ्निर्भर्त्सननिन्द्ययोरिति धरणिः । इतोऽपि अत्रापि । अनुसरति अनुगच्छति । भ्रमर इति शेष । तत् तस्मात् ॥

(१२८) राजेति । उपगम्य तपस्विकन्यका इति शेष । व्याकारेण कोपो द्योत्यते । व्यास्तु स्यात् कोपपीड़ययोरित्यमर ॥

(१२९) क इति । दुर्विनीतानां दुष्टानां शासितरि दमयितरि पौरवे पुरुव शप्रभवे राजनि वसुमतीं पृथ्वीं शासति पालयति सति मुग्धासु अकृतिचयोचनासु तपस्वि

॥ सर्वे राजानं दृष्ट्वा किञ्चिदिव सम्भ्रान्ता ॥ (१४०)

सख्यौ ॥ अज्ज ण किम्पि अच्चाहिदं किंणु खलु इमं पियसखीं दुट्ठ-भमरएण आउलीकिज्जमाणा कादरीभूदा ॥ इति शकुन्तलां दर्शयतः ।(१४१)

राजा ॥ शकुन्तलामुपेत्य ॥ अयि तपो वर्द्धते । (१४२)

शकु ॥ समाश्वसितीव सखी तिष्ठति । (१४३)

अन ॥ दाणिं अदिथिविसेसलाहेण । (१४४)

प्रिय ॥ साम्प्रतं अज्जस्स, हला सउन्तले गच्छ उडजादो फलमिस्स अग्घभाअणं उवहर इदम्पि पादोदअं भविस्सदि ॥ इति घटं दर्शयति ।(१४५)

कन्यासु तपस्विनीषु, कुमारीषु, कोयमविनय दौर्ज्जन्यमाचरति । प्रथमावतीर्ण यौवना सुग्धेत्यालङ्कारिका । इयमार्य्या नाम जाति ॥

(१४०) सख्य इति । सम्भ्रान्ता व्याप्तव्यग्रभावा ॥

(१४१) सख्याविति । सख्यौ प्रिय वदानसूये । चज्जे तत्रादि । चार्य्य न किमपि व्यत्राङ्कित किन्तु खलु इय प्रियसखी दुष्टमधुकरेणाकुलीक्रियमाणा कातरीभूता । व्यत्रा ङ्कित महद् भयम । व्यत्राङ्कित महाभीति कर्म्मजीवानपेक्षि चेतसर । कातरीभूता व्यधीरीभूता । व्यधीरे कातर इतसर ॥

(१४२) दाणेति । व्यधि सम्बोधने । व्यधि प्रश्नानुनययोस्वया सम्बोधनेऽपि चेति मेदिनी । तपो धर्म्म । धर्म्मे व्रते तप इति त्रिकाण्डशेष ॥

(१४३) शकु इति । समाश्वसा सभया । भीति भी साध्वस भयमित्रसर । व्यव-सितसखी व्यधीसखी ॥

(१४४) व्यनेति । भीतया शकुन्तलाया तृणीयोशायामनसूयया प्रत्युच्यते दाक्षिमितार्हि । इदानीमतिथिविशेषलाभेन । व्यतिथिविशेषस्य विशिष्टस्य व्यतिथे लाभेन सुखो वर्द्धत इत्यन्वय ॥

(१४५) प्रियमिति । साध्वमित्यादि । स्वागतमार्य्ये ण । व्यधि शकुन्तले गच्छ घट जात् फलमिश्रमर्घ्यभाजनमुपहर इदमपि पादोदक भविष्यति । स्वागतमिति भावे क्त । स्वागत इत्येतागतम । व्यार्य्यपुत्रेति भाषाकालप्रयोगात् त्वभावक्तेति कर्त्तरि षष्ठी । एष राजाग मति मत्र । व्यनन्तर शकुन्तलां प्रतीह व्यथोत्रादि । घटजात् घर्ष्यजातात । घर्ष-माशोटजोऽस्त्रियामिताभर । फलमिश्र फलसम्पृक्तम । करम्ब करबो मिश्र सम्पृक्त व्यधित एवा इति हेमचन्द्र । व्यर्घ्यभाजनमर्घ्यपात्रम् । पात्रामत्रस्तु भाजनमित्रसर । उपहर उपनय । व्यर्घ्य फलयोग श्रीरामचन्द्रपूजनेऽगस्त्यस्य स्थितायां सिद्धिं ग्रन्थ । यथा

राजा ॥ भवतीनां स्नेहतयैव वाचा कृतमातिथ्यम् । (१४६)

अन ॥ इमस्मिं दाव पच्छाअसंदलाए सत्तवण्णवेदिआए उवविसिअ अज्जो परिस्समं अवणेदु । (१५७)

राजा ॥ नूनं युयमप्यनेन धर्मकर्मणा परिश्रान्ता मुहूर्तमुपविशत । (१४८)

प्रिय ॥ जनान्तिकम् ॥ हला सउन्तले उइदं णो अदिथिपज्जुवासणं वा एहि उवविसह्म ॥ इति सर्व्वा उपविशन्ति ॥ (१४९)

शकु ॥ आत्मगतम् ॥ कधं इमं जणं पेक्खिअ तवोविरोहिणो विआरस्स गमणीया ह्मि संवुत्ता । (१५०)

सत्वेवं वादयेद् पाद्यान्यर्घं दद्याज्जगत्पतेः । फलपुष्पाम्बुसम्पूर्णं घटहोत्वा शङ्खमुत्तमम् इति । ननु पाद्यमेव प्रथमसुपयुज्यते नत्वर्घमित्यत आह इदमिति । अपि सम्भावनायाम् । तथाच सम्भावयामीदं घटगतं जलं पादोदकं पादप्रक्षालनोचितमुदकं भविष्यतीत्यर्थः । इदमेव गुरूणातिथिषत्कारायादिष्टेति शकुन्तलायामयमादेश. प्रियवदाया सङ्गतः ॥

(१४६) राज्ञेति । स्नेहतया प्रियया । स्नेहत प्रिये इत्यमरः । आतिथ्यमतिथ्यर्थं कर्म । ऋमादातिथ्यातिथेये चातिथ्यर्थेऽत्र साधुनीत्यमरः । कृतं निष्पादितम् ॥

(१४७) अनेति । इमस्मिमित्यादि । यस्यां तावत् प्रच्छायशीतलायां सप्तपर्णवेदिकायामुपविश्य आर्यः परिश्रममपनयतु । तावत् तदा । प्रगता छाया यस्यां सा प्रच्छाया । इय प्रच्छाया च शीतला चेति प्रच्छायशीतला तस्याम् । नीललोहितवत् विशेषणयोः कर्मधारयः । सप्तपर्णवेदिकायां सप्तच्छदवृक्षस्य मूलगतचत्वरस्थविश्रामभूमौ । अपनयतु शमयतु ॥

(१४८) राजेति । नूनमवश्यम् । धर्मकर्मणा तपोमेधनात्मकेन । मुहूर्तं कञ्चित् कालम् । देयाध्वकालभावमिति कर्मत्वम् ॥

(१४९) प्रियमिति । जनान्तिकमप्रकाशम् । जनान्तिकमप्रकाश इति त्रिकाण्डशेष । तत्प्रकारस्तु कथान्तरमध्ये नामिकानामिकोर्द्ध्वसर्व्वाङ्गुलिरूपपताकाकृतिकरं कृत्वा अन्योन्यामन्त्रणम् । त्रिपताकरेखान्यामपत्रार्य्यान्तरा कथाम् । अन्योन्यामन्त्रणं यत् स्याच्छ्रमान्ते तज्जनान्तिकमित्युक्तेः । हलेत्यादि । अयि शकुन्तले उचितं नोऽतिथ्युपासनं तदेहि उपविशामः । उचितं न्याय्यं । अतिथिपर्य्युपासनमतिथेः परिसेवनं सर्व्वतः शमोपवेशनञ्च ध्वन्यते । तत् तस्मात् । एहि आगच्छ । उपविशाम उपास्महे ॥

(१५०) शकु इति । आत्मगतमनसिस्थम् । कथमित्यादि । कथमिमं जनं मेऽत्र

राजा ॥ सर्व्वा अवलोक्य ॥ अहो समानवयोरूपरमणीयं सौहार्दमनयो-र्भवतीनाम् । (१५१)

प्रिय ॥ जनान्तिकम ॥ हला अणसूए को णु क्खु एसो दुरवगाहगम्भीरा-किदी मङ्कर आलवन्तो पङ्कत्तदाक्खिण्ण वित्थारेदि । (१५२)

अन ॥ हला समावि अत्थि कोदूहल ता पुच्छिस्सं दाव णं । (१५३)

प्रकाशम् ॥ अज्जस्स मङ्करालावजणिदो वीसम्भो म आलावेदि कदरो राएसिवंसो अलंकरीअदि अज्जेण कदमो वा देसो विरहपज्जुस्सुओ करीअदि किणिमित्तं वा अज्जेण सुउमारेण तवोवणगमणपरिस्समे आप्पा उवणीदो त्ति । (१५४)

नपोविरोधिनो विकारस्य गमनीयाकृतिं सदृक्षा । इमं जन राजान मेव्य विलोक्य तपो ब्रह्मचर्य्यं विरुणद्धि निराकरोतीति तपोविरोधी तथाभूतस्य विकारस्य प्रकृतेरन्यथाभावस्य कामस्येति यावत् कथ गमनीया गमनार्हा । ते स्या भवत्याहेति व्यर्थायैवनीय । सदृक्षा सदृशाकृति ॥

(१५१) राजेति । सर्व्वा यथास्थानमिय वदानद्रष्टया । अहो विस्मये । अत्र-भवतीना श्राघानाम । अत्र भवान् श्लाघ्यपूज्ययोरिति यद्वाच्यि । सौहार्द्दं सख्य वयासि च रूपाणि च तानि वयोरूपाणि समानानि अन्यूनातिरिक्तानि च तानि वयोरूपाणि येति तै रमणीय शोभन ॥

(१५२) प्रियमिति । जनान्तिक यक्त्र्यन्नेतरमपवार्य्येत्यर्थ । हलेत्यादि । अयि अन-सूये को नु खलु एष दुरवगाहगम्भीराकृतिर्मधुरमालपन् प्रभुत्वदाक्षिण्य विस्तारयति । नु वितर्के । खलु जिज्ञासायाम् । तथाचाय वितर्कगर्भं प्रश्न । दुःखेनावगाह्यत इति दुरवगाह । दुरवगाहगम्भीरा अगाधगम्भीरा अत्यक्षुरेति यावत् आकृतो रूप यस्य स तथोक्त । आकृतिस्तु स्त्रियां रूपे सामान्यतनुमोरपीति मेदिनी । एष क पुमान् मधुर प्रियमालपन्नभाषमाण । आदृतियो नु मधुरादित्यमर । प्रभुत्वदाक्षिण्य प्रभुत्वस्य ऐश्वर्य्यस्य दाक्षिण्यस्य औदार्य्यस्य च योगपद्यम् । दक्षिणे सरलोदारादित्यमर । विस्ता-रयति प्रकटयति ॥

(१५३) अनेति । हलेत्यादि । अयि सख्यि कौतूहल तत् प्रच्छामि तावदेन । कौतूहल्य कौतुक ज्ञातुमिच्छेति यावत् । एन जन ॥

(१५४) प्रकाशमिति । न जनान्तिकमित्यर्थ । अनघ्रयैवाह अज्जस्सेत्यादि । आर्य्यस्य मधुरालापवतिनो विश्रम्भो मामालापयति । कतर पुन राजर्षिवयोऽलङ्कुर्व्वते

शकु ॥ आत्मगतम् ॥ हिअअ मा उत्तम्म जं तुए चिन्तिदं तं अणसूआ मन्तदि । (१५५)

राजा ॥ स्वगतम् ॥ कथमिदानीमात्मानं निवेदयामि कथं वात्मनः परिहारं करोमि भवत्वेवं तावत् । (१५६)

प्रकाशम् ॥ भवति वेदविदस्मि राज्ञः पौरवस्य नगरधर्म्माधिकारे नियुक्तः, पुण्याश्रमदर्शनप्रसङ्गेन धर्म्मारण्यमिदमायातः । (१५७)

आर्य्येण कतमो वा देशो विरहपर्य्युत्सुक क्रियते किं निमित्तं वा आर्य्येण सुकुमारेण तपोवनगमनपरिश्रमे आत्मा उपनीत इति । आर्य्यस्य महाभागस्य मधुरालापेन प्रियभाषणेन जनित उत्पादितो यो विस्रम्भोऽस्माकं विश्वास । समो विस्रम्भविश्वासावित्यमर । स एव मा आलापयति आलापाय प्रेरयति किमित्यत आह इतरजनम् । कतरो राजर्षिवंशश्चन्द्रार्कसम्भवयो र्यो राजर्षिवंशो मध्ये को राजर्षिवंश पुनरार्य्येणालङ्क्रियते जन्मना सुधो भनीक्रियते । कतमो देशेषु मध्ये को वा देशो विरहयुर्त्सुक तमुज्झित्वा साम्मत मिक्षोपेततया विरहेणोत्कण्ठित क्रियते । एव सुकुमारेण मृदुलाकृतिना आर्य्येण कि निमित्त किमर्थं वा तपोवनगमनपरिश्रमे आत्मा उपनीत प्रयुक्त । इति आलापयतीत्यन्वय । अत्र कतरकतमौ कि यत्तदेकान्याद्दु ह्यबहुनामेकनिर्द्धारणे इतरडतमावित्यनेन डतरडतमप्रत्ययाभ्या किमो निष्पन्नौ ॥

(१५५) शकु इति । आत्मगतमनतिस्पष्टम । हिअअ इत्यादि । हृदय मा उत्ताम्य यत् त्वया चिन्तित तदनसूया मन्त्रयते । मा उत्ताम्य उत्कण्ठित मा भव । त्वया यच्चिन्तित कोऽय महाभाग इतीत्यर्थ । मन्त्रयते कथयति ॥

(१५६) राजेति । आत्मान कथ निवेदयामि नृपत्वेन कथ विज्ञापयामि । वन्दिकार्य्यतया स्वय विज्ञापनानौचित्यादिति भाव । आत्मन परिहार गोपन वा कथ करोमि मिथ्यावादस्यार्थादिति भाव । तदानीमेव विचार्योह भवत्विति । एव तावद्वक्तव्यमिति शेष ॥

(१५७) प्रकाशमिति । विस्पष्टमितरत्र्यं । वेदविदस्मीत्यनेन विद्वत्वमनुभाषित राजन्यानामपि वेदाधिकारानुमिथ्या च न व्याहृतम । तथा पौरवस्य पुरुवंशप्रभवस्य राज्ञो नगरधर्म्माधिकारे राजधानीगतधर्म्माधिकरणे विचारालय इति यावत् । तदाह कात्यायन । धर्म्मशास्त्रानुसारेण व्यवहारस्य निरूपणम । यत्राधिक्रियते स्थाने धर्म्माधिकरण हि तदिति । नियुक्तो रक्षित । एतेन धर्म्माधिकरणस्थराजपुरुषत्व बोध्यते । तथाच मत्स्यपुराणम । सम यत्नो च मित्रे च सर्व्वशास्त्रविशारद । विप्रमुख्य सुखीनस्य धर्म्माधिकरणो भवदिति ।

अन ॥ अज्ज सणाधा धम्मआरिणो । (१५८)

शकु ॥ अहङ्कारलक्ष्मा नाटयति ॥ (१५९)

सखौ ॥ उभयोराकारं विदित्वा ॥ हला सउन्तले जहू अज्ज तादो दूरं सन्निहिदो भवे । (१६०)

शकु ॥ तदो किं भवे । (१६१)

सख्यौ ॥ तदो जीविदसव्वस्सेणावि इमं अदिथिविसेसं कदत्थं करेदि । (१६२)

वस्तुत पौरवस्य पुरोरपत्यस्य राज्ञो मत्पूज्यस्येत्यर्थ । यानि नगराणि ये च धर्म्मास्तेषामधिकारे नियुक्तास्तदधिकारी सन् इतार्थमभिसन्धाय कृपा च नाभिधीयते । तथा पुण्यस्य पवित्रस्य आश्रमस्य मर्यादं दर्शनप्रसङ्गेन दर्शनप्रसक्ततया इद धर्म्मारण्यमायात । एतदुभयत्रैव समानम् । अत्र श्लेषाख्योऽलङ्कार । यदाह भोजराज । एकरूपेण वाक्येन द्वयो र्भेदनमर्थयो । तत्त्वेन यत् स यद्वत्ते श्लेष इत्यभिधद्वित इति ॥

(१५८) अनेति । चच्छेतादि । अद्य सनाथा धर्म्मचारिण्य । सनाथा नाथेन सह वर्त्तमाना ॥

(१५९) शकु इति । अहङ्कारलक्ष्मा अहङ्काररूपोल्लेखाम् । सनाथपदप्रयोगादिति भाव । नाटयति क्रियया दर्शयति ॥

(१६०) सख्याविति । उभयो राज्ञ शकुन्तलायाश्च । आकारमाकृते भावम् । विदित्वा अन्योन्यानुरागसूचकत्वेनावगम्य । हलेतादि । अयि शकुन्तले यद्यदा तात इह सन्निहितो भवेत् । तात कण्व । सन्निहित उपस्थित ॥

(१६१) शकु इति । तदो इतादि । तदा किं भवेत् । तदा तातसन्निधाने ॥

(१६२) सख्याविति । तदो इतादि । तदा जीवितसर्व्वस्वेनापि इममतिथिविशेष कृतार्थं कुर्य्यात । सर्व्वस्व सम्पत्ति । तच्चाजीवित भूहिरण्यादि जीवितन्तु सर्व्वस्व दारापत्यादि सूचयतो यस्मै कस्मैचित तस्यादेयत्वादत्र जीवितसर्व्वस्वेनाभीतत्रक्त । यथाह कात्यायन । विक्रयश्चैव दानञ्च मनेया द्वारनिष्क्रय । दारा पुत्राश्च सर्व्वस्वमात्मन्येव नियोजयेत् । व्यापत्कालेतु कर्त्तव्य दान विक्रय एव च । अन्यथा न प्रवर्त्तेत इति शास्त्र विनिश्चय इति । अतएव सर्व्वस्वदक्षिणायामुक्त स कुटुम्बाविरोधेन देय दारसङ्गताइते इति । प्रकृते तु नैष्ठिकब्रह्मचारिण पुत्रदाराणामसम्भवात् जीवितसर्व्वस्वपदेन शकुन्तलैवाभिप्रेता अतएव शकुन्तलाया कोप सङ्गच्छते । अतिथिविशेष विशिष्टमतिथि कृतार्थं कृत प्रयोजनम ॥

शकु ॥ सक्षतकक्कोपम् ॥ अवेध तुह्मे किम्पि हिअए कदुए करेध ण वो वअणं सुणिस्सं । (१६३)

राजा ॥ वयमपि भवत्यो. सखीगतं किञ्चित् पृच्छामः । (१६४)

सख्यौ ॥ अज्ज अणुग्गहे वि अब्भत्थणा । (१६५)

राजा ॥ तत्रभवान् कण्वः श्राद्धते ब्रह्मणि वर्त्तते दूयञ्च व सखी तस्याऽमजा कथमेतत् । (१६६)

चन ॥ सुणादु अज्जो अत्थि कोसिओ त्ति गोत्तणामहेओ महप्पहावो राएसी ।(१६७)

---

(१६३) शकु इति । क्षतकक्कोपेन क्षतिमरोषेण सहित सक्षतकक्कोप । जीवित सर्वं स्वपदेन शकुन्तलाया एवाभिप्रेतत्वादिति भाव । क्षतकः स्यात् पुमान् क्षणखर्परे चाप्य सम्भवे । पुत्रभेदे क्षतिमे च त्रिष्विति शब्दाब्धि । अवेधेत्यादि । अपसरत युवा किमपि हृदये कृत्वा मन्त्रयेथे न वा वचन श्रोष्यामि । अपसरत अपगच्छत । किमपि मत्परिणयसम्बन्धमिति भाव । हृदये कृत्वा अभिसन्धाय । मन्त्रयेथे कथयथ ॥

(१६४) राजेति । सखीगत शकुन्तलासम्बन्धम् ॥

(१६५) सख्याविति । अज्जेत्यादि । आर्य्य अनुग्रहेऽपि अभ्यर्थना । अनुग्रहेऽपि विषये अभ्यर्थना प्रार्थना क्रियत इति शेष । काकुक्त्या प्रश्नोऽयम् । तथाच यत प्रश्न एव भवतामस्मास्वनुग्रहोऽनुग्रहीतुञ्च कश्चिन्नाभ्यर्थयते अतो न युज्यत एव प्रागुविज्ञापनमिति भाव ॥

(१६६) राजेति । तत्रभवान् गौरवित । गौरवितात्स्वार्थे मिश्रा श्लाघात्रस्तत्रभवन्नया इति त्रिकाण्डशेष । कण्वो महर्षि श्राद्धते नित्ये । श्राद्धस्तु भृशो नित्यप्रसादातनसनातना इतामर । ब्रह्मणि ब्रह्मचर्य्ये वर्त्तते नैष्ठिकब्रह्मचारीति यावत । तदाह कूर्मपुराणम् । ब्रह्मचार्युर्ध्वरेताख्यो नैष्ठिको ब्रह्मतत्पर । योऽधीत्य विधिवद् वेदान् गृहस्थाश्रममाव्रजेत् । ऊर्ध्वरेताख्यो ज्ञेयो नैष्ठिको मरणान्तिक इति । दूय यो युष्माक सखी शकुन्तला पतस्य महर्षे रात्मजा औरसी एतत कथ केन प्रकारेण सम्भवतीत्यर्थ । या क्रियामन्तरेण न कदाचिदप्यौरसापत्यसम्भवस्तस्या —व्यक्तीर्णीभवेद् गत्वा ब्रह्मचारी तु योषितम् । गर्भमप्युत्सृज्य नैष्ठिकं न विशुध्यतीति याज्ञवल्क्येन ब्रह्मचारिण प्रतिषेधादिति भाव ॥

(१६७) चनेति । सुणाहित्यादि । शृणोत्वार्य्य चास्ति कौशिक इति गोत्रनामधेयो महाप्रभावो राजर्षि । कौशिक इति गोत्रनामधेय कुशिकस्यापत्यमिति वृद्धाणु-भावकनाम यस्य स । महाप्रभावो महातेजा । प्रभाव शक्तितेजसोरिति विश्व । राजर्षि क्षत्रियतपस्वी विश्वामित्र इति यावत् ॥

राजा ॥ स खलु भगवान् कौशिक । (१६८)

अन ॥ तं सहीए पहवं अवगच्छ उज्झिदाए सरीरसम्भड्ढणादिहिं उण तादकण्वो वि एदाए पिदा । (१६९)

राजा ॥ उज्झितशब्देन जनितं नः कुतूहलं तदामूलाच्छ्रोतुमिच्छामि । (१७०)

अन ॥ सुणादु अज्जो पुरा किल तस्स राएसिणो उग्गे तवसि वट्टमाणस्स कधम्पि जादसङ्केहिं देवेहि मेणआ णाम अच्छरा णिअमविग्घआरिणी पेसिदा । (१७१)

---

(१६८) राजेति । अनसूयावचनाज्ज्ञातानुभव आह स खल्वित्यादि । य एतिर्योऽपि विप्रतारणमदिति भाव ॥

(१६९) अनेति । तमितरादि । तं सख्या प्रभवमवगच्छ उज्झितायाः शरीरसंवर्धनादिभिः पुनस्तातकण्वोऽप्येतस्या पिता । तं कौशिकं सख्या शकुन्तलायाः प्रभव जन्महेतुमवगच्छ जानीहि । ख्याज्जन्महेतु प्रभव इत्यमर । उज्झितायास्त्यक्तायाः अस्या इति शेष । शरीरस्य संवर्धनादिभिर्न तूत्पादनयेति भाव ॥

(१७०) राजेति उज्झितशब्देन उज्झिताया शरीरस्य वर्धनादिभिरित्यत्र प्रयुक्तेनेतरार्थं । कुतूहल कौतुकं सविशेषमुत्थूषेति यावत् । नः तस्मात् । आमूलात् आद्यारभ्य । मूलमाद्येक्षिकाभयोरित्यमर ॥

(१७१) अनेति । सुणादित्यादि । हे आर्य पुरा किल तस्य राजर्षेरूपे तपसि वर्त्तमानस्य कथमपि जातशङ्कैर्देवैर्मेनका नामाप्सरा नियमविघ्नकारिणी प्रेषिता । पुराऽतीतकाले । पुरा पुराणे निकटे प्रबन्धातीतभाविष्विति मेदिनी । किलेति परम्परागतवार्तायाम् । वार्तासम्भाव्ययो किलेत्यमर । उग्रे उत्कटे । उग्र स्यूदाशुते यस्मात् श्रीकण्ठे षोत्कटेऽपि चेति विश्व । तपसि कृच्छ्रचान्द्रायणादिनियमे वर्त्तमानस्य तदाचरत इति यावत् । तस्य राजर्षेर्विश्वामित्रस्य नियमस्य तपसो विघ्नकारिणी विघातनशीला मेनका नामाप्सरा जातशङ्कैस्तपोभङ्गिभिन्ना स्वस्वाधिकाराच्छेदनविषये जातभयैर्देवै कथमपि अनन्यावगत यथा स्यात् तथा प्रेषिता प्रेरिता तत्सकीपमिति शेष । यद्यपि क्षिया षड्भ्यश्चरस्य इतत्वमरमतो षड्भ्यश्चरनान्त एवाप्सरशब्दस्यापि अमरसा व्यधितेत्यादिप्रयोगदर्शनात् कचिदेकवचनान्तोऽप्यङ्गीकार्यः । यद्वा प्राकृतत्वादयमृशो न दोषाय स्कृते तु व्यप्सरस इति नियमविघ्नकारिण्य इति प्रेषिता इति बहुवचनान्तैरेव व्याख्यातव्यम् ॥

राजा॥ प्रक्षोभवान्यसमाधिभीरुत्वं देवानाम् । ततस्ततः । (१७२)

व्यन॥ तदो वसन्तावदाररमणीए समए उम्मादहेतुणं ताए रूवं पेक्खिअ॥ इत्यर्द्धोक्तेन लज्जा नाटयति । (१७३)

राजा॥ पुरस्तादवगम्यत एव सर्व्वथा अप्सरःसम्भवैषा । (१७४)

व्यन॥ अध इं । (१७५)

राजा॥ उपपद्यते । (१७६)

मानुषीभ्यः कथं नु स्यादस्या रूपस्य सम्भवः ।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥ (१७७)

---

(१७२) राजेति । देवानामिन्द्रादीनाम् अन्येषां यः समाधिर्नियमस्तस्माद् भीरुत्व भयशीलत्वमस्येव प्रागप्येवं बहुश श्रुतमिति भाव । समाधि नियमे ध्याने नीवाके च समर्थन इति विश्व । प्रकृतमनुसरयति ततस्तत इति ॥

(१७३) व्यनेति । वदो इत्यादि । ततो वसन्तावताररमणीये समये उन्मादहेतुक तस्या रूप प्रेक्ष्य । वसन्तस्य अवतारेण प्रकृत्या रमणीये मनोहरे समये उन्मादस्य चित्तविभ्रमस्य हेतुक हेतुभूत तस्या मेनकाया रूप सौन्दर्य्य प्रेक्ष्य दृष्ट्वा । अर्द्धोक्तेन अपास्तनियमेन राजर्षिणा तेनास्यामाहितो गर्भ इत्यन्तपूर्ण वाक्यस्येति शेष ॥

(१७४) राजेति । पुरस्तादग्रत वाक्यशेषमिति यावत । अवगम्यते ह्यायस एव सर्व्वथा अङ्गीकारे । सर्व्वथा सर्व्वप्रकारे प्रतिज्ञाभ्रशहेतुष्विति शब्दाब्धि । प्रतिज्ञा अङ्गीकार । अप्सर सम्भवा अप्सरोगर्भ सम्भूता ॥

(१७५) व्यनेति। अध इ । अथ किम् । अन्यत कि एतदेवेतत्यर्थ । अङ्गीकारेऽपि चाथ किमिति हारावली ॥

(१७६) राजेति । उपपद्यते युज्यते ॥

(१७७) मानुषीति । मानुषीभ्यो मानवजातिभ्य कथमस्य शकुन्तलासम्बन्धिनो रूपस्य सौन्दर्य्यस्य सम्भव सम्भव स्यात् । नु पृच्छाया । नु पृच्छाया । वितर्के चेत्यमर । कथमपि नेत्यर्थ । तदेव दर्शयति नेति । प्रभातरल प्रभया त्विषा तरल भास्वरम् । तरल चञ्चले स्निग्धे हारमध्यमणावपि । भास्वरे चेति विश्व । ज्योति सविता वसुधातलाद् भूतलात्स उदेति । उदय भजति । ज्योति दिनेशानलयोरपि स्यादिति विश्व । अत्र एकापुरुत्पत्तिक्रिया पौनरुक्त्यनिरासाय सम्भवोदयपदाभ्या पृथक निर्दिष्टेति प्रतिवस्तूपमालङ्कार इति केचित् । वस्तुतस्तु भिन्न एवात्र सम्भवादुदयपदार्थ तथाचात्र उपमान क्रियाया अपि प्रतिबिम्बनाद् दृष्टान्तो नामालङ्कार । तदुक्त प्रकाशे । दृष्टान्त पुनरेतेषा

राजा ॥ एतत् पृच्छामि । (१८४)

वैखानसं किमनया व्रतमाप्रदानाद्
व्यापारबोधि मदनस्य निषेवितव्यम् ।
यत्रत्यमेव सहचेक्षणवल्लभाभि-
राहो निवत्स्यति समं हरिणाङ्गनाभिः ॥ (१८५)

प्रिय ॥ अज्ज धम्माचरणपरवसो एस जणो गुरुणो उण के अनुरूप-
वरप्पदाणे संकप्पो । (१८६)

राजा ॥ सदृशं खल्वस्य । (१८७)

---

(१८४) राजेति । एतत् पृच्छ्यमाणम् ॥

(१८५) वैखानसमिति । मदनस्य कामस्य व्यापारमष्टाङ्गमैथुन झगिति निवर्त्तयतीति तत् तथाभूत वैखानस व्रत तापसाना नियम ब्रह्मचर्यमिति यावत् । व्यष्टाङ्गमैथुन निवृत्तेरेव ब्रह्मचर्यपदार्थत्वात् । तथाच दक्ष । एतन्मैथुनमष्टाङ्ग प्रवदन्ति मनीषिण । विपरीत ब्रह्मचर्यमेतदेवाऽनुरागात् कृतञ्चैतद् ब्रह्मचर्यं विरोधकर्मिन । वैखानस वानप्रस्थसम्बन्धीति केचित् तन्न तस्य मदनव्यापारबोधित्वाभावात् रागानिवृत्तौ पत्नीसहितवनगमनात् । अनया अकृतत्रया किमाप्रदानात् परिणयपर्य्यन्त निषेवितव्य पालयितव्यम् । व्याहो किम् । व्याहो उताहो किमुत विकल्पे कि किमूत चेत्यमर । यत्यन्त देहावसानपर्य्यन्तमेव सदृशेक्षणेन ईक्षणसादृश्येन वल्लभाभि प्रियाभि । दयित वल्लभ प्रियमित्यमर । हरिणाङ्गनाभि-मृगीभि समं सह । साक सार्द्ध समं सहेत्यमर । निवत्स्यति व्याश्रमवास करिष्यतीत्यर्थ । तथाचासौ उपकुर्व्वाणत्व नैष्ठिकत्व वेति प्रश्नार्थ । स्त्रीणा चैतद् ब्रह्मचर्यं द्वैविध्य हारीतनोक्त यथा । द्विविधा स्त्रियो ब्रह्मवादिन्य सद्योवध्वश्च तत्र ब्रह्मवादिनीनामुपनयन अग्नीन्धन वेदाध्ययन स्वगृहे च भैक्षचर्य्येति सद्योवधूनामुपनयन कृत्वा विवाह कार्य्य इति । यमेनापि । पुराकल्पेषु नारीणा मौञ्जीबन्धनमिष्यते । अध्यापनञ्च वेदाना सावित्री-वाचन तथेति । इद यमन्तिलक नाम वृत्तम् ॥

(१८६) प्रियमिति । अज्जेत्यादि । आर्य धर्म्माचरणपरवश एष जन गुरो पुनरस्या अनुरूपवरप्रदाने सङ्कल्प । धर्म्माचरणस्य धर्म्मानुष्ठानस्य परवशोऽधीन धर्म्मभिया स्वातन्त्र्यात्मकमधर्म्मनुपयातु नार्हतीति भाव । एतेन स्वय अकृताधर्म्मं विशुद्धता दर्शिता । एष जन अकृतलाजन । गुरो कण्वस्य । अनुरूपेति । अनुरूपो रूपस्य योग्यो यो वरो जामाता । भाविनि भूतवदुपचार । वरो जामातरि वृते इति मेदिनी । तस्यै प्रदाने सङ्कल्पो मनोऽभिलाष । उभयथा दुर्घटपरिणयेय स वृत्तेति भाव ॥

(१८७) राजेति । सुगमम् ॥

भव हृदय साभिलाष सम्प्रति सन्देहनिर्णयो जातः ।
आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम् ॥ (१८८)

गङ्गु ॥ सरोपमिव ॥ अणसूए अहं गमिस्सं । (१८९)

अन ॥ किंणिमित्तं । (१९०)

गङ्गु ॥ दूरं अस्सवहुप्पलाविणी पिअंवदं अज्जाए गोदमीए गहुअ णिवेदइस्सं ॥ इत्यादि । (१९१)

अन ॥ सद्धि ण जुत्तं अस्समवासिणो जणस्स अकिदसक्कारं अदिथिविसेसं उज्झिअ सच्छन्ददो गमणं । (१९२)

---

(१८८) भवेति । हे हृदय त्वं साभिलाषं गृहीताभिलाषं भव सम्प्रतीदानीं सन्देहस्य राजन्यामामिय जाया परिणेया न वा तया उपभुक्तोज्झिता मैश्रिकी वेयमित्येवं संशयस्य निर्णयो निश्चयो जात । ननु निश्चयो द्विविध एव सम्भवति तत्र राजान्यासमर्पितत्वेन मैश्रिकत्वेन वा निश्चये कथं साभिलाषतेत्यतो विशेषाभिधानायाह आशङ्कसे इत्यादि । यदू यस्तु अग्निमाशङ्कसे अग्नितेन संशयमारोपयसि सपक्षीकरोषीति भाव । तदिदं यस्तु स्पर्शं क्षमं अर्थं योग्यं रत्नं मणि न त्वग्निरित्यर्थः । अत्राग्नित्वेन सन्दिग्धत्वोक्त्या वस्तुन अर्थयोग्यरत्नत्वनिश्चयेन वस्तुतस्तदग्नेन वणिक्कन्यात्वेन मैश्रिकत्वेन वा सन्दिग्धाया अकुलजाया क्षत्रियपरिग्रहोपभुक्तत्वेन क्षत्रियकन्यात्वनिश्चयरूपसन्देहार्थस्य गम्यत्वाद् अप्रस्तुतप्रशंसालङ्कार । तदुक्त दर्पणे । क्वचिद् विशेषः सामान्यात् सामान्यं वा विशेषतः । कार्यात्कारणमिति कार्यं च हेतोरथ समात् समम् । अप्रस्तुतात् प्रस्तुतं चेद् गम्यते सापि तत्र । अप्रस्तुतप्रशंसा स्यादिति । इदमार्या ॥

(१८९) गङ्गु इति । सरोपमिव क्रोधवदिव । अणसूए अनसूये अहं गमिष्यामि । इदमम् ॥

(१९०) अनेति । किं निमित्तम् । किंनिमित्तं किमर्थं निष्ठुरं ॥

(१९१) गङ्गु इति । दूरमित्यादि । दूरमत्यर्थं अस्रवहुप्रलापिनी प्रियंवदामाश्रयिष्ये गौतम्यै तदा निवेदयिष्यामि । तदा काश्यपे गोत्रे जातस्य गौतमीतनयस्य दूरं प्रियंवदां अत्यन्तदुःखजनकं मन्यति भावज्ञ इति अनसूयापरिहासी निवेदयिष्यामि विज्ञापयिष्यामि प्रियंवदायाः अत्यन्तदुःखजनकत्व निवेदयिष्यामीत्यर्थः । यदि विशेषे वार्ते विशेषवचनं सङ्गच्छते नि सादृ ॥

(१९२) अनेति । अनौचित्यादि । यदि न मुनिसम्बन्धिनो जनस्याहार्यसत्कारं अनिर्दिष्टविशेषमुपलक्षणं सत्कारस्य स्वयम् । यदि तदुक्ते अत्रान्तरे सत्कार्य यथा

शकु॥ उत्तरमहत्त्वेव प्रस्थिता। (१९३)

राजा॥ स्वगतम्॥ कथमियं गच्छति (१९४)

जिघृक्षुरिव पुनरिच्छां निगृह्य॥ अहो चेष्टानुरूपिणी कामिजनचित्त-
वृत्तिः। अहं हि। (१९५)

अनुयास्यन् मुनितनयां सहसा विनयेन वारितप्रसरः।
स्वस्थानादुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः॥ (१९६)

प्रिय॥ शकुन्तलामुपेत्य॥ हला चरिद्ध मारिहसि गन्तुं। (१९७)

शकु॥ परिहृत्य सभ्रूभङ्गम्॥ किं त्ति। (१९८)

प्रिय॥ दुवे मे रक्खइस्सेअणके धारेसि तेहिं दाव पत्ताण मोआवेहि
तदो गमिस्ससि॥ इति बलात्निवर्त्तयति॥ (१९९)

यस्य स तम्। अतिथिविशेषमुज्झितुमिच्छा त्यक्तुं स्वच्छन्दत स्वाभिप्रायात्। अभिप्रायश्छन्द आशय इत्यमरः। गमनमात्मभावितमपोषनगतस्य जनस्य न युक्तम्॥

(१९३) शकु इति। उत्तर प्रतिवचनम्॥

(१९४) राजेति। इयं शकुन्तला कथं गच्छति। न गच्छतीति भावः॥

(१९५) जिघृक्षुरिति। जिघृक्षु मंहीतुमिच्छुः शकुन्तलामिति शेषः। इच्छा जिघृक्षाम्। निगृह्य दमयित्वा। अहो विस्मये। कामिजनस्य कामवतो मानवस्य चित्त-वृत्तिरिच्छा चेष्टा कायकृतव्यापारस्तदनुरूपिणी तत्सदृशरूपा। हि यस्मादहं स्वस्थानादुच्च-लन्नपि गत्वेव प्रतिनिवृत्त इति श्लोकीयमान्वयः॥

(१९६) अनुयास्यन्निति। सहसा अतर्कित यथा स्यात् तथा। स्वाविनयव्यक्ति-मनागप्यक्षेत्रमि यावत्। अतर्कितं तु सहसेत्यमरः। मुनितनयां शकुन्तलामनुयास्यन् सन् विनयेन धीरतया वारितो निवर्त्तित प्रसरो वेग अनुगमनस्येति शेषः। अस्य समाहारः समूहः। प्रसर प्रथये वेगे इति विश्वः। स्वस्थानादभ्यासितभूमेरचलन् पदमप्यगच्छन्नपि गत्वा पुन प्रतिनिवृत्त पराङ्मुखीभूत इव अस्मीति शेषः। इयमार्या॥

(१९७) प्रियमिति। उपेत्य उपगम्य। हलेत्यादि। अयि चरिद्ध मार्हसि गन्तुम्। चरिद्ध अतिक्रोपने। चरद्धस्त्वत्यल्पक्रोपन इत्यमरः। गोत्यादित्वादीप्। गन्तुमितोऽन्यत्र गन्तुम्। मार्हसि नोपयुक्तासि॥

(१९८) शकु इति। परिहृत्य अभिमुखीभूय। सभ्रूभङ्ग भ्रूकौटिल्येन सहितम्। किं सि। किमिति किं हेतुकमित्यर्थं। इति हेतुपकरणप्र इत्यादिना प्रश्नितप्रत्ययः॥

(१९९) प्रियमिति। दुवे इत्यादि। दे मे सखीजनके धारयसि तावद्भ्यां तावदात्मानं

राजा॥ भद्रे दृष्टसेचनादेवात्यभवती परिश्रान्ता तर्कयामि । तथा-ह्यस्याः । (२००)

स्रस्तांसावतिमात्रलोहिततलौ बाहू घटोत्क्षेपणा-
दद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः ।
वक्त्रं कर्णशिरीषरोधि वदने घर्माम्भसां जालकं
बन्धे स्रंसिनि चैकहायमिताः पर्याकुला मूर्द्धजाः ॥ (२०१)
तद्दूरमेनामनृणां करोमि ॥ इत्यङ्गुरीयकं ददाति । (२०२)

मोचय ततो गमिष्यसि । भे मद्रम् । धारिणा योगे चतुर्थी । दृष्ट सिच्यते व्यनेनेति दृष्टसेचनमुदककुम्भ । ततोऽल्पार्थे कण । ते धारयसि व्यन्ये ह्वे समानीय मद्र दातुमङ्गीकृतत्र मत्तो गृहीतवतीत्रसि । ताभ्या कृष्णवन्धभूताभ्या व्यात्मान मोचय व्यात्मान त्याजय । ताभ्यामित्यत्राजग्रन्थकर्त्तरि तृतीया । निवर्त्तयति स्वस्थान स्थापयति ॥

(२००) राजेति । भद्रे प्रियवदे । व्यत्रभवतो शकुन्तलाया । परिश्रान्ता जात परिश्रमाम् । तर्कयामि व्यनुमानामि । तदेव दर्शयति तथाहीति । व्यस्या शकुन्तलाया बाहू व्यतिमात्रलोहिततलावित्यादिभि श्लोकीयेनान्वय ॥

(२०१) व्यस्तेति । बाहू व्यसौ दुर्बलतयावनतौ व्यंसौ स्कन्धौ ययोस्तौ । स्कन्धो भुजशिरोऽसोऽस्तीत्यमर । तथा व्यतिमात्रलोहिते व्यतिशयेन रक्ते तले पाणितले ययो-स्तथाभूतौ च दृश्येते इति शेष । व्यत्र तलशब्द एव पाणितलवाचक । तलप्रहाराभिहत, तलेनोरस्यताडयदित्यादिवत । एव घटोनामुदककुम्भानामाहरणे पुनादुद्वहनाद्धेतो प्रमा णात स्वाभाविकादधिको दीर्घ इति यावत् । श्वासो निश्वासोऽद्यापि व्यधुनापि स्तनयो वैपथु कम्प जनयति । टुवेपृङ् कम्पने इति कविकल्पद्रुम । टित्वोऽत्र भीष इति व्यथु । तथा वदने घर्माम्भसा स्वेदवारिणा कर्ण शिरीष कर्णाभरणभूत शिरीषपुष्प कर्णस्थि कोमलतया स्वेदसलिलसगतया च व्यन्दनाद्विवर्त्तयतीति कर्ण शिरीषरोधि जालक व्यस्फुटकोरकरूप बहुमुद्गाकिरम । घर्माम्भसा विन्दुाकारत्व प्राप्तमित्यर्थ । जालक कोरके दृश्ये इति मेदिनी । तथा बन्धे बन्धने व्य सिनि व्यपगते सति पर्य्याकुला प्राप्तविकीर्ण भावा मूर्द्धजा केशाश्च एक-हस्तेन व्यपरेण घटोद्वहनादिति भाव । यमिता यता इत्यमरे इति शेष । व्यत्र स्वभा-वोक्तिरलङ्कार । तद्रूप दृष्टव्यता । नानावस्थ पदार्थाना रूप साधारण विशेषणमी । स्वभावोक्तिश्च व्याप्तिपेतग्राह्या सालङ्कृतिरिति । इद चार्द्धविक्रीडित नाम वृत्तम् ॥

(२०२) तदिति । तत् तस्मादेनां शकुन्तलामनृणां व्यपगतऋणां करोमि दत्वङ्गु व्यङ्गुरीयक ददाति व्यर्पयति । राज्ञेति पूर्वेणान्वय ॥

सख्यौ ॥ प्रतिगृह्य नामाक्षराणि वाचयित्वा च परस्परमवलोकयतः । (२०३)

राजा ॥ अलमन्यथासम्भावनया राज्ञः प्रतिग्रहोऽयम् । (२०४)

प्रियं ॥ तेण हि णारिहदि एदं अङ्गुलीअअं अङ्गुलीविओअं अज्जस्स वअणादो ज्जेव अण्णहा एसा होदु । (२०५)

चन ॥ हला सउन्तले मोअाविदासि अणुकम्पिणा अज्जेण अहवा राएसिणा, ता कहिं दाणिं गमिस्ससि । (२०६)

गकु ॥ व्यात्मगतम् ॥ ण एदं जणं परिहरिअ जइ अत्तणो पहविस्सं । (२०७)

प्रियं ॥ किं दाणिं ण गच्छीअदि । (२०८)

---

(२०३) सख्याविति । प्रतिगृह्य गृहीत्वा अङ्गुरीयकमिति शेषः । नामाक्षराणि अङ्गुरीयकगतनामवर्णान् । वाचयित्वा पठित्वा । पचक सन्देशे इति कविकल्पद्रुमः सन्देशः पाठ । अतएव वाचयत्रखिला लिपिमिति हलायुध उदाजहार ॥

(२०४) राजेति । नामाक्षराणि वाचयित्वा भागवश्य दुष्मन्तं निरनैषीदियमिति निश्चित्याह । अलमिति । अन्यथासम्भावनया मम न्यत्वसम्भावनया । राज्ञ सकाशादयं प्रतिग्रहः । तदभिहितो भावो द्रव्यवत् प्रकाशत इति न्यायात् । इदं प्रतिगृहीतमित्ययं । ममेति शेषः । अत्र अन्यथासम्भावनया राजस्वग्रहणदोषभयसंभावनया अत्र राज्ञः सकाशाद्_अयं प्रतिग्रह अकुन्तलाया इति शेष इत्यर्थोऽभ्यन्तरवाटभियाभिप्रेत ॥

(२०५) प्रियमिति । तेणेत्यादि । तेन हि नार्हति इदमङ्गुरीयकमङ्गुलीवियोगं. आर्यस्य वचनादेव अन्यथा एषा भवतु । तेन राजप्रतिगृहीतत्वेन । अङ्गुलीवियोगमङ्गुलित्यागम् । नार्हति न कर्तुं युक्तं भवति । आर्यस्य भवतः । अन्यथा मयोपेक्षितर्षा । एषा अकुन्तला ॥

(२०६) अनेति । हलेत्यादि । अयि अकुन्तले मोचितासि अनुकम्पिना आर्येण अथवा राजर्षिणा तत् कुत्र दानीं गमिष्यसि । मोदितासि अवगणीतासि । अनुकम्पिना सदयेन । कृपा दयानुकम्पा स्यादित्यमरः । नामाक्षराणि वाचयित्वा ज्ञातदुष्मन्तावस्थगयादाह अथवेति । राजर्षिणा महाराजेन ॥

(२०७) अकु इति । एतेत्यादि । मैत जनं पर्यहरिष्य यदात्मन प्राभविष्यम् । एतं जनं राजानम् । पर्यहरिष्यं पर्याप्तार्थम् । आत्मन इति कर्मणि षष्ठी । प्राभविष्यं प्रभुरभविष्यम् ॥

(२०८) प्रियमिति । किमित्यादि । किमिदानीं न गम्यते । किं कारणम् ॥

शकु ॥ दाणिं किं तुह आअत्तम्हि, जदो मे रोअदि तदो गमिस्सं । (२०९)

राजा ॥ शकुन्तला विलोकयन्नात्मगतम् ॥ किं खलु यथा वयमस्यामियमपि अस्मान् प्रति तथा सञ्जात, अथवा लब्धावकाशा मे मनोवृत्तिः । कुत । (२१०)

वाचं न मिश्रयति यद्यपि मद्वचोभिः
कर्णं ददात्यवहिता मयि भाषमाणे ।
(कामं न तिष्ठति मदाननसम्मुखीयं
भूयिष्ठमन्यविषया न तु दृष्टिरस्याः ॥ (२११)

नेपथ्ये ॥ भो भोस्तपस्विनः तपोवनसन्निहितसत्त्वरक्षणाय सज्जीभवन्तु भवन्तः प्रतत्रासन्न, किल मृगयाविहारी राजा दुष्मन्तः । (२१२)

(२०९) शकु इति । दाणिमित्यादि । इदानीं किं तवायत्तास्मि । यदा मे रोचते तदा गमिष्यामि । आयत्ता अधीना । अधीने मिश्र आयत्त इत्यमरः । अत्र मादृं तवायत्ता । स्वाधीनाङ्गमित्यभिप्रायो व्यक्तीकृतः । आन्तरिकस्तु महाभागस्येदानीमायत्तास्मीति । यदा यत्काल मे मह्यम् । रोचते मीलिकरो भवति । क्रोधेर्ष्याकृतमादाय तु मे इति पाठार्थः ॥

(२१०) राजेति । किं खलुभ्यां वितर्कगर्भमयो द्योत्यते । वयमस्यां यथा अनुरक्ता इति शेषः । तथा तद्वदनुरागवती । अथवा तथा अनुराग निश्चितात्र अयमेति । लब्धावकाशा लब्धविषयद्वारा मनोवृत्तिर्निश्चयात्मिका । मदीयो निश्चय शकुन्तलागतानुरागरूपविषयस्यर्थं द्वारमासादयत्यर्थं । निश्चय शेष द्वारेण शकुन्तलानुराग विषयीकरोतीत्यर्थः कुत इति ॥

(२११) मद्दर्शयति । वाचमिति । यद्यपि मद्वचोभि मदुक्तिभि सह वाचं निजोक्ति न मिश्रयति न सह वदतीत्यर्थः । अध्याहार्यं मेतत् । मयि भाषमाणे ध्याहरति इति व्यवहितः पूर्वश्लोकस्थो मनो कर्णं ददाति धारयति मदुक्तावितिशेषः । एव काम प्रकाशे न । काम चानुमतौ कामम । प्रकाशे चाध्यक्षतायां तथानुगमनेऽपि चेत्यव्ययमेकार्थं वर्गं मेदिनी । मदाननस्य मदभिमुखो यतो अभिमुखो मनो भूयिष्ठ बहुकाल व्याप्य न तिष्ठति वर्तते किन्तु अन्या वाक्यादा इति इंङ् अन्यो मदितरो विषयो यस्या या तथोक्ता न अधोमुखीत्यर्थः । अहमतिशक्त आस इत्तनिदम् ॥

(२१२) नेपथ्य इति । तपसो धन तपोधन तस्य धनिश्चितागामवस्थितानां रक्षणार्थं

तुरगखुरहतस्तथाहि रेणु र्विटपविषक्तजलार्द्रवल्कलेषु ।
पतति परिणतारुणप्रकाश श्चलभसमूह इवाश्रमद्रुमेषु ॥ (२१३)

• राजा॥ स्वगतम् ॥ अहो धिक् ममान्वेषिणः सैनिकास्तपोवनमभि
•
स्कन्दन्ति । (२१४)

पुनर्नेपथ्ये ॥ भो भोस्तपस्विनः पर्य्याकुलयन् दृष्ट्वस्त्रीकुमारानेष
राजः प्राप्त । (२१५)

तीव्राघाताद्भिसुखतरस्कन्धभग्नैकदन्त
प्रौढाकृष्टव्रततिवलयासञ्जनाज्जातपाश ।

जन्तूना रक्षणाय त्राणाय । सत्त्वमस्मी तु जन्तुष्वित्यमर । सज्जीभवन्तु उद्युक्ता भवन्तु । प्रत्यासन्न किञ्च निकटवर्ती सम्भाव्यते । वार्त्तासम्भाव्ययो किञ्चेत्यमर । मृग्यन्ते अन्विष्यन्ते जन्तवोऽस्या क्रियायामिति मृगया तया विहरति परिक्रामतीति मृगयाविहारी । विहारस्तु परिक्रम इत्यमर । राजा प्रत्यासन्न इत्यनेन भीतिभीति र्दर्शिता । यथाह । अतिदृष्टि रनादृष्टि श्चलभा मूषिका खगा । प्रत्यासन्नाश्च राजान षड़ेते ईतयः स्मृता इति॥

(२१३) राजप्रतापसक्ति प्रभापयति तुरगेति । हि यस्मात् तथा तया, राजप्रत्यासत्त्या तुरगाणामश्वाना खुरै र्हतश्चलितो रेणु र्धूलि । रेणु र्द्वयो स्त्रिया धूलिरित्यमर । परिणत परिणाम गत सायन्तन इति यावत । योऽरुण सविता स इव प्रकाशत इति तथाभूत पाटलवर्ण इति यावत् । चलभाना पतङ्गाना समूह इव । समौ पतङ्गचलभा वित्यमर । विटपेषु शाखासु विषक्तानि व्यवसक्तानि जलार्द्राणि मुनीनामवगाहनजल स्निग्धितानि वल्कलानि तरुत्वचो येषा ते तथोक्तेषु चाश्रमद्रुमेषु चाश्रमवृक्षेषु पतति । उपद्रवाय समुत्थितानां पतङ्गसङ्घाना पाटलवर्णत्व प्रतीयोक्षतमनकथोऽस्माभि । यत्तभ

समूहसाम्यख्यापनेन रेणूनामीतिविशेषवदाश्रमोपद्रावकत्व सूचितम् । विटपेत्यादि विशेषणेन धूलिसम्पर्कात् वल्कलाना मलिनत्वमेध्यत्वञ्च दर्शितम । यत्नोपमालङ्कार । वृत्त पुष्पिताग्रा नाम दृत्तम । तदुक्त । अयुजि नयुगरेफतो यकारो युजि तु नजौ जरगाश्च पुष्पिताग्रेति । अयुजि विषमे । युजि समे । वृत्तेऽस्मिन् । अस्मिन्नुक्तलक्षणश्च यकारो भादिगुरु पुनरादिलघु र्यं । जो गुरुमध्यगतो रलमध्य सोऽन्तगुरु कथितोऽन्तलघुस्त ॥ गुरवेको गकारस्तु लकारो लघुरेकक इत्यत्रक्त । एवमन्यत्रापूह्यमेयम् ॥

(२१४) राज्ञेति । धिक् मामिति शेष । मिलितहृदयश्वरथपाद त सेना तत्र एक देशभूता सैनिका । सेनाया समवेता ये सैन्यास्ते सैनिकाश्च ते इत्यमर । अभिस्कन्दन्ति पीड़यन्ति ॥

(२१५) पुनरिति । पर्य्याकुलयन् व्यस्तीकुर्वन् ॥

मूर्त्तौ विघ्नस्तपस इव नो भिन्नसारङ्गयूथो
धर्म्मारण्यं विरुजति गजः स्यन्दनालोकभीतः ॥ (२१६)

॥ सर्व्वाः श्रुत्वा ससम्भ्रममुत्तिष्ठन्ति । (२१७)

राजा ॥ स्वगतम् ॥ अहो धिक् कथमपराद्धस्तपस्विनामस्मि भवतुं प्रतिगच्छामि तावत् । (२१८)

सख्यौ ॥ सहाभाग्य हुमिणा हत्थिसम्भमेण पज्जाउला ण्हु ता अणु-जाणीहि णो उडजगमणे । (२१९)

शकु ॥ शकुन्तलां प्रति ॥ हला सउन्तले पज्जाउला भज्जा गोदमी भविस्सदि ता एहि सीघं एकत्था होम्ह । (२२०)

शकु ॥ गतिरोधं रूपयित्वा ॥ हद्धी हद्धी ऊरुम्ह्यविम्भलह्मि संवुत्ता । (२२१)

---

(२१३) सौम्येति । सौम्यादेकान्नादाघातात् अभिमुखस्य सम्मुखीनस्य तरोर्द्वयस्य स्कन्धे प्रकाण्डे भग्न एको दन्तो यस्य सः तथोक्तः । एकेनैव दन्तेनाघातसम्भवादिति भावः । तथा गौढं प्रवृद्धं सातिशयमिति यावत् । प्रवृद्ध गौढमेधितमित्यमरः । यथा स्यात् तथा व्याकृष्टो यो व्रततिपल्लवो लतावल्लयस्तस्याक्षेपणात् सम्बन्धात् जात पाशो बन्धनं यस्य स तथोक्तः । पाश पक्ष्मादिबन्धने इति विश्वः । तथाभिन्न पृथक्कृत सारङ्गाणा हरिणाना यूथ समूहो येन स तथा स्यन्दनमत्र रथस्य व्याकोशेन दर्शनेन भीत । यतोऽत्र स्यन्दनो रथ इत्यमरः । सोऽयमाकं तपसो धर्म्मारण्यस्य मूर्त्तो मूर्त्तिमान् विघ्न इव गजो मत्तकक्षो धर्म्मारण्य विरुजति पीडयति । व्यत्योक्तेत्यलङ्कार । यदुक्तं प्रकाशे । सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यदिति । इदं मन्दाक्रान्ता नाम वृत्तम् ॥

(२१७) सख्यौ इति । समभ्रम सत्वरम् ॥

(२१८) राजेति । धिक् मामिति शेषः । तपस्विनामिति सम्बन्धे षष्ठी । व्यपराद्ध-मपराधं । भवतु इति शेषः । प्रतिगच्छामि स्वस्थानं गच्छामि ॥

(२१८) सहेत्यादि । सहाभाग्य स्वनेन हस्तिसम्भ्रमेण पर्य्याकुला व्यग्रानुज्ञानीहि मा उटजगमने । हस्तिसम्भ्रमेण हस्तिसंवेगेन । सखी स संवेगसम्भ्रमावि-लासरः । पर्य्याकुला व्यग्रा । अनुजानीहि अनुमन्यस्व । मा अस्मान् ॥

(२२०) अनेति । शकुन्तलां प्रति शकुन्तलानुसरमनोक्ये तार्थः । हलेत्यादि । अयि शकुन्तले पर्य्याकुला व्याप्ता गौतमी भविष्यति तदेहि गौतमेकत्या भवाम । पर्य्याकुला व्यग्रहृदयादनुज्ञा । गौतमी कण्वस्य धर्मपत्नीयमी । एकत्रा मिलिता ॥

(२२१) हद्धीति । संतरोधं मनो प्रतिबन्धं रूपयित्वा मत्वा । हद्धीत्यादि ।

राजा ॥ सैरं सैरं गच्छन्तु भवत्य । आश्रमबाधा यथा न भवति तथाहमपि यतिष्ये । (२२)

सख्यौ ॥ महाभाग विदितभूयिष्ठोसि सम्पद उपचारमधुरत्वादस्मासु तन्मरिसेहि असम्भाविदसक्कारं भूयोवि पच्चवेक्खणणिमित्तं पज्जं विण्णवेम्ह । (२३)

राजा ॥ मा मैव, दर्शनेनैव भवतोना सम्भूतसत्कारोऽस्मि । (२२४)

शकु ॥ हला अणसूए अभिणवकुससूइपरिक्खदं मे चलणं, कुरुवत्तसाहापरिलग्गञ्च वक्कलं, दाव पडिपालेध म जाव ण मोआदेमि ।

इति राजानमवलोकयन्ती सव्याज विलम्ब्य सह सखीभ्यां निष्क्रान्ता ॥ (२५)

राजा ॥ निश्चम्य ॥ गता. सर्व्वाः भवत्वहमपि गच्छामि । शकुन्तला-

---

हा धिक् हा धिक् जरत्तम्भविह्वलाक्षि सष्टत्ता । हाधिकशब्दाभ्या सन्तप्तते प्रतिबन्धाद् विषादात्मनिर्भर्त्सने द्योत्येते । जरत्तम्भविह्वला जर्यो. स्तम्भो स्तैर्य्येण विह्वला विक्लाचेता ॥

(२२२) राजेति । सैरं सैरं मन्द मन्द यथनमतित्वरयेति भाव । मन्दमच्छन्दयो सैरमित्यमर । आश्रमबाधा व्याश्रमपीडा । पीडा बाधा व्यथा दु खमित्यमर । यतिष्ये यत्न करिष्ये ॥

(२२३) सख्याविति । महेत्यादि । महाभाग विदितभूयिष्ठोऽसि सम्यगसुपचार मध्यस्थतया व्यपराद्धा क्व तन्मर्षय व्यसम्भावितसत्कार भूयोऽपि प्रत्यवेक्षणनिमित्तमार्य्य विज्ञापयाम । विदित भूयिष्ठ बहुशो येन स विदितभूयिष्ठ विदिताशेषाकारेङ्गितादि । साम्प्रतमिदानीमुपचारेषु सत्कारेषु मध्यस्थतया औदासीन्येन हेतुना वयमपराद्धा स्मताप राधा क्व तन्मर्षय क्षमस्व । व्यसम्भावितोऽलब्ध सत्कार सपर्या यस्य स तथोक्तमाद्य भूयोऽपि पुनरपि प्रत्यवेक्षणनिमित्त दर्शनार्थं विज्ञापयामो निवदयाम ॥

(२२४) राजेति । एव मा मा नहि नहि । सम्भूतसत्कारो जातसत्कार ॥

(२२५) शकु इति । हलेत्यादि । व्यथि जनसूये अभिनवकुशसूचिपरिक्षत मे चरण कुरुवकशाखापरिलग्नञ्च वल्कल तावत् प्रतिपालयत मा यावदेन मोचयामि । अभि नवस्य कुशस्य सूच्या शिख्यया परिक्षत विद्धम । सूचिर्न त्वग्रभेदे च व्यधनीशिखयोरपीति रत्नकोष । कुरुवकस्तरुविशेष तस्य शाखाया परिलग्नमतिशयेन लग्नम । प्रतिपालयत प्रतीक्षेथाम । एन वल्कलम । मोचयामि व्यपसारयामि । सव्याज सकपटम । कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे इत्यमर ।

दर्शनादेव मन्दौत्सुक्योऽस्मि नगरगमनं प्रति यावदनुयात्रिकानतिदूरे तपोवनस्य निवेशयामि न खलु शक्तोऽस्मि शकुन्तलादर्शनव्यापारादात्मानं निवर्तयितुम् । मम हि । (२२६)

गच्छति पुरः शरीरं धावति पश्चादसंस्थितं चेतः ।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥ (२२७)

इति निष्क्रान्ता सर्वे ।

प्रथमोऽङ्कः । (२२८)

---

(२२६) राजेति । निश्वस्य दीर्घमिति शेषः । मन्दौत्सुक्य अल्पोद्योग । मूढात्मापटुर्निर्भाग्या मन्द इति हलायुधः उत्सुक इति चामरः । नगरगमन राजधानीं प्रतिगमनम् । अनुयात्रिकानुगामिनः सैनिकान् । वारादूर्वमिति विकल्पात् तपोवनस्यातिदूर इति न पञ्चमी । निवेशयामि संस्थापयामि । न खलु न तु । शक्त समर्थः । शकुन्तलादर्शनव्यापारादिति यतो वारणमित्यपादाने पञ्चमी । आत्मान हृदयम । आत्मा देहमनोबुद्धिस्वभावधृतिषु विष्विति विश्वः । निवर्तयितु तस्मात् प्रवृत्तिं विघातयितुम । तत्र हेतुमाह मम हीति ॥

(२२७) गच्छतीति । मम शरीरं पुरो अग्रतो गच्छति । व्या पुर पुरोऽव्यय इत्यमरः । असंस्थित चञ्चलम् । संस्था व्यवस्थितिरित्यमरः । चेतो मन पश्चात् धावति शकुन्तलालोकोत्पत्त्यादिति भावः । अत्र किमिवेत्युपमामाह चीनेत्यादि । प्रतिवात वायौ प्रतिकूल नीयमानस्य केतो ध्वजस्य चीनांशुक चीनदेशोद्भव सूक्ष्मवस्त्रमिति यावत् वस्त्रमिव । तद्वद यथा असंस्थित पश्चाद् धावति तथेत्यर्थः । अत्रोपमालङ्कारः । यदुक्त चन्द्रालोके । उपमा यत्र साङ्गल्यलक्ष्मोल्लसति द्वयोरिति । इयमार्या जाति ॥

(२२८) इतीति । इति एव रूपे । सर्वं सदा । अङ्क परिच्छेद । अङ्क स्वामेऽन्तिके मन्तौ रूपकोत्सङ्गलक्षणे । नाटकादिपरिच्छेदे चिह्नयुक्ते च भूयस्य इति विश्वः ॥

इति श्रीलक्ष्मणमायमखीन्द्रतायामभिज्ञानशाकुन्तलटीकायां प्रवेशिकाख्याया प्रथमाङ्कविवरणम् ॥

द्वितीयोऽङ्कः ।

ततः प्रविशति विदूषकः (१)

विदू ॥ निष्क्रम्य ॥ भो हदोऽस्मि एदस्स मिअआसीलस्स रण्णो वअस्स-भावेण णिव्विण्णो अअं मिओ अअं वराहो अअ सद्दूलो त्ति, मज्झन्दिणे वि गिम्हे विरलपादवच्छाआसु वणराईसु आहिण्डअ पत्तसङ्करकसाअ-विरसाइं उम्मूकडुआइं पिज्जन्ति गिरिणईउलिलाइं, अणिअदवेलञ्च उम्मोसमसभूदटठं भुञ्जीअदि, तुरअगआणाञ्च सद्देण रत्तिं पि मे णत्थि पकामसुइदव्वं मइन्ते ज्जेव भञ्जुसे दासीए पुत्तेहिं साउणिअलुद्धेहि कणोवघादिणा वणगमणकोलाहलेण पडिबोधिदोम्हि, एत्तिकेण वि मे पीडा ण सवुत्ता जदो अअं गण्डस्स उवरि विप्फोडओ सवुत्तो तेण हि किल अम्हेसु अवहीणेसुं तत्थभवदा मिआणुसारिणा अम्हमपद पवि-ट्ठेण मम अधम्मदाए सउन्तला णाम काचि तवस्सिकण्णआ दिट्ठा तं पेक्खिअ सम्पदं णअरगमणस्स कथम्पि ण करेदि एव ज्जेव चिन्त अन्तस्स मे पच्चादा अच्छिदुं रण्णो का गदी जाव ण किदआरपरिग्गहं पिअवअस्सं पेक्खामि । (२)

---

(१) तत इति । विदूषक इङ्गारसहायविशेष । तथाच । इङ्गारस्य सहाया विटचेटविदूषकाद्या एव । भक्ता नर्म्मसु निपुणा सुपिलवधूमानभञ्जना इहा इति । तल्लक्षणमाह । [अनुभवस्मरणाद्यभिध कर्म्मभपूर्वेयभावाद्यै । हास्यकर कलहरति विदूषक स्मात् सङ्कीर्णा इति ॥

(२) विदू इति । निष्क्रम्य दीर्घमिति शेष । भो इत्यादि । भो इतोऽस्मि एतस्य मृगयाशीलस्य राज्ञो वयस्यभावेन निर्विण्ण अय मृगो अय वराहो अय शार्दूल इति मध्यन्दिनेऽपि ग्रीष्मे विरलपादपच्छायासु वनराजिषु आहिण्डता पत्रसङ्करकषायविरसानि उष्णकटुकानि पीयन्ते गिरिनदीसलिलानि अनियतवेलञ्च उत्कोचकाभ्यधिक भुज्यत

परिक्रम्यावलोक्य च ॥ एसो वाणासणहत्थो हिअआणिच्छिदपिअअणो वणमुपक्कमालाहारी इदो ज्जेव आअच्छदि पिअवअस्सो, ओदु अङ्गभङ्ग-

---

तुरगगजानाञ्च गन्धेन रात्रावपि मे नास्ति प्रकामशयितव्यं मदृत्येव प्रत्यूषे दास्याः पुत्रैः शाकुनिकलुब्धैः कर्णोपघातिना वनगमनकोलाहलेन प्रतिबोधितोऽस्मि, एतावतापि मे पीडा न संवृत्ता यतोऽयं गण्डस्योपरि विस्फोटकः संवृत्तः तेन हि किल व्रणमात्रं व्यवक्षीनेषु तत्प्रभवता मृगानुसारिणा आयुष्मता प्रविष्टेन समाधन्यतया शकुन्तला नाम कापि तपस्वि-कन्यका दृष्टा तां प्रेक्ष्य साम्प्रतं नगरगमनस्य कथामपि न करोति एवमेव चिन्तयतो मे प्रभाता व्यक्षिपु रजनी का गतिरियतीं वेलां हृदयपरिग्रहं प्रियवयसं प्रेक्ष्ये । भो इति व्यनधिकारामन्त्रणम् । वयस्यभावेन सवयस्कतया । वयस्यः स्निग्धः सवया इत्यमरः । निर्विष्णो दुःखितः व्यय मृगोऽयं वराह इत्यादि दर्शयन्निति शेषः । मध्यन्दिने मध्याह्ने । समा-सेऽपि व्यभिधानाद् विभक्तेरलुक् । घोषे घोषसमये । विरलाः सान्तराः पादपानां छाया यासु तासु वनराजिषु वनश्रेणीषु । वीच्यालिरावलिः पङ्क्तिश्रेणीलेखास्तु राजय इत्य-मरः । व्याहिण्डन्त्र सञ्चर्य । आङ्पूर्वस्य हिडिङ गतावित्यस्य रूपं । पत्राणां सङ्घरेण विविधजातीनां पत्राणामेकत्र समवायेन । सङ्घरोऽग्निचटत्कारे क्लिन्नधूल्याधिकेषु च । सम्माज्जन्यां विरुद्धानामेकाधिकरणस्थिताविति शब्दाब्धिः । कषायाणि लोहितानि । निर्यासेऽपि कषायोऽथ सुरभौ लोहितेऽन्यवदिति विश्वः । तथा उष्णानि च तानि कटु-क्षा-रूपकटूनि चेति उष्णकटुकानि गिरेः पर्वतस्य मद्या निर्झरस्य सलिलानि तोयानि पीयन्ते । व्यनियता नियमरहिता वेला समयो यत्र तत् यथा स्यात् तथा । क्वचित् पूर्वाह्णे क्वचिन्मध्याह्ने क्वचिदपराह्णे इति यावत् । उष्णोष्णमत्यन्तोष्णं मांसमेव भूयिष्ठमन्यस्माद् भोजनीयादधिकतरं यत्र तत् भुज्यते च । प्रकामशयितव्यं यथेप्सितशयितव्यम् । कामं प्रकामं पर्याप्तं निकामेष्ट यथेप्सितमित्यमरः । मदृत्येव प्रत्यूषे कृतघ्नस्येव । दास्याः पुत्रैर्नीचैः । शकुनान् पक्षिणो हिंसन्ति ये ते शाकुनिकाः । शकुनिपक्षिशकुनिशकुन-शकुनद्विजा इत्यमरः । लुब्धा मृगवधाजीवाः । व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि स इत्यमरः । तैश्च ते च तैः शाकुनिकलुब्धैः । कर्णोपघातिना श्रुतिकटुना । प्रति-बोधितोऽस्मि जागरितोऽस्मि । एतावता हेतुना । पीडा दुःखम् । संवृत्ता समतीता । दृश्यं पद्ये चरित्रे त्रिष्वतीते दृष्टनिष्टले इत्यमरः । यदि दुःखं न समतीतं तदा किमर्थमिष्यमित्यत आह मत इति । व्रणं वक्ष्यमाणोऽर्थः । गण्डस्य व्रणस्य एतेन दुःखधारात्वं दर्शितम् । तमर्थं प्रकाशयति तेन हीति । किल श्रुतवार्तायाम् । व्यव-क्षीनेषु पश्चात्पतितेषु । व्यधन्यतया व्यपुण्यवत्तया । सुकृती पुण्यवान् धन्य इत्यमरः । कथां जल्पनम् । व्यक्षिषु व्यक्षिव्यापारेषु सत्विति शेषः । जाग्रदवस्थायामित्यर्थः । का गतिः क उपायः । गतिः स्त्री मार्गदशयो र्ज्ञाने यात्राभ्युपाययोरिति मेदिनी । हृतहृदयपरिग्रहं हृतविवाहम् ॥

विमलो भविअ चिट्ठिस्सं एवम्पि णाम विस्सामं लहेमं ॥ इति दण्डकाष्ठ-मवलम्ब्य स्थित । (३)

॥ तत प्रविशति यथानिर्दिष्टो राजा । (४)

राजा ॥ आत्मगतम् । (५)

कामं प्रिया न सुलभा, मनस्तु तद्भावदर्शनाश्वासि ।
अकृतार्थेऽपि मनसिजे, रतिमुभयप्रार्थना कुरुते ॥ (६)

स्मित कृत्वा ॥ एवमात्माभिप्रायसम्भावितेष्टजनचित्तवृत्ति प्रार्थयिता विप्रलभ्यते । कुतः । (७)

स्निग्ध वीक्षितमन्यतोऽपि नयने यत् प्रेरयन्त्या तया
यातं यच्च नितम्बयो र्गुरुतया मन्दं विलासादिव ।

---

(३) परीति । परिक्रम्य इतस्तत सञ्चर्य । एसो इत्यादि । एष बाणासनहस्तो हृदयनिहितप्रियजनो वनपुष्पमालाधारी इत एवागच्छति प्रियवयस्य । भवतु व्यङ्गभङ्गविकलो भूत्वा स्थास्यामि । एवमपि नाम विश्राम लभेय । बाणासनहस्तो धनुर्हस्त । हृदयेति । हृदये मनसि निहितो न्यस्त प्रियजन प्रणयिजनो येन स तथोक्त प्रियोत्कण्ठित इत्यर्थ । वनेति । एतस्य स्मरज्वरनिवारणहेतुत्वात विरुद्धावस्था प्रकाशने व्यर्थो हेतुगर्भविशेषण-मेतत् । व्यङ्गेति । व्यङ्गानां भङ्गेन वक्रतया विकल स्खलितेन्द्रिय । एवमपि इत्थ प्रकारेणापि । नाम सम्भाव्ये यदीत्यर्थ । विश्राम दृगयाव्यापारादिति शेष । लभेय प्राप्नुयाम् । दण्डकाष्ठ दारुमययष्टिम् । अवलम्ब्य धृत्वा ॥

(४) तत इति । यथानिर्दिष्टो वनपुष्पमालाधारी वैमनस्यप्रकाशी चेत्यर्थ ॥

(५) राजेति । स्निग्ध वीक्षितमिति श्लोकान्त्यवाक्यानां कर्तृपदमेतत ॥

(६) काममिति । प्रिया शकुन्तला काम पर्याप्त न सुलभा नातिसुलभेत्यर्थ । मनो हृदयन्तु तथा प्रियाया भावस्याभिप्रायस्य दर्शनमास्वसितीति भावदर्शनाश्वासि । भाव सत्तास्वभावाभिप्रायचेष्टासु चेत्यमर । तथा मनसिजे कामे अकृतार्थे अकृतप्रयोजनेऽपि उभयो प्रियाया मम च प्रार्थना रतिं कुरुते जनयति । अत्र कामापरितार्थतायां रत्यु-त्पादनमित्यापाततो विरुद्धतया भासमानत्वाद् विरोधालङ्कार । यदुक्त प्रकाशे । विरोध सोऽविरोधेऽपि विरुद्धत्वेन यद्वच रति । सुरतार्थं तया विरोध, व्यतुरागार्थं तया परि हार । रति स्त्री स्वदारेषु रागे सुरतगुह्ययोरिति मेदिनी । इयमार्या ॥

(७) स्मितमिति । स्मित कृत्वा भावविशेषलेशमङ्गीकृत्य शकुन्तलाकृतप्रार्थनामात्मना मेवाकिञ्चित्करं तदपि पुन परमार्थं मन्यमानो व्याहरामीति विचिन्त्य मन्द हसित्वा । राजेति पूर्वेण सम्बन्ध । मनोगतमिदानीं प्रकाशयति यत्नमिति । व्याजस्योऽभिप्राये-

मागा दूतुअपरुद्धया यदपि तत् साक्रूयमुक्ता सखी
सर्व्वं तत् किल मत्परायणमहो कामं स्वतां पश्यति ॥ (८)

विदू॥ तथास्थित एव॥ भो महाराज्ञ ण मे हत्थो पसरदि ता वाआ मेत्तेण जआवेहि जआदु जआदु भवं । (९)

राजा॥ विलोक्य सस्मितम्॥ कुतोऽयं गात्रोपघातः । (१०)

विदू॥ कधं कुदो त्ति मज्झ ज्जेव अच्छि भङ्गिअ णच्चसि कारणं पुच्छसि । (११)

णायत्येन सम्भाविता निश्चिता दृष्टजनस्य अभिलषितजनस्य चित्तवृत्ति र्मनोरथो येन स तथा भूत प्रार्थयिता कामयिता जन एव माहशो भूत्वा विप्रलभ्यते वञ्चितो भवति । तदभिलाषस्य स्वमन कल्पितत्वेन वस्तुतस्तदभिलाषाभावात् दुतरामलब्धसमागमो भवतीति भाव । तस्या चित्तवृत्ति निजाभिप्रायमात्रसम्भाविता इति दर्शयितुमाह कुत इति ॥

(८) स्निग्धमिति । चन्द्रत चन्द्रकान्तमपि दिवि सदने अक्षिणी मे रयन्त्या पाययन्त्या तया मकुलितया यत स्निग्ध सप्रणय वीक्षित दृष्टम । तया नितम्बयो कटत्रा पश्चाद्भागयो र्गुरुतया भारवत्तया । पश्चात्रितम्ब स्त्रीकटत्रा दमर । विलासात् यत्नभावोकनकृतभाव विशेषादिव । तदुक्तम । तात्कालिको विशेषस्तु विलासोऽङ्गक्रियादिष्विति । तात्कालिको दयितावोकनादिमव । मन्द मृदु यथा स्यात तथा यत्र यात गतम् । तथा मागा न गच्छ इति एवमुक्ता उपरुद्धया प्रियवदानिवारितया तया सखी प्रियवदा साक्रूय दोषाविष्कार वहित तत् किमिति न गमिष्यामीति सभ्रूभङ्गवाक्य यदपि उक्ता अभिहिता तत् सर्व्व मत्परायण मदाश्रय किल मदाश्रयमेव सम्भावयामि इत्यर्थ । परायणमभीक्ष्णे स्यात् तत्परा श्रययोरपीति मेदिनी । अहो कामोऽभिलाष स्वतामन्योऽन्यानामपि क्रियाणामात्मीयता पश्यति । उक्त हि । शेषप्रस्थापने स्निग्धे वीक्षिते मृदुभाषिते । दूतीसम्प्रेषणे नार्य्या भावाभिव्यक्तिरिष्यत इति ॥

(९) विदू इति । तथास्थितो दण्डकाष्ठमवलम्ब्य स्थित । भो इत्यादि । भो महाराज न मे हस्त प्रसरति तद् वाचामात्रेण जाप्यसे । जयति जयति भवान् । प्रसरति प्रचलति । वाचामात्रेण न हस्तोऽमेनेत्यर्थ । जाप्यसे जयाय प्रेर्य्यसे ॥

(१०) राजेति । गात्रोपघातो गात्रपीड़ा ॥

(११) विदू इति । कथमित्यादि । कथ कुत इति । स्वयमेवाक्षि भङ्क्त्वा अभ्युत्कारेण पृच्छसि । कथमिति पृच्छसीति शेष । भङ्क्त्वा पीडयित्वा । तथा च भवतैव जनितमेतत्कारण तत् कथ कुत इति पृच्छसीति भाव ॥

राजा ॥ न खल्वगच्छामि भिन्नार्थमभिधीयताम् । (१२)

विदू ॥ जं वेदसो खुज्जस्स लीलं विडम्बइ दि तं किं अत्तणो पहावेण आहवा णईवेअस्स । (१३)

राजा ॥ नदीवेगस्तत्र कारणम् । (१४)

विदू ॥ ममावि भवं । (१५)

राजा ॥ कथमिव । (१६)

विदू ॥ जुत्तं णाम एव्व जं तुए रज्जकज्जाइ उज्झिअ तादिसं अक्खलिदपदं पदेस च वणचलवित्तिणा होदव्वं त्ति, किं एत्थ मन्तीअदु, अह उण बम्हणो पच्चहं सापदाणुसरणेहिं सक्खोड्डिदसन्धिबन्धणाणं अत्तणो अङ्गाणं अणीसोड्ढि ता पसीद मे एक्काहम्मि दाव विस्समीअदु । (१७)

---

(१२) राजेति । भिन्नं वक्तादितर अर्थस्तात्पर्यं यस्य तत् तथोक्तं वाक्यमभिधीयतामुच्यताम् ॥

(१३) विदूषकेति । जमित्यादि । यदु वेतस कुब्जस्य लीला विडम्बयति तत किमात्मन प्रभावेण अथवा नदीवेगस्य । वेतसो वानीर । सरिदभ्यन्तरूढ इति शेष । कुब्जस्य कुब्जस्य लीला क्रियाम् । लीला विलासक्रिययोरित्यमर । यद् विडम्बयति नदीवेगवशात् तिरश्चीन तया यदनुकरोति । तत् वक्रीभावेन कुब्जलीलाविडम्बनम् । प्रभावेण शक्त्या । नदीवेगस्य प्रभावेणेति सम्बन्ध । प्रभाव शक्तितेजसोरिति विश्व ॥

(१४) राजेति । तत्र वेतसस्य कुब्जलीलाविडम्बने ॥

(१५) विदूषकेति । ममेत्यादि । ममापि भवान् । भवान् कारणमित्यनुषङ्ग ॥

(१६) राजेति । सुगमम्

(१७) विदूषकेति जुत्तमित्यादि । युक्त नामैव यत् त्वया राज्यकार्य्यमुज्झित्वा तादृशमस्खलितपद प्रदेशञ्च वनचरहस्तिना भवितव्यमिति । किमत्र मन्त्र्यताम् अथ पुन ब्राह्मण प्रत्यह श्वापदानुसरणै स्खोड्डितसन्धिबन्धनानामात्मनोऽङ्गाना-मनीशोऽस्मि तत् प्रसीद मे एकाहमपि तावद् विश्रम्यताम् । राज्यकार्य्याणि प्रजापालना दीनि अस्खलितपद चिरागतराजत्व तादृशमदेश वनगरञ्च उज्झित्वा त्यक्त्वा त्वया वनचरस्य व्याधादेरिव इति मृगयादिरूप व्याजोऽयो यस्य स यथोक्तेन यदु भवितव्यम । विपूर्व भविना भवितव्यमितिवद् भावे तव्य । इत्येव तथाभूतत्व नाम युक्तम । नाम सम्भाव्ये । अत्र विषये किं मन्त्र्यतामनुपदिश्यता यथेति शेष । स प्रसीदेति । अ किमपुनरेवमिति

राजा ॥ आत्मगतम् ॥ अयमेवमाह, समापि कण्वसुतामनुस्मृत्य मृगया प्रति निरुत्सुकं चेतः । तथाहि । (१८)

न नमयितुमधिज्यमुत्सहिष्ये धनुरिदमाहितसायकं मृगेषु ।
सहवसतिमुपेत्य यै. प्रियायाः कृत इव लोचनकान्तिमविभाग ॥ (१९)

विदू ॥ राज्ञो मुखमालोक्य ॥ अत्त भव किमिमं हिअए कदुअ मन्तेदि आरण्णे करुं मए रुदिद । (२०)

राजा ॥ सस्मितम ॥ अनतिक्रमणीयं सुहृद्वाक्यमिति स्थितोऽस्मि ।(२१)

भाव । अथ पुनरहं तु ब्राह्मण प्रत्यह मतिदिन मागदानात् हि स्वपश्चूनाम । मागदो ना हि स्वपचाविति यद्धाभि । अनुसरणैरनुगमन कर्तृभूतै स क्षोभितानि सञ्चालितानि सन्धिबन्धनानि यन्थीना बन्धनानि येषा तानि तथोक्तानि चात्मनोऽङ्गानामनीयत्वालिना-ज्जनोऽस्मि । तत् तस्मात् । प्रसीद प्रसन्नो भव । एकाहमिति देशाध्वश्रमेति कर्मत्वम । विश्रम्यतां त्वयेति शेष । भावे क्तिभक्तिः । विस्समिदुमिति पाठे विश्रमितु प्रसीदेत्यन्वय ॥

(१८) राजेति । अथ प्रियायास्य । आह ब्रवीति । कण्वसुता शकुन्तलाम । निरुत्सुकमनुद्युक्तम ॥

(१९) न नमयितुमिति । इदमधिज्यं ज्या गुणमधिकृत्य वर्त्तमान ज्यायुक्तमित्यर्थ । आहित सयोजित सायक शरो यत्र तत तथोक्तम । शरे खड्गे च सायक इतरत्र । अत मृगेषु विषयेषु नमयितु गुणाकर्षणेन वक्रीकर्तुं न उत्सहिष्ये उत्साहं न करिष्यामि । अत्रोद्देश्यविधेयभावेन मृगान हेतुगर्भं विशिनष्टि सहेतरादि । यै मृगै सहवसतिं सह वासम् । वसति स्यात स्त्रियां वासे यामिन्याञ्च निकेतन इति मेदिनी । उपेत्र प्राप्य प्रियाया शकुन्तलाया लोचनयो र्नेत्रयो कान्ते शोभाया स विभागो विभज्य स्वीकार कृत इव तेषु मृगेष्वित्यर्थ । तथाच प्रियालोचनकान्तिजुष पर सादरमेव दृष्टव्या न हन्तव्या इतिभाव । अत्रोत्प्रेक्षालङ्कार । पुष्पितायां नाम वृत्तमिदम । लक्षणन्तूक्तम ॥

(२०) विदूषकेति । अयमेतत्रादि । अत्र भवान् किमपि हृदये कृत्वा मन्त्रयते अरण्ये वयन मया रुदितम । किमपि अनिर्वचनीयम । हृदये कृत्वा चिन्तयित्वा । मन्त्रयते अभीष्ट व्याहरति । अरण्ये इति । तथाच सहचनमरण्यरोदनञ्च किमपि मनाश्वासन-प्रतिवचनमाप्नोतीति भाव ॥

(२१) राजेति । अनतिक्रमणीयमलङ्घनीयम । इति अतो हेतो । स्थितोऽस्मि मृगयायै गमनाद्विरतोऽस्मि ॥

विदू॥ सपरितोषम्॥ तेण हि तुमं चिरं जीव॥ इत्युत्थातुमिच्छति। (२२)

राजा॥ तिष्ठ शृणु मे सावशेषं वचः। (२३)

विदू॥ आणवेदु भवं। (२४)

राजा॥ विश्रान्तेन भवता समान्यस्मिन्नलायासे कर्मणि सहायेन भवितव्यम्। (२५)

विदू॥ किं मोदअखड्डिआए। (२६)

राजा॥ यद् वक्ष्यामि। (२७)

विदू॥ गहीदो क्खणो। (२८)

राजा॥ क्व कोऽत्र भोः। (२९)

द्वौवारिक प्रविश्य॥ आणवेदु भट्टा। (३०)

राजा॥ रैवतक। सेनापतिस्तावदाह्वयताम्। (३१)

---

(२२) विदूषक इति। सपरितोषम् सन्तोषम्। तेणेत्यादि। तेन हि त्वं चिरं जीव। तेन हेतुना। इति उक्त्वेति शेषः। इच्छति उपक्रमते॥

(२३) राजेति। शृणु मे वच इत्येतावन्मात्रोक्तौ सत्यं यदुक्तमिति प्रत्युक्ते सन्मा ख्याह सावशेषमिति। सावशेषं शेषपर्यन्तम्॥

(२४) विदूषक इति। आणवेत्यादि। आज्ञापयतु भवान्॥

(२५) राजेति। विश्रान्तेन कृतयाव्यापारात् लब्धविश्रामेण। अन्यस्मिन् कृतवे-तरस्मिन्। व्यवसायसाध्ये सुकरे॥

(२६) विदूषक इति। किमित्यादि। किं मोदकखाद्दिकायाम्। खाद्दिका खादनम्। लड्डो कभाव इत्यत्रेत्यत्यन्तापि प्रयोगात् इत्यत्रेति भावे अक। स्तृप इति स्तृञ् इत्यस्य विकीर्णे यस्य मोदकेति ज्ञापकात् स च स्त्रियां वक्तव्य॥

(२७) राजेति। यद् वक्ष्यामि तत्रेति शेषः॥

(२८) विदूषक इति। गहीत्यादि। गृहीत क्षण। क्षणो निर्व्यापारस्थितिः। निर्व्यापारस्थितौ कालविशेषोत्सुक्यो क्षण इत्यमरः। गृहीतोऽवलम्बित। नोत्थास्यामि न यास्यदपि किमपि करिष्यामीति भावः। गृहीत प्रतीक्षित क्षण समय इत्यर्थे॥

(२९) राजेति। भो अत्र क्व कस्मिन् वर्तते इति शेषः॥

(३०) द्वौवारिक इति। द्वारे नियुक्तो द्वौवारिकः। दृचे कादिति ष्ठिक। द्वार-स्येति षष्ठ्यर्थस्य समासः। ष्ठिक्ते ठिरिति ठस्य इः। आणवेत्यादि। आज्ञापयतु भर्ता॥

(३१) राजेति। रैवतक इति द्वौवारिकनामधेयम्॥

दोवा ॥ तह ॥ इति निष्क्रम्य सेनापतिना सह प्रविश्य ॥ एदु एदु अज्जो, एस आलाविद्धमअग्गो भट्टा दूध ज्जेव चिट्ठदि उवसप्पदु णं अज्जो । (२२)

सेना ॥ राजानमवलोक्य स्वगतम् ॥ दृष्टदोषापि दृगया स्वामिनि केवलं गुणायैव संवृत्ता । तथाहि देवः । (२३)

अनवरतधनुर्ज्यास्फालनक्रूरकर्मा
रविकिरणसहिष्णुः स्वेदलेशैरभिन्नः ।
अपचितमपि गात्रं व्यायतत्वादलक्ष्यं
गिरिचर इव नागः प्राणसारं बिभर्त्ति ॥ (२४)

जयजय ॥ जयति जयति स्वामी । स्वामिन् गृहीतमृगप्रचारं सूचितवराहदंष्ट्रं तत् किमन्यदनुष्ठीयताम् । (२५)

राजा ॥ भद्रसेन ! भग्नोत्साहः कृतोऽस्मि मृगयापवादिना माधव्येन । (३६)

सेना ॥ जनान्तिकम् ॥ सखे माधव्य स्थिरप्रतिज्ञो भव अद्य तावत् स्वामिनश्चित्तमनुवर्त्तिष्ये । (३७)

प्रकाशम् ॥ देव प्रलपत्येष वैधेयः ननु प्रभुरेव निदर्शनम् । पश्यतु देवः । (३८)

मेदश्छेदकृशोदरं लघु भवत्युत्साहयोग्यं वपुः
सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः ।
उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले
मिथ्या हि व्यसनं वदन्ति मृगयामीदृग् विनोदः कुतः ॥(३९)

मापिता आपदा हि सज्जन्तवो येन तत् तयोक्तम् । भवतीति शेषः । तत् तस्मात् त्वयैव मृगयाप्रस्थानेऽपरत् किमनुष्ठीयतां क्रियताम् । प्रश्ने लो । त्वयाभिरिति शेषः ॥

(३६) राजेति । भद्रसेनेति नाम । मृगयापवादिना मृगयानिन्दकेन । त्वर्णा षेपनिर्भर्त्सनपरीवादापवादवत् । उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणम् इत्यमरः । माधव्येन तन्नाम्ना प्रियवयस्येन ॥

(३७) सेनेति । जनान्तिकं राज्ञोऽप्रकाशम् । स्थिरप्रतिज्ञो मृगयानिषेधे दृढाध्यवसाय । त्वनुवर्त्तिष्ये त्वनुचरिष्यामि । चित्तमस्य कीदृगित्यनुभविष्यामीति भावः ॥

(३८) प्रकाशमिति । राज्ञ इति शेषः । प्रलपति त्वनर्थकं वक्ति । प्रलापोऽनर्थकं वचः इत्यमरः । वैधेयो मूर्खः । त्वज्ञे मूढयथाजातमूर्खवैधेयवालिशाः इत्यमरः । प्रभुर्भवान् । निदर्शनं दृष्टान्तः ॥

(३९) मेद इति । वपुः शरीरं मेदसो देहस्थौल्यकरधातुविशेषस्य छेदेन खण्डनेन व्यपगमेनेति यावत् । कृश क्षीणसुदरं यत्र तत् । तदुक्तं भावप्रकाशे । व्यायामदिवास्वप्नेऽन्नाहारेऽधिक । मधुरोऽम्लरसं प्रायः श्लेष्मान्मेदो विवर्द्धयेदिति । त्वन्यस्य तत्रैव । मेदो हि सर्वजन्तूनामुदरेष्वधिकं स्थितम् । त्वतएवोदरे दृष्टि प्रायो मेदस्विनो भवेदिति । त्वतएव लघु विगतभारं सद् उत्साहयोग्यं भवति । एतेनाहवेषु निरालसभावसम्भावना दर्शिता । त्वपि एवं सत्त्वानां जन्तूनां भयक्रोधयो र्भये क्रोधे च विकृतिमत् प्राप्तविकारं चित्तं लक्ष्यते त्वनुभूयते । एतेन युध्यमानस्य रिपो र्विकारदृष्ट्या भीतिः क्रोधो वेति निश्चयशक्तता सूचिता । एवं चले जङ्गमे लक्ष्ये मरुष्ये इषवो बाणा यत् सिध्यन्ति सफला भवन्ति धन्विनां धनुष्मताम् । धन्वी धनुष्मान् धानुष्क इत्यमरः । स च त्वत्कर्षो

विदू॥ परोक्षम्॥ अवेहि रे उच्छाअहेदुअ। अत्तभवं पढमं आवस्सो, तुमं दाव दासीए पुत्तो अडइदो अडइं आहिण्डन्तो जाव सिआल-सिंघलोलुअस्स कस्स वि जिमरिच्छस्स मुहे णिवडिदो होहि। (४०)

राजा॥ सेनापते आश्रमसन्निकर्षं स्थितोऽस्मीति वचनं ते नाभि-नन्दामि। अद्य तावत्। (४१)

गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु।
विश्रब्धैः क्रियतां वराहपतिभिर्मुस्ताघतिः पल्वले
विश्रामं लभतामिदञ्च शिथिलज्याबन्धमस्मद्धनुः॥ (४२)

मैपुण्यम्। एतेन मरविषयेऽकौशलं दर्शितम्। यतो मिथ्या हि वितथमेव मृगया व्यसन व्यसनगणान्मूलं वदन्ति मन्वादय इति शेषः। कुतः कथाद् व्यापारादीदृग विनोद एवमानन्दं न कुतोऽपीत्यर्थः। स्थिरधारण्ये। स्थिरे चेतावधारण इत्यमरः। व्यसना-त्याद्य भवतु। कामजेषु प्रसक्तो हि व्यसनेषु पक्षीयति। वियुज्यतेऽर्थधर्माभ्यां क्रोध जेषात्मवान्नृपः। मृगयाशो दिवास्वप्न परीवादः स्त्रियो मद। तौर्यत्रिक वृथाटा च कामजो दशको गणः। पैशुन्य साहस द्रोह ईर्ष्यासूयार्थ दूषणम। वाग्दण्डजञ्च पारुष्य क्रोधजोऽपि गणोऽष्टक इति। इत्यमिदं गार्हस्थ्यविक्रीडितं नाम॥

(४०) विदूषकेति। अवेहीत्यादि। अवैहि रे उच्छाअहेदुअ। अत्तभवान् प्रकृति मापन्न, स तावत् दासी पुत्र अटवीतोऽटवीमाहिण्डमानो यावत् शृगालशृगालोलुपस्य कस्यापि जीर्णं वस्त्रस्य यत्रे निपतितो भव। अवैहि अवगच्छ। प्रकृति स्वभाव। प्रकृति-र्यं स्वभावे स्यादमात्यादिस्वभावयोरिति मेदिनी। दासी पुत्रो जीर्ण आहिण्डमान परिभ्रमन्। धारयधारण्ये। जीर्णं वस्त्रम् इहभङ्गुरम्। माया स्त्रियो ह्यो जीर्णो सरघ्नीति अत्र भङ्गुरे। अमरोऽप्यत्र भङ्गुरे इति वामनः। विधातेत्यत्र धर-णिधाधोरनुक्तौ तृचि दाह। परमर्षिधाधोरुपसर्गस्यर्थे। अथवा हि प्रायेणादौ परस्य सान्निध्यादेव विज्ञानीति पर्षदिः॥

(४१) राजेति। नाभिनन्दामि न साधु मन्ये॥

(४२) गाहन्तामिति। महिषा मद्दै रिंधाघैराहितमाहत निरालम्ब आत्म-मदस्य कंडव शान्त इव दुष्प्रवेशं विगोहदन्तु। मृगकुल इतिवृत्तच्छायादाश्रमतरौ मद्द मृग कदम्बक व प्रसक्षाणो देवमस्य मदेक वपु। विश्वास्तु य इति हुंभ्रं विकृतस्य वराहसंघस्यैव। शोभनदंष्ट्रौ चर्मसंदष्टमध्यस्य शूकरस्यानिशितं। तथा वराहार्थं भूत

सेना॥ यथा प्रभविष्णवे रोचते । (४३)

राजा॥ तेन हि निवर्त्तय पुरोगतान् धनुर्ग्राहिणः यथा च मे सैनिकास्त्वपोवनं नाभिरुन्धन्ति दूरात् परिहरन्ति च तथा निषेद्धव्याः । पश्य । (४४)

शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः ।
सूर्यानुकूला अपि सूर्यकान्तास्तेऽन्यतेजोऽभिभवाद्दहन्ति ॥(४५)

सेना॥ यथाज्ञापयति स्वामी । (४६)

विदू॥ भो उच्छाअहेतुअ णिक्कम णिक्कम । (४७)

सेनापतिर्निष्क्रान्तः । (४८)

राणां मतिभिर्यूथनाथैर्विस्रब्धैरप्राकृतालोकनाद् विश्वासवद्भिः सद्भिः । सभौ विस्रम्भविश्वासावित्यमरः । पल्लले चल्ले सरसि । पल्वलङ्घाल्पसर इत्यमरः । सुखानां घृतिः क्षयः क्रियताम् । तथा दृढमस्वस्थनुश्च शिथिल. एकस्याः कोटेरवसन्नो ज्याबन्धो मौर्व्या बन्धो यस्य तत् तथाभूतं सत् विश्रामं लभताम् ॥

(४३) सेनेति । यथा यत्प्रकारः । प्रभविष्णवे प्रभवे भवते इति यावत् । रोचते प्रीतिं जनयति । तथैव भवतीति शेषः ॥

(४४) राजेति । नाभिरुन्धन्ति नाक्रामन्ति । परिहरन्ति त्यजन्ति । हेतुमुत्पादयति पश्येति ॥

(४५) शमेति । शमः शान्तिरेव प्रधानं येषु तेषु तपोधनेषु तपश्चर्यारण्येषु गूढ-मलक्ष्यमाणं दाहो भस्मीकरणं यात्मा स्वभावो यस्य तत् तथोक्तम् । यात्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्म चेत्यमरः । तेजोऽस्ति । तथाहि सूर्यकान्ताः सूर्यरश्मिसम्पर्केणा-ग्नेयोद्गारिण्यो मणिविशेषाः सूर्यानुकूला सूर्यं यनुकूलाः तोषयितारः तेऽपि यन्येन तेजसा यभिभवादाक्रमणाद् दहन्ति दाहं जनयन्ति । यत्र दृष्टान्तोऽलङ्कारः । दृष्टान्तदृष्टपजाति-र्मम । यदुक्तम् । यत्र द्वयोरप्यनयोस्तु पादा भवन्ति सीमन्तिनि चन्द्रकान्ते । विद्वद्भिरादौ: परिकीर्त्तिता सा प्रयुज्यतामित्युपजातिरेषेति । यनयोरिन्द्रवज्रोपेन्द्रवज्रयोः । उपेन्द्रवज्रा यद्यते, सा चागुरुपादादिवर्णोपेन्द्रवज्रोच्यते ॥

(४६) सेनेति । सुगमम् ॥

(४७) विदू इति । भो इत्यादि । भो उच्छ्वासहेतुक निष्क्राम निष्क्राम । सुगमम् ॥

(४८) सेनेति । सुगमम् ॥

न च परिहार्येऽत्र वस्तुनि दुष्यन्तस्य मनः प्रवर्त्तते । (६१)

विदू ॥ ता कधेहि । (६२)

राजा ॥ ललिताभ्यरोभव किल सुनेरपत्यं तदुज्झिताधिगतम् ।
अर्कस्योपरि शिथिलं च्युतमिव नवमालिकाकुसुमम् ॥ (६३)

विदू ॥ विहस्स ॥ भो जधा पिण्डोखज्जूरेहिं उव्वेजिदस्स तिन्ति-
डीए सह्वा भोदि तधा अन्तेउरट्ठियआरक्खणपरिभोट्ठणो भवदो दूअ
पत्थणा । (६४)

राजा ॥ सखे तावदेनां न जानासि येन त्वमेवमवादीः । (६५)

---

(६१) अधुना वस्तुतोऽभ्यर्णं नीयता वेदयितुमाह न चेति । परिहार्ये अपात्रेऽत्र वस्तुनि पदार्थे च दुष्यन्तस्य मनो न प्रवर्त्तते प्रवृत्तिमद् भवति ॥

(६२) विदू इति । अपरिहार्यं तावीज शकुन्तलाया आह तेत्यादि । तत् कथय । तत् तावत् ॥

(६३) राजेति । अपरिहार्यं तावीजं कथयति ललितेति । ललिताभ्यरोभव ललिताभ्यो रमणीयाभ्यो अभ्यरोभ्यो भूत तत् किल शकुन्तलारूप वस्तु सुने कण्वस्य माता अज्झित इत्र घनिमा अधिगत लब्धमित्युज्झिताधिगतमपत्य न स्वौरसमित्यर्थं । अत्र प्रधानेनामत्येन सम्बन्धात् सुनेरिति षष्ठी न स्यादिगतमित्यस्य कर्मत्वात् तृतीया तस्य गुणीभूत स्यात् । अतोऽत्र उपपदविभक्तेः कारकविभक्ति र्गरीयसीति न्यायेन तृतीयया षष्ठ्या बाध स्याभावो न दोषाय यत उक्तम । अन्यगुणस्यापवादेन प्रधानेन गुणस्य च । बाधो विधीयते यस्मात् ततोऽनेन न बाधिता इति । उपमया विशिनष्टि च्युतस्येति । विशिष्य तत् अर्कस्य चाकन्देति प्रसिद्धस्य पादपस्य उपरि च्युत गलित नवमालिकाया कुसुम पुष्पमिव । यथा नवमालिका कुसुम ललितलताभवमेव ह्यपरिपाताद्र्कस्य वा तुसुममिव दृश्यते तदुज्झिताधिगत न तु नवीन कुसुम तथेत्यर्थः । अत्रोपमालङ्कार । इयमार्या ॥

(६४) विदू इति । विहस्स मध्यम कृत्वा । मध्यम आह विहसितमित्यमर । भो इत्यादि । भो यथा पिण्डीखर्ज्जूरैरुद्वेजितस्य तिन्तिडी सह तथा अन्त पुरस्थीरत्न परिभोगिणो भवत इय प्रार्थना । पिण्डीखर्ज्जूरै पिण्डीभ यै खर्ज्जूरै । पिण्डी य पिण्डीतरुरेवाभूत्खर्ज्जूरभेदवोरिति मेदिनी । अद्देलितप्रातिमाधुर्यौज्झितायवगच्छित्व । तिन्तिडी तिन्तिडायां । अन्तत्वादिति भाव ॥

(६५) राजेति । वन चेत्यर्थ । अवाहीरक्षकारणमि ॥

विदू ॥ तं खु रमणीअं णाम ज भअदोवि विम्हअ उप्पादेदि ।(६६)

राजा ॥ वयस्य किं वर्णना । (६७)

चित्ते निवेश्य परिकल्पितसर्वयोगान्
रूपोच्चयेन विधिना विहिता कृशाङ्गी ।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः ॥ (६८)

विदू ॥ 'सव्वधा पच्चादेसो खु सा रूवदीणं । (६९)

---

(६६) विदूषकेति । तत्किमित्यादि । तत् खलु रमणीय नाम यद् भवतोऽपि विस्मय-मुत्पादयति । तत् खलु । खलु निश्चये । नाम सम्भावनायाम् । रमणीयमेव सम्भावया-मीत्यर्थः ॥

(६७) राजेति । शकुन्तलाया रूपं वर्णयितुमामन्त्रयते वयस्येति । वर्णनेनेति शेषः ॥

(६८) चित्ते इति । धातुर्विधातुर्विभुत्वं निर्माणेषु प्रभुत्वम् । विभू शिवे प्रभौ नित्ये इति विश्वः । तया तस्याः शकुन्तलाया वपुः शरीरञ्च अनुचिन्त्य चिन्तयित्वा स्थितस्य मे मम सम्बन्धे । स्थितस्येत्यध्याहार्यं क्रिययोरेककर्तृकत्वापत्तेः । 'सा कृशाङ्गी तन्वी शकुन्तला परिकल्पिता अभिनवसृष्टा न तु कृप्ता महाभूतमया इति भावः । ये सर्वे योगा निर्माणस्य निखिलोपाया उपादानकारणानीति यावत् । योग सच्चूर्णोपायध्यानसङ्गति-युक्तिष्वित्यमरः । तान् चित्ते मनसि निवेश्य निधाय । न तु निर्मीयमानवस्तुन योक्तु-मार्यमङ्गमिश्र हस्तयो निवेश्येति भावः । रूपोच्चयेन सौन्दर्यराशिना करणेन । रूपमाकारसौन्दर्यं आभरणेष्वपि दृश्यते इति त्रिकाण्डशेषः । विधिना स्रष्ट्रा विहिता निर्मिता अतएव अपरा जगत्सु वर्तमानेभ्य स्त्रीरत्नेभ्य पृथग्विधा स्त्रीरत्नसृष्टि सृष्ट स्त्रीरत्न प्रतिभाति प्रकाशते । कृशाङ्गीत्यत्र ङीर्योगोपधलक्षणङीषि प्रतिषेधेऽपि यङ्लुगन्ता द्योषादौ पाठादीप् । यङ्लुगन्ता यथा । यङ्लुगन्तदन्तकण्डूञ् गुडङ्कर्षोऽस्त्रियामपि । पुच्छो नेवं तथा गात्रलुम्पकादिरीरितः इति । यत्र लोकदृष्या सृष्ट्या अभेदेऽपि तद्भेदनिश्चयस्य विवक्षादतिशयोक्तिरलङ्कारः । यदुक्तं दर्पणे । विज्ञाते ऽध्यवसायस्यातिशयोक्तिर्निगद्यते । भेदेऽप्यभेद सम्बन्धेऽसम्बन्धस्त्वद्विपर्ययः । पौर्वापर्यान्यय कार्यहेतौ सा पञ्चधा मता इति । तद्विपर्ययः अभेदे भेद सम्बन्धे असम्बन्धः । दण्डिनापि । विवक्षा या विशेषस्य लोकसीमानुवर्त्तिनी । असावतिशयोक्तिः स्यादिति । विशेषस्य उत्कर्षस्य । इत्तमिद् षष्ठन्तिलक नाम ॥

(६९) विदूषकेति । सव्वधेत्यादि । सर्वथा प्रत्यादेश खलु सा रूपवतीनाम् ।

राजा ॥ परिजनानवलोक्य ॥ मृगयावेशमपनयन्तु भवन्तः । रैवतक ! त्वमपि स्वनियोगमम्यून्यं कुरु । (४९)

रैव ॥ जं महाराओ आणवेदि ॥ इति निष्क्रान्त । (५०)

विदू ॥ किदं भवदा सम्पदं णिम्मक्खिअं ता इमस्मिं पादव-च्छाआविरइदविदाणसणाहे सिलाअले उवविसदु भवं जाव अहम्पि सुहासीणो होमि । (५१)

राजा ॥ गच्छामीत्यतः । (५२)

विदू ॥ एदु एदु भवं ॥ उभौ परिक्रम्योपविष्टौ । (५३)

राजा ॥ सखे माधव्य नानाश्चर्यफलोऽसि येन त्वया द्रष्टव्यानां परं न दृष्टम् । (५४)

विदू ॥ णं भवं ज्जेव मे अग्गदो वट्टदि । (५५)

---

(४९) राजेति । परिजनान् परिवारजनान् । अपनयन्तु सञ्चरन्तु । स्वनियोगं द्वारे नियुक्तत्वादस्य । अम्यून्यं कुरु म्यून्य न कुरु आत्मनेति शेष । तत्र गच्छेति भाव । अथवा स्वनियोगं स्व प्रतत्रादेय अम्यून्यं कुरु पालय ॥

(५०) रैवेति । जमित्यादि । यन्महाराज आज्ञापयति ॥

(५१) विदूषकेति । किदमित्यादि । कृत भवता साम्प्रत निर्म्मक्षिकं तदस्मिन् पादप-च्छायाविरचितवितानसनाथे शिलातले उपविशतु भवान् यावदहमपि सुखासीनो भवामि । साम्प्रतमिदानीम । निर्म्मक्षिक मक्षिकापर्द्दनरहितम् । अनम्यून्यमित्यर्थ । पादपेति । पादपस्य शाखिनो या छाया तया विरचित सम्पादित यद् वितान शम्बूशतपत्रसाद्य तदयुक्ते क्या विशिष्टे सनाथयस्थितिमत् । शिलातले शिलास्वरूपे । अथ स्वरूपयोरभेदे सप्तमितत्पुरु । यावत् यथा येनेत्यर्थ ॥

(५२) राजेति । सुगमम् ॥

(५३) विदूषकेति । एहित्यादि । एतु एतु भवान् । उभौ राजा विदूषकश्च ॥

(५४) राजेति । चक्षुःफल रमणीयसन्दर्शन अनासादितपूर्व यत् तत् देव च । पर श्रेष्ठम् ॥

(५५) विदूषकेति । अणमित्यादि । नन्वु भवानेव मे अग्रतो वर्त्तते । भवन्तमेव भवतो महत्वमिति त्वा कथ दृष्टव्यानां पर न दृष्ट मयेति भाव ॥

राजा ॥ सर्व्वः खलु कान्तमात्मानं पश्यति अहन्तु तामेवाश्रमललाम-भूतां शकुन्तलामधिकृत्य ब्रवीमि । (५६)

विदू ॥ स्वगतम् ॥ भोदु ण से पस्सुअं वड्ढयिस्सं । (५७)

प्रकाशम् ॥ भो जइ सा तवस्सिकण्णआ अणब्भत्थणीआ ता किं ताए दिट्ठआए । (५८)

राजा ॥ धिङ्मूर्खं । (५९)

निवारितनिमेषाभि र्नेत्रपङ्क्तिभिरुन्मुखः ।
नवामिन्दुकलां लोकः केन भावेन पश्यति ॥ (६०)

---

(५६) राजेति । सर्व्वः खलु सर्व्व एव जन आत्मान स्व कान्त सुन्दर पश्यति अहन्तु आश्रमललामभूतामाश्रमभूषणरूपा । प्रधानश्चूलिङ्गेषु पुण्ड्रबालधिलक्षणेषु । भूषावाजिप्रभावेषु ललाम स्यात्ललाम चेति रुद्र । ता शकुन्तलामेव अधिकृत्य अभिप्रेत्य ब्रवीमि द्रष्टव्याना परमिति वच्मि ॥

(५७) विदूरति । स्वगतमनतिव्यक्तम् । भोदु इतत्रादि । भवतु नाम प्रणय वर्द्धयिष्यामि । प्रस्थय प्रणयम् । प्रस्थय प्रणय समावितत्रमर ॥

(५८) प्रकाशमिति । भो इतत्रादि । भो यदि सा तपस्विकन्यका अनभ्यर्थनीया तत् कि तया दृष्टया । तपस्विनो सुने कन्यका तपस्विकन्यका । अतोऽनभ्यर्थनीया भवत इति शेष । कि फलमिति शेष ॥

(५९) राजेति । परिज्ञातामपि वस्तुतोऽभ्यर्थनीयता पश्चाद् वेदयिष्यन्नभ्यर्थनीयाया दृष्टे वैफल्यमिति यदुक्त विदूषकेण तदेव प्रथम खण्डयित्वा निर्भर्त्सयन्नाह धिगिति । मूर्खेति सम्बोध्य श्लोकेन पृच्छति ॥

(६०) निवारितेति । लोको जन उन्मुख ऊर्द्धमुख सन् निवारितान्यजिता निमेषा स्यन्दनानि याभिस्ताभि नेत्रपङ्क्तिभि-र्नेत्रश्रेणिभि नवा प्रतिपदुदितामिन्दुकला कलामात्रमिन्दु केन भावेनाभिप्रायेण पश्यति। मङ्गलपक्षनिगासु तस प्रायदर्शनादप्रीततया तदपगमसन्तोषेणैव न तु जिह्मतयेति भाव । अत्र प्रतिपच्चन्द्रस्य द्रष्टुमयुक्ततया नवा द्वितीयोदितामिति केचिद् व्याचक्ष्युक्तत्र प्रतिप-क्षेऽपि चन्द्रदर्शनसम्भवात् । यथाह ज्योतिस्तत्त्वे । चन्द्रो द्वादशभि पश्चाद् दृश्य प्राग यात्यदृश्यतामित्यभिधाय अनभ्यायास्तु यदि पञ्चदशभिरप्येतुपरिणि । रवे सार्द्धदशागेऽपि दृश्यतामेति चन्द्रमा इति । सार्द्धदशागेऽपि द्वादशाना भागाना सार्द्धागमक्षेऽपि । अतएव प्रतिपच्चन्द्रमिश्र मचा श्रुतिति किरातार्ज्जनीयम ॥

राजा ॥ इदञ्च मे मनसि वर्त्तते । (७०)

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम् ।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥ (७१)

विदू ॥ तेण हि अज्ज अज्ज गच्छदु भवं मा जाव सा कस्सवि तव-
स्सिणो इङ्गदीतेल्लचिक्कणसोंअस्स हत्थे णिवडिस्सदि । (७२)

राजा ॥ परवती खलु तत्रभवती न च सन्निहितगुरुजना । (७३)

सर्व्वथा प्रतिज्ञाया अङ्गीकारद्योतन इति यावत् । सर्व्वथा सर्व्वप्रकारे प्रतिज्ञा-भङ्गहेतुष्विति यद्वाक्ये । प्रत्यादेशो निराकरण इदमिच्छतो भावो द्रव्यवत् प्रकाशत इति न्यायात् सतत्वमिति यावत् । प्रत्यादेशो निराकृतिरित्यमरः । खलु निश्चये । प्रत्यादेश एव इत्यर्थः ॥

(७०) राजेति । इदं वक्ष्यमाणम् ॥

(७१) अनाघ्रातमिति । अनाघ्रातमसृतगन्धमिदं पुष्पमिव कररुहैः नखरैरलूनं मक्षितमक्षुण्णमिति यावत् । किसलयं पल्लव इव पुनर्नवं कररुहो नखोऽस्त्री नखरो ऽस्त्रियामित्यमरः । अनाविद्धमङ्गेष्वपिनद्धं अपरिहितमिति यावत् रत्नं मणिरिव । आविद्धं प्रतिमुक्तञ्च पिनद्धञ्चापिनद्धवदित्यमरः । अनास्वादितो रसनया अननुभूतो रसो यस्य तत् तथोक्तं नव मधुरिव । एवं पुण्यानां यज्ञादि धर्म्माणां अखण्डं समग्रं न त्वङ्ग-वैगुण्यजन्यकिञ्चिदूनमिति भावः । समग्रे सकलाखण्डपूर्णाभीत्यमरः । फलमिव च अनघं निर्म्मलापापमोक्षे ऽभिधेयवदिति मेदिनी । तद्रूपमिह भुवि कं भोक्तारमुपभोक्तारं समुपस्थास्यति उपगमिष्यति न जाने नानुभवामि । अत्र मालोप मालङ्कारः । उक्तदर्पणे । मालोपमा यदेकस्योपमानं बहूनं दृश्यते इति । इदं शिखरिणी नाम वृत्तम् ॥

विदू॥ अध तुह उवरि कोदिसो से चित्तराओ। (७४)

राजा॥ वयस्य स्वभावादेवाप्रगल्भाऽऽसन्नपरिचिता तथापि तु। (७५)

अभिमुखे मयि संहृतमौचित्य हसितमन्यनिमित्तकथोदयम्।
विनयवारितवृत्तिरतस्तया न विदितो मदनो न च लक्षितः॥(७६)

विदू॥ विहस्य॥ किं दिट्ठिमेत्तेण च्चेव भवदो अङ्कं आरोहदु।(७७)

राजा॥ सखीभ्यां मिथः प्रस्थाने पुनः सलीलया तत्वभवत्या मयि भूयिष्ठमाविष्कृतो भावः। तथाहि। (७८)

स्वय न कस्यापि हृदयगता भविष्यतीति ज्ञापयति। ननु प्रभुरेवैना पात्रमात कर्तुमधिकरोतीति वचनमाशङ्क्याह न चेति। सन्निहित उपस्थितो गुरुजनो यस्या सा तथोक्ता च न॥

(७४) अथेत्यादि। अथ तवोपरि कोदृशोऽस्याश्चित्तराग। अथ प्रश्ने। सङ्कल्पनरारम्भप्रश्नकात्स्न्र्येष्वथो अथेत्यमर। चित्तरागश्चेतसोऽनुराग॥

(७५) राजेति। अप्रगल्भा अनिपुणा। निपुणता प्रयोगेषु दक्षैर्मोक्ता प्रगल्भतेतुज्ज्वलनीलमणि। तथापि अप्रगल्भत्वेऽपि॥

(७६) अभीति। मयि अभिमुखे सम्मुखस्थे सति ईक्षित दर्शन सदृश गोपायित अथच अन्येन निमित्तेन हेतुना कथाया उदयो यत्र तत् यथा स्यात् तथा हसितम् अन्येन हेतुना कथामुद्भाव्य हसितमित्यर्थ। अतो अस्मात् तया शकुन्तलया विनयेन कृष्टवृत्त्या यद्वा विनयेन सुशिक्षितत्वेन कर्त्रा वारिता सङ्कुचिता वृत्तिराचारो यस्य स तथोक्तो मदन कामो न विदितो व्यक्तीकृतो न च लक्षितो न च गोपायित। तथाच सुशिक्षितकन्यात्वेन स्वेदरोमाञ्चादयो न व्यक्तीभूता कामस्तु ईक्षणस वरणादव्यक्तीकृतोऽपि अथस्वइ कथोदयेन कृतहसितादेव व्यक्तीभूत इति भाव। इद हृतविलम्बित नाम वृत्तम्। तदुक्तम्। यथि लघोदरि यत्र चतुर्थक गुरु च सप्तमक दृश्यत तथा। विरतिगञ्च तदेव विचक्षणै हृतविलम्बितमित्युपदिश्यत इति॥

(७७) विदूषकेति। किमित्यादि। कि दृष्टिमात्रेणैव भवतोऽङ्कमारोहतु। आरोहत्विति स प्रश्ने गी॥

(७८) राजेति। सखीभ्यामिति सहार्थे तृतीया। मिथो रहसि। मिथोऽन्योन्य रहसयोरित्यमर। प्रस्थाने गमने। पुनस्त्वर्थ। सलीलया सविलासया। लीला विलासक्रिययोरित्यमर। भूयिष्ठमिति भाविष्कारक्रियाविशेषणम्। आविष्कृतो विहित। भाव सत्त्वस्वभावाभिप्रायचेष्टाजन्मसित्यमरः॥

दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे
तन्वी स्थिता कतिचिदेव पदानि गत्वा ।
आसीद् विवृत्तवदना च विमोचयन्ती
शाखासु वल्कलमसक्तमपि द्रुमाणाम् ॥ (७९)

विदू ॥ गहीदपाधेओ किदोसि तए अदो अणुरूवं तवोवणं त्ति सक्केमि ।' (८०)

राजा ॥ सखे तपस्विभिः कैश्चित् परिज्ञातोऽस्मि चिन्तय तावत् केनापदेशेन पुनराश्रमपदं गच्छामः । (८१)

विदू ॥ को अवरो अवदेसो णं भवं राआ । (८२)

राजा ॥ ततः किम् । (८३)

विदू ॥ नीवारच्छट्ठभाओ तावसा मे उवहरन्तु त्ति । (८४)

---

(७९) दर्भेति । तन्वी शकुन्तला कतिचित् कियन्ति पदानि गत्वैव दर्भाङ्कुरेण कुशाङ्कुरेण चरण क्षतश्चिन्नश्च अकाण्डे अनवसरे वस्त्रतो दर्भाङ्कुरावेधेऽपीत्यर्थः । इति सत्वरं स्थिता । काण्डोऽस्त्री इक्षुवाणार्थं वर्गोऽवसरवारिधिन्नित्यमरः । तथा द्रुमाणां वृक्षाणां शाखासु अग्रेषु अस्वग्नमपि वल्कल परिहितत्वेन विमोचयन्ती सती विवृत्तवदना मदाद् भ्रमितवदना च व्यलोकयत् ॥

(८०) विदू इति । गहीत्यादि । गृहीतपाथेय असतोऽसि तया यतोऽनुरूपं तपोवनमिति तर्कयामि । गृहीत पाथेय सम्बल पथिव्ययितव्यधनमिति यावत् येन स तथोक्त सतोऽसि यदनविवृत्तत्वादिनेति शेष । तदालोचनयाध्वश्रमसम्भवादिति भावः । चतुरक्षमनुरागविषयतापापन्नम् ॥

(८१) राजेति । परिज्ञात परिचित । अपदेशेन निमित्तेन लक्ष्येण वा । पदे लक्ष्ये निमित्तेऽपदेश इत्यादिनामरः । आश्रमपदमाश्रमस्थानम् । प्रथमगमन पुण्याश्रमदर्शनार्थमेवोक्तम् इत्र पुनर्गमनमपदेशचिन्तनमुपयुज्यते ॥

(८२) विदू इति । को इत्यादि । कोऽपरोऽपदेश नन्वयमेव राजा । ननु यत ॥

(८३) राजेति । ततश्चात्मा राजानादिनार्थं ॥

(८४) विदू इति । नीवारेत्यादि । नीवारषष्ठभाग तापसा मे उपहरन्त्विति । नीवाराणां शब्दादिसप्तधान्यानां षष्ठभाग तापसाश्रमवासिनो मे मह्य उपहरन्तु ददतु इति अवदेश इत्यर्थः । अत्र मनु । षष्ठांशवृत्ति आदेयो राज्ञा प्रजाभ्य इत्यस्मृतौ । शान्ताकारमदो

राजा ॥ मूर्ख ! अन्यमेव भागधेयमेते तपस्विनो मे निर्व्यपन्ति यो रत्नराशीनपि विहायाभिनन्द्यते । पश्य (८५)

यदुच्छिष्टति वर्णेभ्यो नृपाणां क्षयि तद् धनम् ।
तपःषड्भागमक्षयं दत्त्यारण्यका हि नः ॥ (८६)

नेपथ्ये ॥ हन्त सिद्धार्थौ स्वः । (८७)

राजा ॥ कर्णं दत्त्वा ॥ अये प्रशान्तस्वरैस्तपस्विभि र्भवितव्यम् । (८८)

भाग. षष्ठो द्वादश एव वा । आदद्यात्तप एव षड्भागं द्रुमांसमधुमर्पिषाम् । गन्धौषधिरसानाञ्च पुष्पमूलफलस्य च । पत्रशाकतृणानाञ्च चैदलस्य च चर्म्मणाम् । मृण्मयानाञ्च भाण्डानां सर्व्वस्याश्मनयस्य चेत्यादि ॥

(८५) राजेति । क्षियमाणोऽप्यादद्यात न राजा श्रोत्रियात् करं । न च क्षुधास्य संसीदेत् श्रोत्रियो विषये यस्त्विति, तथा—यस्य राष्ट्रस्तु विषये श्रोत्रियः सीदति क्षुधा । तस्यापि तत् क्षुधा राष्ट्रमचिरेणैव सीदति । श्रुतवित्ते विदित्वास्य धर्म्मज्ञां वृत्तिं प्रकल्पयेत् । संरक्षेत् सर्व्वतस्त्वेनं पिता पुत्रमिवौरसमिति मनूपदेशात् क्षयशब्दमनभिनन्द्यराह मूर्खेति । अन्यं भोगातिरिक्तमेव । भागधेयं करम् । भागधेयः करो बलिरित्यमरः । निर्व्यपन्ति ददति । यो भागधेयो रत्नराशीन् मणिस्तूपान् विहाय त्यक्त्वा क्षयमभिनन्द्यते क्षयाभिरादृियते तमन्यं भागधेयमित्यर्थः ॥

(८६) तापसोपस्थियमाणभागधेयं दर्शयति यदिति । हि यस्मात् नृपाणां राज्ञां वर्णेभ्यो रक्षिभ्यो यद् धनं शस्त्रादिकरभूसुक्तिरूपं क्षयाति तत् क्षयि क्षयशीलं । शस्त्रैरिन्निति शस्त्रास्त्रादिन् । आरण्यका अरण्यवासिन आश्रमिण इति यावत् । अक्षयं क्षयानर्हं तपसो धर्म्मस्य षड्भागं षष्ठभागं नोऽस्मभ्यं ददति । तदुक्तं मनुना । संरक्ष्यमाणो राज्ञाऽयं कुरुते धर्म्ममन्वहम् । तेनायुर्वर्द्धते राज्ञो द्रविणं राष्ट्रमेव चेति । तथा । यदधीते यद् यजते यद् ददाति यदर्च्चति । तस्य षड्भागभाग् राजा सम्यग् भवति रक्षणादिति ॥

(८७) नेपथ्य इति । नृपतिश्चेत्नगरं प्रविशतस्तदर्शनार्थीवेश स्वावेशुत्कण्ठया समागच्छन्तौ तापसकुमारौ राजसभासन्दर्शनेन हर्षादाह हन्त हर्षेऽनुकम्पायामित्यमरः । सिद्धो निष्पन्नोऽर्थो नरपतिसाक्षात्कारलक्षणो ययोस्तौ तथोक्तौ स्व आत्मेत्यादिः ॥

(८८) राजेति । क्षये इति सम्भ्रमे । क्षये क्रोधे विषादे च सम्भ्रमे स्मरणेऽपि चेति मेदिनी । प्रशान्ता अनुद्धता स्वरा येषां ते तथोक्तैः प्रशान्तस्वरैरतएव तपस्विभिः । भवितव्यमिति भावे तव्यः ॥

प्रविश्य दौवारिक ॥ जअदु जअदु भट्टा एदे दुवे इसिकुमारआ पडिहारभूमिं उवट्ठिदा । (८९)

राजा ॥ अविलम्बं प्रवेशय तौ । (९०)

दौवा ॥ ज भट्टा आणवेदि ॥ इति निष्क्रम्य ऋषिकुमाराभ्या सह पुन प्रविश्य ॥'

इदो इदो भवन्ता । (९१)

उभौ ॥ राजान विलोकयत: । (९२)

एक॰ ॥ अहो दीप्तिमंतोऽपि विश्वसनीयतास्य वपुष: । अथवा उपपन्नमेतदस्मिन् ऋषिकल्पे राजनि । कुत: । (९३)

अधाक्रान्ता वसतिरमुनाप्याश्रमे सर्व्वभोग्ये
रक्षायोगादयमपि तप: प्रत्यहं सञ्चिनोति ।
अस्याप्यद्यां स्पृशति वशिनस्त्रारणद्वन्द्वगीत.
पुण्य शब्दो मुनिरिति सुत: केवलं राजपूर्व्व: । (९४)

---

(८९) प्रविश्येति । जअदित्यादि । जयति जयति भर्त्ता एतौ द्वौ ऋषिकुमारौ प्रतीहारभूमिमुपस्थितौ । प्रतीहारभूमि द्वारभूमि । स्त्री द्वा द्वौर प्रतीहार इत्यमर ॥

(९०) राजेति । सुगमम् ॥

(९१) दौवेति । जमित्यादि । यद् भर्त्ता आज्ञापयति । परिक्रम्य सङ्गम्य । इद इत्यादि । इत इतो भवन्तौ । आगच्छतामिति शेष ॥

(९२) उभाविति । ऋषिकुमारावित्यर्थ ॥

(९३) एक इति । ऋषिकुमारयोरिति शेष । अहो विस्मये । दीप्तिमतोऽपि तेजस्विनोऽपि । विश्वसनीयता आश्वसनीयता । कल्पान्तरेण विस्मयमपाकरोति अथवेति । ऋषिकल्पे ऋषितुल्ये अयो । स्यादेयोम इति कल्पप्रत्यय । अस्मिन् राजनि एतत् दीप्तिमतोऽपि विश्वसनीयत्वमुपपन्न युक्तम् । ऋषिकल्पत्वे हेतुत्वमाशयति कुत इति ॥

(९४) अधेति । न केवल सुलभ एवाश्रमवासिन अमुना राज्ञापि सर्व्वाणि भोग्यानि भोगयोग्यानि यत् स तपोरूपे आश्रमे वसति स्थितिरध्याक्रान्ता अधिष्ठिता । क्षत्रियपक्षे आश्रमो वनं राजपक्षे गार्हस्थ्यम् । आश्रमो मठश्चयोर्द्वो वानप्रस्थे वने मठे इति मेदिनी । तथा सुलभ एव न केवल तपस्विन अयमपि रक्षायोगात् प्रजापालनसम्बन्धात् प्रत्यहं प्रतिदिन तपोधर्म्म सञ्चिनोति सम्पादयति । तपश्चान्द्रायणादौ स्याद् धर्म्मे लोकान्तरे ऽपि इति विश्व । तथाह मनु । स क्षत्रियनिषेव्यं प्रजानाञ्चैव पालनम् । सुलभा

द्वितीय ॥ सखे अयं स बलभिस्खलो दुष्मन्तः । (८५)

प्रथम ॥ अथ किम् । (८६)

द्वितीय ॥ तेन हि । (८७)

नैतच्चित्रं यदयमुदधिस्खामसीमा धरित्री
मेकः क्षत्त्रां नगरपरिघप्रांशुबाहुर्भुनक्ति ।
आशंसन्ते समितिषु सुरा सक्रवैरा हि दैत्यै-
रस्याधिज्यं धनुषि विजयं पौरुहूते च वज्रे ॥ (८८)

ब्राह्मणानाञ्च राज्ञा श्रेयस्कर परमिति । तथा वह्निनो जितेन्द्रियस्य व्यस्यापि राज्ञ केवल विशेषात् राजपूर्व्वो राजयज्ञपूर्व्वो सुनि रिति एतदर्थक पुण्य पवित्र शब्दो राजर्षिस्वा दिति भाव । चारयति देशान्तरेषु, कीर्त्तिं प्रचारयतीति चारेण कुशीलवाख्यनटविशेष । चारणास्तु कुशीलवा इतामर । तद्गृहस्थेन तनूस्त्रीषु साध्वा । गीत पठित तनू । स्त्रीषु सो मिथुन इत्यमितामर । सङ्ग पुन पुन द्यौमिन्द्रलोक स्पृशति । चल उपपन्न मित्यर्थ सर्व्वभोग्ये इतामादिभिरीषदूनत्व ऋषिभ्यो बोधयति । ऋषिधर्म्म प्रदर्शनादत्र तुल्ययोगितालङ्कार । यदुक्त दण्डिना । विवक्षित गुणोत्कर्ष यत सधीरत्र कस्यचित् । कीर्त्तन स्तुतिनिन्दार्थं सा स्मृता तुल्ययोगितेति । इद मन्दाक्रान्ता नाम इत्तम् ॥

(८५) द्वितीय इति । ऋषिकुमारयोरिति शेष । अय इदमान । स कथा प्रसङ्गेन स्तुत । बल भिनत्ति स्फुटयतीति बलभित बलारातिरिन्द्र इति यावत् । तस्य सखा बलभित्सख । सख्युरोराश्च इति स ॥

(८६) प्रथम इति । अथ किं किमर्थमत यदुक्त तदेवात्रार्थं । अङ्गीकारेऽपि स्वार्थकिमिति हारावली ॥

(८७) द्वितीय इति । तेन हि तेनैव ॥

(८८) नैतदिति । नगरपरिघौ नगरद्वारार्गलाविव प्राप्तौ दीर्घौ बाहू यस्य स तथोक्त । परिघो योगभेदेऽर्गलघातयोरिति मेदिनी । दीर्घौ प्राप्तौ विशालश्चेति धनञ्जय । अय राजा उदधे समुद्रस्य श्याम कालिमा नीरभाग इति यावत् । स एव सीमा यस्या सा तथोक्ता क्षत्त्रामग्रेसरा धरित्रीं भुव यदेकोऽद्वितीयो भुनक्ति पालयति । अत्र नार्थ एव भूजे र्यं कृष्णात्मनेपदम् । एतत्र चित्रमाश्चर्य्य । हि यस्मात् दैत्यैरसुरै सक्र सम्भृत वैर विद्वेषो येषां ते तथोक्ता सुरा देवा । वैर विरोधो विद्वेष इतामर । समितिषु युद्धेषु । समितप्राजितसमिद् युध इतामर । अधिज्ये अधिगतगुणे अस्य राज्ञो धनुषि पौरुहूते माहेन्द्रे वज्रे च विजयमाशं सन्ते अभ्यर्थयन्ते न त्वन्यस्मिन् कापीत्यर्थ । तथा च

उभौ उपगम्य ॥ विजयस्व राजन् । (९९)

राजा ॥ आसनादुत्थाय ॥ अभिवादये भवन्तौ । (१००)

उभौ ॥ स्वस्ति भवते । इति फलान्युपनयत । (१०१)

राजा ॥ सप्रणामं परिगृह्य ॥ आगमनप्रयोजनं श्रोतुमिच्छामि । (१०२)

उभौ ॥ विदितो भवानिहस्थस्तपस्विनाम् । ते च भवन्तमभ्यर्थयन्ते । (१०३)

राजा ॥ किमाज्ञापयन्ति । (१०४)

उभौ ॥ तत्रभवत कण्वस्य कुलपतेरसान्निध्यात रक्षांसि न दृष्टिविघ्नमुत्पादयन्ति सत् कतिपयदिवसमात्रं सारथिद्वितीयेन भवता सनाथीक्रियतामाश्रम इति । (१०५)

मागरान्तां महीमयमेको भुञ्जतीत्यविधित्व स्वर्गलोकपर्य्याप्तोऽस्याधिकारो ज्ञाप्य इतीमाम् यत्नापाकरणिकसमाप्ति वज्रसूच धनु सौषाढ्याय सुराणा विजयाय सनविषयत्वच्छैकधर्म्म मत्रोपादानात् दीपकालङ्कार । यदुक्त प्रकाशे । सकृदुक्तिस्तु धर्म्मस्य प्रक्रमाप्रक्रमात्मनाम् । भेद क्रियासु चङ्क्षीप् कारकस्येति दीपकमिति । प्राकरणिकाप्राकरणिकाणा धर्म्मस्य सकृद् दभिरेक दीपक कारकस्य चङ्क्षीप् क्रियासु सकृद्दभिरपर दीपकम् ॥

(९९) उभाविति । विजयस्वेति विधराज्ञीतात्मनेपदम् ॥

(१००) राजेति । अभिवादये प्रणमामि । फलवत्कर्त्तव्यात्मनेपदम् ॥

(१०१) उभाविति । स्वस्ति मङ्गल । स्वस्तिमङ्गलाशीर्व्यादयापनिर्णेजनादिष्विति भागुरि । भवत इति भक्तार्थं षष्ठ्यन्तत्वादिना चतुर्थी । फलानीति । यदाह । रिक्तपाणि न पश्येत् तु राजान देवतां गुरुम् । नैमित्तिकञ्च वैद्यञ्च फलेन फलमादिशेदिति ॥

(१०२) राजेति । परिगृह्य स्वीकृत्य ॥

(१०३) उभाविति । अयात्र दृष्टस्तो विधिस्त्वयस्थित इत्रेत्रस्कारेण प्राप्त । दृष्टाभ्यन्तरे अभ्यर्थनासम्भवात् विदित इति कर्म्मणि क्त । तद्योगात् तपस्विनामिति कर्मणि षष्ठी । ते स्पष्टम् ॥

(१०४) राजेति । शुश्रूषत ॥

(१०५) उभाविति । कुलपते मंत्रहणमिति । अणोश्चिध्यारुपस्थानात् । रक्षांसि राक्षसाः । दृष्टिविघ्न मागव्याघातम् । दृष्टि योगेष्वयो रित्यत्रर । कतिपयमिति कदाध्यारि व्याप्तावितिममरः । सारथिरेव द्वितीयो यस्य स सारथिद्वितीय तेन । अस्मै अंशुभि

राजा ॥ अनुगृहीतोऽस्मि । (१०६)

विदू ॥ अपवार्य ॥ एस दाणिं भवदो अणुरूलो गलहत्थो । (१०७)

राजा ॥ स्मित कृत्वा ॥ रेवतक मद्वचनादुच्यतां सारथिः सन्नाहकार्मुक रथमुपस्थापयेति । (१०८)

दौवा ॥ जं देवो आणवेदि ॥ इति निष्क्रान्त । (१०९)

उभौ ॥ सहर्षम । (११०)

अनुकारिणि पूर्व्वेषा युक्तरूपमिदं त्वयि ।

आपन्नाभयसत्वेषु दीक्षिताः खलु पौरवा ॥ (१११)

राजा ॥ सप्रणामम ॥ गच्छता भवन्तौ अहमनुपदमागत एव । (११२)

उभौ ॥ विजयस्व ॥ इति निष्क्रान्तौ । (११३)

राजा ॥ साधय अथसि ते कुतूहलं शकुन्तलादर्शनं प्रति । (११४)

राज्ञोपरोधभंग इति तैरुक्तमिति भावः । सनाथीक्रियता सस्वामिकीक्रियताम् । त्वाश्रम कुलपतेरसान्निध्यादस्वामिको मठः । इति अभ्यर्थयन्त इत्यन्वयः ॥

(१०६) राजेति । अनुगृहीतस्तपस्विभिः कृतानुग्रहः ॥

(१०७) विदू इति । अपवार्य परावृत्य । तदुक्तम । तद्वेदपवारितम् । रहस्य तदन्यस्य परावृत्य प्रकाश्यते इति । एस इत्यादि । एष इदानीं भवतोऽनुरूपो गलहस्तः । इदानीमेव गलहस्त कर्म्मणि नियोगो भवतोऽनुरूप इत्यर्थः ॥

(१०८) राजेति । सनाथकार्मुकेण सार्मुकेण धनुषा च सहित । उपस्थापय आनय । इति उच्यतामित्यन्वयः ॥

(१०९) दौवेति । जमित्यादि । यदु देव आज्ञापयति । देवो राजा ॥

(११०) उभाविति । सुगमम् ॥

(१११) अनुकारिणीति । पूर्व्वेषा पुरुवंशानामनुकारिणि सदृशे त्वयि इदं मया आत्मनश्चरण युक्तरूप अनुरूप खलु यस्मात् पौरवा पुरुवंशभवा राजान आपन्नानामभयसत्वेषु अभयदानरूपयागेषु यद्वा सदाभयदानेषु दीक्षिता मतिर्न । आपन्न आपत्प्राप्ते स्यादिति सत्वमाच्छादने यज्ञे सदादाने धनेऽपि चेति चामरः ॥

(११२) राजेति । अनुपदमनुग सन । अन्वगन्वच्चमनुगेऽनुपद क्रीवमव्ययमित्यमरः । आगत एव आगतत्वेन निश्चेतव्य इत्यर्थः ॥

(११३) उभाविति । सुगमम् ॥

(११४) राजेति । अपि प्रश्ने । कुतूहल लालसा ॥

विदू ॥ पढमं अपरिवाधं आसी सम्मद रक्खसवुत्तन्तेण सपरिवाध । (११५)

राजा ॥ मा भैषीः ननु मत्सभीप एव वर्त्तिष्यसे । (११६)

विदू ॥ एष तुह रथचक्करक्खोभूदोम्हि जइ ण कोवि आअच्छिअ विग्घं करेदि । (११७)

प्रविश्य दौवारिक ॥ जअदु जअदु भट्टा सज्जो रधो भत्तुणो विजअ पआणं अवेक्खदि, एस ण पआरादो देवीणं आणत्तिहदो करभगो आअदो । (११८)

राजा ॥ सादरम ॥ किमम्बाभि प्रेषित । (११९)

दौवा ॥ अध ट्ठ । (१२०)

राजा ॥ तेन हि प्रवेश्यताम् । (१२१)

दौवा ॥ तह ॥ इति निष्क्रम्य पुन करभकेण सह प्रविश्य ॥ करभआ । एसो भट्टा उवसप्पदु भव । (१२२)

---

(११५) विदू इति । पढममित्यादि । प्रथममपरिवाधमासीत् साम्मत ! राक्षसवृत्तान्तेन सपरिवाधम् । अपरिवाध कष्ट विना । सपरिवाध कष्टेन सह । कुतूहल मिति विधेयम् ॥

(११६) राजेति । मैषीरिति मा टी वेति टी । ननु यत । वर्त्तिष्यसे स्थास्यसि ॥

(११७) विदू इति । एष इत्यादि । एष तव रथचक्ररक्षीभूतोऽस्मि । यदि न कोऽप्यागत्य विघ्न करोति । युध्यमानस्य कस्यिद्रथचक्ररक्षकोऽपेक्ष्यते, तवाहं तथाभूतोऽस्मीत्यर्थ । कोऽपि राक्षस । विघ्न चक्ररक्षाया इति शेष ॥

(११८) प्रविश्येति । जअदित्यादि । जयति जयति भर्त्ता सज्जो रथो भर्त्तु विजय प्रयाणमपेक्षते । एष पुन नगरात् देवीनामाज्ञप्तिहर करभक आगत । सज्जो बद्धाल गस्त्र । विजयप्रयाण विजयाय प्रस्थानम् । अपेक्षते आकाङ्क्षति । आज्ञप्तिहरो वार्त्तावह । करभकस्ताद्धामा ॥

(११९) राजेति । सादर सानादरम । अम्बाभि र्मातृभि । अम्बा मातेति नाटयोक्तावसर । प्रेषित प्रेरित ॥

(१२०) दौवेति । अध ट्ठ अथ किम् ॥

(१२१) राजेति । सुगमम ॥

(१२२) दौवेति । तह तथा । करभअ इत्यादि । करभक एष भर्त्ता उपसर्प भवान् । उपसर्पतु उपगच्छतु ॥

करभक ॥ उपसृत्य प्रणम्य च ॥ जअदु जअदु भट्टा देवीओ आणवेन्ति ।(१२३)

राजा ॥ किमाज्ञापयन्ति । (१२४)

कर ॥ आआमिणि चउट्ठदिअहे पुत्तपिण्डपालणो णाम उववासो भविस्सदि तहिं दीहाउणा भवस्स अम्हे सम्भावइदव्व त्ति । (१२५)

राजा ॥ कृतस्तपस्विना कार्यक्रमितो गुरुजनाज्ञा उभयमनतिक्रमणीय तत् किमत्र प्रतिविधेयम् । (१२६)

विदू ॥ भो तिसङ्कु विअ अन्तरा चिट्ठ । (१२७)

राजा ॥ सत्यमाकुलीभूतोऽस्मि । (१२८)

क्षतत्रयो भिन्नदेशत्वाद् द्वैधीभवति मे मनः ।
पुरः प्रतिहतं शैलैः स्रोतः स्रोतोवहा यथा ॥ (१२९)

---

(१२३) करेति । जअइत्यादि । जयति जयति भर्त्ता देव्य आज्ञापयन्ति ॥

(१२४) राजेति । सुगमम् ॥

(१२५) करेति । आआमिणीत्यादि । आगामिनि चतुर्थदिवसे पुत्रपिण्डपालनो नाम उपवासो भविष्यति तत्र दीर्घायुषा भवता वयं सम्भावयितव्या इति । पुत्रेति । पुत्रपिण्डाना पुत्रेण प्रदीयमानपिण्डाना पालन रक्षण सम्भावनमिति यावत् यस्मात् स तथोक्त । भविष्यति अनुष्ठित इत्यादि । सम्भावयितव्या बहुमन्तव्या आगमनेन सम्भावयितव्या इति यावत् । इति आज्ञापयन्तीत्यन्वय ॥

(१२६) राजेति । अनतिक्रमणीयमनवहेलनीयम । तत् तस्मात । अत्र अनयो र्विषययो किं कर्म प्रतिविधेयमुपायतयानुष्ठातव्यम् ॥

(१२७) विदू इति । भो इत्यादि । भोस्त्रिशङ्कुरिवान्तरा तिष्ठ । न दिवं न भूमिमन्तराधितिष्ठति यथा त्रिशङ्कुरन्तरा तिष्ठेत्यर्थ । श्रूयते हि रामायणादौ कौशिकाख्यैस्तपोदीर्घैर्योद्भूमितोऽपि । नाकृष्य सशरीरस्त्रिशङ्कु र्भेजे सुराकुलस्थितीश्वरो गुरुशापोपजनितप्रतिकूल्येनाक्षपक्षलेनाधःपातितोऽन्तरान्तरीक्ष एवावाक्शिरताक्तिष्ठतीति । सोढुं न तु विस्तरभयादत्र ॥

(१२८) राजेति । सत्यमित्युपहासप्रतिषेधाय । आकुलीभूतोऽस्मि व्यग्रीभूतोऽस्मि ॥

(१२९) क्षतयोरिति । क्षतयोराश्रमपालनमात्रसम्भावनरूपयो र्भिन्नदेशत्वात् भिन्नो अनेको देशो अधिकरणभूमी ययोस्तौ तथोक्तत्वात्मे मम मन पुरो अग्रे शैलैः विनायकैः प्रतिहृत इत्यनिघात स्रोतोवहा नदीमां स्रोतो यथा स्रोत इव द्वैधीभवति एवमत्र भवतीति । अत्रोपमालङ्कार ॥

विचिन्त्य ॥ सखे माधव्य त्वमप्यस्मानिः पुत्र इव गृहीत ग भागानित प्रतिनिवृत्य तपस्विकार्यव्यग्रतामस्माकमावेद्य सत्वरमेनां पुत्रकार्यम-नुष्ठातुमर्हसि। (१२०)

विदू = भो मा रक्खसभीरुअं म आवगच्छ । (१२१)

राजा ॥ स्मित कृत्वा ॥ भो महाब्राह्मण कथमिदं त्वयि सम्भाव्यते ।(१२२)

विदू ॥ तेण हि राआणुअ विअ गच्छिदु इच्छेमि । (१२३)

राजा ॥ ननु तपोवनोपरोध परिहरणीय इति सर्वानेवानुयात्रिकां-स्तवैव सह प्रेषयिष्यामि । (१२४)

विदू ॥ सगर्व्वम ॥ जुअराओह्मि दाणिं संवुत्तो । (१२५)

राजा ॥ सस्मितम ॥ चपलोऽयं ब्राह्मणवटुः कदाचिदिमामस्मत्सा-र्थेनामन्तःपुरिकाभ्यो निवेदयेत् । भवत्वेव तावद् वक्ष्यामि । (१२६)

---

(१२०) विचिन्त्येति विचार्येत्यर्थः । प्रतिनिवृत्य प्रतिगत्य । सखेति । तपस्विनां कार्ये व्यग्रता व्यासक्तताम । व्यग्रो व्यासक्त व्याकुले इत्यमरः । आवेद्य विज्ञाप्य । अनुष्ठातुं कर्तुम ॥

(१२१) विदू इति । भो इत्यादि । भो मा राक्षसभीरुकं मामगच्छ । अवगच्छ जानीहि ॥

(१२२) राजेति । महाब्राह्मणशब्देनात्यमतित्वाक्षुद्रसम्भ्रमयुक्तं विप्रा पकर्षं व्याहरति । महाब्राह्मणशब्दो हि वाराणस्यादावत्याश्चर्यकविषेषु प्रयुज्यते । इदं राक्षसभीरुत्वम । सम्भाव्यते मन्यते ॥

(१२३) विदू इति । तेणेत्यादि । तेन हि राजानुज इव गन्तुमिच्छामि ॥

(१२४) राजेति । ननुरनुज्ञाने । तपोवनस्य उपरोध पीडा परिहरणीयो निवा रणीय । इति हेतो । अनुयात्रिकान् अनुगतान सैनिकान् ॥

(१२५) विदू इति । सगर्व्वं साहङ्कारम । गर्व्वोऽभिमानोऽहङ्कार इत्यमरः । जुअ इत्यादि । युवराजोऽस्मि इदानीं संवृत्त । युवराज कुमार । युवराजस्तु कुमारो भर्तृदारक इति भाटप्रोक्तावमरः ॥

(१२६) राजेति । व्यात्मगतमनतिस्पष्टम । चपलश्चञ्चल । ब्राह्मणवटु ब्राह्मण बालक । बालको मानवो बाल किशोरो वटुरित्यपीति शब्दरत्नावली । कदाचिच्छब्द सम्भावना द्योतयति । इत्यमेव प्रयुक्त काश्यपीयम । यथा पूर्वभागे । कदाचिदनभि

विदूषकस्य हस्तं गृहीत्वा। प्रकाशम्॥ सखे माधव्य ऋषिगौरवादाश्रममृगं प्रविशामि न खलु सत्यमेव तापसकन्यायामभिलाषो मे। पश्य। (१३७)

क्व वयं क्व परोक्षमन्मथो मृगशावैः सह वर्द्धितो जनः।
परिहासविकल्पितं सखे परमार्थेन न गृह्यतां वचः॥ (१३८)

विदू॥ एवमेतत्। (१३९)

राजा॥ माधव्य त्वमपि स्वनियोगमनुतिष्ठ। अहमपि तपोवनरक्षार्थं तत्रैव गच्छामि। (१४०)

इति निष्क्रान्ताः सर्वे।

द्वितीयोऽङ्कः। (१४१)

मतङ्गविकारदर्शनकुपितोऽयं बाधामित्थं करोति। यदुरुकोपा हि मुनिजनस्य प्रकृतिरित्यवधार्येति। उत्तरभागे च। कदाचिदसौ वैनतेयादप्राप्तालोक्यादसर्पस्येव तदृतुर्वपि मार्गैः स्वगृहिता भवन्तु भवन्न इति। तया कदाचिदस्य दृष्टान्तस्याभिप्रायेणापि भवत्येव तत्। तां तु तावत् पश्यामि इत्यादि। यत्सत्यार्थनां शकुन्तलाभिलाषम्। यत्नपुरस्कारार्थो भक्तिधीभ्यः। विधार्यांऽह भवतिति। एवं वक्ष्यमाणम्॥

(१३७) विदूषकस्येति। प्रकामं सुष्ठुम्। ऋषिगौरवादु ऋषीणां सम्मानात्। तापसकन्यायां शकुन्तलायाम्। तदभिलाषस्यासम्भाव्यतां दर्शयति पश्येति॥

(१३८) क्वेति। क्व वयं शकुन्तलाभिलाषरागपुरुषा इति भावः। क्व परोक्षोऽनाविर्भूतो मन्मथः कामो यस्य स तथोक्तः मृगशावैः मृगशिशुभिः सह वर्द्धितः परिपालितो जनः शकुन्तलारूपः। न कदाचिदप्यनयोः परस्परप्रणयाभिलाषसम्भव इति भावः। परोक्ष इति। अक्षाण्यिन्द्रियाणां परः व्यतिक्रम्य परोक्षः। परः शब्दस्य सान्तव्ययत्वात् पूर्वनिपातः। सखे परिहासेन विकल्पितमभिहितं यथा तापसकन्याभिलाषवादः परमार्थेन याथार्थ्येन न गृह्यतां न मन्यताम्। इत्थमेतत् सुन्दरी नाम। सदृशम्। यदुक्तो यदि सो जनो अमे अमरा लोए यदि सुन्दरी सदेति॥

(१३९) विदूरिति। एवमेतदिदम्॥

(१४०) राजेति। स्वनियोगमात्मानं प्रस्थातां अनुतिष्ठ मानय॥

(१४१) इतीति। इति द्वितीयोऽङ्कः। अङ्कः परिच्छेदः॥

इति श्रीशकुन्तलागर्भाङ्कस्याभिज्ञानशकुन्तलटीकायां
प्रमोदिकाख्यायां द्वितीयोऽङ्कविवरणम्॥

तृतीयोऽङ्कः ।

ततः प्रविशति कुशमादाय यजमानशिष्य । (१)

शिष्य ॥ विचिन्त्य सविस्मयम् ॥ अहो महाप्रभावो राजा दुष्मन्तः येन प्रविष्टमात्र एवाश्रम तत्भवति सारथिद्वितीये राजनि निरुपप्लवानि नः कर्म्माणि संवृत्तानि । (२)

का कथा बाणसन्धाने जात्यशब्देनैव दूरतः ।
हुङ्कारेणैव धनुषः स हि विघ्नान् व्यपोहति ॥ (३)

यावदेतान् वेदिसंस्तरणार्थं दर्भान् ऋत्विग्भ्य उपाहरामि । (४)

परिक्रम्यावलोक्य च ॥ व्याकोशे ॥ प्रियंवदे कस्ते दसुशीरानुलेपनं मृणाल वन्ति च नलिनीदलानि नीयन्ते । (५)

---

(१) तत इति । आदाय गृहीत्वा । यजमानशिष्य यागादेष्टा आरभ्ययाग इति यावत् कश्चित् कण्वशिष्य । आदेष्टा त्वङ्करे मती । शास्ता च यजमानश्चेत्यमरः ॥

(२) शिष्य इति । अहो विस्मये । महान् प्रभावो दण्डज तेजो यस्य स महाप्रभाव । स प्रतापः प्रभावश्च या तेज कोषदण्डजमित्यमरः । येन हेतुना । प्रविष्टमात्र एव अचिरप्रविष्ट एव । निरुपप्लवानि निरुपद्रवाणि । कर्म्माणि दृष्टिरूपाणि ॥

(३) केति । बाणसन्धाने बाणस्य धनुष्यारोपणे का कथा तत्कथापि नास्तीत्यर्थः । स हि राजा हुङ्कारेण हुमितिध्वनिनेव । वर्णात् स्वरूपे कारप्रत्ययो वक्तव्य । दूरतो दूरात् धनुषो जात्यशब्देन मौर्व्या शब्देनैव विघ्नान् विघ्नभूतान् राक्षसान् व्यपोहति निवर्त्तयति ॥—

(४) यावदिति । एतान् दर्भान् कुशान् वेद्या यागार्थं निर्म्मितपरिष्कृतभूमौ । संस्तरणार्थं मास्तरणार्थम् । वेदि परिष्कृता भूमिरित्यमरः । ऋत्विग्भ्यो वस्त्रालङ्कारादिभि परितोष्य दृतेभ्यो याजकेभ्य । अग्निष्ठाद्या धनै र्वार्या ऋत्विजो याजकाश्च ते इत्यमरः । उपाहरामि ददामि ॥

(५) परीति । व्याकोशे शून्ये अदृष्टप्रिय वदायामपि रङ्गभूमौ प्रियंवदा दृष्टेत्यर्थः । कस्येति सम्बन्धविवक्षाया षष्ठी । उशीरानुलेपन पिष्टवीरणमलम् । स्याद् वीरण वीरतर मूलेऽस्योशीरमस्त्रियामित्यमरः । नीयन्ते प्राप्यन्ते स्वयेति शेष ॥

श्रुतिमभिनीय ॥ किं कथयसि आतपलङ्घनाद् बलवदसुस्थशरीरा शकुन्तला तस्या शरीरनिर्व्वापणायेति । प्रियंवदे यत्नादुपचर्यतां सा हि तत्भवत कुलपते द्वितीयमुच्छ्वसितम् । अहमपि तावद् वैतानिकं शान्तुदकमस्या एव गौतमीहस्ते विसर्ज्जयामि ॥ इति निष्क्रान्त । (६)

विष्कम्भक । (७)

॥ तत प्रविशति समदानवस्थो राजा । (८)

राजा ॥ सचिन्त निश्चम्य । (९)

---

(६) श्रुतिमिति । श्रुति श्रवणमभिनीय कृपयित्वा श्रवणायेव कर्णं दत्त्वेति यावत् । व्यातपलङ्घनाद् रविकराभिभवात् । बलेति । बलवदतुल्यं मसुस्थमप्रकृतिस्थं शरीर यस्या सा सन्नशरीरेत्यर्थ । शरीरनिर्व्वापणाय देहस्य तापोपशमनाय । इति किं कथयसीत्यन्वय । व्यत्र चरक । फलिनीलोध्रसेव्याम्बुहेमपत्र कुटन्नटम् । कालीयकरसोमेत दाहे शस्त प्रलेपनमिति । सेव्यसुधीर । सुश्रुतच । शीत विधानमत ऊर्द्धमह प्रयच्छे दाहप्रशान्तिकरहर्षिमता नराणाम् । तत्रादितो मनयज्ञेन हित प्रदेहचन्द्रांशुहारतुहिनोदकशीतलेन । शीताम्बुशीतलतरैश्च शयानमेव हारैर्मृणाल-बलयैरबला स्पृशेयु । भिन्नोत्पलोज्ज्वलहिमे शयने शयीत पत्रेषु वा सजलबिन्दुषु पद्मिनीनामिति । तथा । दाहाभिभूतमथवा परिषेचयेत् तु शीतैरशीरजलचन्दनवारिभिरलमिति च । प्रियंवदाया प्रवेशवाक्यप्रयोगयोरनभिनयादुशीरनलिनीदलाहरणस्य एकस्य रक्षाव्यग्रतया गुहावद्येन गमनमनुज्ञैकत्तरदानञ्चाक्षत्तिमप्रिय वदायास्तदानीमभवदिति सूच यति । यत्नात् प्रयासात । उपचर्यतां परिचर्यताम । हि यत । सा शकुन्तला । द्वितीयमुच्छ्वसित यद्विश्वरप्राणभूता । वैतानिक यज्ञियम । क्रतुविस्तारयोरस्त्री वितानमित्यमर । शान्त्युदक शान्तिकुम्भस्थमुदकम । अर्घ्यं शकुन्तलार्घं । गौतमी हस्ते विसर्ज्जयामि गौतमीहस्ते दापयामि कर्त्तव्यमिरिति शेष ॥

(७) विष्कम्भक इति । तदाख्य अंगविशेष । इत्तामामङ्कपितानामपि शकुन्तला लापतदर्थं प्रियंवदाक्षतोशीरानुलेपनादिसहनाना वर्त्तिष्यमानानाञ्चोपपत्यर्थं नाथशकुन्तलाप्रवेशा दीनां निदर्शकत्वात् । स च मध्यमपात्रेण प्रयोजितत्वेन शुद्ध । तदुक्तम । इत्तवर्त्तिष्य माणानां कथ्यमानां निदर्शक । मल्लिनार्थ स्तु विष्कम्भ व्यादावङ्कस्य दर्शित् । मध्येन मध्य माभ्यां वा पात्राभ्यां स प्रयोजित । शुद्ध स्यात् स तु सङ्कीर्णो नीचमध्यमकल्पित इति ॥

(८) तत इति । समदानवस्थ सरदशायस्थ ॥

(९) राजेति । सचिन्त शकुन्तलाकृतिसहितम । व्याकुला कृतिराध्यानमित्यमर ॥

जाने तपसो वीर्यं स बाला परवतीति मे विदितम् ।
न च निम्नादिव सलिल निवर्त्तते मे ततो हृदयम् ॥ (१०)
भगवन् मन्मथ कुतस्ते कुसुमायुधस्य सत स्तैक्ष्ण्यमेतत् । (११)
स्मृत्वा ॥ आ ज्ञातम् । (१२)
अद्यापि नूनं हरकोपवह्निस्त्वयि ज्वलत्यौर्व इवाम्बुराशौ ।
त्वमन्यथा मन्मथ मद्विधाना भस्मावशेषः कथमेवमुष्णः ॥ (१३)
अपिच । त्वया चन्द्रमसा चातिविक्लवमनोयाभ्यामभिसन्धीयते कामि-
नार्थं । कुत. । (१४)

---

(१०) जान इति । तपसो वीर्यं प्रभावमहं जाने वेद्मि । वीर्यं बले प्रभावे चेत्यमर । एतेन स्वेक्ष्वाकुवोऽस्या परिग्रह खण्डित । एव सा बाला शकुन्तला परवती परायत्ता इति मे विदितमनुभूयमान भवति । एतेन तद्दिक्ष्वयापि समागममसम्भावित दर्शयति । एव मम मनश्च निम्नात् सलिल तोयमिव तत शकुन्तलातो न निवर्त्तते पराङ्मुख भवति । तदत्र कि करणीयमिति भाव । व्यतीपमालङ्कार । इयमार्या ॥

(११) भगवन्निति । भगवन् माहात्म्यवन् । भग श्रीकाममाहात्म्यवीर्यप्रयत्नार्क-कीर्त्ति ष्वित्यमर । मन्मथ मदन ते तव कुसुमानि पुष्पाण्येवायुधानि प्रहरणानि यस्य स तथोक्तस्य सत कुत कस्मादेतत् तैक्ष्ण्य तीक्ष्णभाव ॥

(१२) स्मृत्वेति । स्मृत्वा स्मृति कृपयित्वा । चिन्तया तीक्ष्णताबीजनिश्चयादाह आमिति । आ ज्ञाने निश्चयस्मृत्योरिति मेदिनी । ज्ञात निश्चितम ॥

(१३) मनसावधारित तीक्ष्णताबीज वचसा प्रकाशयति यद्यापीति । हे मन्मथ हरस्य शम्भो कोपवह्नि क्रोधोद्गतकपालनेत्रानल अम्बुराशौ समुद्रे । वारिराशिरब्धिरित्यमरे । और्वो वाडवानल इव । और्व्वस्तु वाडवो वडवानल इत्यमर । नूम निश्चितमद्यापि त्वयि ज्वलति न निर्व्वाणता गत इत्यर्थ । अन्यथा तस्य निर्व्वाणे भस्मैवावशेषो यस्य स तथोक्तस्य मम विधा प्रकारो येषा ते तथाभूताना दृष्टपियाविरहमागमानामिति यावत् सम्बन्धे कथमेवमित्यनुष्णा । विधा विधौ प्रकारे चेत्यमर । अतीष्णतया वह्निभस्मसाधना-नन्तरे हरकोपानलज्वलनसङ्गावानुभवरूपवैचित्र्यादनुभानमलङ्कार । यदुक्त दर्पणे । अनुमानन्तु विच्छित्त्या ज्ञान साध्यस्य साधनादिति । विच्छित्तिरलङ्कारान्तरसतवैचित्र्यम । इत्तमिदमुपजाति र्मम ॥

(१४) अधुना चासत्प्रसक्तिता दर्शयितुमाह अपिचेति । त्वया मन्मथेन चन्द्रमसा दृष्टेन च अतिविक्लवमनोयाभ्यामतिशयेनोत्सुकाभ्या द्वाभ्या कामिना प्रियाभिलाषिण्या दार्थं

तव कुसुमशरत्वं शीतरश्मित्वमिन्दो-
र्द्वयमिदमयथार्थं दृश्यते मद्विधेषु।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखै-
स्त्वमपि कुसुमबाणान् वज्रसारीकरोषि॥ (१५)

अथवा। (१६)

अनिशमपि मकरकेतुर्मानसो रुजमावहन्नभिमतो मे।
यदि मदिरायतनयनां तामधिशय्य प्रहरतीति॥ (१७)

भगवन्नेवमुपालब्धस्य ते न मां प्रत्यनुकोशः। (१८)

सङ्ग। छन्दभेदा समैर्वर्गं सङ्गसार्थैस्तु जन्तुभिरित्यमर। अभिसन्धीयते प्रतार्यतेऽनेनाभिसन्धान व्यलीकञ्च प्रतारणमिति हेमचन्द्र॥ ७

(१५) तवेति। तव मन्मथस्य कुसुमशरत्वं कुसुमशरसत्त्वं तथा इन्दोश्चन्द्रस्य शीतरश्मित्वं शीतरश्मिनामधेयत्वं इदं द्वयं मद्विधेषु कामिजनेषु यथार्थमर्थमतिक्रान्त्य दृश्यते तथाहि हिमानि तुषारा गर्भे अभ्यन्तरे येषां ते तथोक्तैर्मयूखैररुभिरग्निं विसृजति विकिरति। तथाच शीता शीतला रश्मय किरणा यस्य स शीतरश्मिरित्यर्थो न सम्भवतीति भाव। तथा त्वं मन्मथोऽपि कुसुमबाणान् पुष्पतया दृश्यमानान् शरान् वज्रादपि सारो बल येषा ते वज्रसारा। सारो बले स्थिरांशे चेत्यमर। वज्रसारान् वज्रतुल्यान् करोषि। चि क्रभृस्तिष्वभूततद्भाव इति चि। ईकारस्य पूर्वाकारस्य। एवञ्च कुसुमानि शरा यस्य स कथं न युज्यते वज्रशरत्वस्यैव युक्तत्वादिति भाव। अत्रापह्नुतिरलङ्कार। यद्वक्ष्यमाणोदाहरणं दण्डिना। अपह्नुतिरपह्नुत्य किञ्चिदन्यार्थ दर्शनम। न पद्मेषु शरत्वस्य सङ्क्रमः परिणामिति। चन्द्रिका चन्दन मन्दो गन्धवाहश्च दक्षिण। सेयमग्निमयी दृष्टि शीता किल परान् प्रति। शैशिर्यमभ्युपेत्यैव परेष्वात्मनि कामिनाम। औष्ण्यप्रदर्शनात् तस्य सैषा विप्रयनिह्नुतिरिति। वृत्त मालिनी नाम वृत्तम॥

(१६) निन्दितामपि स्वक्रियां कथञ्चिदभिनन्दयन्नाह अथवेति॥

(१७ अनिशमिति। मकरकेतु कामो मदिरे मत्तखञ्जनाविव भायते दीर्घे नयने यस्या सा तथोक्ता। मदिरा मत्तखञ्जन इति शब्दरत्नावली। ता शकुन्तलामधिकृत्य लक्ष्यीकृत्य यदि प्रहरति इति एव स्यात् तदा अनिश सतत मनसो रुज पीडामावहन् जनयन्नपि मे अभिमत सम्मत स्यादिति शेष। अभिमत इति ज्ञानार्थत्वाद् वर्त्तमाने क्त॥

(१८) भगवन्निति। उपालब्धस्य दुरुक्तस्य। दुर्व्याद स्यादुपालम्भस्तत्र य स्तुतिपूर्वक। सोऽनुस्थान मनिन्द्यस्तु यत्तत्र परिभाषणमिति जटाधर। अनुकोशो दया। कृपा दयानुकम्पा स्यादनुकोशोऽपीत्यमर॥

वृथैव सङ्कल्पशतैरजस्रमनङ्ग नीतोऽसि मयातिदुःखिम् ।
आरुह्य चापं श्रवणोपकण्ठे मयैव मुक्तस्तव बाणमोक्ष ॥(१९)

सखेद ॥ परिक्रम्य ॥ क्व नु खलु निरस्तविघ्नैस्तपस्विभिरनुज्ञात. खिन्नमात्मानं विनोदयामि न च प्रियादर्शनादृते शरणमन्यत् यावदनामन्त्रि-
ष्यामि । (२०)

सदृक्षमवलोक्य ॥ द्रुमासुग्रतपा वेला प्रायेण लतावलयवत्सु मालिनी तीरेषु सप्तपर्णीजना तत्भवतो शकुन्तला गमयन्ति भवतु तत्रैव तावद् गच्छामि । (२१)

परिक्रम्यावलोक्य च ॥ अनया बालपादपवीथ्या सुतनुरचिर गतेति तर्कयामि । कुत । (२२)

---

(१९) वृथैवेति । हे अनङ्ग सङ्कल्पशतै मिथ्यामधिलक्ष्य मानसकर्म्मभिस्ते करणै । सङ्कल्प कर्म्म मानसमित्यमर । अजस्रमनिश वृथैव निरर्थकमेव मया त्वमतिदुःखिमति विपुलता नीतो गमितोऽसि श्रवणोपकण्ठे कर्णान्तिके । उपकण्ठान्तिकाभ्यर्णाभ्यया व्ययमितोऽव्ययमित्यमर । चाप धनुराकृष्य मय्येव तव बाणमोक्ष शरविक्षेपो युक्त उचित । अत्र राज्ञपरिवर्द्धितस्य तदुपकृतिरेवोचिता क्रिया तत्र बाणमोक्षस्त्वपकारकत्वेन विसदृशो भवतीति विषमाख्योऽलङ्कार । यदुक्त चन्द्रालोके । विरूपकार्य्योत्पत्तिरपर विषम मतमिति । वृत्तमुपजाति नाम ॥

(२०) सखेदमिति । सोपतापमित्यर्थ । अतएव खिन्नध्यौ दैन्यके इति कवि कल्पद्रुमव्याख्याने दैन्यकसुपतप्तीभाव इति धातुदीपिका । दु विंतर्के । खल जिज्ञासायाम । निरस्ता निवारिता विघ्ना येषा ते तथोक्तैस्तपस्विभिरनुज्ञातोऽनुमतोऽहं क्व कस्मिन् प्रदेशे खिन्नमुपतप्तमात्मान विनोदयामि आनन्दयामि । प्रियादर्शनादृते शकुन्तलादर्शनमन्तरेण । शरण विश्रान्तरेणेति हलायुध । अन्यारभ्येति क्रियायोगे पञ्चमी । अन्यत शरण रुचिर न भवतीत्यर्थ ॥

(२१) अर्द्धमिति । अर्द्धमवलोक्य ईषन्मुखीभूय । उपसृत्य सपत्नीत्युपतपा ता माध्यन्दिनीमिति यावत् । प्रायेण बाहुल्येन कादाचित्कबाधेनेति भाव । लतावलयवत्सु लताग्रहवत्सु । मालिन्या सरितस्तीरेषु तटभूमिषु वसन्तीति शेष । गमयति यापयति वेलामित्यनेन सम्बन्ध ॥

(२२) परीति । बालपादपवीथ्यामल्पवयस्कवृक्षता मां वीक्ष्य त्वेषा । दीव्यतिरवचि

सम्मीलन्ति न तावद् बन्धनकोषाश्रयावचितपुष्पा ।
चीरस्निग्धाश्यामी दृश्यन्ते किसलयच्छेदाः ॥ (२३)

स्पर्शं रूपयित्वा ॥ अहो प्रवातसुभगोऽयं वनोद्देशः । (२४)

अक्ष्योरविन्दसुरभि, कणवाची मालिनीतरङ्गाणाम् ।
अङ्गैरनङ्गतप्तै र्निर्दयमालिङ्गितुं पवनः ॥ (२५)

विलोक्य ॥ हन्तास्मिन् वेतसलतामण्डपे सन्निहितया शकुन्तलया भवितव्यम् । तथाहि । (२६)

अभुग्नता पुरस्ताद्वगाढा जघनगौरवात् पश्चात् ।
हारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा ॥ (२७)

पङ्क्तिश्रेणौ लेखासु राजयदृश्यमरः । मदनुगतमार्गेक्षेति यावत । सुतनु शकुन्तला । अचिरमविनम्रम । अचिरप्रयाणे हेतुस्तुथाप्यसौ किल दृति ॥

(२३) सम्मीलि । तया शकुन्तलया अवचितानि उद्भृतानि कुसुमानि पुष्पाणि येभ्य स्ते तथोक्ता बन्धनकोषा पुष्पमूलबन्धनजनका कोषाकारावत्त सम्मीलन्ति मुद्रा यान्ति चिर प्रयाणे तु ते सममीलिष्यन्नेवेति भाव । तथा अमी किसलयाना पल्लवाना छेदा खण्डानि च । छेद खण्डोऽस्त्रियामिति त्रिकाण्डशेष । चीरेण प्रसवभङ्गप्रवृत्तनिर्यासेन स्निग्धा मसृणा दृश्यन्ते । दृयमाया ॥

(२४) स्पर्शमिति । रूपयित्वा तथा कृत्वा । प्रवातेति । प्रकृष्टेन गैत्यसौगन्ध्य मान्द्यात्मकगुणत्रयशालिना वातेन सुभग सुन्दर । सुन्दरेऽधिकभाग्ये च दुर्दिनेतरवासरे । तुरीयाशे श्रीमति च सुभग दृति शब्दार्णव । वनोद्देशो वनप्रदेश ॥

(२५) वातस्य गैत्यादिगुणान् दर्शयति अस्य दृति । अरविन्दैरम्भोरुहै सुरभि सुगन्धि । सुगन्धौ च मनोज्ञे च वाच्यवत सुरभि स्मृत दृति विश्व । एतेन सौगन्ध्य दर्शितम् । तथा मालिन्यात्तरङ्गणासुर्म्मीणा कणानमून् वहतीति कणवाही । लवलेश कणाणव दृत्यमर । एतेन गैत्य दर्शितम । पवनो वायु अनङ्गतप्तै र्मदनदाहवह्निरङ्गै रवयवै निर्दय गाढमालिङ्गितु शक्य । अत्र निर्दयमितत्रनेन मान्द्य ख्यापयति । दृयमाय्यौ ॥

(२६) विलोक्येति । हन्तकारो हर्षं द्योतयति । शकुन्तलया अस्मिन् वेत सलताभि र्वाणीरतरुगताभि र्लताभि र्मण्डपे गृहभूते सन्निहितया व्यवस्थितया भवितव्यम । भावितव्य । उक्त प्रमाणयितुमाह तथाहीति ॥

(२७) अभुग्नेति । पुरस्तादग्रतोऽभुग्नता ऋजुता तथा जघनयो कटिदेशपुरो

यावद् विटपान्तरेणावलोकयामि । (२८)

तथा कृत्वा सहर्षम् ॥ अये लब्धं नेत्रनिर्वाणम् । एषा मनोरथप्रिया मे शकुसुमास्तरण शिलापट्टमधिशयाना सखीभ्यामुपास्यते । भवतु लता-व्यवहितः शृणोमि विश्रब्धकथितान्यासाम् ॥ इति विलोकयन् स्थित । (२९)

॥ तत प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला ॥ (३०)

सख्यौ ॥ उपवीज्य ॥ हला सउन्तले अवि सुहाअदि दे णलिणी-पत्तवादो । (२१)

शकु ॥ सखेदम् ॥ किं वीजयन्ति म प्रियसख्यौ । (२२)

सख्यौ ॥ सविषाद परस्परमवलोकयत । (२३)

राजा ॥ बलवदसुख्यशरीरा तत्भवती दृश्यते । (२४)

भागयो गौरवात् भारात् । पश्चान्नितम्ब स्त्रीकटया श्रोणे तु जघन पुर इत्यमर । पश्चात गुल्फनिपातभूमौ व्यवगाढा निम्ना अभिनवा अचिरभूता पदपङ्क्ति पादचिह्नावली । पद यद्धे च वाक्ये च व्यवसायप्रदेशयो । पादतच्चिह्नयो स्थानत्राणयोरङ्घ्रवस्तुनोरिति मेदिनी । अथ नतसखतानपङ्कज पाण्डुरवर्णौ सिकता वालुका यस्मिन् तत् तथोक्त हारे दृश्यते । इत्यार्या ॥

(२८) यावदिति । विटपान्तरेण विटपानां पल्लवानामन्तरेण व्यवधानेन ॥

(२९) तथेति । अये सम्भ्रमे । नेत्रनिर्वाण नयनयोस्तापशान्ति । मनोरथस्य अभिलाषस्य प्रिया प्रीतिकरी । यस्यामभिलाषोऽविरत रमत इति भाव । सकुसुमास्तरण कुसुमशय्यासहितम् । शिलापट्ट पाषाणफलकम । अथ पट्ट स्यात् फलके नृपशासने इति त्रिकाण्डशेष । अधिशीङ स्थासेत्युपादानादधिकरण कर्म । उपास्यते शुश्रूष्यते । व्यवहितः शकुन्तलायास्तत्सख्योरित्यर्थ ॥

(३०) तत इति । यथोक्तव्यापारा कुसुमशय्याधिशायिनी सखीशुश्रूष्यमाणा च ॥

(३१) सख्याविति । उपवीज्य अन्तिके वीजयित्वा । हलेत्यादि । अयि शकुन्तले अपि सुखयति ते नलिनीपत्रवात । अपि प्रश्ने । सुखयति सुख करोति । ते इति सम्बन्धसामान्यविवक्षाया षष्ठी ॥

(३२) शकु इति । सखेद सोपतापम् । किमित्यादि । किं योजयतो मा प्रियसख्यौ ॥

(३३) सख्याविति । सविषाद खेदेन सहितम ॥

(३४) राजेति । बलवत् अतीव । बलवत् शठ किमुत खल्वतीव च निर्भरे इत्यमर । ४

सवितर्कम्॥ तत् किमयमातपदोषः स्यात् उत यथा मे मनसि वर्त्तते। (२५)

साभिलाषं निर्वर्ण्य॥ अथवा कृतं सन्देहेन। (२६)

स्तनन्यस्तोशीरं प्रणयिलघुबाहुलतिकं
प्रियायाः साबाधं तदपि कमनीयं वपुरिदम्।
समस्तापः कामं मनसिजनिदाघप्रसरयो-
र्न तु ग्रीष्मस्यैवं सुभगमपराद्धं युवतिषु॥ (२७)

यद्यस्यशीरा सन्तप्तशरीरा। यत्र दाहप्रणाशिकरयोः कुसुमास्तरणनलिनीपत्रवातयोः सद्भावात् तापानुमानं तस्य च गौरवबुद्धिः स्वयं सुखानुभवव्यक्तेः। कुसुमास्तरणादीनां दाहप्रणाशिकरत्वमाह सुश्रुतः। शीतं विधानमतः जड़ं मद्यं प्रवक्ष्ये दाहप्रणाशिकरबुद्धि-मता नराणामित्युपक्रम्य—व्यासादयन् पवनमाहृतमिष्टगन्धकह्लारपद्मदलशैवलसङ्घेभ्यः। शीतैर्वनान्तपवनैः परिस्पृश्यमाणः प्रीतश्चरेत् भवनकाननदीर्घिकास्विति। तथा। मांसोशीरमाल-धनकुङ्कुमपद्मपत्रजातोत्पलप्रियकुकेशरपुण्ड्रोके। पुन्नागनागकरवीरलतोपकारे तस्मिन् गृहे कमलरेणुकल्पे शयीतेति च॥

(२५) सवितर्कमिति। किमेवमुतैवमिति तत्त्वानुसन्धानं वितर्कः। तत् तावत्। त्वयं सन्ताप। व्यातपदोषः व्यातपोपजनितविकारसमूहः। उतो विकल्पे व्यथवेत्यर्थः। उताप्यर्थविकल्पयोरित्यमरः। मनसि यथा वर्त्तते यथानुभवामि स एवेत्यर्थः। स्मरसन्ताप इति भावः॥

(२६) साभिलाषमिति। निर्वर्ण्य स्थिरमवलोक्य। निर्वर्ण्यं सं तु निध्यान दर्शना लोकनेक्षणमित्यमरः। कृतं व्यलम्। कृतं युगेऽलमर्थे चेति मेदिनी। सन्देहेनेति कारण्या र्थेन योगे तृतीया॥

(२७) स्तनेति। प्रियायाः मदुन्मत्तायाः इदं वपुः शरीरं स्तनयो र्न्यस्तं दत्तशीरं वीरणमूलानुलेपनं यत्र तत् तथोक्तं तथा प्रणयिलं स्नेहभूतं सृणालस्य एकवल्लय यत्र तद् तथोक्तम्। णिलं स्नेहयः स्नेह इति शब्दरत्नावली। अतएव साबाधं व्याबाधया सम्यक्-पीडया सह वर्त्तमानं तदपि तथापि कमनीय मनोज्ञम्। मनसिजस्य कामस्य निदाघस्य ग्रीष्मस्य च प्रसरयो र्वेगयोस्तापो दाह इव। तथाच गरुडपुराणम्। कामाद् भ्रमोऽरुचि-र्दौर्बल्यं सोनिद्राधीष्टसिद्धय इति। काम स्यादस्तु। व्यकामानुमतौ कामभितत्रमरः। किन्तु युवतिषु यौवनवतीषु विषयेषु ग्रीष्मस्य व्यपराद्धं सन्तापदानापराध एव सुभगमित्य सुचारु वपुःकमनीयताकरमिति यावत्। न भवतीत्यर्थः। अतो मनसिजदाह एवायमिति भाव। इदं शिखरिणी नाम वृत्तम्॥

प्रिय ॥ जनान्तिकम् ॥ अणसूए तस्स राएसिणो पढमदंसणादो आरब्भिअ पज्जुच्छुअमणा सउन्तला ण क्खु से असणिमित्तो आतङ्को भवे । (३८)

अन ॥ सहि मम वि एआरिसी आसङ्का हिअअस्स भोदु पुच्छिस्सं दाव णं । (३९)

प्रकाशम् ॥ सहि मुच्छिदव्यासि किम्पि बलीओ क्खु दे अङ्गाणं सन्दावो । (४०)

राजा ॥ वक्तव्यमेव । (४१)

अभिरविपदान्यस्यालथाहि दुःसहनिदाघघर्मांशोनि ।
भिन्नानि श्यामिकया मृणालनिर्म्माणवलयानि ॥ (४२)

अक ॥ पूर्व्वार्द्धेन अयनादुत्थाय ॥ हला भण जं वत्तुकामासि । (४३)

---

(३८) प्रियमिति । जनान्तिकमप्रकाशम् । तत्प्रकारस्तु पूर्व्वं दर्शित । अणसूये त्यादि । अनसूये तस्य राजर्षेः प्रथमदर्शनादारभ्य पर्य्युत्सुकमना अकुन्तला, न खल्वन्या अन्यनिमित्त आतङ्को भवेत् । प्रथमदर्शनादित्यत्र अन्यारभ्यार्थेति पञ्चमी । पर्य्युत्सुकमना सत्सक्तिष्ठतमना । अन्यनिमित्तं हेतु र्येस्य सोऽन्यनिमित्त । आतङ्कस्ताप । कृकृतापशङ्का आतङ्क इत्यमर ॥

(३९) अनेति । सहीत्यादि । सखि ममाप्येतादृशी आशङ्का हृदयस्य, भवतु प्रक्ष्यामि तावदेनाम् । आशङ्का स शयारोप । एनां अकुन्तलाम ॥

(४०) प्रकाशमिति । सहीत्यादि । सखि प्रष्टव्यासि किमपि बलीयान् खलु ते अङ्गानां सन्ताप । अतिशयेन बलवानिति बलीयान् । सुप्सुपेति समासो यणो लोप । अङ्गु यक्षात् ॥

(४१) राजेति । वक्तव्य यथमार्हम् । बलीयानित्यादीति शेष ॥

(४२) अथ सन्तापबलीयस्त्वस्य यथमार्हतां साधयति अभीति । तथाहि अधिन-शूरस्य करा अय इव विश्वदानि शुभ्राणि अया अकुन्तलाया मृणालनिर्म्माणवलयानि मृणालनिर्म्मितवलयानि । कर्म्मधयवत् । श्यामिकया तापोपजनितकालिम्ना भिन्नानि विदि दानि सति दुःसह असह्यात् सहन्ते सहनि कथयन्तीति दुःसहनिदाघ-धर्मांशोनि भवन्तीति शेष । भेदो हेधे विशेषे च उपतापे विदारण इति विश्व । इयगार्य्या ॥

(४३) अङ्गु इति । पूर्व्वार्द्धेन अङ्गुलीदलधोन । अयनात् अध्यात । अयादां

अन ॥ हला सउन्तले अलब्भन्तरा अम्हे दे मणोरहस्स वुत्तन्तस्स किन्तु जादिसी इदिहासकथाणुबन्धेसुं कामिअणाणं अवत्था सुणीअदि तादिसी तुह त्ति तक्केमि ता कधेहि किं णिमित्तं दे अअं आआस त्ति विआरं परमत्थदो अआणिअ पडीआरस्स किल पदीआरम्भो (४४)

राजा ॥ अनसूयरागि मदीयस्तर्कोऽवगतः । (४५)

अक्क ॥ बलीओ मे आआसो ण सक्कणोमि सहसा णिवेदिदुं । (४६)

प्रिय ॥ सुट्ठु, क्खु एसा भणादि किएंदं अत्तणो उवहेवं णिगूहसि अणुदिअसं क्खु परिहीअसि, अङ्गेसुं लावण्णमई छाया केवलं तुम ण मुञ्चदि । (४७)

गयनीयवत् । अयनमित्यमर । हलेत्यादि । अयि भव्य यद् वक्तुकामासि । भण वद । वक्तुकामोऽभिलाषो यस्या सा वक्तुकामा ॥

(४४) अनेति । हलेत्यादि । अयि अकृत्रिमे अलब्धान्तरा वयं ते मनोरथस्य वृत्तान्तस्य किन्तु यादृशी इतिहासकथानुबन्धेषु कामिजनानामवस्था श्रूयते तादृशी तवेति तर्कयामि । तत कथय किं निमित्तं ते अयमायास इति । विकारं परमार्थतोऽज्ञाता अनारम्भं किल प्रतीकारस्य । अलब्धान्तरा अनवगतविशेषा । इतीति । इतिहासकथानां पुरावृत्तकथानामनुबन्धेषु अभिवर्तनेषु प्रवृत्तिष्विति यावत् । दीर्घोत्पादेऽनुबन्ध स्यात् प्रवृत्त्यादिषु नश्वरे । सख्यानुयायिनि शिशौ प्रकृतस्यानिवर्तन इत्यमर । कामिजनानामनङ्गाधस्तज्जनानाम् । अवस्था कालिको विशेष । विशेष कालिकोऽवस्था इत्यमर । किं निमित्तं किमर्थम् । त्वादृशोऽर्थोऽकृते स्वेषु सर्वो इति प्रथमा । निमित्तशब्दोऽत्र प्रयोजनपर । आयास श्रमः । विकार रोगम् । विकारो विकृतौ रोगेऽपीति विश्व । परमार्थतत्त्वज्ञ । प्रतीकारस्य चिकित्सायाः । अनारम्भ किल आरम्भो न स्यादेव । किलशब्दो निश्चये ॥

(४५) राजेति । मदीयस्तर्कं अय वा कारयन्नाप इत्येवरूप ॥

(४६) अक्क इति । बलीयादि । बलीयान् मे आयास न शक्नोमि सहसा निवेदयितुम् । आयास श्रम । सहसा अतर्कितम् । अतर्कितेषु सहसेव्यमर ॥

(४७) प्रियमिति । अट्ठु इत्यादि । अट्ठु खल्वेषा भणति किमेतमात्मन उपहवं निगूहसि अनुदिवस खलु परिहीयसे । अङ्गेषु लावण्यमयी छाया केवल त्वां न मुञ्चति । एषा अनसूया । किं कथम् । उपहव विकारम् । निगूहसि गोपायसि । अनुदिवस अनुदिनम् । परिहीयसे रुजादिभि धौतैभि र्हीयसे । लावण्यमयी सुकुमारेषु छायादा-

राजा ॥ अवितथमाह प्रियंवदा । तथाहि । (४८)

श्यामश्यामकपोलमाननसुरः काठिन्यमुक्तस्तनं
मध्यः क्लान्ततरः प्रकामविनतावंसौ क्षविः पाण्डुरा ।
शोचत्या च प्रियदर्शना च मदनग्लानेयमालक्ष्यते
पत्राणामिव शोषणेन मरुता स्पृष्टा लता माधवी ॥ (४९)

शक ॥ निश्चप्त ॥ कस्य वा अणस्स कधइस्सं किन्तु आश्वासहेतुआ वो भविस्सं । (५०)

स्तरस्त्वमिवान्तरा । प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते इत्यत्रज्वलनोलमणिदर्शित-लक्षणा । छाया कान्तिः । छाया सूर्य्यप्रिया कान्तिः प्रतिबिम्बमनातप इत्यमरः । सुप्तमिति जहाति ॥

(४८) राजेति । अवितथं सत्यम् । आह चतुर्दिवसं परिक्षीयस इतीति शेषः । रूपादियोगं दर्शयितुमाह तथाहीति ॥

(४९) श्यामेति । श्यामं शुष्कं यस्या इत्यादिः । श्यामश्यामावतिक्षीणौ कपोलौ गण्डौ यत्र तत् तथोक्तम् । तथा उरौ वक्षः काठिन्येन कठिनभावेन मुक्तौ परित्यक्तौ स्तनौ यत्र तत् तथोक्तम् । एतद्द्वितयेन धातुक्षयारम्भो दर्शितः । तथा मध्यो मध्यावयवः क्लान्ततरोऽतिदुर्ब्बल । तथा अंसौ भुजौ प्रकामविनतौ अतीवावनतौ । आभ्यां सक्लान्त-शोभता । तथा क्षविर्द्युतिश्च पाण्डुरा पाण्डुवर्णा अतएव पत्राणां शोषणेन शोषकेण पाण्डुरी-कारकेणेति यावत् । गन्धादित्वादगः । मरुता दक्षिणानिलेन स्पृष्टा माधवीलतेव शोच्या शोचनीया तथा प्रियं प्रीतिकरं दर्शनं यस्या सा तथोक्ता च इयं शकुन्तला मदनग्लाना कामविक्लवा आलक्ष्यते निश्चीयते । ग्लानग्लान्नु श्यामयोर्यो विक्लवो व्याधिरुपट्टस्तेत्यमरः । एतेन शोकशोचितां गतेति सुप्तष्टं दर्शितम् । यथाह शबरः । व्यवायशोषी शुक्रस्य क्षय-निष्ठेष्टदेहता । पाण्डुदेहो यथापूर्वं शोषणे धातव' । मध्यानशीलः सक्लान्त. शोक शोषणि साहचर्य' । विना शुक्लक्षयकृतं विकारेऽपलक्षित इति । उत्तरश्लोकस्य भावप्रका-शार्थमिदमाख्यायिकाभिधीयते मध्यानशीलः यथाभावेन शोको लक्षितस्तादृध्यानपरः । सक्लान्त' मिति विशेषणात् । साहचर्य. पूर्वोक्तव्यवायशोषिणोऽत्रग्रहणं । तेन पाण्डुदेहः सन् धातुक्षययुक्तो भवति परं शुक्लक्षयकृते विकारे मेढ्रवृषणवेदनादिभिर्विक्लिन्नो भवति व्याधिस्तापादिति ॥

(५०) अङ्ग इति । निश्चप्त दीर्घमिति शेष' । कस्येत्यादि । कस्य वा अन्यस्य अनर्थविष्यामि । किन्तु आश्वासहेतुका वो भविष्यामि । अन्यस्येति सम्बन्धविवक्षायां षष्ठी । मुद्रक्षमत्वमेव कथयितुमन्यस्मिति भाव । आश्वासहेतुका इत्यत्रेत ॥

विदू॥ सहि अदो ज्जेव णिव्वन्धो सिणिद्धजणसविभत्त वसु दुक्ख मज्जणेण भोदि। (५१)

राजा॥ दृष्टा जनेन समदु खसुखेन बाला
नेय न वक्ष्यति मनोगतमाधिहेतुम्।
दृशो विरत्य बङ्कणोऽप्यनया सतृष्ण
मत्तोत्तरश्रवणकातरतां गतोऽस्मि॥ (५२)

भक्कु॥ जदो पब्भदि तवोवणरक्खिदा सो राएसी मम दसनपथ गदो।

इत्यर्द्धोक्तेन लज्जा नाटयति। (५३)

उभे॥ कधेदु कधेदु पियसही। (५४)

भक्कु॥ तदो पब्भदि तग्गदेन गहिलासेन एत्तावदवत्थ म्हि सवुत्ता। (५५)

---

(५१) उभे इति। सहीत्यादि। सखि अतएव निर्व्वन्ध स्निग्धजनसविभक्त दु ख सङ्ग्रवदन भवति। निर्व्वन्ध स्थिरनिश्चय स्निग्धेति। स्निग्धजनेन वयस्यजनेन सविभक्त विभज्य प्रतिपादितम। वयस्य स्निग्ध सखया इत्यमर। दु ख सङ्ग्रा सहनीया वदना स वदोऽनुभव इति यावत् यस्य तत् तथोक्त भवति। लघुतयेवेति भाव। स वेदो वदना न नेत्यमर॥

(५२) राजेति। किं वक्ष्यतीत्यौत्सुक्यादाह दृष्टेति। समे सगताभ्यामन्यूने दु खसुखे यस्य स तेन जनेन सखीजनेनेति यावत् दृष्टा कृतमन्त्रा इय बाला किशोरी मनो गत मनसि वर्त्तमान व्याधे र्मन पीडाया हेतुम। दु खाधि र्मानसी व्यथेत्यमर। न वक्ष्यति न श्रावयिष्यति न एव न वक्ष्यत्येवेत्यध। अनया बालया विद्धत्य परिहृत्य बङ्कणो ऽनक्षा सतृष्ण सस्पृहम। तृष्णे स्पृहापिपासे ते इत्यमर। दृष्टोऽपि येन सदृशेनेवानु रागो निवेदित स्यादिति भाव। अत्र अत्र वचनोन्मुखदृशाया उत्तरस्य प्रतिवचनस्य श्रवणे विषये कातरता किमेषा वक्ष्यतीत्यधीरता गत प्राप्तोऽस्मि। अधीरे कातर इत्य मर। यतो मनोभवातपबाधेति प्रस्तुतक्लेशो विफलोऽय मनोरथाडम्बर स्यादिति भाव। इद वसन्ततिलक नाम वृत्तम॥

(५३) भक्कु इति। जदो इत्यादि। यत प्रभृति तपोवनरक्षिता स राजर्षि मम दृग्यनपथ गत। यत प्रभृति यत्कालमारभ्य। अन्यारभ्येति पञ्चमी। व्यलीकेन तत प्रभृतीत्यादिप्रतीकान्तशब्दाङ्केन। नाटयति रूपयति॥

(५४) उभे इति। कधेदु इत्यादि। कथयतु कथयतु प्रियसखी। सुगमम॥

(५५) भक्कु इति। तदो इत्यादि। तत प्रभृति तद्दर्शनाभिलाषेण एतावदव

उभे ॥ दिट्ठिआ दे अणुरूए वरे णन्दिलासो, अधवा सागरं उज्झिअ कहिं महाणदीए पविसिदव्वं । (५६)

राजा ॥ सहर्षम् ॥ श्रुत यत्कर्तव्यम् । (५७)

स्मर एव तापहेतु र्निर्वापयिता स एव मे जात ।
दिवस इवाभ्रश्यामस्तपात्यये जीवलोकस्य ॥ (५८)

सकु ॥ ता जइ वो अणुमदं तदो तधा पउत्तिदव्व जधा तस्स राएसिणो अणुकम्पणीआ होमि त्ति अप्पधा सुमरेध म । (५९)

राज्ञा ॥ अहो विमर्शक्षेदि वचनम् एतदेव कामफलं यन्नफल मन्यत । एतावदवस्थापि मा सुखयति । (६०)

स्यास्मि सञ्जाता । त राजर्षि गत प्राप्तसङ्गतस्तेनाभिलाषेण मम स्पृहया हेतुना एतावती दयती अवस्था दशा यस्या सा तथाभूता सञ्जातास्मि ॥

(५६) उभे इति । दिट्ठिआ इत्यादि । दिष्ट्या ते अनुरूपे वरेऽभिलाष । अथवा सागरमुज्झित्वा कुत्र महानद्या प्रवेष्टव्यम । दिष्ट्येत्यानन्दसूचकम । दिष्ट्या सदृशयोग इत्यानन्द इत्यमर । यद्वा दिष्ट्या भाग्यात् ते तव अनुरूपे तुल्यरूपे वरे वरणीये पात्रे अभिलाषो जात इति शेष । न चेत् महान् प्रमादोऽभविष्यदिति भाव । दिष्ट्या हर्षे शुभे भाग्ये इति शब्दार्णवे । विचार्योह अथवति । महानद्या गङ्गया । तथाच सर्व एव स्वयोग्यमभिलषतीति भाव ॥

(५७) राजेति । यत् श्रोतव्य श्रवणीयमतीवस्तुतिसुभगमिति यावत् तत् श्रुतम ॥

(५८) स्मर इति । स्मर काम एव मे तापहेतु र्दाहहेतु । उक्त हि गरुडपुराणे । कामाद्धि भ्रमोऽरुचि र्दाहो हृन्निद्राधीष्टनिस्तय इति । स एव स्मर एव मे निर्वापयिता तापोपशमयिता जात । प्रियाचेतसि गत सन्निति शेष । यथा तापहेतु र्दिवस एव तपात्यये निदाघावसाने । निदाघ उष्णोपगम उष्ण उष्णागमस्तप इत्यमर । अभ्रै र्मेघै श्यामोऽसित यत् जीवानां जीवता लोकस्य भुवनस्य भुव इति यावत निर्वापयिता जायते तथेत्यन्वय । इत्यार्या ॥

(५९) सकु इति । तेत्यादि । तद् यदि योऽनुमत ततस्तया प्रवर्त्तितव्य यथा तस्य राजर्षे रनुकम्पनीया भवामीति । अन्यथा स्मरत भाम । तत् तस्मात् । तथा प्रवर्त्तितव्य तथा यतितव्यम् । किमित्याह यथेत्यादीत्यन्वय । अन्यथा तदकरणे । मा स्मरत यूय स्मृतिमात्रेऽपानुभवत । स्मर जीवलोक हास्यामीति भाव ॥

(६०) राजेति । विमर्शक्षेदि निखिलवितर्कविध्वंसि तथाच किमिव निरवेक्षो

प्रिय ॥ जनान्तिकम् ॥ अणसूए दूरगदो से मणोरहो अक्खमा दूअं कालहरणस्स । (६१)

अन ॥ पिअम्वदे को णु उवाओ भवे जेण अविलम्बिद णिउदञ्च सहीए मणोरहं सम्पादेम्ह । (६२)

प्रिय ॥ णिउदं त्ति चिन्तणीअं सिग्घं त्ति ण दुक्करं । (६३)

अन ॥ कधं विअ । (६४)

प्रिय ॥ णं सो वि राएसी इमस्मिं जणे सिणिद्धदिट्ठिआ चूदलदाहि-लासो इमेसुं दिअएसुं पजागरकिसो विअ लक्खीअदि । (६५)

भविष्यति उत सानुरागापि गुरुजनानुमतिमपेक्षिष्यते इत्येव वितर्कस्यापि नावसर इति भाव । वितर्कः स्यादुभयत परामर्शो विमर्शनम् । अथाहोस्वित्तर्कं जह इति हेमचन्द्रः । एतदेव एततपर्यन्त कामफल कामसाध्यं नवितोऽन्यत् परिणयनादिकं कामेन साध्यते इत्यर्थः । तदा तत् किंसाध्यमित्यत आह यत्नेति । अन्यत परिणयनादिकं यत्नफलं यत्नसाध्यम् । तथाच येन येन विना यत्नाय प्रवृत्ति र्नासीत कामेन तच्चिन्तादितमधुनास्माभिः समागमाय यतितव्यमिति भावः । एतावद्वस्थापि शोकशोषायस्यापि । मा सुखवति चानुरागोद्गारादिति भाव ॥

(६१) प्रियमिति । जनान्तिकमप्रकाशम् । त्रिपताकाकरेण व्यवधायेति यावत् । अणेत्यादि । अनसूये दूरगतोऽस्या मनोरथ, अत्यन्तमेयं कालहरणस्य । अम्या सख्याः मनोरथोऽभिलाषो दूरमनासन्नं राजानमिति यावत् गतो विषयीवकार । अत एव कालहरणस्य कालक्षेपणस्य अक्षमा अनर्हा । अत एव तदासादनाय कालहरणसम्भव-मत्यन्तमन्येनैच्छिकेनेति भाव ॥

(६२) अनेति । पिअम्वदे इत्यादि । प्रिय वदे को नु उपायो भवेत येनाविलम्बित निभृतञ्च सख्या मनोरथ सम्पादयाम । नु प्रश्ने । भवेदिति प्रश्ने खौ । येन उपायेन । अविलम्बितं शीघ्रम् । निभृतं नि शब्दम् । सम्पादयाम सफलीकुर्म्म ॥

(६३) प्रियमिति । णिउदमित्यादि । निभृतमिति चिन्तनीय शीघ्रमिति न दुष्करम् । निभृतमिति । निभृत सम्पादन चिन्तनीय विचारणीयम् । शीघ्रमिति । शीघ्र सम्पादनं न दुष्करमनायासशाध्यम् ॥

(६४) अनेति । कथ विअ कथमिव । कीदृगित्यर्थः ॥

(६५) प्रियमिति । णमित्यादि । ननु सोऽपि राजर्षिरस्मिन् जने स्निग्धदृष्टा सूचिताभिलाष एव दृश्यते, प्रजागरकृश इव लक्ष्यते । ननुरनुपप्रे । अस्मिन् जने

राजा ॥ आत्मानमवलोक्य ॥ सत्यमित्यभ्यनुज्ञा एवाऽसि । तथाहि । (६६)

णिणिरतरैरन्तस्तापै र्विवर्णमलीमसं
निणि निणि भुजन्यस्तापाङ्गप्रवृत्तिभिरश्रुभिः ।
अनतिलुलितजाघाताङ्कान् सुजं मणिबन्धनात्
कनकवलयं स्रस्तं स्रस्तं पुनः प्रतिसार्यते ॥ (६७)

प्रिय ॥ विचिन्तय ॥ हला सच्चणलेहण दाणिं से करीअदु अच्च तं सुमणोगोविदं कदुअ देवदासेवावदेसेण तस्स रण्णो हत्थ पावदूसं ।(६८)

सख्याम । स्निग्धदृष्ट्या सप्रणयया दृष्ट्या । सूचितो व्यञ्जितोऽभिलाषो यस्य स तथोक्त । प्रजागरलग जागरणात् क्षीणता गत । एतेन गण्डदेशपाण्डुत्व दर्शयति । उक्त यथा । चक्षूरागस्तदनु मनस सङ्गतिर्भावना च व्यावृत्ति स्यात् तदनु विषयप्राप्तयेतसोऽपि । निद्राच्छेदस्तदनु तनुता निस्सहत्व ततोमूर्च्छा तदनु मरण स्यु दशा प्रक्रमेणेति ॥

(६६) राजेति । सत्यमित्यनेन प्रियवदाभिहितमङ्गीकरोति । इत्यभ्यनुज्ञ एव प्रजागर लग एव । कार्श्य दर्शयितुमाह तथाहीति ॥

(६७) णिणिरेति । यन्तस्तापैरन्तर्गतैरुत्तापै र्हेतुभिरणिणिरतरैरनुपशान्तै । तथा भुजे वामबाहौ न्यस्तान्निहिताद्बाष्पाप्लवनकोणात् प्रवृत्तिभि पतिभिरश्रुभि र्नेत्राम्बुभि· र्विवर्णमलीमसम । आदौ विवर्ण जातवर्णापकर्ष पश्चात् मलीमस मलदूषित पिच्छिल मिति यावत् । विशेषणयो कर्मधारय । मलीमसन्तु मलिन कज्जर मलदूषितमित्यमर । कनकवलय स्वर्ण कटकम् अनतिलुलिताया अनतिसरलिताया कोटियुते अग्रिथिलवद्धाया इति यावत् । ज्याया मौर्व्या आघातेन अनुस्थिक्ष यत्र तत् तथोक्तम् । प्रेङ्खोलितस्तरलितो लुलितान्दोलितार्थोति भूरिप्रयोग । मणिबन्धनात् मणयो बध्यन्ते यस्मिन्निति मणिबन्धन पाणिप्रकोष्ठयो सन्धिस्थान तस्मात् णिणि णिणि प्रतिनिश सुष्ठ पुन पुन स्रस्त स्रस्त गलित गलित सत् पुन प्रतिसार्यते स्वस्थान नीयते। इद हरिणी नाम वृत्तम् । तदुक्तम । रसयुग्नि नसम्र सलगा हरिणीयमि तदत्र ललितालापे वर्णा लघ्व् च गुरवस्तरो । प्रभवति लघु यत्रोपान्त्र स्फुरत्स्फरकद्वये यतिरपि रसै र्वेदैरश्वै कृता हरिणीति सा कृति ॥

(६८) प्रियमिति । विचिन्त्य विधार्यत्र । हलेत्यादि । यदि मद्गतस्नेहमनभिज्ञोसख्या क्रियतां सत्वर तत् सुमनोगोपित कृत्वा देवतासेवापदेशेन तस्य राज्ञो हस्त प्रापयिष्यामि । मद्गतस्नेहस्य कथिताख्यानुरूपा स्थिति । यथाह । स्नेहप्रस्तावने स्निग्धै र्गोपिते कर्तु भाषिते । दूतासम्मे पथै मार्ग्यो भावाभिज्ञैरिष्यत इति । सुमनोगोपित पुष्पै मङ्गलम ।

अन॥ सहि रोअदि मे सुउमारो एसो पओओ किं वा सउन्तला भणादि। (६९)

अक्कु॥ सहीणिओओ वि विकप्पीअदि। (७०)

प्रिय॥ तेण हि अत्तणो उवआसाणुरूअं चिन्तेहि ललिदपदावलि-बन्धं गीदिअं। (७१)

अक्कु॥ चिन्तेमि किन्तु अवहीरणाभीरुअं वेवदि मे हिअअं।(७२)

राजा॥ विहस॥ (७३)

अयं स ते तिष्ठति सङ्गमोत्सुको विशङ्कसे भीरु यतोऽवधीरणाम्।
लभेत वा प्रार्थयिता न वा स्त्रियं स्त्रिया दुरापः कथमीप्सितो भवेत्॥(७४)

स्त्रियः सुमनसः पुष्पमित्यमरः। देवतासेवापदेशेन त्वामि सुमनोभिरर्च्यतामिति छलेन॥

(६९) अनेति। सहीत्यादि। सखि रोचते मे सुकुमार एष प्रयोग किं वा शकुन्तला भणति। रोचते प्रीतिमुत्पादयति। मे मह्यम्। अर्कै रुचिरित्यपादानाच्चतुर्थी। सुकुमारो मृदु अनतिप्रगल्भ इति यावत्। प्रयोगः प्रयुक्ति। शकुन्तलासम्मत्यर्थमाह शकुन्तलेत्यादि॥

(७०) अक्कु इति। सहीत्यादि। सखीनियोगोऽपि विकल्पयते। अपि प्रश्ने। तथाच सखीनियोग एष्यामः प्रयोग किं विकल्पयते द्वैधीक्रियते अपि तु नेत्यर्थः॥

(७१) प्रियमिति। तेणेत्यादि। तेन हि आत्मन उपन्यासानुरूपा चिन्तय ललितपदावलिबन्धा गीतिकाम्। उपन्यासानुरूपा प्रथमकथनोपयुक्ताम्। उपन्यासस्तु वाङ्मुखमित्यमरः। ललितेति। ललिताभि र्मनोज्ञाभि पदावलिभि पदपद्धतिभि र्बन्धो रचना यस्या सा ताम्॥

(७२) अक्कु इति। चिन्तेमीत्यादि। चिन्तयामि किन्तु अवधीरणाभीरुकं वेपते मे हृदयम्। अवधीरणा राज्ञोऽवज्ञा। अवधीरणैकवज्रायामिति कविकल्पद्रुमः। वेपते कम्पते॥

(७३) राजेति। विहस्य मध्यम हसित्वा॥

(७४) अयमिति। हे भीरु भयशीले। भृञ्भृकृभी भिय इति भिय क्रु। उतोऽयुट्रज्वादेरिति स्त्रियामूप्। भ्रूभङ्गदीक्षागुरवो ह्यार्या इत्यमरः सम्बोधने ह्रस्वः। स्व अयं पुरुषादवधीरणामवज्ञां विशङ्कसे आकलयसि सोऽय पुरुषस्ते तव सङ्गमे संयोगे उत्सुक उद्ग्रीव- मस्तिष्कति तथाहि प्रार्थयिता स्त्रियोऽभिलाषी जन स्त्रिय लक्ष्मीं लभेत वा न लभेत वा तत्रानियतत्वमिति भाव। ईप्सित याम्भिष्टो जन कथ स्त्रिया सकाशात् दुरापो

अपिच । (७५)

अयं स यस्मात् प्रणयावधीरणामशङ्कनीयां करभोरु शङ्कसे ।
उपस्थितस्त्वां प्रणयोत्सुको जनो न रत्नमन्विष्यति मृग्यते हि तत् ॥(७६)

सखौ ॥ अह्र अत्तगुणावमाणिणि को णाम सन्दावणिव्वाणहेतुणं सारदीअं ज्जोण्हं आदवत्तेण णिवारेदि । (७७)

शकु ॥ सङ्कितम् ॥ णिस्सोहदाहि ॥ इत्युपविष्टा चिन्तयति । (७८)

राजा ॥ स्थाने खलु विस्मृतनिमेषेण चक्षुषा प्रियामवलोकयामि ।

यतः । (७९)

दुरासदो भवेत् कथमपि नेतरार्थं । खनर्थं वर्जनात् प्रियेति न पदं । यत्र सुसदृशवस्तुन प्रतिबिम्बनाद् दृष्टान्तोऽलङ्कार । वंशस्थविलवृत्तम् । उत्तरत्रापि ॥

(७५) इदानीमर्थनाय पुनर्बहुमाह अपिचेति ॥

(७६) अयमिति । करभस्य करिशिशोरूरू इव ऊरू यस्या सा करभोरूः । वामः लक्षणेत्युपमानात् स्त्रियामूङ् । उपमानपदलोपः । करभ करिशावक इतरत्समरं । हे करभोरु अयङ्गुलोयामसम्भावनीयां प्रणयस्य भवत्कृतप्रार्थनस्य अवधीरणामवज्ञाम् । प्रणया त्वमी । विश्रम्भयाच्ञाप्रेमाण इतरत्समरं । यस्मात् कारणात् यद्धेतोः सोऽयं जनः प्रणयोत्सुकः प्रार्थनोद्युक्त मनु त्वामुपस्थितम्बत्सुमीपमागत । तथाहि रत्नं महार्घो मणिर्नान्विष्यति स्वामीकर्तुं लोकान् न मार्गयति तद् रत्नं मृग्यते स्वीकर्तुं लोकैरन्विष्यते । अत्रापि दृष्टान्तोऽलङ्कारः ॥

(७७) सख्यादिति । अह इत्यादि । अयि आत्मगुणावमानिनि को नाम सन्ताप-कारणहेतुकां शारदीं ज्योत्स्नामातपत्रेण निवारयति । अयि सम्बोधने । अयि प्रश्नानुनययो आया सम्बोधनेऽपि चेति मेदिनी । आत्मनो गुणान् रूपादीन् यावमन्यतेऽवजानाति सात्म-गुणावमानिनी । रूपादिगुणसम्पन्नायाः अपि राजावधीरणाभीरुत्वादिति भावः । आत-पत्रेण छत्रेण । छत्रमातपत्रमित्यमरः ॥

(७८) शक इति । शङ्कितं समन्दहासम् । णिओ इत्यादि । नियोजितापि । नियोजिता प्रवर्तिता ॥

(७९) राजेति । स्थाने युक्तम् । युक्तं हे मामक स्थाने इत्यमरः । विस्मृतो निमेषो यस्य तत्तेन निर्निमेषेणेति यावत् चक्षुषा यद्यालोकयामि तद् युक्तमित्यर्थः । निर्गत निष्क्रान्तोऽक्ष्णोरक्षिभ्यं दृगं वितनुमाह यत इति ॥

उन्नमितैकभ्रूलतमाननमस्या पदानि रचयन्त्याः।
पुलकाञ्चितेन कथयति मयानुरागं कपोलेन ॥ (८०)

शकु॥ हला चिन्तिदा मए गीदिआ असन्निहिदाणि उण लेहन-साहणाणि। (८१)

प्रिय॥ ण इमस्मिं सुगोदरसुउमारे णलिणीवत्ते पदच्छेदभत्तीए णहेहिं आलिहीअदु। (८२)

शकु॥ यथोक्तं कृपयित्वा। हला सुणध दाव मङ्गदत्था ण वत्ति। (८३)

उभे॥ अवहिदह्म। (८४)

शकुं॥ वाचयति। (८५)

तुज्झ ण आणे हिअअं मम उण मअणो दिवा वि रत्तिं पि।
णिक्किव दाव इ बलिअं तुहहत्थमणोरहाइ अङ्गाइं। (८६)

---

(८०) ०उन्नमीति। पदानि रचयन्त्या योजयन्त्या अस्या शकुन्तलाया उन्नमिता ऊर्द्धस्थिता एका भ्रूर्लता यत्र तत् तथानन वदन कर्तृ पुलकाञ्चितेन रोमाञ्चवता कपोलेन गण्डेन द्वारेण मयि नरेन्द्रविषये स्वानुराग कथयति व्यनक्ति। दुष्यन्तार्थ ॥

(८१) शकु इति। हलेत्यादि। अयि चिन्तिता मया गीतिका असन्निहितानि पुन र्लेखनसाधनानि। चिन्तिता चेतसा रचिता। असन्निहितानि अनुपस्थितानि। लेखन साधनानि लेखनोपकरणानि। पुनरर्थं ॥

(८२) प्रियमिति। णमित्यादि। नन्वस्मिन् सुकोदरसुकुमारे नलिनीपत्रे पद च्छेदभक्त्या नखैरालिख्यताम्। नन्वरसुज्ञाने। मन्नावधारणात्तज्ञानुनयामन्त्रणे नन्वि त्यमर। शुकेति। शुकस्य पक्षिण उदर क्रोडमिव सुकुमार कोमल तस्मिन्। पद च्छेदभक्त्या पदविच्छेदाय यावान विभाग आवश्यकस्तावता विभागेन अनतिविभागे-नेति यावत् ॥

(८३) शकु इति। यथोक्त प्रियवदोपदिष्टानुरूपम्। हलेत्यादि। अयि शृणुत तावत् मङ्गलार्था न वत्ति। मङ्गलं स लग्नो अर्थो यस्या सा मङ्गलार्था गीतिकेति शेष। इति शृणुतमित्यन्वय ॥

(८४) उभे इति। अवहितह्म अवहिते स्व। अवहिते कृतमनोऽभिनिवेशे ॥

(८५) शकु इति। वाचयति पठति। वाचकु सन्देश इति कविकल्पद्रुम। सन्देश पाठ अतएव वाचयतीखिला लिपिरिति कलायुध उदाजहार ॥

(८६) तुज्झेति। तव न जाने हृदय मम पुन मदनो दिवापि रात्रिमपि। निष्कृप

राजा ॥ अवसरः खल्वयमात्मानं दर्शयितुम् । (८७)

सहसोपसृत्य । (८८)

तपति तनुगात्रि मदनस्त्वामनिशं मां पुनर्दहत्येव ।
ह्लपयति यथा शशाङ्कं न तथा हि कुमुदतीं दिवसः ॥ (८९)

सख्यौ ॥ विलोक्य सहर्षं सुत्याय ॥ साध्वदं यथासमीहितफलस्य अविलम्बिनो मनोरथस्य । (९०)

शकु ॥ उत्यातुमिच्छति । (९१)

तापयति बलीयस्त्वं हृदयमनोरथानि व्यङ्गानि । हे निष्कृप निर्दय तव हृदय न जाने साभिलाष निरभिलाष वेति भाव । मम पुन र्मम तु तव हृदये मनोरथोऽभिलाषो येषां तानि व्यङ्गानि मदनो दिवापि रात्रिमपि व्याप्य बलीयोऽतिबलवत तापयति वितपति । तपक् दाहे इति कविकल्पद्रुम । सदाध्वादिव्याप्ताविति दिवारात्रो कर्मता । ह्रयसुङ्गाया । यथोक्त पिङ्गलेन । पुव्वद्धे उत्तद्धे मत्ता तीसत्ति सुभय्य सभणिआ । सो उग्गाहो उत्तो पिङ्गलकइ दिट्ठ सट्टिमत्तङ्गो । सस्कृतभाषायामिय गीतिरुच्यते । यदाह । आर्या पूर्व्वार्द्धसम यस्या अपरार्द्धमपि च तद्गते । छन्दोविदस्तदानीं गीति तामस्कृतवाणि भाषन्ते इति । आर्यालक्षणन्तु पागस्तुसभ्भेयम । उद्गाथायामपि गाथावद् लघुनियमो द्रष्टव्य । विशेषस्तु परार्द्धे षडगणो लघुवर्णात्मको न स्यात । पूर्व्वार्द्धवत् मध्यगुरुर्लघुचतुष्टयात्मको वा स्यादिति । गाथालक्षण वक्ष्यते ॥

(८७) राजेति । अवसरोऽवकाश ॥

(८८) सहसेति । अतर्कितमित्यर्थ । उपसृत्य शकुन्तलामुपगम्य ॥

(८९) तपतीति । हे तनुगात्रि क्षणाङ्गि । गात्रानाम्य शोणादुन्तर्भावादीप । मदनस्त्वामनिश सतत तपति उत्तप्तीकरोति मां पुनरिम जन तु दहनेत्रव भस्मीकरोतेत्रव । ननूभयत्र समोऽय रिपु कथ द्वन्द्वान्यतरस्मिन् जने पक्षपात वहतीति दृष्टान्तयति । ह्लपय तीति । तथाहि दिवसो यथा शशाङ्क चन्द्रमस ह्लपयति ग्लानि नयति तथा कुमुदतीं कुमुदिनीं न तथा न ह्लपयतीत्यर्थ । अत्र दृष्टान्तोऽलङ्कार । आर्य्येय जाति ॥

(९०) साध्वदमिति । साध्वदमितादि । स्वागत यथासमीहितफलस्य यथि लम्बिनो मनोरथस्य । मनोरथस्याभिलाषस्य अविलम्बि अविलम्बेनोत्पन्न अत यथा समीहितफल समीहितातिक्रान्तफल वाञ्छितातिरफलमिति यावत् तद्भूतस्य भवत स्वागत सुखेनागतम् । स्वभावक्तीति भावक्तान्तेन कर्त्तरि षष्ठी ॥

(९१) शकु इति । उत्यातु शयनादिति शेष ॥

राजा॥ अलमलमायासेन। (९२)

वृ) सन्दष्टकुसुमशयनान्याशुविमर्दितमृणालवलयानि।
गुरुपरितापानि न ते गात्राण्युपचारमर्हन्ति॥ (९३)

शकु॥ समाश्वसमात्मगतम्॥ हिअअ तधा उत्तम्मिअ दाणिं ण किम्पि पडिवज्जसि। (९४)

अन॥ हृदो सिलादलेक्कदेम अणुगेण्हदु महाभाओ। (९५)

शकु॥ किञ्चिदपसरति। (९६)

राजा॥ उपविश्य॥ कच्चित् सखी वो नातिबाधते शरीरताप.।(९७)

प्रिय॥ सस्मितम्॥ दाणिं लद्धोसधो उवसमं गमिस्सदि। (९८)

शकु॥ सलज्जा तिष्ठति। (९९)

प्रिय॥ महाभाअ दोसुम्पि वो असोआणुराओ पच्चक्खो सही-सिणेहो उण मं पुनरुत्तवादिणी करेदि। (१००)

---

(९२) *राज्ञेति। वीप्साऽतिनिषेधार्था। आयासेन श्रमेण।

(९३) सन्दष्टेति। सन्दष्टमाच्छादित कुसुमशयनं यैस्तानि तथा आशु शीघ्र अधुनैव विमर्दितानि लुण्ठनोल्लुण्ठनादिभि र्दूनीकृतानि मृणालाना वलयानि यैस्तानि अतएव गुरु-र्महान् परितापो येषु तानि तथोक्तानि। गुरु र्महति चान्यवदिति विश्व। ते तव गात्राणि अङ्गानि उपचार सत्कार नार्हन्ति कर्तुं सुचितानि न भवन्तीत्यर्थ। गात्रमङ्गे वपुषेऽपि इति विश्व। इयमार्या जाति॥

(९४) शकु इति। ससाध्वस सभयम। हिअअ इत्यादि। हृदय त्वा उत्तम्य इदानीं न किमपि प्रतिपद्यसे। उत्तम्य उत्कण्ठित भूत्वा। प्रतिपद्यसे बुध्यसे॥

(९५) अनेति। हृदो इत्यादि। इत शिलातलैकदेशमनुगृह्णातु महाभाग। अनुगृह्णातु उपवेशनेनानुग्रहभाजनीकरोतु॥

(९६) शकु इति। सुगमम॥

(९७) राजेति। शरीरतापो वो युष्माक सखी नातिबाधते नातिपीडयति व्यर्थान्मन्दता गत कश्चित किमित्यर्थ। कच्चित् कामप्रदन इत्यमर। कामप्रदन मनोरथा भिव्यक्तिप्रश्न॥

(९८) प्रियमिति। दाणिमित्यादि। इदानी लब्धौषध उपशम गमिष्यति। लब्ध-औषध यस्य स शरीरताप इति योग। तयाचाल तदर्थं व्याकुलभावेनेति भाव॥

(९९) शकु इति। सुगमम्॥

(१००) प्रियमिति। महेत्यादि। महाभाग द्वयोरपि युवयोरन्योन्यानुराग मत्यच

राजा ॥ भद्रे नैतत् परिहार्यं विचलितं स्नुतमनुरागं जनयति ।(१०१)

प्रिय ॥ तेण हि सुणादु अज्जो । (१०२)

राजा ॥ अवहितोऽस्मि । (१०३)

प्रिय ॥ अस्समवासिणो जणस्स रण्णा अक्खिहरेण होदव्वं त्ति णं एसो भणो । (१०४)

राजा ॥ अयमत्र किन्नाम । (१०५)

प्रिय ॥ तेण हि पुण्णो पिअसहो तुमं ज्जेव उद्दिसिअ भणवदा मन्तणेण इमं णावअन्तरं पाविदा ता अरिहसि णब्भुववत्तीए जीविदं से अवलम्बिदुं । (१०६)

ण्योश्चेह पुन र्मा पुनरुक्तवादिनी करोति । अन्योन्यानुराग परस्परानुराग । परस्परार्थे चान्योन्यमिति शब्दाच्च । प्रयत्न स्पष्टमनुभूयमान । पुनरुक्तवादिनीमधिक-वादिनीम । पुनरुक्तशब्दोऽधिकार्थे प्रयुक्त कादम्बर्यांम् यथा अत्र हे पिशङ्गधररोचिषि स्फाटिकगिरातले मुक्त यत्न सङ्क्रान्तचन्द्रनरसलाञ्छने शुक्लांशुलशिलापट्टे शुभ्रमिति परि-तोन पुनरुक्त निवेद्यमान देवर्ष्येव स्थानचिह्नानि पश्यन्ती स्थपितवती दिवसमिति तथा स्पष्टपुष्पमायास पुनरुक्त निगद्यमेत्यादि । शिशुपालवधेऽपि । मोढ़ारजालमलिन पुनरुक्तमाद्रा कुर्व्वन वधूजनविलोचनपद्मपाला इति ॥

(१०१) राजेति । परिहार्यं निवार्यं म । हि यस्मा विचलितं वस्तुविष-यतुल्यमभिहित मनु अनुराग पश्चात्ताप जनयति ॥

(१०२) प्रियमिति । तेण हीत्यादि । तेन हि श्रूयोऽवार्यं ॥

(१०३) राजेति । अवहित सततमनोऽभिनिवेश ॥

(१०४) प्रियमिति । अस्समेत्यादि । आश्रमवासिनो जनस्य राज्ञा अक्षिहरेण पीडाहारिणा । अक्षिं पीडाधरुष्कोटयो-रित्यमर । इति हरणोत्तिलम्बय । धर्म्म राज्ञामिति शेष ॥

(१०५) राजेति । तत् स्थलाश्रमवासिनोऽक्षिहरणोचितम् । अयमत्रमरमगद-मोऽत्र कि क्रियतां व्याधत इत्यर्थ ॥

(१०६) प्रियमिति । तेण हीत्यादि । तेन कि हृय न प्रियसखी त्वामेवोद्दिश्य भगवत कण्वेन दूरमवस्थानान्तर प्रापिता तदर्हसि अभ्युपपत्त्या जीवितमस्या अवलम्बयितुम । तेन राज्ञोऽक्षिहरणोचित्येन हेतुना अर्हसीत्यन्वय । उद्दिश्य तदर्थमेव स्वामित्वेनाभि-मन्याय । अवस्थानान्तर नैसर्गिकीरतमस्यां कोमलायामवस्थां दूरापितेति यावत् । अभ्युप-

राजा॥ भद्रे साधारणोऽयं प्रणयः सर्व्वथानुगृहीतोऽस्मि । (१०७)

गङ्गा॥ अनसूयामवनोक्य॥ हला णत्थि वो अन्तेउरविरहपज्जुस्सुएण राएसिणा अवरुद्धेण । (१०८)

राजा॥ दृदमनन्यपरायणमन्यथा हृदयसन्निहिते हृदयं मम ।
यदि समर्थयसे मदिरेक्षणे मदनबाणहतोऽपि हतः पुनः॥(१०९)

अन॥ बहुवल्लहा क्खु राआणो सुणीअन्ति ता जधा दूसंणो मिअसहो बन्धुअणसोअणीआ ण होदि तधा करिस्सदि । (११०)

राजा॥ भद्रे किं बहुना । (१११)

पत्तेत्र अनुपपत्तेण । अभ्युपपत्तिरनुग्रह इत्यमरः । जीवितमवलम्बयितुं जीवन मस्थापयितुम् । अन्यथा अचिरेणैवानदृशमभव इति भावः । तथाच हृोत्यागोन्मादमूर्च्छाना दत्यनङ्गदृगा दृगेति वात्स्यायन ॥

(१०७) राजेति । साधारण अस्माकमस्मभ्यं चोभयो समान । साधारण समान त्येत्यमरः । प्रणयः प्रार्थनम् । सर्व्वथाङ्गीकारे ॥

(१०८) गङ्ग इति । हृलेत्यादि । अयि अन्न योऽन्त पुरविरहपर्युत्सुकेन राजर्षिणा उपरुद्धेन । अन्त पुराणामन्त पुरिकाणा विरहेण पर्युत्सुकेन उत्कण्ठितेन राजर्षिणा उपरुद्धेन कृतोपरोधेन वो युष्माकमत्र मसि विशेष्ये आर्ये विशेषणमुपसक्रामतीति न्यायादुपरोधो वारणीय इत्यर्थ । अन्त पुरादिशब्दाना तात्स्थ्यात् स्थदारेष्वपि प्रयोगो बहुधा द्रष्टव्य ॥

(१०९) राजेति । दृदमिति । हे हृदयसन्निहिते चेतोऽवस्थिते अन्यस्या परायणमन्यपरायणम् । पुवत् स्त्रीरिति पुवद्भाव । न तदित्यनन्यपरायण अनन्याश्रयम् । परायणमभीक्ष्णे स्यात् तत्पराश्रययोरपीति मेदिनी । मम हृदय यदि अन्यया अन्यपरायणतया समर्थयसे निश्चिनोषि हे मदिरेक्षणे मदिरे मत्तस्येव ईक्षणे नेत्रे यस्या स्तथोक्ते तदा मदनस्य बाणेन हतोऽपि अह पुनर्हत व्यापादित । दृद द्रुतविलम्बित नाम छन्दः ॥

(११०) अनेति । बहु इत्यादि । बहुवल्लभा खलु राजान श्रूयन्ते तद् यथा इय न प्रियसखी बन्धुजनशोचनीया न भवति तथा करिष्यति । बहुवल्लभा बहवो वल्लभा प्रिया येषा ते । प्रेयसो दयिता कान्ता प्राणेशा वल्लभा प्रिया । हृदयेशा प्राणसमा प्रेष्ठा प्रणयिनी च सैव हेमचन्द्र । श्रूयन्ते न कदाचित् दृष्टा इति भाव । बन्धुजनस्य शोचनीया दुःखहेतुर्न भवति सुभगा भवतीत्यर्थ । करिष्यति महाराज इति शेष ॥

(१११) राजेति । बहुना व्याहृतेनेति शेष ॥

परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य मे ।
समुद्ररसना चोर्वी सखी च युवयोरियम् ॥ (११२)

उभे ॥ णिव्वुदत्तु । (११३)

शकु ॥ हर्षं खलयति । (११४)

प्रिय ॥ जमालिकम ॥ त्रणखूए पेक्ख पेक्ख मेहवादाहद विअ णिह्मे मोरी वलणे वलणे पच्चाअदजोविद पिअसही । (११५)

शकु ॥ हला मरिसावेध लोअपालं जन्नह्मेहिं विस्सद्धपलाविणोहिं उवआरादिक्कमेण भणिदं । (११६)

सर्व्वौ ॥ सस्मितम ॥ जेण तं सन्तिदं सो ज्जेव मरिसावेदु अम्ह को अच्चणो । (११७)

---

(११२) परीति । परिग्रहाणां पत्नीनां बहुत्वेऽपि अनल्पत्वेऽपि । पत्नीपरिवृता दानमूलगाथा परिग्रहा इत्यमर । समुद्रा एव रसना मेखला यस्या सा उर्व्वी पृथ्वी च इयं युवयो सखी च इह नोऽस्माक कुलस्य प्रतिष्ठे गौरवभूते । श्लोकटाद मेखला काञ्ची सप्तकी रसनापि चेत्यमर । प्रतिष्ठा गौरवे स्थितावपि मेदिनी ॥

(११३) उभे इति । णिव्वुदत्तु निर्वृते स्व । निर्वृते सुस्थिते । सुस्थितस्ते प निर्वृतिरिति त्रिकाण्डशेष ॥

(११४) शकु इति । खलयति खलयति ॥

(११५) प्रियमिति । अणेत्यादि । अनल्पूते पश्य पश्य मेघवाताकृतामिव ग्रीष्मे मयूरीं वने वने प्रत्यागतजीवितां प्रियसखीम । ग्रीष्म निदाघतौ मेघवातो मेघागमानिल स्तेनाकृता इवागतो मयूरीमिव । एतेन गुरुतरागमनो दर्शित । वने वने क्रमेण प्रत्या गतजीवितामतएवम्बिनजीवनां प्रियसखीं शकुन्तला पश्य पश्य ॥

(११६) शकु इति । हलेत्यादि । अयि मरिषावेद लोकपाल यद्यस्मि र्विनय प्रभावितोभिरुपचारातिक्रमेण भणितम । विनय विश्वासयुक्त यथा स्यात् तथा अनाद्दि दिति यावत् प्रभावितोभि र्वाग्मिरुपचारातिक्रमेण सत्कारातिशयेन यद् भणितमुक्त लोकपाल राजानं तद्गर्व्वयत अमयतम ॥

(११७) सर्व्वेति । जेणेत्यादि । येन तद्भणितम स एव तद्गर्व्वयतु अम्हम्ह कोऽस्मद्म । अम्हमनुष्म । म अस्म । अम्हयो ह्रोम । अम्हयोऽतिक्रमे लक्ष्ये ह्रोम इत्यमरोक्षणात् ॥

शक्र ॥ अरिहदि क्खु महाराओ इमं विसोढुं परोक्कमं वा ण किं को मन्तेदि । (११८)

राजा ॥ शक्रितम् । (११९)

अपराधमिमं ततः सहिष्ये यदि रम्भोरु तवाङ्गसङ्गस्पृष्टे ।
कुसुमास्तरणे क्षमापहेऽत्र स्वजनत्वादनुमन्यसेऽवकाशम् ॥(१२०)

प्रिय ॥ मोपहासम् ॥ णं एत्तिकेण चेव तुट्ठो भविस्सदि । (१२१)

शक्र ॥ सरोषमिव ॥ विरम विरम दुर्विनीदे एदावदवत्थं गदाए मए कीलसि । (१२२)

शक्र ॥ यदि सदृष्टिक्षेपम् ॥ पिअसुदे एसा तवस्सिमिअपोदओ

---

(११८) शक्र इति । अरीत्यादि । अर्हति खलु महाराज इदं विनोदं परोक्षं वा न किं को मन्त्रयति । खलु रत्नुनये । निषेधवाक्यालङ्कारजिज्ञासानुनये खल्वित्यमरः । को वा जन परोक्षमसमक्षं किं न मन्त्रयति व्याहरति ॥

(११९) राजेति । सुगमम् ॥

(१२०) अपरेति । रम्भे रम्भेव ऊरू यस्या सा रम्भोरु । सामन्त्रणे तु प्रथमान्तं स्त्रियामूप । हे रम्भोरु यदि तव चरणानां सङ्गेन सम्बन्धेन स्पृष्टे युक्ते क्षमापहे तापापहारिणि त्वयि कुसुमास्तरणे कुसुमशयने स्वजनत्वात् स्वात्मीयत्वादवकाशमवस्थानोचितस्थानमनुन्यसे अनुजानासि ततोऽपराधमिमं सहिष्ये क्षमिष्ये । वृत्तमेतदुपवृत्तं नाम । तदुक्तम् । उपवृत्तमिदं तदाऽपरत्रेत् गुरुवर्णं यदु सुन्दरीपदान्ते इति । सुन्दरीलक्षणन्तूक्तम् । उपवृत्तमौपच्छन्दसिकम् । अतएव सुन्दरीं वैतालीयेष्वनभीप्सता पिङ्गलाचार्येण ग औपच्छन्दसिकमिति वैतालीयप्रकरणे सूत्रित व्याख्यातञ्च तद्वृत्तिकृता कृता युधेन यस्मिन् वैतालीये छन्दसि अन्ते गकारश्चेदधिको भवति तदौपच्छन्दसिक नाम छन्द इति । गकारो गुरुवर्ण ॥

(१२१) प्रियमिति । मोपहासम् अपरिहासम् । क्षमिति । अल्पेनावकाशेन पुनस्तुष्टो भविष्यति । नन्वत्र प्रश्ने । एतावत्कालेन गत्यायामवकाशगमनमात्रेण । भविष्यति भवानिति शेष ॥

(१२२) शक्र इति । सरोषमिव क्षतक्षनकरोषम् । विरमेति । विरम विरम दुर्विनीते एतावदवस्था गतया मया क्रीडसि । विरम व्यपसर । व्यपरिरम इत्युपपदात्रात परस्मैपदम् । दुर्विनीते दुःशिक्षिते । एतावदवस्था एतावन्त कालक्षनविशेषम दीर्घत्वमिति यावत् । विशेष कालिकोऽवस्थेत्यमरः ॥

हूओतद्दो दिण्णदिट्ठी णूणं मादरं पब्भट्ठं अणेसदि ता संजोएमि ण । (१२३)

प्रिय ॥ हला चवलो क्खु एसो ण ण संजोजइदु एआहूणी पारेसि ता अहम्पि सहाअत्तणं करिस्सं ॥ इत्यभे प्रस्थिते । (१२४)

शक ॥ हला हूओ पलाणदो ण वो गन्तु अणुमण्णे जदो अवरा हूणो हि । (१२५)

उभे ॥ कथितम ॥ तुमं दाव असहाहूणी जाए मह्वोणाहो समीवे वट्टदि ॥ इति निष्क्रान्ते । (१२६)

शक ॥ कधं गदाओ ज्जेव पिअमहीओ । (१२७)

राजा ॥ सुन्दरि किलमात्रेणैव नन्वयमाराधयिता जनस्ते सखो भृशो वर्तते । तदुच्यताम् । (१२८)

---

(१२३) अनति । यद्धि सदृक्षेषु वर्हिर्दृष्टिपातसहितम । पिअमिति । प्रियवदे एष तपस्विकृष्णपोतक इतस्ततो दत्तदृष्टि नूनं मातरं प्रभ्रष्टमन्विष्यति तत् संयोजयाम्येनम । तपस्वी अनुकम्पार्हो दासो मृगपोतको मृगाधिपुत्रेति तपस्विकृष्णपोतक । तपस्वी तापसे चानुकम्पार्हे चेति, पोत शिशौ वर्हिते चेति च विश्व । प्रभ्रष्टं दिगन्तरगताम् । स योजयामि मात्रेति शेष । अत्र पर्य्यायोक्तमलङ्कार । यदुक्त भोदाहरण दण्डिना । व्यर्थमिष्टमनाख्याय गम्यते तत्तथैव सिद्धये । या प्रकारान्तराख्यान पर्य्यायोक्त तदिष्यते । दमयसो परभृत सहकारस्य मञ्जरीम् । समद वारयिष्यामि युवाभ्या खैरमास्यताम । मद्वचस्य सखी यूना सङ्गत न हृतोत्सवम । निर्व्यलीकयितुमिच्छन्या कयाप्यवस्था तत इति ॥

(१२४) तियमिति । हलेयादि । यदि चपल खल्वेष मैन संयोजयितुमेका किनी पारयति तदहमपि सहायत्व करिष्यामि । चपलश्चञ्चल । एष मृगपोतक । पार यसि शक्नोषि । प्रस्थिते वर्हि गते ॥

(१२५) शक इति । हलेत्यादि । यदि हतो न शोऽन्यतो गन्तुमनुमन्ये यतोऽसहा यिन्यग्नि । अनुमन्ये अनुजानामि । सहायो वा अस्मीति सहायिनी न वा इत्यसहा यिनी एकाकिनीति यावत् ॥

(१२६) अभे इति । तुमसियादि । य सावदसहायिनी यस्या पृथिवीनाथ गभीरे वर्तते । पृथिवीनाथ इत्यनेन महासहायता दर्शयत ॥

(१२७) शक इति । कधमियादि । कथ गते एव प्रियसख्यौ । शुगमम ॥

(१२८) राजेति । आवेगेन त्वरया । आवेगो वेगे त्वराया पैति शब्दार्थि ।

किं शीकरैः क्लमविमर्दिभिरार्द्रवातं सञ्चालयामि नलिनोदलतालवृन्तम् ।
अङ्के निधाय चरणावुत पद्मताम्रौ संवाहयामि करभोरु यथासुखं ते ॥ (१२९)

• शक्र ॥ ण माणणीएसु जणेसु अत्ताणं अवराहइस्सं ॥ इति अवस्था गदगमुत्थाय प्रस्थातुमिच्छति । (१३०)

राजा ॥ अवष्टभ्य ॥ सुन्दरि अपरिनिर्वाणो दिवस इयञ्च ते शरीरावस्था । (१३१)

९८ उत्सृजत्र कुसुमशयनं नलिनीदलकल्पितस्तनावरणा ।
कथमातपे गमिष्यसि परिवाधाकोमलैरङ्गैः ॥ (१३२)

इति यवनिकान्तरे यति । (१३२)

आराधयिता तोषयिता । आराधन गाधने स्वादावौ तोषणे इति चेत्यमर । सपीडमौ सखीपदे ॥

(१२९) किमिति । हे करभोरु क्लम शरीरग्लानिं तापमिति यावत विमर्दयितुं विछत्तुं शीलं येषां ते तै शीकरैरम्बुकणैरार्द्रं शीतलो वातो यस्य तं तथोक्त नलिन्या पद्मजताया इदं पत्रमेव तालवृन्तं व्यजनं किं सञ्चालयामि दोलयामि । व्यजनं तालवृन्तकमित्यमर । उत व्यथवा । उताप्यर्थविकल्पयोरित्यमर । पद्म इव ताम्रौ चरणौ । ताम्रं शुल्वेऽरुणेऽपि चेति विश्वकाण्डशेष । ते तव चरणौ अङ्के उत्सङ्गे । उत्सङ्गचिह्नयोरङ्क इत्यमर । निधाय निवेश्य यथासुखं सुखमनतिक्रम्य येन सुख स्यात तथेति भाव । संवाहयामि मर्दयामि । इत्येवमुच्यतामिति पूर्वेणान्वय । स वाहन पाहने स्यात् भारादेरङ्गमर्दन इति विश्व । षष्ठलतिलक नाम वृत्तम् ॥

(१३०) शक्र इति । णेत्यादि । न माननीयेषु जनेष्वात्मानमपराधयिष्यामि । माननीयेषु पूज्येषु । अपराधयिष्यामि सेवनादेरादरादिति भाव । अवस्थामदृश दौर्बल्यात् रूप कष्टमिति भाव ॥

(१३१) राजेति । अवष्टभ्य अभिरुध्य । अयात् स्तब्धेत्यादयनिकटयोरिति वक्तव्यात षत्वम् । अपरिनिर्वाण सर्वतोभावेन न विच्छिन्नताप । शरीरावस्था देहस्य दाक्षाभिभूतता ॥

(१३२) अवहज्येति । ननिनीदलेन पद्मिनीपत्रेण कल्पित रचित स्तनयो रावरण सिच्यायया सा त्व कुसुमशयन पुष्पमयीं शय्यामुत्सृज्य विमुच्य परिवाधया पीडया चैत्यर्थ इति यावत । कोमलै मार्दवे गतै त्वद्दै करणै कथमातपे गमिष्यसि । इयमार्या ॥

(१३३) इतीति । इति एवमुक्त्वा । निवारयति शकुन्तलामिति शेष ॥

शकु ॥ सुअ सुअ मं ण क्खु णत्तणो पहवामि अधवा सहीमेत्त-सरणा किं दाणिं एत्थ करिस्सं । (१२४)

राजा ॥ धिग् व्रीडितोऽस्मि । (१२५)

शकु ॥ ण क्खु अहं महाराअं भणामि देव्व उवालहामि (१२६)

राजा ॥ अनुकूलकारि दैवं कथमुपालभ्यते । (१२७)

शकु ॥ कधं दाणिं ण उवालहिस्सं जं मं अत्तणो अणीअं कदुअ परगुणेहिं लोहावेदि । (१२८)

राजा ॥ स्वगतम् ॥ (१२९)

अप्येतत्सुलभे महति दयितप्रार्थनासु प्रतीपाः
काङ्क्षन्त्योऽपि व्यतिकरसुखं कातराः स्वाङ्गदाने ।
आबाधन्ते न खलु मदनेनेव लब्धान्तरत्वा-
दाबाधन्ते मनसिजमपि चिरकालाः कुमार्यः ॥ (१३०)

---

(१२४) शकु इति । सुअ इत्यादि । सुअ सुअ मा न खल्वात्मन प्रभवामि अथवा सखीमात्रशरणा किमिदानीमत्र करिष्यामि । आत्मन प्रभवामि प्रभु र्भवामि । ढे च पीतव्रते कर्मणि षष्ठी । साक्षेपमाह अथवेति । इदानीं सखीमात्रं शरण रक्षित यस्या साऽहं क्वात्र भवतो बलात्कारे विषये किं करिष्यामि । नान्य कोऽपि शरणभूतोऽस्ति यत समाक्रन्दामीति भाव ॥

(१२५) राजेति । धिगित्यात्मनिन्दायाम् । व्रीडितो लज्जायानस्मि । यतोऽनया कन्याहरणदोषेणोपालभ्ये इति भाव । व्रीडयति चित्ते लज्जे इति कविकल्पद्रुम । ओत्वाद् वर्त्तमाने क्त ॥

(१२६) शकु इति । णेत्यादि । न खल्वहं महाराज भणामि देवमुपालभे । खलु रत्नुमये । उपालभे निन्दामि । तथाच एव योजयिष्यता दैवन कथमहं परतन्त्री स्यामिति पूर्वाभिप्राय ॥

(१२७) राजेति । अनुकूलकारि अभिमतार्थं साधि ॥

(१२८) शकु इति । कधमित्यादि । कथमिदानीं नोपालप्से यन्मामात्मनोऽनीयां कृत्वा परगुणे लोभयति । उपालप्से दैवमिति शेष । यत् दैव । आत्मनोऽनीयाम-कृतज्ञाम् । लोभयति प्रलोभयति ॥

(१२९) राजेति । स्वगतमनतिस्पष्टम् ॥

(१३०) अपीति । महति बलवति औत्सुक्ये इदार्योद्योगेऽपि । इदार्योऽत्र

शकु ॥ गच्छत्येव । (१४१)

राजा ॥ न कथमात्मन प्रियं करिष्ये ॥ उपहृत्य पटान्तमवलम्बते । (१४२)

शकु ॥ पोरव रक्ख रक्ख विणअं,इदोतदो दिट्ठिओ सञ्चरन्ति ।(१४३)

राजा ॥ सुन्दरि अलं गुरुजनाद् भयेन न ते विदितधर्मा तत्रभवान्

कण्वः खेदमुपयास्यति । यतः । (१४४)

गान्धर्वेण विवाहेन बहवोऽथ सुनिकन्यकाः ।
श्रूयन्ते परिणीतास्ताः पितृभिश्चानुमोदिताः ॥ (१४५)

शकुन्तलेत्यमर । दयितेति प्रियस्य । दयित वल्लभ प्रियमित्यमर । प्रार्थनायां क्रियाविशेषणमिति भावः । प्रतीपा पराङ्मुखी । प्रतीपोऽस्त्री पराङ्मुखे इति शब्दार्णवे । तथा व्यतिकरेण व्यतिषङ्गेण अन्योन्यसंयोगेनेति यावत् यत्र सुखं तत् काङ्क्षन्त्योऽभिलषन्त्योऽपि । व्यतिकर समाख्यातो व्यसनव्यतिषङ्गयोरिति विश्व । खाङ्गदाने निजावयवार्पणे कातरा भयाच्चञ्चला । अधीरे कातर इत्यमर । क्षुभाद्यर्थोऽज्ञातपुंस्कर्मा लक्ष्यान्तरत्वात् जक्षावसरत्वात् न खलु न केवलं मदनेनैव व्याबाध्यन्ते पीड्यन्ते किन्तु सख्युपस्थितोऽपि परित्यक्त कालो मदनस्य कृतार्थतासमयो याभिस्ताश्चयोक्ताः अन्यो मनसि जायत इति मनसिज । विभक्तेरलुक् । ता मदनमपि व्याबाधन्ते पीडयन्ति । अत्र पराङ्मुखैः उभयो परस्पर प्रति बाधनरूपैकक्रियाकारणत्वादन्योन्यालङ्कार । यदुक्त दर्पणे । अन्योन्यमुभयोरेकक्रियायोः कारणं मिथ इति । इदं मल्लिनाथस्य मतम् ॥

(१४१) शकु इति । एवकारेण गतेरत्वाधिक्यं प्रत्येतव्यम् ॥

(१४२) राजेति । सुखं मे भूयात दुःखं मे मा भूदिति स्वार्थिकेच्छयोरेव क्रियारम्भकत्वादाह कथमिति । प्रिय कर्मेति शेष । पटान्त वस्त्राञ्चलम । पटश्चित्रपटे वस्त्रे इति मेदिनी । अवलम्बते गृह्णाति ॥

(१४३) शकु इति । पोरवेत्यादि । पौरव रक्ष रक्ष विनय, इतस्तत क्षणं सञ्चरन्ति । विनय सौजन्यम् । क्षुभ्यन्ति भ्रमन्ति । समस्ता इति तृतीयान्तेदं यावत्तनेपदम् । यदि कोऽपि छलैतत्प्रत्यक्षो गुरवे निवेदयेदिति भाव ॥

(१४४) राजेति । गुरुजनात् पितुः । ते तव पितृत्वसम्बन्धी कण्व इत्यन्वय । विदिता ज्ञायमाना धर्मा व्यापारा येन स विदितधर्मा व्यापारज्ञ इत्यर्थः । धर्मो पुण्य यमन्यायस्वभावाचारसोमपा इत्यमर । धर्मादनिच्यत् । खेदमुपतापम् । ननु कथमयमसदाचारोऽपि छलनीयो गुरुणेत्यत आचारस्य साधिष्ठमा साधयितुमाह यत इति ॥

(१४५) गान्धर्वेणेति । बहवोऽनेका सुनिकन्यकास्तापसकुमार्यो गान्धर्वेणान्योन्यसमयपूर्वकेण विवाहेन । गान्धर्वो समयान्मिथ इति शाकुन्तलेय परिणीता

द्विरवलोक्य ॥ कथं प्रकाशं निर्गतोऽस्मि ॥ शकुन्तला क्षित्वा पुनस्तैरेव पदै निवर्त्तते । (१४६)

शक्र ॥ पदान्तरे प्रतिनिवृत्य साक्षभङ्गम् ॥ पोरव अणिच्छापूरओवि सम्भावणमेत्तपरिचिदो अच्चं जणो ण विसुमरिदव्वो । (१४७)

राजा ॥ सुन्दरि । (१४८)

त्वं दूरमपि गच्छन्ती हृदयं न जहासि मे ।
दिवावसाने छायेव पुरो मूलं वनस्पतेः ॥ (१४९)

शक्र ॥ लोकमन्तरं गत्वा आत्मगतम् ॥ हद्धी हद्धी दूमं सुणिअ ण मे चलणा पुरोसुहा पसरन्ति भोदु दूमेहिं पज्जन्तकुरुवएहिं ओवारिदसरीरा भविअ पेक्खिस्सं दाव से भावाणुबन्धं ॥ तथा कृत्वा स्थिता । (१५०)

कदा । अथानन्तरं ता पितृभि गुंरुजनैरनुमोदिता अभिनन्दिताश्च भूयस्ते इतिहासकथानुबन्धेष्विति शेष ॥

(१४५) दिय इति । द्विरवलोक्य इतस्ततो दृष्ट्वा । प्रकाशं लताग्रहाद् बहिर्देशम् । अनधिकारमस्योऽयम् । क्षित्वा त्यक्त्वा । हाको क्षिरिति हि । पदै पदन्यासै । निवर्त्तते लताग्रह निविशते ॥

(१४७) शक्र इति । पदान्तरे अन्यस्मिन् चरणन्यासे तत्समय इति यावत् । प्रतिनिवृत्य परिवृत्त्य निवृत्य । साक्षभङ्गमङ्गाना कौटिल्येन सहितम् । पोरवेति । पौरव अनिच्छापूरकोऽपि सम्भावणमात्रपरिचितोऽयं जनो न विस्मर्त्तव्य । अनिच्छापूरकोऽपि अमन्यादितमनोरथोऽपि । सम्भावणेति । सम्भावणमात्रेणालापमात्रेण परिचितो विदित । न विस्मर्त्तव्य स्मर्त्तव्य ॥

(१४८) राजेति । सुन्दरीति सम्बोधन श्लोकोक्तशकुन्तलाम्बितम् ॥

(१४९) त्वमिति । दिवावसाने अपराह्णे पुरोऽग्रतो दूरमपि गच्छन्ती वनस्पते र्बहानपादेरुच्छाया मूल मूलप्रदेशमिव पुरो दूरमपि गच्छती त्य मे मम हृदय मनो न जहासि न त्यजसि । मनसि स्थिरलग्नैवासीति भाव । अत्रोपमालङ्कार ॥

(१५०) शक्र इति । लोकमन्तरम । लोकान्तरमनुष्यका इत्यमर । अन्तरमवधि । अन्तरमवकाशावधिपरिधानान्तर्भेदमध्ये इत्यमर । हद्धीत्यादि । हा धिक् हा धिक इदं श्रुत्वा म मे चरणौ पुरोसुखौ प्रसरत । भवतु यदि पर्य्यन्तकुरुवकैरपवारितशरीरा भूत्वा प्रेक्षिष्ये तावदस्य भावानुबन्धम् । पुरोसुखौ अग्रामिमुखौ । पर्य्यन्तकुरुवकै इतिभद्रै कुरबकै अपवारितशरीरा अनर्हितशरीरा । अवहित्थमित्यमर ।

राजा॥ कथमेवं प्रिये अनुरागैकरसं मामुत्सृजन्त्र निरपेक्षैव गतासि। (१५१)

०८ अनिर्हयोपभोगस्य रूपस्य स्पृदुनः कथम्।
कठिनं खलु ते चेतः शिरीषस्येव बन्धनम्॥ (१५२)

शक्र॥ एवं सुणिअ ण से अत्थि विहवो गच्छिदुं। (१५३)

राजा॥ सम्प्रति प्रियाभूत्ये किमस्मिन् लतामण्डपे करोमि। (१५४)

अपवार्योक्त्वा॥ हन्त व्याहृतं मे गमनम्। (१५५)

३० मणिबन्धाद् गलितमिदं सक्तान्तोधौरपरिमलं तस्याः।
हृदयस्य निगडमिव मे मृणालवलयं स्थितं पुरतः॥ (१५६)

भावानुबन्ध भावप्राभिप्रायस्य अनुबन्धमनिष्टसिद्धसिमिति यावत्। भाव सत्तास्वभावाभिप्रायचेष्टास्वजन्यस्थिति दोषेत्यादेऽनुबन्ध स्यात् प्रलयादिषु अन्वरे। तस्यानुयायिनि प्रियो प्रस्थानिवर्तन इति अमर॥

(१५१) राजेति। अनुरागैकरस अनुरागो रतिरेव एक केवलो रसो रसता गतो यस्य तम्। शृङ्गारभावरसाविष्टमिति यावत्। तदुक्त। विभावेनानुभावेन व्यक्त सञ्चारिणा तथा। रसतामेति रत्यादि स्थायी भाव सचेतसामिति। तथा। पुंस स्त्रिया स्त्रिया पुंसि सयोग प्रति या स्पृहा। स शृङ्गार रति ख्यातो रतिक्रीडादिकारणमिति। उत्सृज्य त्यक्त्वा। निरपेक्षा नि स्पृहा। अपपूर्वस्य क्षतेराकाङ्क्षार्थत्वात्॥

(१५२) अनिर्हयेति। अनिर्हयोपभोगस्य अजातगाढालिङ्गनादिव्यापारस्य अतएव स्पृदुन कोमलस्य ते तव रूपस्य आकारस्य। रूप स्वभावे सौन्दर्ये नामके पशुगन्धयो। यन्याष्टत्तौ नाटकादावाकारश्लोकयोरपीति विश्व। चेत खलु केवल हृदय स्पृदुन शिरीषस्य तत्पुष्पस्य बन्धन इत्तामिव कठिनम्। अत्रोपमालङ्कार॥

(१५३) शक्र इति। एवमित्य हि। इद श्रुत्वा न मेऽस्ति विभवो गन्तुम्। विधव॰ शक्ति॥

(१५४) राजेति। सम्प्रति इदानीम्। एतर्हि सम्प्रतीदानीमित्यमर। लतामण्डपे लतागृहे॥

(१५५) अपवर्त इति। मृणालवलयमवलोक्य हर्षादाह हन्तेति। व्याहृत प्रतिबद्धम॥

(१५६) गमनव्याघातक दर्शयति मणीति। मणिबन्धात् पाणिप्रकोष्ठयो सन्धि स्थानात् गलित परिभ्रष्टम इद इक्ष्वाकु सक्रान्त सम्पर्कवशात् सङ्गत सग रक्त

सवह्नमानमादत्ते । (१५७)

शकु ॥ हस्तं विलोक्य ॥ अम्मो दोव्वल्लसिढिलदाए परिब्भट्ठं एदं मिणालवलअं ण मए परिग्गहं । (१५८)

राजा ॥ मृणालवलयमुरसि निक्षिप्य ॥ आहो सदृशं । (१५९)

अनेन लीलाभरणेन ते प्रिये विहाय कान्तं भुजमत्र तिष्ठता ।
जनः समाश्वासित एष दुःसभागचेतनेनापि सता न तु त्वया ॥(१६०)

शकु ॥ अदो वरं ण समत्थस्मि वितक्किदुं भोदु एदेण ज्जेव अवदेसेण अत्ताणं दंसइस्सं ॥ इतरपरपँति । (१६१)

वीरणमूलानुलेपनस्य परिमल प्रगस्तगन्धो यत्र तत् तथोक्तम् । विमर्दक्षमे परिमलो गन्धे जनमनोहरे इत्यमर । मे मम हृदयस्य निगड बन्धनरज्जुरिव । यथा रज्जुके । अन्यत्रको निगडोऽस्त्री स्यादित्यमर । तस्या प्रियाया मृणालवलय पुरतोऽग्रत स्थित तिष्ठति । स्यात् पुर पुरतोऽग्रत इत्यमर हृदयस्य निगडमिवेत्युत्प्रेक्षालङ्कारः । इयमार्या जाति ॥

(१५७) सबह्निति । सबहुमान सात्मादरम् । आदत्ते गृह्णाति । मृणालवलय मिति शेष ॥

(१५८) शकु इति । अम्मो इत्यादि । अहो दौर्बल्यशिथिलतया परिभ्रष्टमिद मृणालवलय न मया परिगृहीतम् । दौर्बल्येन अङ्गानां कार्श्येण या शिथिलता मृणाल-वलयस्य स्वभावसिद्धया हेतुना परिभ्रष्ट पतित मृणालवलयं मया न परिगृहीत मनु भूतम् । अमार्षो दुर्बलस्यात इत्यमर ॥

(१५९) राजेति । उरसि वक्षसि निक्षिप्य निधाय । स्वर्ग इति । एतेन विरह विनोदन दर्शितम । तथाचोक्तम । वियोगावस्थासु प्रियजनसम्भोगानुभवस्य तत्रचित्र कर्म यदनुभवस्मरणमपि । तदुद्भूतोत्साहानुभवसदृशस्य स्वर्गसमपि प्रतीकार कामव्यधिसमर्थां कोऽपि कथित इति ॥

(१६०) अनेनेति । हे प्रिये कान्त मनोज्ञ भुज बाहु विहाय तत्रैव अव भृथे तिष्ठता वर्तमानेन अनेन ते मम लीलाभरणेन विलासमण्डनेन अचेतनेन अबल्य न तेन अपि तु अमाद्दृ दुर्विरहदुःखितं भजते सेवते य स । टाट्-भजभञ्जभक्षो विणुति विल । एष जन अहमिति भाव । समाश्वासित दृष्टोऽत स्वया तु सचेतनया मयापीति भाव । न न समाश्वासित इत्यर्थ । दुर्बलस्यापि भाग इतम् ॥

(१६१) शकु इति । अम्मो इत्यादि । अत परं न समर्थोऽस्मि वितर्कयितुम् । भवतु एतमेवावदेशेनात्मान दर्शयिष्यामि । अत परं एतस्मादवसादनात्परम् । एतमेव मणय-न्तमनेन । अवदेशेन व्याजेन । दर्शयतीति दर्शयिष्यति ।

राजा॥ दृष्ट्वा सहर्षम्॥ अये जीवितेश्वरी मे प्राप्ता परिदेवनानन्तरं प्रसादितोपकर्त्तव्योऽस्मि खलु दैवस्य। (१६२)

ॐ पिपासश्यामकण्ठेन याचितश्चातकेन तु।
नवमेघोज्झिता चास्य धारा निपतिता मुखे॥ (१६३)

शकु॥ राज्ञः सम्मुखे स्थित्वा॥ अज्ज गाहमधे सुमरित्थ एदस्स कण्वदंसिणो सिणालबलअस्स कदे पडिणिवुत्तस्सि कधिदं मे हिअएण तए गहिदं त्ति ता णिहुविअ एदं मा मं अत्ताणअं सुणिअणेसु पआसइस्सादि। (१६४)

---

(१६२) राजेति। अये सम्भ्रमे। जीवितेश्वरी प्रेयसी। परिदेवनानन्तर मरणान्त विलापावसाने। विलापः परिदेवनमित्यमरः। दैवस्य विधेः। दैवं तु भागधेयं भाग्यं स्त्री नियति विधिरित्यमरः। प्रसादेन प्रसन्नतया उपकर्त्तव्य उपकारार्होऽस्मि। खलु-र्जिज्ञासायां किमित्यर्थे। अनधिकारमस्मोऽयम्। शकुन्तलागम एव दैवस्य प्रसाद इति भावः। प्रकटितम्॥

(१६३) पिपासेति। पिपासया श्यामो दुर्ब्बल उच्चैरगाढ्यम इति यावत् कण्ठो यस्य स तथोक्तेन पक्षिणा चातकेन च अम्बु तोय याचित नवमेघेन उज्झिता क्षिप्ता धारा व्यासारश्च अस्य पक्षिणो मुखे निपतिता। द्वौ चकारौ क्रिययोरव्यवहितपौर्व्वापर्य्य बोधयत। अत्र कातरस्वरचातककृतानन्तरमेव नवमेघोज्झितधारापातेनाप्रस्तुतसुखदुःखेनार्थेन विलापानन्तरमेव शकुन्तागमरूपप्रस्तुतसुखदुःखार्थस्य गम्यत्वात्प्रस्तुतप्रपञ्चाख्योऽलङ्कारः। यदुक्तं दर्पणे। क्वचिद् विशेषः सामान्यात् सामान्यं वा विशेषतः। कार्य्यात्तिमित्तं कार्य्यं च हेतोरथ समात समम्। अप्रस्तुतात् प्रस्तुतस्य गम्यते पञ्चधा मतः। अप्रस्तुतप्रपञ्चा व्यादिति॥

(१६४) शकु इति। स्थित्वा गति व्यवधाय। अज्जेत्यादि। आर्य्य अहं पथे स्मृत्वा एतस्य दृप्तभ्रंशिनो कण्वालवलयस्य कृते प्रतिनिवृत्तास्मि, कथितं मे हृदयेन त्वया गृहीतमिति, तत्सन्निक्षिपेदं, मा मामात्मानञ्च सुनिजनेषु प्रकाशयिष्यसि। अहं पथ्या इतार्थं पथक्लान्ता पथे। पथ्यशब्दे वे प्रत्ययः। स्मृत्वा ललाटेऽक्षणालवलयभ्रंशमिति शेषः। कृते अर्थे। अर्थे कृतेऽव्ययं तादर्थ्ये वर्त्तते हयमिति कोषात्। प्रतिनिवृत्ता प्रत्यागता। प्रथमं निक्षिपेत्यत्रको वैनाभिहितोसि यद्दृमेधाग्रहीषमिति राज्ञ प्रत्यभिज्ञानावधार्य्यैह कथितमिति। तत् तस्मात्। एतं कण्वालवलयम्। मामात्मानञ्च सुनिजनेषु मा प्रकाशयिष्यसि। तथाच विश्वस्तेन सुनिजनेषु निहितहस्तालक्षणं प्रकाश्यं स्यादिति भावः॥

राजा ॥ सहर्षमात्मगतम् ॥ इदानीमस्मि विश्वसित भर्तुराभाषणपदमेतत् । (१७३)

प्रकाशम् ॥ सुन्दरि नातिश्लिष्टः सन्धिरस्य मृणालवलयस्य यदि नेऽभिमतं तदन्यथा घटयिष्यामि । (१७४)

शकु ॥ क्षितं कृत्वा ॥ जधा दे रोअदि । (१७५)

राजा ॥ सव्याजं विलम्ब्य प्रतिमोच्य ॥ सुन्दरि दृश्यताम् । (१७६)

अयं स ते श्यामलतामनोहरं विशेषशोभार्थमिवोज्झिताम्बरः ।

मृणालरूपेण नवो निशाकरः करं समेत्योभयकोटिसाश्रितः ॥(१७७)

शकु ॥ ण दाव णं पेक्खामि पवणकम्पिदकमलपुलरेणुणा कलसीकिदा मे दिट्ठी । (१७८)

---

(१७३) राजेति । स्वागतमनतिप्रकाशम् । विश्वसितो जातविश्वास । एतत् भार्यं पुत्रेति । भर्तुराभाषणपद् भर्तरि प्रयोगार्हं पदम् । तदाह भरत । भार्यं पुत्रेति सम्बोध्य पति पत्नीजनेन वेति ॥

(१७४) प्रकाशमिति । विश्लिष्टमित्यर्थं । नातिश्लिष्ट न सम्यक् श्लेष गत न सुष्ठु मिलित इति यावत् । सन्धिरुभयकोटियोग । अभिमत सम्मतम । तत तदा । अन्यथा घटयिष्यामि पृथग्विध सन्धास्यामि ॥

(१७५) शकु इति । जधेत्यादि । यथा ते रोचते । यथा सत्कार ते तुभ्य रोचते प्रीतिमुत्पादयति । तथा क्रियतामिति शेष ॥

(१७६) राजेति । सव्याज व्याजसन्धानकपटेन सहित विलम्ब्य काल गमयित्वा । प्रतिमोच्य परिधाप्य । वलयमिति शेष । दृश्यतामित्यस्य श्लोकोक्तिनान्वय ॥

(१७७) अयमिति । अय स प्रसिद्धो नव कलामात्रो निशाकरश्चन्द्रमा उज्झिता म्बरो शुक्लाकाशवाम सन् । एतेन शुक्लवस्त्रत्वमपि ध्वन्यते । अम्बर व्योम्नि वाससीत्यमर । विशेषशोभार्थं शोभातिरेकार्थमिव श्यामलतया नीलिम्ना मनोहर चित्तोन्मादकम् । एतेन गगणसादृश्यमपि दर्शितम् । तव कर मृणालरूपेण समेत्य समागत्य उभयकोटि आश्रयभाजित । कुण्डलीभूय दृढ धृतवानिति भाव । कोटिरग्रे प्रकर्षे चेति धरणि । अत्यासन्नधिनमपि कुण्डलीभूतकलामात्रमिन्दु सुघमान प्रौढ्या सम्भाव्य तदात्मतया उपमेयस्य मृणालवलयस्य सम्भावनादुत्प्रेक्षालङ्कार । यदुक्त दर्पणे । भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मनेति । संगच्छविन्द्र इत्यत्र । तत्रावयवेन प्रेम्णे पवनकम्पितकमलपरागेणा-

राजा ॥ मधितम् ॥ यद्यनुमन्यसे तदहमेनां वदनमारुतेन विशदां करवाणि । (१७९)

शकु ॥ तदो अणुकम्पिदा भवेय्यं किन्तु उण अहं ण दे वीसवेमि । (१८०)

राजा ॥ मा मैवं वयो हि परिजनः सेव्यानामादिशात् परं न वर्तते । (१८१)

शकु ॥ अय्य जेव अच्चादरो अविस्सासजणओ । (१८२)

राजा ॥ स्वगतम् ॥ नाहमेवं रमणीयमात्मनः सेवावसरं शिथिलयिष्ये ॥ सुखसक्तमयितु प्रवृत्तः । (१८३)

शकु ॥ प्रतिषेध कृपयन्ती विरमति । (१८४)

कलुषीकृता मे दृष्टिः । एव कृष्णसर्पविनिर्मोकम् । न प्रेक्षे न पश्यामि । कुत एवमत आह मदनेति । मदनेन कम्पितयोः स्पन्दितयोः कर्णोत्पलयोरवतंसभूतयो. कमलयो रेणुना रजसा दृष्टिर्लोचन कलुषीकृता व्यप्रसादीकृता ॥

(१७९) राजेति । अनुमन्यसे अनुजानासि । तत तस्मात् । यदि दृष्टिम् । वदनमारुतेन फूत्कारेण । विशदां निर्मलाम् । विशदो धवले पुमान् । तदुक्ते निर्मले वाच्यवच्चेति यद्वाक्ये । यद्वा विशदां, व्यक्ताम् । विशद. पाण्डरे व्यक्ते इति मेदिनी-त्रिकाण्डशेषौ । करवाणीति प्रार्थनाया गौ ॥

(१८०) शकु इति । तदो इत्यादि । तदानुकम्पिता भवेयम् । किन्तु पुनरहं न ते विश्वसिमि । अनुकम्पिता कृपया सम्भ्रमिता । भवेयमिति भव्ये वा. क्रियातिपत्तौ रिति क्रिया या गौ । ते इति सम्बन्धमात्रविवक्षाया षष्ठी ॥

(१८१) राजेति । मा मैवं एवं मा वद मा वदेयुः । हि यस्मात् वयो अधिरोपितः गत. परिजन. परिचारको जन. सेव्यानामुपासनीयानाम् आदेशात् परम् आदिष्टातिरिक्तं व्यापारं न वर्तते न तत्र रमते । परमिति भावपरत्वात् सेव्याध्यक्षानभ्यर्थयितुं कर्तव्यम् ॥

(१८२) शकु इति । अय्यमिश्रादि । अयमेवास्मादरो अविश्वासजनकः । अत्यादरः आदरातिशय. ॥

(१८३) राजेति । रमणीय दुर्लभम् । आत्मनः सेवावसरं सेवायै आत्मनो-ऽवकाशम् । शिथिलयिष्ये अनेष्यामि । उपभोगयिष्ये इत्यर्थः ॥

(१८४) शकु इति । प्रतिषेधं निषेधं कुर्वती क्रियया दर्शयन्ती विरमति निवर्तते ॥

राघा ॥ अयि मदिरेक्षणे अलमलङ्घविलम्बाशङ्कया । (१८५)

गङ्गु ॥ किञ्चिद् दृष्ट्वा व्रीडावनतमुखी तिष्ठति । (१८३)

राजा ॥ अङ्गुलिभ्यां मुखमुन्नमय्य चात्मगतम् । (१८४)

चारुणा स्फुरितेनायतपरिचितकोमल ।
पिपासतो ममानुज्ञा दृष्टालोच प्रियाधरः ॥ (१८८)

गङ्गु ॥ परिट्ठाणमन्थरो विअ अज्जउत्तो । (१८६)

राजा ॥ कर्णोत्पलस्त्रिकर्णादोलणमृदोऽस्मि॥ सुखमारुतेन चक्षु सेवते।(१८७)

गङ्गु ॥ भोदु पढुदिअहंसणट्ठिअ संवुत्ता । लज्जेमि उण अज्जउत्तस्स अणुआरिणो पिअआरिणो अज्जउत्तस्स । (१८१)

---

(१८५) राजेति । मदिरेक्षणे सञ्जनलोचने । अलम् अयुक्त । पक्ष्मभ्या चक्षु षचमान्न पदम् । व्यतिनयस्य व्यभ्यर्थाया व्याघ्रुया त्रासेन तस ॥

(१८३) गङ्गु इति । किञ्चिद् दृष्ट्वा ईषद् प्रेक्ष्य । किञ्चिदीषन्मनागर्थे कृदमर । व्रीडया लज्जया अवनत नम्र मुख यया सा तथोक्ता । स्वाङ्गादीप् ॥

(१८४) राजेति । अङ्गुलिभ्या अङ्गुष्ठमध्यमाभ्याम् । उन्नमय्य उन्नम्य । आत्मा स्वमे क्षात्रोऽयम् । अदैर्घ्यमिति अदैर्घ्य ॥

(१८८) चारुणेति । अपरिचितेन दशनसम्पर्कामावेन कोमल सुकुमारौष्ठ्य प्रियाया अधरस्य चारुणा मनोहारिणा स्फुरितेन स्फुरणेन द्वारेण पिपासत पातुमिच्छत अधरमिति योज्य । अस मम्बन्धे अनुज्ञामनुमतिं दृष्टालोच । भावे क्त । अत्रोमे चालङ्कार ॥

(१८७) गङ्गु इति । परोक्षादि । परिट्ठानमन्थर दर्शनार्थं पुन्न । परिट्ठान चक्षु प्रविष्टकर्णोत्पलरेणो सम्यगबोध तस मन्थरो मन्द अचम इति यावत् । मन्थर कोपदण्डयो र्बोधमन्थानयो पुमान् । दुष्टगावान न द्वयो र्मन्दे पृथो पक्षेऽभिधेयवद्भिति मेदिनी । मन्थे कर्णोत्पलरेणून् नेत्रगतान् सम्यगनुभवितु नाहतीति भाव ॥

(१८०) राजेति । कर्णोत्पलस्य कान्तकर्णात् मासीयात् दृष्टपमूतो दर्शनात्तम । रेणुनिरसीकरणादिति भाव । सुखमारुतेन फुत्कारेण ॥

(१८१) गङ्गु इति । भोदित्यादि । भवतु प्रकृतिस्वदर्शनापि घटना । लज्जे पुनरनुपकारिणी प्रियकारिण्य र्यपुत्रस्य । भवतु यस्तु बलमन्येन फुत्कारेणेति भाव । भवतिरत्रास्तिसमानार्थ । प्रकृतिस्वदर्शना स्वाभाविकदर्शना । पुनस्त्वर्थ । तेन त्विन्तु प्रियकारिण्योऽभिन्नार्थ साधिन आर्यपुत्रस्य अनुपकारिणी अहं लज्जे लिङ्गेमि। कचिज्जीयोऽन भोड़े इति कचित्पाठस्तुन । अपभ्रंशेरिति पक्ष द । सुबुभिरिति दक्ष ज ॥

राजा ॥ सुन्दरि किमन्यत् । (१८२)

इदमनुपहतिपक्षे सुरभि मुखं ते यदाघ्रातम् ।
नवु कमलस्य मधुकर सन्तुष्यसि गन्धमात्रेण ॥ (१८३)

भक्तु ॥ कथितम् ॥ असन्तोषे उण किं करेदि । (१८४)

राजा ॥ इदम् ॥ इति व्यवसितः । (१८५)

भक्तु ॥ पल्ला ढौकते । (१८६)

नेपथ्ये ॥ चक्रवाकवधु आमन्तेहि सहचरं ण उवलक्खिदा रअणी । (१८७)

भक्तु ॥ कर्णं दत्त्वा सपरिभ्रमम् ॥ अज्जउत्त एसा क्खु रादक्खअस्स धम्म

---

(१८२) राजेति । अन्यत् उपकरणं किम । अलमन्येनोपकारेणेति भावः ॥

(१८३) किमुपहतं मया यदन्येनालमित्युच्यते इत्यत आह इदमिति । तव सुरभि मुखं सुगन्धि वदनम् । सुगन्धौ च मनोज्ञे च याज्यवत् सुरभि सदृशं इति विश्वः । यदाघ्रातमाघ्रायि मयेति शेषः । इदमपि उपहतिपक्षे उपकारकत्वे गणनीय इति शेषः । ननु यत् कमलस्य मधुमात्रेण व्यवहारात् विरागोऽसि भाव । मधुकरो भृङ्ग सन्तुष्यति इत्लोपमाप्नोति । अत्र इष्टान्तोऽलङ्कारः । पूर्वार्द्धेऽपि द्वादशाक्षरत्वात्पादवृत्तिः नोपाद्यैवम । सदृक्षम । चार्यागीतेरर्द्धस्य प्रथमार्द्धमपि प्रयुक्तं चेत् । कामिनि सासूयगीति प्रकाशयन्ते महाकवय इति ॥

(१८४) भक्त इति । व्यसेत्यादि । व्यसनोपे पुनः किं करोति । मधुकर इति शेषः । सतामनिविघ्नमात्मानं आसादयतीत्यर्थः ॥

(१८५) राजेति । इद एव करोतीत्युक्त्वा व्यवसितसुचित्तः सन्नाध्यवसाय सुचित्तसङ्कल्पः इति यावत् । अत्र सङ्कल्पसुचित्तयोः सदभिनयस्य प्रतिषेधात् । यथाह । शयनासनपानादि मनोराज्यपरोधनम् । स्नानानुलेपने चैव चेष्टितं तो गतिविकार इति । सुखमनविघ्नं सङ्कल्पाद्या कथमप्युच्यते न सुचित्तं तु तत्र्यभिधानाभावेन विरोधाच्च ॥

(१८६) भक्त इति । पल्ला सुख ढौकते आहयोति । यद्यपि ढौङ्ग गत्यामिति कविकल्पद्रुमस्यापि धातूनामनेकार्थत्वादत्रावरुध्यार्थं । यदुक्तम । क्रियायाश्चिदगाख्यातु प्रसिद्धोऽर्थं प्रदर्शितं । प्रयोगतोऽन्ये मन्तव्या अनेकार्था हि धातव इति ॥

(१८७) नेपथ्य इति । चक्रेत्यादि । चक्रवाकवधु आमन्त्रयस्व सहचर समुपस्थिता रजनी । आमन्त्रयस्व आह्वय । सह युगपच्चरतीति सहचर प्रिय । उपेत्यादि शेष । निशि चक्रवाकमिथुनं विरहदुःखं लभते प्रिया च प्रियमाक्रन्दतीति प्रसिद्धमत्र ॥

कर्णौअसी मम वुत्तन्तोवलम्भणणिमित्तं अज्जा गोदमी आअच्छदि ता विडवान्तरिदो होहि। (१९८)

• राजा॥ तथा॥ इत्येकान्ते स्थित (१९९)

॥ तत प्रविशति पात्रहस्ता गौतमी। (२००)

गौत॥ जादे अच्चाहिदं सुणिअ आअदा, एदं पाल्लिउद्धं॥ (२०१)

ब्रह्मा सप्तम्याम्य च॥ हुअ देवदासहाइणी ठिदसि। (२०२)

शकु॥ दाणिंमेव अणहूआपिअब्भदाओ मालिणी ओदी-णाओ। (२०३)

गौत॥ [शान्तोदकेन अभिसिञ्चन्ती॥ जादे णिराबाधा मे चिरं जीव अवि दे लङ्घसन्दावाहूं शक्काहूं॥ इति स्व्रुयति। (२०४)

---

(१९८) शक्र इति। 'कर्णं दत्त्वा श्रोत्रं कर्णं नियुज्य। शक्रस्मृगं शावरम्। यज्ञेत्यादि। आर्य पुत्र एषा खलु तातकण्वस्य धर्मैकनीयसी मम दुहितानोपलम्भननिमित्त-मार्या गौतमी आगच्छति तद् विटपान्तरितो भव। धर्मैकनीयसी धर्मैकभगिनी न वस्तुतो भगिनीत्यर्थः। मम दुहितालम्भ वार्तायां उपलम्भननिमित्तं ज्ञानार्थम्। वार्तां प्रहसि-र्दुहितान्त इति, प्रद्योपलब्धिविश्वस्तप्रतिपक्षप्रणिधिचेतसा इति चामर। विटपान्तरित स्तब्धा च्छादितशरीर॥

(१९९) राजेति। तथा तथैव क्रियत इत्युक्ता एकान्ते निर्जने स्थितस्तिष्ठति। एकान्त श्लोकमित्यर्थः निर्जने तरुयुते विश्विति यज्ञाग्नि॥

(२००) तत इति। तत राज्ञ स्थानान्तरगमनात्परम्। पात्रहस्ता यान्त्यु दक-पात्रहस्ता॥

(२०१) गौतेति। जाते इत्यादि। जाते व्यत्याहित श्रुत्वा आगता, एतच्छान्तो-दकम्। जाते वत्से। व्यत्याहित तापादतिभीतिम्। व्यत्याहित सङ्काभीति धर्मैकनीयान मेवि चेत्यमर। यान्त्यु दक दर्शयितुमाह एतदिति॥

(२०२) हुअेति। अयुक्तमसामिति शेष। हुअेत्यादि। हुअ देवतासहायिनी तिष्ठसि। देवतासहायिनी एकाकिनी। [शैलकोणगर्भोऽयं पाठः॥

(२०३) शक्र इति। दाणिमिति। इदानीमेव अनहूयाभियदे मालिनीमवतीर्णे। मालिनीं नदीम्। अवतीर्णे गते॥

(२०४) गौतेति। अभ्युक्ष्य शान्तोदकेन अभिषिच्य। तत्प्रकारस्तु। ज्ञानेनैव दुहितेम शोधयं वसुदाशुतम्। व्यसुनाभ्युक्ष्य मौक्तं तिरश्चाशोधय दृतमिति वाशुक्त।

अनु ॥ अम्मो अत्थि विसेसो । (२०५)

गौत ॥ परिअड्ढो दिवसो ता एहि उडअं अेव गच्छआ । (२०६)

अनु ॥ कथञ्चिदुत्तीर्य जगतम् ॥ हिअअ पढमं सुहोवणदे णवोरहे कालहरणं करेसि सव्वदं अणुभव दाव दुक्खं । (२०७)

पदान्तरे प्रतिनिष्क्रम्य प्रकाशम् ॥ जदाहर सन्दावहर आलम्बेमि तुमं मुधो वि परिओअअं ॥ इति निष्क्रान्ते । (२०८)

राजा ॥ पूर्वं स्थानमुपेत्य सनिश्वासम् ॥ अहो विघ्नबन्धुः प्रार्थितार्थसिद्धयः । तथा हि । (२०९)

सुकुमारकुलसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम् ।

जादे इत्यादि । जाते निराबाधा मे क्रिय जीव यदि ते लघुसन्तापान्यङ्गानि । जाते अर्थे गि प्रत्ययेन सन्नन्त. । निराबाधा निर्व्रीडा । यदिः मन्ये । लघवोऽल्पीभूताः सन्तापा येषु तानि लघुसन्तापानि । इति इति पृच्छनो । सूयति यद्वानीति यः ॥

(२०५) अनु इति । अम्मो इत्यादि । अहो अस्ति विशेषः । अस्ति भवति । अस्ति क्रिया इत्यर्थमवलम्ब्य मिथ्याशब्दोपः परिहृतः । सत्यार्थधातुना इतश्चिन्तितेत्यर्थं हृदयमेव स्फुटम् । विशेषः प्रतीकार ॥

(२०६) गौतेति । परीत्यादि । परिणतो दिवसस्तदेहि शकुन्तलमेव गच्छाव । अत्रान्तरे स्त्रियेत्येवकारव्यवच्छेदः ॥

(२०७) अनु इति । कथञ्चिदुत्तीर्य जगत् । हृदयेत्यादि । हृदय प्रथमं सुखोपनते नवोरसे कालहरणं करोषि सम्प्रत्यनुभव तावद् दुःखम् । सुखोपनते अप्रयत्नसुलभे सती त्यर्थः । नवोरसे अभिलषितलाभे प्रियतम इति यावत् । कालहरणं विलम्बम् । सम्प्रत्यधिगमोम् ॥

(२०८) पदेति । पदान्तरे अन्यस्मिन् पदविन्यासे प्रतिनिष्क्रम्य पश्चान्निष्क्रम्य । जदेत्यादि । जात्यटप यत्नादरं आलम्बये त्वां पुनरपि परिभोगार्थम् । जातादरं निर्भरम् । अत्र सत्यो सङ्गराज एव ध्वन्यते । सन्तापहर व्यालोकनिरावरणादाधोक्षणाद्वा इत्यर्थः । आलम्बे निवेदयामि । परिभोगाय यागार्थं सङ्गमार्थं वेत्यर्थः । इति परिहासो वचनम् । विष्कम्भके गौतमीशकुन्तले इति शेषः ॥

(२०९) राजेति । पूर्वस्थानं जातादरनिष्क्रान्तस्थानम् । अहो विस्मये । प्रार्थितानामर्थानां प्रयोजनानां क्रियो विघ्नबन्धवो विघ्नवन्धुः अनुगतविघ्ना । विधि निर्व्यक्तियोगयोरिति विश्व । हि यस्मात् मया यत्पूर्वमिदं न तु चुम्बितमिति शोकोद्रेकाभ्यवः ॥

सुप्तमंसविवर्त्तिपक्ष्मलाक्ष्याः कथमपुत्रमसिं न चुम्बितं तु (२१०)
क्व नु खलु सम्प्रति गच्छामि अथवा इहैव प्रियापरिभुक्ते लतामण्डपे
मुहूर्तं निष्ठामि । (२११)

सर्वंतोऽवचोक्य । (२१२)

तस्याः सुप्तमयी शरीरलुलिता शय्या शिलायामियं
३८ कान्तो नन्दयतेरयं नलिनीपत्रैर्नखैरर्पितः ।
इत्याद्भ्रदमिदं विलासभरणक्लिष्यन्मृजमानेक्षणो
निर्गन्तुं सहसा न वेतसगृहाद्दीर्घोऽस्मि चूर्ण्यादपि ॥ (२१३)

---

(२१०) सुप्तेति । पक्ष्म नेत्ररोमावली । पक्ष्मलाक्ष्योत्प्रेक्षते । सदक्षि यस्या रिति गौरादिनेयेत्यादिना चुडादित्वाल्लप्रत्ययात् पक्ष्मले पक्ष्मप्रशस्तिमतीत्यर्थं । यत्त सप्रहर्षमर्थं विशेषणेन विशेष्यस्य नेतरव्यावृत्ति र्जायते तत्तस्यार्थं प्रत्ययात्तर तदुत्कर्षं प्राय-स्यादिमत्त्वबोधकत्वस्वभावात् । विदृतमेतद् वातदूतीकायाम् । पक्ष्मले चक्षिणी इवो यस्या सा तया । सक्थ्यक्ष्णो प स्वाङ्गे इति प । पिच्चादीम् । अकुलाया इति यावत् । अधरस्य ओष्ठस्य हया समाहार अधरोष्ठम् । प्राणितूर्यसेनाङ्गानामैक्य चे इति वक्तव्यादैक्यम् । यौष्ठोत्वो से इति ओष्ठे परे अकारलोप । सुड्ड पुन पुनरङ्गुलिभि सदृशमधरोष्ठ मस्त तत्तथोक्तम् । तथा प्रतिषेधात्तरै निषेधायोदीरितवर्णै र्विद्धव विद्धच अभिराम मनो ज्ञ । अयर ज्ञार्थयोरिति विश्व । विक्लवो विद्धव इत्यमर । अभिराम रमणीय रम्य सौम्यश्च सुन्दरमिति धनञ्जय । तथा अये स्कन्धे विवर्त्तते सुप्तमातङ्गाद् भ्रमतीति अस निर्वाचि सुख कथमपि कष्टकृच्छ्रा उद्गमितसङ्गमित न तु चुम्बितम् । भविष्यत्येव चुम्बने विघ्न भूता गौतमो समायातेति भाव । इदमुपदृत्त नाम वृत्तं चतुष्पदीलक्षम् ॥

(२११) क्वेति । तुदितवर्त्तं । खलु वृच्छायाम् । प्रियया परिभुक्ते व्याप्ते । प्रेव्यगत्यदनार्थाड्डे चेत्यधिकरणे क्त । मुहूर्तं कतिचित् क्षणान् । चक्षुस्ते मुहूर्तो द्वादशाङ्गुलायामित्यमर ॥

(२१२) सर्वंत इति । सर्वंतो लतामण्डपस्थद्रव्यजातानि ॥

(२१३) तस्या इति । शरीरेण लुलिता सुखतल्पोत्तरणिमा विमर्दिता । लुल विमर्दने इति कौटधातुगणने कविकल्पद्रुम । इय शिलाया शिलोपरि तस्या प्रियाया पुष्प मयी पुष्पशिक्षा गम्या । तस्या इति सर्वत्रान्वयि । नलिन्या. पद्मिन्या पत्रै मर्दैरपि न ऽर्पित एव कान्तो मनोहरो मन्मथखेदो मदनखेद । कान्त इत्यत्र क्लान्त इति क्वचित् पाठ । क्लान्तो ग्लानि गत इत्यर्थः । इत्यादि भवद परिगणितादिद विलासभरणं मण्डनसमूहम् ।

विचिन्त्य ॥ अहो धिगसम्यक्चेष्टितं प्रियां समासाद्य कालहरणं कुर्वता मया । तदिदानीम् । (२१४)

रहः प्रत्यासत्तिं यदि सुवदना यास्यति पुन-
र्न कालं हास्यामि प्रकृतिदुरवापा हि विषयाः ।
इति क्षिप्तं चित्ते गणयति च मे मूढहृदयं
प्रियायाः प्रत्यूहं किमपि च तथा कातरमिव ॥ (२१५)

नेपथ्ये ॥ भो भो राजन् ! (२१६)

मृणाल विसमित्यमरः । इति एवंरूपेण व्याक्षिप्यमाने दृष्टुं प्रवृत्ते दर्शने चक्षुषी यस्य स तथोक्तोऽपि शून्यात् प्रियारक्षितादपि वेत्रलतागृहात् यानोत्तरङ्गलतागृहात् बहिः कठात् निर्गन्तुं न कथं समर्थोऽभूत् । व्याक्षिप्यमानेति व्याङ्पूर्वस्य क्षिप् तर्पणे इत्यस्य रूपम् । व्याक्षेपदित्यं तु आक्षेपदभिक्षन्ति परन्तैपदिनां क्वचिदिति न्यायात् । व्याक्षिप्यमानेति पाठे इति एवं दर्शनव्यापारेण व्याक्षिप्यमाने सम्बध्यमाने दर्शने यस्य स तथोक्त इत्यर्थः । इदं शार्दूलविक्रीडितं नाम वृत्तम् ॥

(२१४) विचिन्त्येति विषाद्यैत्यर्थः । अहो विषादे । अहो धिगर्थे शोके च धरण्यां विषादयोरिति मेदिनी । धिगिति । प्रियां गुरुजनात् सखीभावाद्वा लब्ध्वा कालहरणं स्वाभिमतार्थसाधने विलम्बं कुर्वता मया यदयुक्तं चेष्टितं कृतं तदनुचितं धिक् । तत् तत्काम् इदानीमधुना मूढहृदयं प्रियायाः प्रत्यूहं गणयतीति श्लोकोदेशाम्वयः ॥

(२१५) रहः इति । सुष्ठु वदनं यस्याः सा सुवदना । व्याप्तत्वेऽपि अनादिकोदरादि-त्वात् ङीष् इति बहुव्रीहिप्रतिषेधात् । पुनरन्यदा रहः प्रत्यासत्तिं विविक्तभूमौ सन्निकर्षम् । विविक्तविज्ञनप्रदेशमित्यर्थः । यास्यति तदा कालं न हास्यामि त्यक्ष्यामि न क्षेपयिष्यामीति यावत् । तत्क्षणादेव यथाकर्तव्यं करिष्यामीति भावः । एतेनास्य वैयाधिकशृङ्गारोद्दीपनमेवदा विधिप्रतिषेधं साधयतीदम् । गान्धर्वादीनामष्टानां मध्ये वैवाहिकत्वस्तुते । यदा रहसि बालायाम् । प्राजापत्यमाहुरेवार्षं चांशा कार्येऽनुरूपे-ऽपि कार्या विवाहाः । गान्धर्वादयो राक्षसपैशाचाश्च वर्ण्यकाले विधेया इति । हि यतो विषया इन्द्रियार्थाः । विषया अमी । गोचरा इन्द्रियार्थाश्चेत्यमरः । प्रकृत्या स्वभावेन दुरवापा दुर्लभाः । विषै दुर्दैवैः क्षिप्तं क्रीडितं यै मूढहृदयं इति बहुव्रीहिकारेण प्रियायाः प्रत्यूहं व्याघातं गणयति च तथा किमपि अनिर्वचनीयं कातरमधीरमिव भवति च । इदं हतं विधुरितो नाम ॥

(२१६) नेपथ्ये इति । सुगमम् ॥

सायन्तने सवनकर्म्मणि सम्प्रवृत्ते
वेदिं ज्वलानवतीं परितः प्रकीर्णाः ।
छायाश्चरन्ति बहुधा भयमादधाना
सन्ध्याभ्रकूटकपिशा पिशिताशनानाम् ॥ (२१७)

राजा ॥ आकृष्य सावष्टम्भम् ॥ भो भोः सपत्निनो मा भैष्ट मा भैष्ट त्रयमहमागत एव ॥ इति निष्क्रान्ता ।(२१८)

तृतीयोऽङ्कः ।(२१९)

---

(२१७) सायन्तने इति । सायन्तने सायङ्कालीने सवनकर्म्मणि यागकर्म्मणि । सवनं यजने स्याते सोमनिर्मथनेऽपि चेति विश्वः । अग्निहोत्रं इति यावत् । तथाच श्रुतिः । यावज्जीवमग्निहोत्रं जुहोति यदग्नये च प्रजापतये सायं प्रातर्जुहोतीति । सम्प्रवृत्ते व्यारब्धे सति ज्वलानवतीं ज्वलदग्निवतीं वेदिं परितो यज्ञभूमेः समन्तात् । समन्ततस्तु परितः वर्त्ततो विश्वः गिरपोत्यमरः । अभ्युभयपरिसर्व्वतः इत्यजयः हिंसोया । प्रकीर्णा व्याप्ता अतएव भयं हविराच्छेदाशङ्कामादधाना उत्पादयन्त्य सन्ध्याया अभ्रकूटा मेघपुञ्जा इव कपिशा श्यावा कृष्ण पीतवर्णा इति यावत् । अभ्रं मेघः इति पुञ्जराघौ तूत्करः कूटमस्त्रियामिति, श्यावः श्याव कपिशः इति चामरः । पिशितं मांसमस्यन्ति ये ते पिशिताशनाः । नन्द्यादित्वाद्यु । पिशितं तरसं मांसमित्यमरः । तेषां बहुधा बहुप्रकाराश्छायाश्चरन्ति इतस्ततो भ्रमन्ति । तथाच मायाकृतादृश्यविग्रहा अपि राक्षसा ज्वलदग्निसन्निधर्मात् पतनीभिश्छायाभिरनुमीयन्त इति भावः । वसन्ततिलकं वृत्तम् ॥

(२१८) राजेति । आवष्टम्भ आरम्भ उद्यममिति यावत् । अवष्टम्भ स्तम्भे च स्तम्भारम्भयोरपीति विश्वः । मैष्टेति । माङ्योगात् माङि लुङि लुङ्लङ्लिटः इति टेः । युष्मत्कर्त्तृत्वात् कर्त्तरि बहुत्वाच्च तस्यास्तविभक्तिः । त्रयमेतिकरणाद्यमागमः । टुवा गिरिति सिः । हवर्णान्तनिषेधाद्धेम । मज्जवदेति हविः । तत यत्र तस्य टत्वं । इति एवमुक्त्वा निष्क्रान्तो रङ्गभेरवस्तुतः ॥

(२१९) तृतीयेति । अङ्कः परिच्छेदः ॥

इति श्रीकृष्णनाथन्यायपञ्चाननभट्टाचार्य्यकृतायामभिज्ञानशकुन्तलटीकायां मनोरमाख्यायां तृतीयाङ्कविवरणम् ॥

चतुर्थोऽङ्कः ।

अत प्रविशतः कुसुमावचयमभिनयन्त्यौ सख्यौ । (१)

अनसूया ॥ हला पिअम्बदे जइ वि गन्धव्वेण विवाहविहिणा णिव्वुत्त-कल्लाणा पिअसही सउन्तला अणुरूवभत्तिभाइणी संवुत्ता तह वि मे ण णिव्वुदं हिअअं । (२)

प्रियंवदा ॥ कधं विअ । (३)

अन ॥ अज्जा सो रायरसी दुट्ठपरिसमणीए दुस्सिहिं विसज्जिदो आलणे णअरं पविसिअ अन्तेउरसमागमादो दूरं जणं सुमरेदि ण वत्ति । (४)

---

(१) तत इति । कुसुमावचयं पुष्पेभ्यः पुष्पसञ्चयम् । अभिनयन्त्यौ कथयन्त्यौ । सख्यौ सकुन्तलाया इति शेषः ॥

(२) अनसूयेति । हलेत्यादि । अयि प्रियंवदे यद्यपि गान्धर्वेण विवाहविधिना निर्वृत्तकल्याणा प्रियसखी सकुन्तला अनुरूपभर्तृभागिनी संवृत्ता तथापि मे न निर्वृतं हृदयम् । गान्धर्वेणान्योन्यसमयपूर्वकेण । विवाहविधिना विवाहकर्मणा । निर्वृत्तकल्याणा निष्पन्नमङ्गला । अनुरूपे समर्थं भर्तारं भर्तुं शीलं यस्या इत्यनुरूपभर्तृभागिनी । रम्भोरुप्रकाण्डनिष्पादितेति भवभूतिप्रयोगेण युग्मभुजगजत्यजसंवृतजरद्भगभर्तृविषयसंवृतिभ्यो णिणिलाक्षीलुके इति भक्तव्याद् णिणिगन्तत्वम् । विवाह्यजस् गः । निर्वृतं सुखीभूतं सुखिता । निर्वृतिः सुखितावस्तगमने च सुखे स्त्रियामिति मेदिनी ॥

(३) प्रियंवदेति । कथं विव कथमिव ॥

(४) अनेति । अज्जेत्यादि । अत्र स राजर्षिरिष्टिपरिषमाप्ता अपि भिन्नः आत्मनो नगरं प्रविश्य अन्तःपुरसमागमादिमं जनं स्मरति न वेति । दृष्टिपरिषमाप्ता यागसमापनेन । दृष्टि यागेक्षयोरित्यमरः । विसर्जितो नगरगमनायानुज्ञातः । अन्तःपुरसमागमात्प्रभृतीषद्भोगान् । दूरं जनं प्रियसखीम् । स्मरति यद्वा न स्मरति इति यत्तं विस्मया न निर्वृतं सुखयतिव्यत्ययः ॥

प्रिय॥ एत्थ दाव वीसत्था होहि ण हि तादिसा आकिदिविसेसा गुणविरहिणो होन्ति। एत्तिअं उण चिन्तणीअं तादो तीअजाक्कादो पडिणिउत्तो इमं वुत्तन्तं सुणिअ ण आणे किं पडिवज्जिस्सदित्ति। (५)

अन॥ जधा मं पुच्छसि तधा अभिमदं तादस्स। (६)

प्रिय॥ कधं विअ। (७)

अन॥ अणुरूवस्स वरस्स इच्छे कण्णा पडिवादणीअ त्ति अहं दाव पढमो कप्पो। तं जइ देव्वं सम्पादेदि णं कअत्थो गुरुअणो। (८).

---

(५) प्रियमिति। एत्थेत्यादि। अत्र तावद् विश्रब्धा भव न हि तादृशा आकृतिविशेषा गुणविरहिणो भवन्ति, एतावत् पुनश्चिन्तनीयं तातस्तीर्थयात्रात प्रतिनिवृत्तं इमं वृत्तान्त श्रुत्वा न जाने किं प्रतिपत्स्यत इति। अत्र राज्ञ सप्तमी। विश्रब्धा स्थिरनिश्चया। हि यस्मात तादृशास्तद्वत् आकृतिविशेषा विशिष्टा आकृतय। गुणमजडप्रज्ञत्वादिक विरहयन्ति त्यजन्तीति गुणविरहिणो न भवन्ति। अतएवाह आकारसदृशप्रज्ञ प्रज्ञया सदृशागम इति। रहक तु त्याग इति कविकल्पद्रुम। एतावत् पुनरिदन्तु चिन्तनीय विचारणीय किमित्याकाङ्क्षायामित्यन्तम्। किं प्रतितत्स्यते किं मंस्यते॥

(६) अनेति जधेत्यादि। यथा मा पृच्छसि तथाभिमत तातस्य। यथा यत्र विषये प्रियसख्या पौरवराजसङ्गम इति यावत। मा पृच्छसि श्रुत्वा किं प्रतिपत्स्यत इति जिज्ञाससे तथा मा तातस्य अभिमत सम्मतम्। अभिमतमिति ज्ञानार्थत्वाद् वर्त्तमाने क्त। तद्योगात कार्त्तकसङ्गमं केनेति कर्त्तरि षष्ठी। जइ अहं पेक्खामि तेहं तधा अणुमद भवे इति कचित पठ्यते अयमेव तथा तस्यानुमत भवेदित्यर्थ॥

(७) प्रियमिति। कध विअ कथमिव॥

(८) अनेति। अणुरूवेत्यादि। अनुरूपस्य वरस्य इच्छे कन्या प्रतिपादनीयेत्यय प्रथम कल्प। त यदि दैव सम्पादयति नन्तु कृतार्थो गुरुजन। वरस्य जामातु। वरो जामातरि हृते रेवतादेरभीप्सित इति मेदिनी। प्रतिपादनीया दानीया इत्यय प्रथम कल्प प्रथमो विधि। कल्पे विधिक्रमौ। सख्य स्यात् प्रथम कल्पोऽनुकल्पस्तु ततोऽधम इत्य मर। त (तत्) कल्पम् दैव नियतिरेव दैवे पुरुषकारे च कर्म्मसिद्धि व्यवस्थितेत्युक्तगुरुजन पुरुषकार विनेत्यर्थ। सम्पादयति निष्पादयति। अयमर्थोग सयोरित्याद्यसाया भव्ये की। कृतार्थ कृतायोजन॥

प्रिय ॥ एवमेदं । (९)

पुष्पभाजन विलोक्य ॥ अहि अवचिदाइ खु बलिकम्मपज्जत्ताइं कुसुमाइं । (१०)

अन ॥ णं सउन्तलाए वि सोहग्गदेवदाओ अच्चिदव्वाओ ता अव-राइं पि अवचिणुह (११)

प्रिय ॥ जुज्जदि ॥ इति तदेवकर्मानिनयत । (१२)

नेपथ्ये ॥ अयमहं भोः । (१३)

अन ॥ कर्णं दत्वा ॥ अहि णदिधिणा विअ णिवेदिदं । (१४)

प्रिय ॥ णं उदए अणिच्छिदा सउन्तला । (१५)

---

(९) प्रियमिति । एवमेदं एतमिदम् । दृढमेवमेवेत्यर्थं ।

(१०) पुष्पेति । पुष्पभाजनगृहीतपुष्पपात्रम् । अहीत्यादि । अहि अवचितानि खलु बलिकर्मपर्याप्तानि कुसुमानि । अवचितानि उद्गृहीतानि । खलु केवलम् । बलीति । बलिकर्मतु पूजोपहारकर्मणि पर्याप्तानि यथेष्टानि । बलिशब्दश्चाष्टे च लक्ष्यते शब्दार्णवे । उदाहरणे देवे करपूजोपहारयोरिति विश्वः । काम प्रकाम पर्याप्त निकामेष्ट यथेप्सितमित्यमरः ॥

(११) अनेति । अमित्यादि । ननु शकुन्तलाया अपि सौभाग्यदेवता अर्चयितव्या तदपरायपि अवचिनुत । अपि दैवतापदान्ते योज्य । सौभाग्यदेवता अर्चनसुभगता-धिष्ठात्री देवता सङ्गमविद्यादय । तदर्चनसौभाग्यातिशयार्थं मारीचरं समाचार ॥

(१२) प्रियमिति । जुज्यते । अभिमतं रुचितं । ह्ये एवेति शेषः ॥

(१३) नेपथ्य इति । अय भवदभ्यर्थनाभूत इत्यर्थः । भिक्षाभ्यर्थनानिवेदन-मिदम् ॥

(१४) अनेति । कर्णं दत्वा श्रुतिमभिनीय । गृहीत्यादि । अहि अतिथिनेव निवेदितम् । यथातिथिरेव निवेदयतीत्यर्थः ॥

(१५) प्रियमिति । अमित्यादि । ननूटजे वसिष्ठिता शकुन्तला । वसिष्ठिता अवस्थिता ॥

चन ॥ आं अज्ज उण अंसणिहिदा हिआएण तेण हि मोदु एत्ति-केहिं कुसुमेहिं पओजणं ॥ इति प्रस्थिते। (१६)

पुन र्नेपथ्ये ॥ आः कथमिति मां परिभवसि। (१७)

विचिन्तयन्ती यमनन्यमानसा
तपोनिधिं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव ॥ (१८)

अभे ॥ सुत्वा विमृश्य। (१९)

प्रियं ॥ हद्धी हद्धी त जेव संवुत्तं जं मए चिन्तिदं कस्सिं पि पूआ-रिहे अवरद्धा सुण्णहिअआ पियसही सउन्तला ॥ (२०)

---

(१६) अनेनेति। आमित्यादि। आ अद्य पुनरणचिन्तिता हृदयेन, तेन हि भवतु एतावद्भिरेव कुसुमैः प्रयोजनम्। आं स्मरणे। आं ज्ञाने निश्चयस्मृत्योरिति मेदिनी। हृदयेन अहमचिन्तिता असम्बद्धा भर्तृगतहृदयेति भावः। तेन हि तेनैव हेतुना। एतावद्भिरियद्भिरेव कुसुमैः प्रयोजनं बलिकर्म सौभाग्यदेवताभ्यर्चनरूपं भवतु। प्रस्थिते गच्छतः॥

(१७) पुनरिति। आः कोपे। आस्तु स्यात् कोपपीड़योरित्यमरः। परिभवसि उपेक्षितवचनत्वाच्चादृियसे। अनादरः परिभव इत्यमरः॥

(१८) विचिन्तयन्तीति। यं पुरुषं विचिन्तयन्ती स्मरन्ती सती अनन्यमानसा मान्य-न्यस्मिन् विषये मानसं मनो यस्याः सा तथोक्ता त्वम्। चित्तमन्तःकरणं सुप्तानामेव अहश्चात् क्षणादपि मानसगच्छान्नेष्। उपस्थितं गृहागतं तपांसि ब्रह्मचर्यादीनि धर्मो वा निधी-यन्ते धार्यन्ते यस्मिन्निति तपोनिधिः। डुधाञ् इति कर्मोपपदाद् धाञोऽधिकरणे किः। तथाभूतं मां न वेत्सि नानुभवसि न तथाचिन्तासद्भूतौ मनो बोधितोऽपि वस्तुसिद्धेतुभूत-क्रियया स्मरणाय प्रेरितोऽपि सन् प्रथमं कथारम्भसमये प्रमत्तोऽनवधानः पुमान्। प्रमादो-ऽनवधानमित्यमरः। पश्चात् बोधितोऽपि सन् कृतानुपन्यस्तां कथां वाक्प्रबन्धमिव त्वां न स्मरिष्यति कृतसम्पर्कतया नानुभविष्यति। अत्रोपमालङ्कारः। वंशस्थविलं वृत्तम्॥

(१९) अभे इति। प्रियम्वदे जातविशेषे॥

(२०) प्रियमिति। हद्धीत्यादि। हा धिक् हा धिक् तदेव संवृत्तं यन्मया चिन्तितं कस्मिंश्चित् पूजार्हे अपराद्धा शून्यहृदया प्रियसखी शकुन्तला। यन्मया चिन्तितं अनुमितं

अन ॥ पुरोऽवलोक्य ॥ ण क्खु जस्सिं कस्सिं पि एसो दुव्वासा सुलहकोवो महेसी तधा सविस्स अविरलपादतुवराए गदीए पडिणिउत्तो । (२१)

प्रिय ॥ को अण्णो ऊदवहादो पहवदि दट्ठिदुं ता गच्छ पाएसुं पडिअ णिउत्तावेहि जाव से अहं पि अग्घोदअं उवकप्पेमि । (२२)

अन ॥ तह ॥ इति निष्क्रान्ता । (२३)

प्रिय ॥ पदान्तरे स्खलितं रूपयन्ती ॥ अम्मो आवेअक्खलिदाए गदीए परिब्भट्ठं मे अग्गहत्थादो पुप्फभाअणं ॥ इति पुष्पाणि चयं रूपयति । (२४)

तदेव सदृत्तं सम्भूतम् । तदेव विद्वणोति कस्मिन्नित्यादि पूजार्हे सत्कार्ये । अपराद्धा क्षन्तापराधा । शून्यहृदया राजगतचित्तहृदया ॥

(२१) अनेति । पुरोऽग्रतः । स्यात् पुरः पुरतोऽग्र इत्यमरः । णेत्यादि । न खलु यस्मिन् कस्मिन्नपि एष दुर्वासाः सुलभकोपो महर्षिः । तथा शप्ता अविरलपादत्वरया गत्या प्रतिनिवृत्तः । न खलु अपराद्धेति पूर्वेण सम्बन्धः । यस्मिन् कस्मिन् सामान्यजने इत्यर्थः । सुलभः सहजः कोपो रोषो यस्य स सुलभकोपः । तथा शप्ता विचिन्तयन्तीत्यादिना शप्ता । अविरलेति । अविरला घनविन्यस्ताः पादा यस्यां सा तथाभूता त्वरा यत्र सा तया । प्रतिनिवृत्तः पराङ्मुखीभूतः ॥

(२२) प्रियमिति । को इत्यादि । कोऽन्यो ऋतवेहात् प्रभवति दग्धुं सद् गच्छ पादयोः पतित्वा निवर्तय। यावदहमपि अर्घोदकमुपकल्पयामि । ऋतवेहाद् वह्नेरन्यः कः पदार्थो दग्धुं प्रभवति प्रभुर्भवति । दुर्वाससं विना क एवं शप्तुमर्हतीति भावः । गच्छ दुर्वाससः समीपमिति शेषः । निवर्तय आश्रमं नय । यावत् त्वां निवर्तनात् । यावत् तावच्च साकल्येऽवधौ मानेऽवधारण इत्यमरः । अस्य महर्षेः तत्सम्बन्धेयमित्यर्थः । अर्घोदकमर्घार्थं जलम् । उपकल्पयामि पुष्पफलादिभिः सुसज्जीकरोमि ॥

(२३) अनेति । तह तथा ॥

(२४) प्रियमिति । पदान्तरे अन्यस्मिन् पदविन्यासे स्खलितं गतिवैलक्षण्यम् । अम्मो इत्यादि । अम्मो आवेगस्खलितया गतया परिभ्रष्टं मे अग्रहस्तात् पुष्पभाजनम् । आवेगेन त्वरया स्खलितया अन्यथाभूतया । परिभ्रष्टं पतितम् । अग्रहस्तात् कृत्वापात् अपपदस्य राजदन्तादित्वात् पूर्वनिपातः । पुष्पभाजनं पुष्पपात्रम् पुष्पावचयं विकीर्णपुष्पसंग्रहम् । पुष्पान्तरसंग्रहं वा ॥

अन॥ प्रविश्य॥ अत्थि सरीरी विअ कोवो कस्स अणुणअं सो गेण्हदि। किंच उण सो अणुकम्पिदो मए। (२५)

प्रिय॥ एदं चेव तस्सिं वञ्चदरं ता कधेहि कधं तए पसादिदो। (२६)

अन॥ जदो णिउत्तिदुं ण इच्छदि तदो पाएसुं पडिअ विण्णविदो मए भत्तव पढमं त्ति पेक्खिअ अविण्णादतव्वप्पहावस्स दुच्चिट्ठिजणस्स अअं अवराहो भत्तदा मरिसिदव्वो त्ति। (२७)

प्रिय॥ तदो तदो। (२८)

अन॥ तदो तेन भणिदं ण मे खलिअणं अक्खधाभविदुं अरिहदि किन्तु आहरणाहिप्पाणदंसणेण मे सावो णिउत्तिस्सादित्ति मन्तिअन्त जेव अन्तरिदो। (२९)

---

(२५) अनेति। प्रविश्य रङ्गभूमिमिति शेषः। अस्तीत्यादि। अस्ति शरीरीव कोप कस्यानुनय स गृह्णाति। किंच पुन सोऽनुकम्पितो मया। शरीरी मूर्त्तिमान् कोप क्रोध इव स महर्षि कस्यानुनय प्रसादन गृह्णाति ग्रहीष्यति कस्यापि नेत्यर्थः। अनुनयस्य सुनिपाहृतया लिप्सितत्वात् गृह्णातीति किमिह लिप्सायामिति भव्ये को। मया पुन स महर्षि किंच किञ्चित् अनुकम्पितोऽनुकम्पा कारित॥

(२६) प्रियमिति। एदमित्यादि। एतदेव तस्मिन् वञ्चतर तत् कथय कथ मया प्रसादित। एतदेव किञ्चिदनुकम्पनमेव तस्मिन् दुर्व्वासमि वञ्चतर समधिकतया मन्तव्य किञ्चिदनुकम्पनस्यैव तस्मिन दु शकत्वादिति भाव। प्रसादित प्रसन्नीकृत॥

(२७) अनेति। जदो इत्यादि। यदा निवर्त्तितु नेच्छति तदा पादयो पतित्वा विज्ञापितो मया भगवन् प्रथममिति प्रेक्ष्य अविज्ञाततप प्रभावस्य दुश्चिष्टजनस्यायमपराधो भवता मर्षयितव्य इति। निवर्त्तितुमात्मन प्रत्यागन्तुम्। विज्ञापितो निवदित किमित्या काङ्क्षाया भगवन्नित्यादि। भगवन् माहात्म्यवन्। प्रथम् प्रथममपराद्धमिति प्रेक्ष्य विविच्य अविज्ञातो अपरिचितस्तप प्रभावो भवत्तपसस्तेज भक्ति वा येन स तथाभूतस्य। प्रभाव शक्तितेजसोरिति विश्व। दुश्चिष्टजनस्य निजदुश्चिष्टनिर्विशेषस्य जनस्य। अयमपराध अवैधाचरणजनितो दोषो भवता मर्षयितव्य क्षन्तव्य॥

(२८) प्रियमिति। तदो तदो ततस्तत॥

(२९) अनेति। तदो इत्यादि। ततस्तेन भणितं न मे स्खलनमन्यथाभवितुमर्हति

प्रिय ॥ सक्क दाणिं आसुसिदुं णत्थि तेण राएसिणा संपत्थिदेण अत्तणो णामाङ्किदं अङ्गुलीअअं सुमरणीअं त्ति सउन्तलाए हत्थे सव्वं ज्जेव परिधाविदं एस ज्जेव तस्सिं साहीणो उवाओ भविस्सदि । (२०)

अन ॥ सहि एहि देवकज्जं दाव से णिव्वत्तेहं ॥ इति परिक्रामति । (२१)

प्रिय ॥ अवलोक्य ॥ णणसूए पेक्ख दाव वामहत्थविणिहिदवअणा णालिहिदा विअ पिअसही तग्गदाए चिन्ताए अत्ताणम्पि ण विभावेदि किं उण आगन्तुअं । (२२)

किन्त्वभरणाभिज्ञानदर्शनेनास्या शापो निवर्त्तिष्य इति मन्वयमाण एवान्तरित । तेन दुर्व्वासस । अत्ययाभवितु व्यर्थीभवितुम । अभिज्ञायत इतस सर्गतया निश्चीयते अनेनेत्य भिज्ञानम । आभरणरूप य'भिज्ञान तदृष्टवा परित्यक्तुमदवलोकनेन हेतुना व्यक्ष्या शापो भर्त्तु स्मृतिव्यवधायको निवर्त्तिष्यत अवगमिष्यति इति भणितमित्यन्वय । मन्वय शापोऽनुद्धै व्याहरन् इतीत्यनेनानुषङ्ग । अन्तरित अन्तर्हित ॥

(२०) प्रियमिति । शक्यमित्यादि । शक्यमिदानीमाश्वसितु यस्मिन तन राजर्षिणा यस्मिन्निमित्ते आत्मनो नामाङ्कितमङ्गुलीयक स्मरणीयमिति शकुन्तलाहस्ते स्वयमेव परिधापित एव सन्निधु स्वाधीन उपायो भविष्यति । इदानी शापानन्तरमर्थे सतीत्यर्थ । समाश्वासित समयगाश्वासमाप्त । शक्यमक्षाभिरिति शेष । भाव क्तप् । व्याश्वासबीज दर्शयति अङ्गुलीत्यादि । यस्मिन्निमित्ते यस्या । स्मरणीय स्मरणाय हितम । इति उक्तेति शेष । शकुन्तलाहस्ते मया अङ्गुलीयम । परिधापित पर्यापितम । एव अङ्गुलीयरूप उपाय इत्यन्वय । शक्र उपायनिर्द्धार अर्थत । सन्निधु शापोपशमने । स्वाधीनो न परायत्त ॥

(२१) अन्तरिति । सहेत्यादि । सखि एहि इदकार्य साधयाव निर्व्वर्त्तयाव । देवकार्य सौभाग्यदेवताभ्यर्चनम । निर्व्वर्त्तयाव सपादयाव ॥

(२२) प्रियमिति । अवलोक्य शकुन्तलामिति शेष । अणेत्यादि । अनवरत नेत्रया सादर यामङ्कमारोपितदृशा आरोपितेव प्रियमयी सङ्गतमुद्रा चिन्तया आत्मान मपि न विभावयति किं पुनरागन्तुकम । आगतमि । यामकक्षे वामपार्श्वो विनिहित न्यासित यदृच्छया वा । आलिखितेव चित्रितेव निस्पन्दत्वादिति भाव । अ यामं गता प्राप्ता

अन ॥ हला दोण्णं ज्जेव णो छिअए एसो वुत्तन्तो चिट्ठदु रक्खणीआ ज्जु पइदिवसलद्धा पिअसही । (२२)

प्रिय ॥ को दावउण्होदएण णोमालिअंसिञ्चदि । इतुग्मे निष्क्रान्ते । (२४)

विष्कम्भकः । (२५)

॥ ततः प्रविशति सुप्तोत्थितः कण्वशिष्यः । (२६)

शिष्यः ॥ वेलोपलक्षणार्थमादिष्टोऽस्मि तातभवता प्रवासात् प्रतिनिवृत्तेन कण्वेन तत् प्रकाशं निर्गत्यावलोकयामि कियदवशिष्टं रजन्या इति । (२७)

शङ्कता तया राजविषययेति यावत् ॥ विभावयति परिच्छिनत्ति । विभावः स्यात् परिचितौ कामक्रोधोद्दीपनेऽपि चेति विश्वः । आगन्तुकमतिथिम् । छत्रवारवेशिक आगन्तुरतिथि र्नो वटहागत इत्यमरः ॥

(२३) अनेनेति । हलेत्यादि । यदि द्वयोरेवयोर्हृदये एष दृष्टान्तस्तिष्ठतु रक्खणीया खलु प्रकृतिपेलवा प्रियसखी । एष दृष्टान्तः शापदृष्टान्तः । रक्खणीया न प्रकाशनार्हा । खलु क्षेपणम् । प्रकृतिपेलवा स्वभावकोमला । मेलवं कोमलमिति लिङ्गानुशासनः ॥

(२४) प्रियमिति । को इत्यादि । कस्तावदुष्णोदकेन नवमालिकां सिञ्चति । अप्रस्तुतेनैतेन प्रियसखी सम्बन्धेऽयेतद्दृष्टान्तप्रकाशनमेतीव दारुणमिति प्रस्तुतार्थस्य गम्यत्वादप्रस्तुतप्रशंसाप्योऽङ्गद्वारोऽयम् । इति चतुर्थम् ॥

(२५) विष्कम्भक इति । तदाख्योऽङ्कविशेष इत्यर्थः । अङ्कताभिनयमात्रेण दृष्टस्य दुष्यन्तोऽनुनयान्तदृष्टान्तस्य वक्ष्यमाणस्य च शापस्याङ्गुरीयकदर्शनावसानत्वस्य निदर्शकत्वात् मध्यमाभ्यां सङ्कयोजितत्वेन शुद्धत्वायम् । यदुक्तम् । दृष्टवर्तिष्यमाणानां कथाशानां निदर्शकः । स चित्रार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः । मध्येन मध्यमाभ्यां या पात्राभ्यां संप्रयोजितः । शुद्धः स्यात् स तु सङ्कीर्णो नीचमध्यमकल्पित इति । अत्र च विवाहो भोजनं शापोत्सर्गो मृत्यूदन्तं तथेत्यादिना शापाभिनयस्याङ्कमध्ये निषेधात् शपतो दुर्वाससः प्रवेशो बाधितः सुतरामनङ्गत्वं तदनुनयादिकथाशोऽपि कृपणेन न दर्शितः किन्तु विष्कम्भकेनेत्यनुभाव्यम् ॥

(२६) तत इति । सुप्तोत्थितः सुप्तमुक्त उत्थितः । कण्वशिष्यः कण्वाध्याप्यः ॥

(२७) शिष्य इति । प्रवासात् प्रदेशान्तरात् सोमतीर्थादिति यावत् । प्रतिनिवृत्तेनागतेन

परिक्रम्यावलोक्य च ॥ हन्त प्रभातप्राया रजनी । तथाहि । (३८)

यात्येकतोऽस्तशिखरं पतिरोषधीना-
आविष्कृतोऽरुणपुरःसर एकतोऽर्कः ।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवैष दशान्तरेषु ॥ (३९)

तत्रभवता कण्वेन वेलाया कालस्य प्रातर्हौमीयसेति यावत् उपलक्षणार्थमवधारणार्थं म । अस्त्यत्र्यु विक्षतौ वेला कालमर्यादयोरपीत्यमर । आदिष्टोऽस्मि चात्रभोऽस्मि । तत तस्मात प्रकाशं गटच्छाद बहिर्भाग निर्गत्य रजन्या राज्ञे कियदवशिष्टमित्यवलोकयामि ॥

(३८) परीति । परिक्रम्य कतिपयै पदै सञ्चार्य । हन्तकारो हर्षे । हन्त हर्षेऽनुकम्पायामित्यमर । प्रभातप्राया उषा कालसटशी । तस्मात किञ्चिदूने यथ । उषा प्रत्यूषसी अपि प्रभातञ्चेत्यमर । प्रायश्चानघने स्त्रियौ तुल्यबाहुल्ययोरपीति विश्व । प्रभात वर्णनया तदुपपादयितुमाह तथाहीति ॥

(३९) यातीति । एकत एकस्मा दिशि ओषधीना पतिश्चन्द्रमा । 'सोम ओषधीनामधिपतिरिति श्रुते । अस्तस्य चरमाचलस्य शिखरमग्रभाग याति । अस्तस्तु चरमाचलो भदित्यमर । शिखर मैलशृङ्गाग्रकक्ष्याप्रुलककोटिष्विति विश्व । एकतो अन्यस्मा दिश । एके मुख्यान्यकेवला इत्यमर । अर्कश्च स्वसारथि पुर सरोऽग्रगामी यस्य स तथोक्तोऽर्को दिवाकर । सूरस्तपोऽरुणोऽनूरित्यमर । आविष्कृत प्रकाश कर्तुमारब्धवान् । प्राकाश्य प्रादुरावि शादित्यमर । धे चादिर्ढे क इत्यादिकर्मणि कर्त्तरि क्त । तेजोद्वयस्य चन्द्रार्कं तेजसो युगपदेकदा । युगपदेकदेत्यमर । व्यसनोदयाभ्या विपदभ्युदयाभ्याम । व्यसन विपदि भ्रंशे इत्यमर । एव लोको भूलोको ग्यान्तरेषु सुषदु स्वात्मकावस्थाविशेषेषु । दशावस्थादीपवर्त्यो वैस्तान्त भूम्नि योपितीति मेदिनी । नियम्यते सुखप्रयुक्तादीत्यादि दु खप्रयुक्ताच्च वैलक्ष्य चित्तवृत्त इव । चान्द्रमसतोव्यसनमात्मदर्शनया सम्पदामस्थायित्व मनुभाव्य सुखिनमीहयादिवमयति अर्कतेजोऽभ्युदयचात्मदर्शनया विपदामनित्यतामवगमय्य दु खिन वैलक्ष्याच्चित्तयतीवति भाव । यत उक्तम । चक्रवत् परिवर्त्तन्ते दु खानि च सुखानि चेति । महाभारतेऽपि । सुखञ्च दु ख यदिदमपि जन्तु र्दैवाधीन विन्दते नात्मशक्त्या । तस्माद दैव बलवन्नान्यमानो न सज्वरेत्तापि कदाचिदिति । अत्रोत्प्रेक्षालङ्कार । यदुत इत्युत्प्रेक्षायामित्यमर । अन्यथैव स्थिता इसिद्धेतुनहेतवश्च या । अन्यथोत्प्रेक्षते यत्र तु साधर्म्ये चा सिद्धर्मिणि । इत्त वमन्नतिलक नाम ॥

अपिच । (४०)

शान्तर्हिते शशिनि सैव कुमुद्वतीयं
दृष्टिं न नन्दयति संहरणोद्यतेव ।
दूरप्रवासजनितान्यबलाजनेन
दुःखानि नूनमतिमात्रदुरुद्वहानि ॥ (४१)

अपिच । (४२)

कर्कन्धूनामुपरि तुहिन रञ्जयत्यग्रसन्ध्या
दार्भं मुञ्चत्प्रटजपटलं वीतनिद्रो मयूरः ।
वेदिप्रान्तात् खुरविलिखितादुत्थितश्चैष सद्यः
पश्चाद्भूयै भवति हरिणः स्वाङ्गमायच्छमानः ॥ (४३)

---

(४०) अपिचेति । अन्यच्चेत्यर्थं ॥

(४१) अन्तर्हिते इति । शशिनि कुमुद्दिनीनायके अन्तर्हिते व्यवधानं गते सति कुमुद्वतीया सकरुणार्हा नेदानीं दर्शनार्हेति यावत् शोभा यस्या सा तथोक्ता सैव यात्तादृग् विकसितासीदिति भाव । दूय कुमुद्वती कुमुदिनी दृष्टिं नेत्रं न नन्दयति न सुखयति म्लानभावादिति भाव । अतो नूनं निश्चितं दूरस्थस्य प्रियस्य प्रवासेन देशान्तरगत्या जनितानि दुःखानि अबलाजनेन स्त्रीजनेन अतिमात्रदुरुद्वहानि अत्यन्तं दुर्वहाणि अतिमात्रदुरुद्वहानि इत्यत्र अतिमात्रशब्देन एतद् दृष्ट्वाहमेव निश्चिनोमि न त्वनालोकित दाम्पत्यव्यवहारतया कदाचिन्नाद्यावगतवानसीति गम्यते । इदमपि वसन्ततिलकं वृत्तम् ॥

(४२) अपिचेति । अन्यच्चेत्यर्थं ॥

(४३) कर्कन्धूनामिति । "अपसव्यां प्रातसन्ध्यां कर्कन्धूना पक्वबदराणामुपरि । कर्कन्धुर्बदरी कोलिरित्यमर । तुहिन तुषार रञ्जयति राग लम्भयति । तुषारस्तुहिन हिममित्यमर) रागप्रियाऽसौ सन्ध्या तुहिनमपि लोहितभूतानां कर्कन्धूनामुपरि निधाय लोहितीकरोतीत्युत्प्रेक्षा सा चोत्प्रेक्षाव्यञ्जकेवादिपदविरहात् प्रतीयमाना । यदुक्तम् । वाच्या प्रतीयमाना सा प्रथम द्विविधा मता । वाच्ये वादिप्रयोगे स्याद्प्रयोगे परा पुनरिति । तथा धौता विगता निद्रा यस्य स तथोक्तो मयूरो दार्भं दर्भैः कुशैः रचित प्रटजस्य पर्णशालाया पटलं छदिर्दं छाच्छादनमिति यावत् । छदिर्नेत्रजो क्लीव समूहे पटल न मेदमर । खुरैति जहाति भूमिमवरोहतीति यावत् । तथा खुरैर्विलिखितादल्पखनिताद् वेदि

अपिच । (४४)

पादन्यासं क्षितिधरगुरोर्मूर्ध्नि कृत्वा सुमेरोः
क्रान्तं येन क्षपिततमसा मध्यमं धाम विष्णोः ।
सोऽयं चन्द्रः पतति गगनादल्पशेषैर्मयूखै-
रत्यारूढिं भवति महतामप्यपभ्रंशनिष्ठा ॥ (४५)

क्रान्तात् पादपमूलोपरचितचतुष्कैकपार्श्वान् उत्थित एष हरिणश्च सद्यस्तत्क्षणे स्वाङ्गं निजावयवमायच्छमानः प्रसारयन् सन् । व्यात्ताभ्रदाद्दाश्वाहनयम इत्यात्मनेपदित्वात् यानः । स्वादनन्तरमुच्चै भवति । पराङ्गै स्वभावोक्तिरलङ्कारः । यदुक्तं दण्डिना । जातिर्यस्यं पदार्थानां भावं साक्षाद् विदधती । स्वभावोक्तिश्च जातिश्चेत्यादौ सालङ्कृतिरिति । मन्दाक्रान्ता नाम वृत्तम् ॥

(४४) अन्यदपि वर्णयितुमाह अपिचेति ॥

(४५) पादन्यासेति । क्षपितानि क्षिप्तानि दूरं निरासितानीति यावत् । तमांसि तिमिराणि येन स तथोक्तेन क्षपत्क स्यात् क्षेप इति कविकल्पद्रुमः । अत्र क्षयितेत्यपि पठन्ति तत्र क्षयोऽस्य जात इति क्षयितः । इतोऽस्य जात इति इतः । क्षपितानि क्षयं प्राप्तानि तमांसि यस्मात् स तेनेत्यर्थः । येन चन्द्रेण क्षितिधरेषु पर्वतेषु मध्ये गुरोः श्रेष्ठस्य । गुरुस्तु गीष्पतौ श्रेष्ठे गुरुः पितरि दुर्भरे इति शब्दार्णवः । तथाच नरसिंह-पुराणम् । मध्ये दृधिव्याश्चतुरश्रो भास्वान् मेरुर्हिरण्मय इति । गुरुशब्देन पूज्यता च ध्वन्यते । सुमेरोर्मूर्ध्नि शृङ्गे श्लेषपक्षे गिरिमि पादन्यासं किरणनिक्षेपं श्लेषात् तु चरणविन्यासं कृत्वा । पादा रश्मावङ्घ्रितूर्यांघ्रा इत्यमरः । विष्णोस्त्रिविक्रमस्य मध्यमं धाम मध्यमत्रिक्रमाक्रान्तं व्योमेति यावत् क्रान्तमाक्रान्तम् । तदुक्तं वामनपुराणे । क्रान्त्वा तु रूपं दितिजांश्च हत्वा प्रणम्य पद्मौ तु प्रथमक्रमेण । महीं महीभृद्भिः सहितां सहाम्भसा जहार रत्नाकरपत्तनैर्युताम् । ततः स नाकं त्रिदशाधिवासं सोमार्कशुक्रैरभिमण्डितं नभः । देवो द्वितीयेन जगाम वेगात् क्रमेण देवप्रियलोकभोश्वरः । क्रमस्तृतीयो न यदास पूरित-मित्यादिकोपाख्यानमनुसन्धेयम् । पपात पृष्ठे भगवांस्त्रिविक्रमो मेरुप्रमाणेन तु विग्रहेण सः । सोऽयं चन्द्रोऽल्पशेषैः किञ्चिन्मात्रावशिष्टैर्मयूखैः रश्मिभिः विशिष्टः सन् । विशेषणे तृतीया । गगनादम्बरतलात् पतति । महतां प्रधानभूतानामपि जनानामत्यारूढिः दूरारोहश्चासौ अपभ्रंशः पतनमेव निष्ठा यस्यासौ यथा स्यात् तथोक्ता भवति । निष्ठा निष्पत्तियोगान्ता इत्यमरः । यथोक्तमत्रैः पतनाय चेति । अत्रार्थान्तरन्यासः श्लेषश्चेत्यलङ्कारद्वयम् । मन्दाक्रान्ता वृत्तम् ॥

अनसूया॥ पटीचेलेन प्रविश्य॥ एव्वं णाम विसअपरम्मुहस्स जणस्स ण णिबडिदं जधा तेण रण्णा सउन्तलाए अणज्जं आचरिदं त्ति। (४६)

• शिष्य॥ यावदुपस्थिता होमवेलां गुरवे निवेदयामि। इति निष्क्रान्त॥ (४७)

अन॥ णं पहादा रअणी ता सिग्घं सअणं परिच्चअामि अधवा लङ्घ लङ्घ उत्थिदावि किं करिस्सं ण मे उचिदेसु पहादकरणीएसु हत्थपाआ पसरन्ति कामो दाणिं सकामो भोदु जेण असच्चसन्धे जणे पिअसही सुहिदिआ पद कारिदा। (४८)

स्वगतं॥ अधवा ण तस्स राएसिणो दोसो दुव्वासासावो कदु

---

(४६) अनेति। अल्प पट सुचेलक पटी अल्पत्वविवक्षाया स्त्रीत्वम। स्त्री स्यात काचिन्नटणाल्यादि विवस्त्रापचये यदीत्वमर। नारीसखीत्वादिनिपातनादीप। सुचेलक पटोऽस्त्री स्यादित्यमर। पटी स्त्री पटभेदे स्यादिति मेदिनी। तया चेलेन तदाच्छादनेन। एवमित्यादि। एव नाम विषयपराङ्मुखस्य जनस्य न निर्मितं यथा तेन राज्ञा शकुन्तलाया मनार्यमाचरितमिति। नाम कुत्सने। नाम प्राकाम्यसम्भाव्यक्रोधोपगमकुत्सने इत्यमर। विषयेषु इन्द्रियसुखेषु पराङ्मुखस्य अप्रवृत्तिमतो जनस्य सम्बन्धे एवमसदाचरण न निपतितमुपस्थितम। किमित्याह यथेत्यादि अनार्यं गर्हितम। आचरितं व्यवहृतम्। अकृत मवादस्यादिति भावः॥

(४७) शिष्य इति। यावद्यधारणे। यावत तावच्च साकल्येऽवधौ मानेऽवधारणे इत्यमर। उपस्थिता भूतामित्यर्थः॥

(४८) अनेति। णमित्यादि। नन्वु प्रभाता रजनी तच्छीघ्र शयन परित्यजामि अथवा लघु लघूत्थितापि किं करिष्यामि न मे उचितेषु प्रभातकरणीयेषु हस्तपाद प्रसरति काम इदानीं सकामो भवतु येनासत्यसन्धे जने प्रियसखी सुहृद्दया पद कारिता। ननुएव धारणद्योतक। प्रभायधारणात्तुन्नात्तुनयामन्त्रणे नन्वित्यमर। प्रहृष्टं भात प्रकाशो यस्या सा प्रभाता अल्पावशेषा रात्रि यावत्। लघु लघु शीघ्र शीघ्रम्। उचितेषु अभ्यस्तेषु। अभ्यस्तेऽप्युचित न्याय्यमिति यादव। प्रभातकरणीयेषु प्रात कृत्येषु। काम कन्दर्प। सकाम पूर्णकाम। येन हेतुना कामेन वा। असत्यसन्धे असत्यप्रतिज्ञे। सन्धा प्रतिज्ञा मर्यादेत्यमर। पद व्यवसायम्। पद व्यवसितित्वाधस्थानलक्ष्मादिषु वस्तुष्वित्यमर। एव एव कामस्य मनोरथ स्यादिति भाव॥

एसो पहवदि जस्सधा कधं सो राएसो तादिसाइं मन्तिअ एत्तिअस्स कालस्स वात्तामात्त पि ण विसज्जेदि । (४९)

विचिन्त्य ॥ ता हुदो गहिणाए अङ्गलोगअं से विसज्जेम अथवा दुक्खसीले तवस्सिजणे को अब्भत्थीअदु णं सहीगामी दोसोत्ति अवसाइदुं पि ण पारेम्ह तादकण्वस्सु वा अवासपडिणिउत्तस्स दुस्सन्तपरिणीदं आवन्नसत्तं सउन्तलं णिवेदिदुं ता एत्थ दाणिं किं णु कलु अम्हेहिं करणिज्जं । (५०)

प्रिय ॥ अविश्य ॥ अणसूए तुवर तुवर सउन्तलाए अत्थाणकोदूहलं णिव्वत्तिदुं । (५१)

---

(४९) अहवेति । 'दुर्वासस शापदुष्टस्यानिति शेष । अथवेत्यादि । अथवा न तस्य राजर्षेरपराध दुर्वासस शाप खल्वेष प्रभवति अन्यथा कथ स राजर्षिस्तादृशानि मन्त्रयित्वा एतावत कालस्य वार्तामात्रमपि न विसर्जयति । खलु निश्चये । प्रभवति यत प्रभु भवति । अन्यथा शापप्रभाव विना । तादृशानि प्राक्श्रुतानीति भाव । मन्त्रयित्वा रहसुक्त्वा । एतावत कालस्य एतावत्कालमध्यन्धि वार्तामात्रमपि । दूरे स्थिता नेदृशजन-प्रेरण्यमिति भाव । विसर्जयति प्रेरयति ॥

(५०) विचिन्त्येति । कर्तव्यमवधार्येत्यर्थ । तत्यादि । सदितोऽभिज्ञानमङ्गुरीयक तस्य विसर्जनाय । अथवा दु खगोत्रे तपस्विजने कोऽभ्यर्थतां अतु सखीगामी दोष इति व्यवसाययितुमपि न पारयाम तातकण्वस्य वा प्रवासात् प्रतिनिवृत्तस्य दुष्मन्तपरिणीतामापन्न सत्त्वां शकुन्तला निवेदयितु तद्दोषो किं नु खल्वस्माभि करणीयम् । दु खगोत्रे सत्य कोऽभ्यर्थतां । तपस्विजन इति निर्द्धारणे सप्तमी । इह सामान्यस्य चेत्यादिवदेकवचने-नापि कश्चिच्छिष्यैरित्यमिति ध्येयम । कोऽभ्यर्थतां प्रार्थयतां । अस्मद्गो दोषोऽपराध सखीगामी सख्यो आत्मा अभिज्ञानमङ्गुरीयकं व्यवसाययितु व्यभिज्ञानकरणाय कथमपि व्यापारयितुमपि न पारयाम । तातकण्वस्येति । वा यदृच्छये । वा स्याद्विकल्पोऽनयो-रेवार्थे चकारस्य इति विश्व । प्रवासात् प्रतिनिवृत्तस्य तातकण्वस्य सम्बन्धे दुष्मन्तेन परिणीता कृता तदा आदधानस्य आपन्न प्राप्त सत्त्व जन्तुर्गर्भ र्यत यया सा तथोक्ता । इत्यादु व्यवसायेऽनुमतौ तु अन्तर्भावण्यर्थ । शकुन्तला निवेदयितुमपि न पारयाम इत्यनुषङ्गस्त । दु खितर्के । खलु निश्चयेऽनुमतौ च । दु खगोत्र इत्यत्र कण्वगोत्र इति क्वचित् पाठ ॥

(५१) निपुणेति । प्रियेत्यादि । अनसूये त्वर त्वर शकुन्तलाया तत्काल

अन ॥ सविस्मयम ॥ सहि कधं विअ । (५१)

प्रिय ॥ सुणाहि दाणिं जेव सुहसुत्तिआपुच्छणणिमित्तं सउन्तलाए सआसं गदम्हि । (५३)

अन ॥ तदो तदो । (५४)

प्रिय ॥ तदो ण लज्जावणदमुहीं परिस्सङ्ग सअं तादकस्सेव एवं अहिणन्दिद वच्छे दिट्ठिआ धूमोवरुद्धदिट्ठिणोवि जजमाणस्स 'पावअस्स जेव सुहे आहुदी णिवडिदा सुसिस्सपरिदिण्णा विआ विज्जा असोअणीआसि मे संवुत्ता अज्ज जेव तुमं इसिपरिरक्खिदं करिअ भत्तुणो सआसं विसज्जेमि त्ति । (५५)

कौतूहलं निर्वर्त्तयितुम । प्रस्थाने भर्त्तुर्भवनयात्राया यत कौतूहलम अत्यभिलाषस्तन्निर्वर्त्तं यितु समापयितुम् ॥

(५२) अनेति । सविस्मय कथमेव स वृत्तमिति विस्मयनेत्यर्थं । सहीयादि । सखि कथमिव ॥

(५३) प्रियमिति । सुणेत्यादि । एष, इदानीमेव सुखसुप्तिकाप्रच्छननिमित्त शकुन्तलाया सकाश गतास्मि । सुखसुप्तिका सुखेन निद्रा तस्या प्रच्छननिमित्त जिज्ञासार्थं । सकाश समीपम् ॥

(५४) अनेति । तदो तदो ततस्तत ॥

(५५) प्रियमिति । तदो इत्यादि । तत एना लज्जावनतमुखीं परिष्वज्य स्वय तातकश्येनैवमभिनन्दित वत्से दिष्ट्या धूमोपरुद्धदृष्टेरपि यजमानस्य पावकस्यैव मुखे आहुति र्निपतिता सुशिष्यपरिग्रहीतेव विद्या अशोचनीयासि मे सवृत्ता । अद्यैव त्वामपि परिरक्षिता कृत्वा भर्तुः सकाश विसर्जयामि । एना शकुन्तलाम । परिष्वज्य आलिङ्ग्य । आलिङ्गन परिष्वङ्ग स श्लेष उपगूहनम् । अङ्कमालि परीरम्भ क्रोडीकृतिरिति हेम चन्द्र । एवमभिनन्दितमित्यभिनन्दितम् । तत्प्रकारस्तु वत्से इत्यादि इतीत्यन्तम । वत्से पुत्रि । वत्सशब्दः कपुत्रादिवर्षे वत्सतु रक्षणेति विश्व । दिष्ट्या आनन्दे । दिष्ट्या सखि जोषमुच्येत्यानन्द इत्यमर । धूमेति । धूमेन उपरुद्धा व्याकुला दृष्टि र्दर्शन यस्य स तस्य । यजमानस्य होतु । अत्र पावकपातोचितायां आहुतेरनन्यत्रपातात् योग्यकर्मणा प्रयुक्तेन समालङ्कार । यदुक्त दर्पणे । सम सम्बन्धानुरूप्येण श्लाघायोग्यस्य वस्तुन इति

अन ॥ सखि केण उण आचक्खिदो तादकण्णस्स अअं वुत्तन्तो । (५६)

प्रिय ॥ अग्गिसरणं पविट्ठस्स किल शरीरं विणा छन्दोमईए वाआए । (५७)

अन ॥ सवियसम् ॥ कधं विअ । (५८)

प्रिय ॥ सुणाहि । (५९)

संस्कृतमाश्रित्य ॥ (६०)

दुष्मन्तेनाहितं तेजो दधानां भूतये भुवः ।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव ॥ (६१)

अन ॥ प्रियंवदामाश्लिष्य ॥ सखि प्रियं मे प्रियं किन्तु अज्ज

सुशिष्येण सच्छात्रेण परिगृहीता अधिगता विद्येयं मे अयोपनीया न दुःखहेतुः संवृत्तासि । अत उक्तम् । कुशिष्यमध्यापयतः कुतो यश इति । विसर्जयामि प्रेरयामि । इति अभिनन्दितमित्यन्वितम् ॥

(५६) अनेति । सखीत्यादि । सखि केन पुनराख्यातस्तातकण्वसंप्रायं वृत्तान्तः । आख्यात उक्तः ॥

(५७) प्रियमिति । अग्गीत्यादि । अग्निशरणं प्रविष्टस्य किल शरीरं विना छन्दोमय्या वाचा । अग्निशरणमाश्रितानामग्नीनां गृहम् । शरणं गृहरक्षित्रोरित्यमरः । किलेति श्रुतवार्तायाम् । वार्तासम्भाव्ययोः किलेत्यमरः । शरीरादेव वाक् प्रत्यक्षीभवति अत्र हुंकृतयेत्याह शरीरं विनेति । अदृष्टप्रयोक्तृशरीरयेत्यर्थः दैव्येति यावत् । छन्दोमय्या पद्यात्मिकया । छन्दः पद्येऽभिलाषे चेत्यमरः । वाचा आख्यात इत्यन्वयः ॥

(५८) अनेति । कधं विअ कथमिव ॥

(५९) प्रियमिति । सुणाहि शृणु ॥

(६०) संस्कृतेति । संस्कृतं वचनमिति शेषः ॥

(६१) दुष्मन्तेनेति । हे ब्रह्मन् विप्र । ब्रह्मा विप्रः प्रजापतिरित्यमरः । दुष्मन्तेन राज्ञा आहितं हुताधानमर्पितमिति यावत् । तेजः प्रभावे दीप्तौ च बले शुक्रेऽपीत्यमरः । भुवो भूमेः भूतये सम्पत्तौ । भूतिर्भस्मनि सम्पत्तौ हस्तिहुङ्कारयोः स्त्रियामिति मेदिनी । दधानां बिभ्रतीं तनयाम् अग्निर्गर्भे यस्याः सा तथोक्तां शमीं तरुविशेषमिव अवेहि अवगच्छ । वह्निरणेषु शमीनामन्तःप्रविष्टो ज्वलतीति प्रसिद्धिः । अत्रोपमालङ्कारः ॥

ज्जेव मउलन्तला णोवदि त्ति उक्कण्ठासाधारणं परिदोसं णव-
मवेमि। (६२)

प्रिय॥ सहि अत्तणो कधं पि उक्कण्ठा विणोदइस्सामो सा दाणिं
तवस्सिणी णिव्वदा होदु। (६३)

अन॥ तेण हि एदस्सि चूअसाहायलम्बिदे णारिएलसमुग्गए एद-
णिमित्तं ज्जेव मए कालहरणक्खमा केसरगुण्डा णिक्खित्ता चिट्ठदि ता
इमं णलिणीवत्तसङ्गदं करेहि जाव से णअं पि॰गोरोअणं तित्थमित्तिअ
दुव्वाकिसलआइं मङ्गलसमालहणं विरएमि। (६४)

---

(६२) अनेति। व्यासिक्तं व्याप्तिद्रव्यं। सखीत्यादि। सखि प्रिय मे प्रिय किन्तु अद्यैव अकुलता मीयत इत्युत्कण्ठासाधारणं परितोषमनुभवामि। मीयते भर्तृसङ्ग माप्यते। उत्कण्ठासाधारणोत्कण्ठया सहित। अयोत्कण्ठा तया परितोषमनुभवामीत्यर्थः॥

(६३) प्रियमिति। सखीत्यादि। सखि मय कथमपुत्कण्ठा विनोदयिष्यामि सेदानीं तपस्विनी निर्वृता भवतु। कथमपि कष्टसृष्टा उत्कण्ठा यदय नञ्जनितमनोवेदनाम। रागे स्वलब्धविषये वदना महती तु या। स गोपणी तु गात्राणां तापुत्कण्ठा विद्वद्भिर्धा रयुत्तमे। विनोदयिष्यामो यापयिष्यामः। तपस्विनी व्यनुकम्पार्हा। तपस्वी तापसे व्यानुकम्पार्हे षेति विश्व। निर्वृता सुस्थिता। निर्वृतिः सुस्थितावस्थगमने च सुख स्त्रिया मिति मेदिनी॥

(६४) अनेति। तेणेत्यादि। तेन हि एतस्मिन् चूतशाखावलम्बिते नारिकेलसमुद्गके एतन्निमित्तमेव मया कालहरणक्षमा केसरगुण्डा निक्षिप्ता तिष्ठति तदिमां नलिनीपत्रसङ्गतां कुरु यावदहमपि गोरचना तीर्थमृत्तिका दूर्वाकिसलयानि मङ्गलसमालम्भन विर चयामि। चूतशाखावलम्बिते व्याघ्रशाखायामवस्थापिते। नारिकेलसमुद्गके नारिकेलस्य सम्पु टके स्रोत्र इति प्रसिद्धे। समुद्गक सम्पुटक इत्यमरः। केसरगुण्डा नागकेसरचूर्णमुष्टयः। चाम्पेय केसरो नागकेसर काञ्चनाह्वय इत्यमरः। गुण्डेति गुडिक वेष्टे रचे इति कवि कल्पद्रुमः। स स्तम्बाद इति यः। स च स्त्रियामिष्टुप्रके क्लीबम। गुडिरत्र चूर्णार्थः। अतएव अनेकार्थत्वाच्चूर्णीकरणेऽपि यथा गुण्डयति हिङ्गुल लोक इति धातुदीपिका। इमां केसरगुण्डाम। नलिनीपत्रसङ्गतां पद्मपत्रोपरिस्थां ताम्। यावत् यत्कालमभिव्याप्य। अस्या अकुलताया मङ्गलसमालम्भनमित्यनेन सम्बन्धः। दूर्वाकिसलयानि दूर्वापल्लवान्। मङ्ग लाय समालभ्यते विलिप्यते अनेनेति मङ्गलसमालम्भन मङ्गलगात्रानुलेपनमित्यर्थः। विर

प्रियंवदा तथा करोति । अनसूया निष्क्रान्ता । (६५)

नेपथ्ये ॥ गौतमि गार्हिस्थन्ता शार्ङ्गरवशारद्वतमिश्राः वयं शकुन्तला नेतु सज्जीभवन्तु भवन्त इति । (६६)

प्रिय ॥ अणसूए तुवर तुवर एदे खलु हत्थिणाउरगामिणो इसीओ सद्दाविअन्ति । (६७)

पयामि कल्पयामि । मालम्भो विलेपनमित्यमर । मङ्गलसंभालम्भनमित्यत्र एको न द्वाविति वत् यन्नासा दक्षिणायनमितिवच्चेह्यविधेयभावाल्लिङ्गवचनयोरतन्त्रता । गोरोचनादीना मङ्गलत्वमाह मङ्गल्यैर्वस्तै यथा । गच्छन् दर्भ रामेगो यात्रामङ्गलसूदकमित्यभिधाय दुग्धञ्च रोचनामाज्यमक्षत पायस तथा । बालधाम पक्वफल खसिक शकरा मधु । माङ्गल्यञ्च दूर्वेन्द्रञ्च मेधपर्वतमूषकम । मेधाच्छत्रस्य च रवेरुदय चन्द्रमण्डलम । कस्तूरीं कञ्चन तोय हरिद्रा तीर्थमृत्तिकाम । सिद्धान्न सर्षप दूर्वा विल्वपत्रञ्च बालिकामित्यादि ॥

(६५) प्रियंमति । तथा करोति विलेपन विरचयति । उक्त वस्तुजात चूर्णय-तीत्यर्थ ॥

(६६) नेपथ्य इति । आदिश्यन्तामाज्ञाप्यन्ताम । शार्ङ्गरवशारद्वतमिश्रास्तत्संज्ञका गौरविता मुनय । बहुत्व गौरवात । गौरवितान्वार्ष मिश्रा इति भूरिप्रयोग । क्रियादेश्यमित्याकाङ्क्षायामित्यन्तमन्वेति । नेतु भवन्तु इदमुक्ता भवन्तु ॥

(६७) प्रियमिति । अणेत्यादि । अनसूये त्वरस्व त्वरस्व एते खलु हस्तिनापुरगामिन ऋषय शब्दायन्ते । हस्तिनापुर गमिष्यन्तीति हस्तिनापुरगामिन । शब्दायन्ते शब्द कुर्वन्ति । शब्दसुखकृदादेरिति कृत्संज्ञेह ङ्ञ । यत्र हस्तिनापुरस्य तदानीमसद्भाव मन्यमान कश्चिदिममपपाठमाह तदयुक्तम । तस्मिन्नगर दुष्मन्तराजधानीत्वेन महाभारतादवगम्यते । यथा । तत्रेक्ष्वाकु सु ते सर्वे प्रतिपन्न महौजस । शत्रुसेना पुरस्कृत्य सपुत्रा गजसाह्वयमिति । गजसाह्वय हस्तिनापुरम । तथाच तत्रैव । यद्धि स्तव पिता सोऽपि तथैवास्ते यतव्रत । सोपि राजा स्वनगर स्थितो गजसाह्वयमिति । तथा निहते काश्यपे तस्मिन समयेन महात्मनि । जगाम तच्चकल्पं नगर नागसाह्वयमिति । अतएव विष्णुपुराणेऽपि । नागाह्व हस्तिनापुरम । गजाह्व हास्तिनश्चेति । यत्तु दुष्मन्तान्वयप्रस्तावे सुहोत्रमभिधाय सुहोत्राद्धस्ती य इद हस्तिनापुर निर्ममेयथाम्नायेति विष्णुपुराण तदुपाख्याने ऽयोध्याया कुशद्वजस्य स्कारवत स स्कारोभिप्रायम । अतएव महाभारतीय वशानुकीर्तने दशाश्वस्य जह्नो हस्ती य इद हास्तिनपुर स्थापयामासेत्यभिहितम । स्थापन विनाशा

अनसूया ॥ समालम्भनहस्ता सखि ॥ सखि एहि गच्छावः । इति परिक्रामति । (६८)

प्रिय ॥ विलोक्य ॥ एसा सुज्जोदए किदमज्जणा मडिच्छिदणीवार-भाअणाहिं सोत्तिवाअणिआहिं तावसीहिं अहिणन्दीअमाणा चिट्ठदि सउन्तला ता उवसप्पह्म णं । इत्युभे तथा कुरुतः । (६९)

तत प्रविशन्ति यथानिर्दिष्टव्यापारा सपरिवारा शकुन्तला । (७०)

शकु ॥ भअवदीओ वन्दामि । (७१)

गौत ॥ जादे भत्तुणो बहुमाणसुहहेउअ देवीसद्दं अहि गच्छ । (७२)

इत्यनम् । इत्यमेव रघुवंशीयमजराजविवाहसमयसमागतसुषेणराजराजधानीत्वेन वर्णितायां अपि मथुरायां यत्नप्रनिर्माणाभिधान समाधेयम् ।

(६८) अनेति । समालम्भनहस्ता विच्छित्तिहस्ता पिष्टगोरोचनादिहस्तेति यावत् । विच्छित्तिस्तु कषायः स्नात्वमालम्भनमित्यपीति त्रिकाण्डशेषः । सहीयादि । सखि एहि गच्छाव ॥

(६९) प्रियमिति । विलोक्य दृष्टिमभिनीय । एसेत्यादि । एषा सूर्योदये कृतमज्जना प्रतीक्षनीवाराभि स्वस्तिवाचनिकाभि तापसीभिरभिनन्द्यमाना तिष्ठति शकुन्तला कटुपसर्पाव एनाम । सूर्योदये इति कृत मज्जन स्नान यया सा । एतच्च सूर्योदय विना नैव स्नानदानादिकाक्रियेति । प्रतीक्षनीवाराभिर्गृहीतत्वेन धान्यतण्डुलाभि । स्वस्ति वाचयितृवाचनार्थं हिता स्वस्तिवाचनिका । हितार्थे कण । ताभि । स्वस्त्ययनी क्षेमपुण्यादावित्यमर । अभिनन्द्यमाना आद्रिय माणा । तथाकुरुत उपगच्छत ॥

(७०) तत इति । यथेति स्नानेत्यर्थ । उपरिवारा तापसीभि परिवृता ॥

(७१) शकु इति । भअवदीत्यादि । भगवतीर्वन्दे प्रणमामि ॥

(७२) गौतमीति । जाद इत्यादि । जाते भर्तुर्बहुमानसुखहेतुकं देवीशब्द-मधिगच्छ । जाते पुत्रि । भर्तुर्बहुमानेनाल्पादरेण यत्सुख तस्य हेतुक हेतु

तापसः ॥ वीरप्रसविनी भव । दुष्यन्तमभिवर्द्ध्य गौतमीमुद्दिश्य सर्व्वौषधिप्रक्षान्ता । (७२)

सख्यौ ॥ उपगम्य ॥ सम्मज्जनं ते भूतम् । (७४)

शकु ॥ साध्वहं प्रियसखीनं दूतो निषीदामि । (७५)

सख्यौ ॥ उपविश्य ॥ हला उज्जुआ दाव होहि जाव दे मङ्गल-समालहणं करेम्ह । (७६)

शकु ॥ कदुदं पि एदं अज्ज बहुमणिदव्वं जदो दुल्लहं दाव पुणो मे पिअसहीमण्डणं भविस्सदि । इति वाम्यं विरचयति । (७७)

देवीशब्दं देवीति संज्ञामधिगच्छ तमस्व । राज्ञ क्षतानिषेका महीषी भवेत्यर्थः ।
देवी क्षताभिषेकायामितरासु च भट्टिनीत्यमरः ॥

(७२) तापस्य इति । वीरेत्यादि । वीरप्रसविनी भव । वीरं विक्रान्तं प्रसवितुं शीलं यस्याः सा वीरप्रसविनी । ष्यादेरिनिति इन् । शूरो वीरश्च विक्रान्त इत्यमरः । गौतमीमुद्दिश्य गौतमीं सम्बोधयिता । द्वीपीभ्यां भोक्तरायामिति वक्ष्यमाणत्वात् । समासानुवृत्तेः समासश्च । स्वरा नेच्छन्त्यन्ये यथा सर्व्वसर्व्वे रतिरिति कामन्दकः ॥

(७४) सख्याविति । सम्मेत्यादि । सम्मज्जनं ते भूतम् । सम्मज्जनं मङ्गलस्नानं दर्भौषधिस्नानमिति यावत् ।

(७५) शकु इति । साध्वहमित्यादि । स्वागतं प्रियसख्योरिति भावलक्षणेन कर्त्तरि षष्ठी । प्रश्नोऽयम् । दूतोऽस्मि निषीदतासनपरिग्रहम् ।

(७६) सख्याविति । हलेत्यादि । यदि ऋजुका तावद्भव यावत्ते मङ्गल-समालम्भनं कुर्व्वः । ऋजुका अवक्रा । यावत् यत्कालमभिव्याप्य । मङ्गलसमालम्भन मङ्गलार्थगात्रानुलेपनम् ॥

(७७) शकु इति । उदमित्यादि । उचितमप्येतदद्य बहुमन्तव्यं यतो दुर्लभं तावत् पुनर्मे प्रियसखीमण्डनं भविष्यति । उचितमभ्यक्तम । अभ्यक्तेऽप्युचित व्याप्यधिति यादवः । एतत् गात्रानुलेपनम् । बहुमन्तव्यं समादरणीयम् । मे इत्यस्य

पत्नी ॥ सखि ण जुत्तं मङ्गलकाले रोदिदुं । अस्सूणि मम्मच्च
-ाद्येण पसाधयत । (७८)

प्रियं ॥ सखि आहरणारिहं दे रूवं धम्मसुलहेहिं पसाह-
णेहिं विप्पआरीअदि । (७९)

मविश्य आभरणहस्ता अपिसार ॥ दूदमलङ्कारजातमलङ्क्रियतामा-
युष्मती । (८०)

पत्नी विलोक्य विस्मिता ।(८१)

प्रियसखीमलङ्करणित्यनेनान्वयो मत्त दुर्लभमित्यनेनापि ऐश्वर्यस्य कर्त्तरि पत्नी प्रतिषे-
धात् । प्रियसखीमलङ्कं प्रियसखीभ्या वेषरचनम् । वाष्पं अस्त्र । वाष्पाकुलाक्षा
क्षयसदः । विसृजति सञ्चति ॥

(७८) सख्यामिति । सहीत्यादि । सखि म युक्त मङ्गलकाले रोदितुं । मङ्गल-
काले मङ्गलसमालम्भनकाले । अस्त्र णि नेत्राम्बूनि । अस्तु नेत्राम्बु रोदनञ्चाश्रमस्तु
क्लेत्यमर । प्रसाधयत वेषं रचयत ॥

(७९) प्रियमिति । सहीत्यादि । सखि 'आभरणार्हं ते रूप आत्मसुलभै
प्रसाधनैर्विप्रकार्यते । आभरणार्हमलङ्कारार्हम् । यदाभरणेनैव शोभत इति
भाव । आत्मसुलभैराश्रमे विनायासेन लब्धं । प्रसाधनं प्रसाध्यते वेष क्रियते
ऽभिस्ते कर्तृभि । व्याकुलवेषो नेपथ्य प्रतिकर्म्म प्रसाधनमित्यमर । विप्रकार्यते
क्षोकनिकार नीयते । निकारो विप्रकार स्यादित्यमर ।

(८०) प्रविश्येति । प्रवेशाभागप्राप्तिस्थानाश्रमर्य्यादादौ प्रविश्येति पद्धा-
द्धतिसिद्धेन । प्रविष्टपूर्व्वतया श्रुतदृष्टान्नतया वानुमानबलेन प्रवेशाभागप्यनुभवात्तु
युक्तोऽन्यत्र प्रथम व्यक्तिसंशुद्धेय । अलङ्कारजातमाभरणकमूह । एतेन प्रदर्शयति ।
जात व्यक्तौषजन्मक्षिति मेदिनी । अलङ्क्रियतां भूष्यताम् । आयुष्मती आयु
प्रशस्तिमती । भवत्वेत्यर्थ ।

(८१) सख्यौ इति । विस्मिता जातविस्मया ।

गौत ॥ वच्छ हारीद कुदो दूदं आसादिदं । (८२)

हारी ॥ तातकण्वप्रभावात् । (८३)

गौत ॥ किं मायसी सिद्धी । (८४)

हारी ॥ न खलु न्यूयतां तत्भवता कण्वेन वयमाज्ञप्ताः शकुन्तलाहेतोर्वनस्पतिभ्यः कुसुमान्याहरतेति । ततश्च । (८५)

क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं
निष्यूतश्चरणोपरागसुभगो लाक्षारसः केनचित् ।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै-
र्दत्तान्याभरणानि तः किसलयच्छायापरिस्पर्द्धिभिः ॥(८६)

---

(८२) गौतेति । वच्छेत्यादि । वत्स हारीत कुत इदमासादितम् । कुतः कथात् । इदमलङ्कारजातम् । आसादितं लब्धम् ।

(८३) हारीति । तातकण्वप्रभावात् अस्मत्पितृकल्पस्य महर्षेः शकुन्तलार्थं । आसादितमित्यनुषङ्गः । प्रभाव शक्तितेजसोरिति विश्वः ।

(८४) गौतेति किमित्यादि । किं मायसी सिद्धिः । मायसी मनःकृता । सिद्धि निष्पत्तिः । सिद्धि निष्पत्तियोगयोरिति विश्वः । अलङ्कारजातस्येति शेषः ।

(८५) हारीति । न खलु नैव । मायसी निष्पत्तिरिति शेषः । शकुन्तलाहेतोः शकुन्तलाप्राप्त्यर्थम् । वनस्पतिभ्यो वृक्षेभ्यः । वनस्पतिर्वृक्षमात्रे इति विश्वः । आहरत आहरत । इति आत्मना वयमित्यन्वयः । ततः किमित्यपेक्षायां ततश्चेति ।

(८६) क्षौममिति । केनचित् तरुणा भूरुहेण इन्दुवत् चन्द्रमण्डलवत्पाण्डु सितपीतम् । सितपीतमयुक्तः पाण्डुवर्णः प्रकीर्तित इति शुभूतिः । माङ्गल्यं मङ्गलकर्मणि हितं क्षौमं दुकूलं । क्षौमं दुकूलसितयोरिति विश्वः । आविष्कृतं प्रकाशितम् । तथा केनचित् तरुणा अश्वत्थादिना करण्वयोरुपरागे रञ्जने शुभग सुन्दरः । सुन्दरेऽधिकभाग्ये च दुर्दिनेतरवासरे । वरीयसि श्रीमति च शुभग इति शब्दार्णवः । लाक्षारसो जातुफलो निष्यूत उक्तोऽर्द्धः । अन्येभ्यो वनदेवताकरतलैः वनदेवतानां करतलैः पल्लवैः । आपर्वभागोत्थितैः आपर्वभागेषु उत्थितैः । दत्तान्याभरणानि दत्तानि आभरणानि । तः किसलयच्छायापरिस्पर्द्धिभिः किसलयानां पल्लवानां छायां परिस्पर्द्धन्ते इति तथोक्तैः ।

प्रियं ॥ मधुनश्च विलोकयं ॥ इला कोटरसम्भवापि मञ्जरी पोक्खर-मञ्ज ज्जेव वहिलसदि । (८७)

गौत॥ जादे दूमाए चब्भुवबत्तीए सूइदा भत्तुणो गेहे चनुहो-दव्वा राचलच्छी । (८८)

शकु ॥ खड्गं नाटयति । (८९)

हारी ॥ यावदिमां वनस्पतिसेवामभिषेकार्थं मालिनीमवती-र्णाय तत्भवते कण्वाय निवेदयामि । इति निष्क्रान्तः । (९०)

ह्रवे रस इत्यमरः । तथा चन्येभ्य सरभ्य' चापर्यंभोगं मणिबन्धपर्यन्त स्थितै-रङ्गदै' किसलयस्य प्रस्तस्य च्छायां कान्तिं परिसर्द्धितमनुकर्तुं शीलं येषा ते तैः किसलयच्छायाम्परिस्पर्द्धिभि । छाया सूर्यप्रियाकान्तिप्रतिबिम्बमातप इत्यमरः । वनदेवताया करतलै कर्तृभि भोरुभ्यं चाभरणानि दत्तानि । इत्तं शाकुन्त-शिकीर्डितं नाम ।

(८७) प्रियमिति । इलेत्यादि । यदि कोटरसम्भवापि मधुकरी पुष्करमध्ये-वाभिनषति । कोटरसम्भवापि काष्टादिविवरसम्भवापि पुष्करमधु पद्ममधु । विप्र-प्रस्तुतराजीवपुष्कारान्मोदकृदपि चेत्यमरः । तथाधारण्यसम्भवापि त्वमाभरणान्या-स्वादयसीति गम्यते ।

(८८) गौतेति । जादेरित्यादि । जाते चनया चभ्युपपत्त्या सूचिता भर्तुर्गेहे चनुभवितव्या राजलक्ष्मी । चनया चभ्युपपत्त्या उपयोगदशायामेव क्षौमाद्याविष्कर-णात्मकानुग्रहेण वनस्पतीनामितिशेषः । चभ्युपपत्तिरनुग्रह इत्यमरः । सूचिता चनुमापिता भर्तुर्गेहे राजलक्ष्मी राजसम्पद् चनुभवितव्या उपभोक्तव्या । उप-सर्गस्यानुभव इत्यमरः ॥

(८९) शकुरिति । सुगमम् ॥

(९०) हारीति । वनस्पतिसेवां वनस्पतिसोपकारां [illegible] कण्वार्थं । चवतीर्णाय गताय ॥

अन ॥ सखि अनघभूदभूसणो अअं जणो कधं तुमं अल-
ङ्करेदि । (९१)

चिन्तयित्वा विलोक्य च ॥ चित्तपरिचएण दाणिं दे अङ्गेसु आभ-
रणविणिओअं करेस्सं । (९२)

शकु ॥ जानामि वो निपुणत्वम् (९३)

सख्यौ ॥ नाट्येनाभरणप्रकारान् विनियुङ्क्षाते । (९४)

नट॰ प्रविशति स्नानोत्तीर्णं कण्वं । (९५)

कण्व ॥ विचिन्त्य । (९६)

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
अन्तर्वाष्पभरोपरोधि गदितं चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं न तनयाविश्लेषदुःखैर्नवैः ॥ (९७)

---

(९१) अनेति । सख्योत्यादि । सखि अनघभूतभूषणोऽयं जन कथं त्वा मण्ड-
यति । अनघभूतभूषण अदुष्टभूषण ॥

(९२) चिन्तयित्वेति । चिन्तयित्वा उक्तमाय । विलोक्य आभरणानि अङ्गानि
दृष्ट्वा । चित्तेति । चित्तपरिचयेनेदानीं ते अङ्गेष्वाभरणविनियोगं करिष्यामि ।
चित्तस्य मनसः । परिचयेन ज्ञानेन । मनसा यथावधार्यते तथेत्यर्थः । आभरणानां
विनियोगं यथास्थानविवेचनम् ॥

(९३) शकु इति । जानामीत्यादि । जानामि वो निपुणत्वम् । निपुणत्वमभिप्र-
यम् । प्रथमे निपुणाभिप्रायविज्ञानिष्यासमिश्रिता क्रियाभरः ॥

(९४) सख्याविति । नाट्येन अनुपप्रदर्शनेन । विनियुङ्क्षाते परिधापयत ॥

(९५) नट इति । स्नानोत्तीर्णं स्नानानन्तरं साधिया उत्तीर्णः ॥

(९६) कण्व इति । विचिन्त्य शकुन्तलाभरणानुमनसि कृत्वा ॥

(९७) यास्यतीति । अद्य शकुन्तला यास्यति भर्तृगृहमितियेव । दर्शनेतो
हृदयं मम उत्कण्ठया प्रगाढचिन्तया संस्पृष्टमधिक्षिप्तम् । तथा गदितं वचनं अन्तर्मध्ये

इति परिक्रामति । (९८)

यक्षौ ॥ इला सउन्तले अवसिदमण्डणासि सम्मदं परिहेहि खोमजुअलं । (९९)

यक्षु ॥ उवाय ॥ माध्येन परिधत्ते । (१००)

गौत ॥ जादे एस दे आणन्दवाप्पपरिवाहिणा लोअणेण परिस्स-जन्तो विअ गुरू उवत्थिदो ता समुदाआरं पडिवज्जस्सु । (१०१)

यक्षु ॥ सम्भीड वन्दणं करोसि । (१०२)

यो बाष्पाणामश्रूणां भरोऽतिशयस्तस्य उपरोधि तद्दर्शनव्याघातवत । अथाति-शयोक्तिरलङ्कार । तथा दर्शन नयन विलया जड कर्मात्रमम । अरण्य-मोक्ष यस्य स तथोक्तस्य । शोक एवाग्नयस्तैरुत्थ इत्यमर । ममापि तावत् स्नेहादीदृश वैक्लव्यं विहृवता विक्लवो विह्वल इत्यमर । अदृष्टिणो अदृश्या मत्ते प्रथमाभिर्भूतैस्तनयाविश्लेषदुःखं तनयया सुतया विश्लेषात विप्रयोगात् यानि दु खानि तै कथ न पीड्यन्ते क्लिश्यन्ते युक्तमेव पीड्यन्त इति भाव ॥

(९८) इतीति । सुगमम ॥

(९९) यस्यामिति । इत्येत्यादि । यदि यक्षुन्मते अवसितमण्डनासि साम्प्रत परिधेहि क्षौमयुगलम् । अवसितमण्डना समाप्तभूषणक्रिया । अलङ्कारस्त्वाभरण परिष्कारो विभूषणम् । मण्डनश्चेत्यमर ॥

(१००) यक्षु इति । परिधत्ते क्षौमयुगलमिति शेष ॥

(१०१) गौतेति । जादेत्यादि । जाते एष ते आनन्दवाष्पपरिवाहिणा लोचनेन परिव्रजमानत्व गुरुरुपस्थित तत्समुदाचार प्रतिपद्यस्व । आनन्दवाष्पा आनन्दोद्गतास्त्रूणि तानु परिवहतीत्यानन्दवाष्पपरिवाहि तेन । शोकबाष्पोल्लेखे ऽप्युत्तरपि शोके द्विगुणीभविष्यतीत्यानन्दवाष्पपदम । लोचनेन परिव्रजमान नेत्रेणालिङ्गन् प्रगाढदृष्टिप्रसारणया विषयीकुर्वन्निति यावत । समुदाचार समुचिता चार वन्दनमिति यावत । प्रतिपद्यस्व प्राप्नुहि कुर्विति यावत् ॥

(१०२) यक्षुरिति । सम्भीड़ सवज्जम ॥

कण्व ॥ वत्से । (१०२)

ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव ।
पुत्रं त्वमपि सम्राजं सेव पूरुमवाप्नुहि ॥ (१०४)

गौत ॥ जादे यरो क्खु एसो ण आसिसो । (१०५)

कण्व ॥ वत्से घृतः सद्यो हुतानग्नीन् प्रदक्षिणी कुरुष्व । (१०६)

सर्वं तथा कारयितुं परिक्रामन्ति । (१०७)

कण्व ॥ वत्से । (१०८)

---

(१०२) कण्व इति । वत्से इति सम्बोधनं स्नेहीयशाक्यमन्वेति ॥

(१०४) ययातेरिति । ययाते राज्ञः शार्मिष्ठेयस्य पुरोर्भर्तुर्दुष्मन्तस्य बहुमता भव । वर्तमाने क्तः तद्योगात्कर्तरि षष्ठी । मनुष्यपुराणम् । 'देवयान्युवाच । शर्मिष्ठयातिदुष्टाऽसि दुहिता वृषपर्वणः । त्वयोऽस्माः सलिता पुत्रा दास्यानेन ययातिना' । दुर्भगायां मम द्वौ तु पुत्रौ तात प्रजज्ञतुः । अपि एवं सा शर्मिष्ठा पूरुं पुरुनामानं पुत्रमिव त्वं सम्राजं राजगामकं पुत्रमवाप्नुहि । उभयत्र वर्षपर्वणोरिति व्याख्यानि मी । येनेदं राजसूयेन मरुत्तस्येज्यरे यः । याति ययातिना राज्ञा स सम्राट्त्वमरः । विष्णुपुराणम् । यदुश्च वर्षपुरुश्च देवयानी व्यजीजनत् । दुष्मन्तानुश्च पूरुश्च शर्मिष्ठा वार्षपर्वणीति ॥

(१०५) गौतेति । जादे इति । जाते वरः क्षेम आशिषः । नियतेऽकर्तृकायोगो वरः । अनवद्यमाशीर्वादागमनमाशी । अत्र स्वामाशास्यत्वेन वरस्यलोनिर्देशोक्तेः । अतएवोक्तमलङ्कारिकैः । लौकिकानां हि साधूनामर्थं वागनुवर्तते । इत्यीया पुनराद्यानां वाचमर्थोनुधावतीति ॥

(१०६) कण्व इति । हुता एतस्यां दिशि । अग्नीन्द्रया अविरदेवाग्नयस्त एव अग्नयश्चेति साधु । प्रदक्षिणीकुरुष्व दक्षिणार्थेन यम ॥

(१०७) सर्वे इति । तथा कारयितुं प्रदक्षिणीकारयितुम् ॥

(१०८) कण्व इति । वत्से दैवमा वक्षवत्सां वाचयन्तु कुलपतय' ॥

अमी वेदिं परितः क्लृप्तधिष्ण्याः
समिद्धन्तः प्रान्तसंस्तीर्णदर्भाः ।
अपघ्नन्तो दुरितं हव्यगन्धै-
र्वैतानास्त्वां वङ्क्षवः पावयन्तु ॥ (१०९)
वङ्कु ॥ प्रदक्षिणं करोमि । (११०)

---

(१०९) अमी इति । वेदिं परित वेद्या इतस्तत । धिक्ष्वमयेति द्वितीया । क्लृप्तानि निर्दिष्टानि धिष्ण्यानि स्थानानि येषा ते । धिष्ण्या स्थानाग्निसङ्घस्थिति मेदिनी । तथा समिद्धन्तो दह्यमानसमिधः । तथा प्रान्तेषु पार्श्वचतुष्टयेषु सस्तीर्णा कृतास्तरणा दर्भा. कुशा येषा ते । तथा हव्यामा देवतोद्देशेन हुतामा गन्धै दुरित पापमपघ्नन्त अमयन्त । हव्यकव्ये देवपैत्रे इत्यमर । वैतानाः यज्ञिया. । ऋत्विक्सारथयोरस्त्री वितान मित्यमर । वङ्क्षव. सस्कृताग्नयस्त्वां पावयन्तु शुद्धिं नयन्तु । अत्र प्रथमतृतीयपादौ वातोर्म्यौ । द्वितीयचतुर्थपादौ मालिन्या इत्युपजातिर्मम इष्टम् । तदुक्तम् । अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातय स्मृता । इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिस्त्रिदमेव नामेति । अतएव पिङ्गलाचार्यस्त्वत्रेष्टान्युपजातिप्रकरणे तथा मालिनीवातोर्म्यो-पादयोरन्येषामल्पभेदानामपि प्रयोगानुसारेणोपजातयोद्रष्टव्या इति स्वाशयेनोक्तम् । यद्यपि प्रथमतृतीयपादयोर्वातोर्म्यीपादत्वाङ्गीकारे द्वितीयपादस्य च मालिनीपादत्वाङ्गीकारे तेषां लघुपूर्वकत्वमनुचित मिव प्रतिभाति । वातोर्म्यीयं गदिताम्भौ तगौ ग इति वातोर्म्यीलक्षणात् मालौ गौ चेच्छालिनी श्लोकवेदे इति मालिनी लक्षणाच्च । तथापि वेदे तयोर्लघुपूर्वकताया अपि बहुत्वमुपलम्भात् वेदाध्ययनाध्यापनानालोचितपाण्डित्यात्तत्रत्यौ वैदिकवत् प्रयोग बहुविषयत्व । तथाच प्रथमतृतीयपादौ यजोच्चैको युष्मार्पोत्तुर्यते इति त्वपोभिन्ना बहुधैकोत्तुगच्छन्नित्यादि वैदिकवत् । द्वितीयपादश्च जङ्घन्यो भुक्तभोगासजोऽन्य इति अविद्यायामन्तरे वर्त्तमाना. स्वयं धीरा पण्डितमन्यमाना इत्यादि वैदिकवत् द्रष्टव्य. ॥

(११०) यङ्कु इति । सुगमम् ॥

कण्वः ॥ वत्से प्रतिष्ठस्वेदानीम् । (१११)

यदभिप्रेषम् ॥ क्व नु ते शार्ङ्गरवशारद्वतमिश्राः । (११२)

गिर्यौ ॥ मिश्र्य ॥ भगवन्निमौ स्वः । (११३)

कण्व ॥ वत्सौ भगिन्याः पन्थानमादेशयतम् । (११४)

गिर्यौ॥ द्रुत द्रुतो भवती । (११५)

सर्वे परिक्रामन्ति ॥ (११६)

कण्वः ॥ भो भो सन्निहितवनदेवता स्तपोवनतरवः । (११७)

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वसिक्तेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्यो वः कुसुमप्रवृत्तिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥ (११८)

---

(१११) कण्व इति । प्रतिष्ठस्व गच्छ । प्रस्थानं गमनं गमनयोग्यं । प्रतिज्ञा निर्णयप्रकाशे संप्रत्यवोचस्तदात्मनेपदम् ॥

(११२) यदीति । यदभिप्रेषमभिसस्मरतो हृदि प्रातयन्निव्यर्थः । ते प्रागादिष्टा इत्याशयः । शार्ङ्गरवशारद्वतमिश्रा तु क्व कुत्र गताः । तु पृच्छायाम् ॥

(११३) गिर्याविति । द्रुतो रूढवागतौ द्वावां स्तो वर्तावहे ॥

(११४) कण्व इति । भगिन्याः शकुन्तलायाः ।

(११५) गिर्याविति । अत्र मनुः । परपत्नी तु या स्त्री स्यादसम्बन्धा च योनितः । तां ब्रूयाद्भवतीत्येवं सुभगे भगिनीति चेति ॥

(११६) सर्वे इति । सुगमम् ॥

(११७) कण्व इति । सन्निहितेति । सन्निहिता उपस्थिता वनदेवता वनाधिष्ठात्री देवता येषु ते तथोक्ताः ॥

(११८) पातुमिति । युष्मासु अविनयेषु व्यक्ततलकसेकेषु या शकुन्तला अयं प्रथमं पातुं न व्यवस्यति नेच्छति । अविनयेष्विति तादीतेष्विति मल्लिनाथसम्मतः पाठः किरातार्जुनीयटीकायां घटः तन्मते शकर्मकाया अपि कर्मविवक्षाया-

चाकाशे ॥ रम्यान्तरः कमलिनीहरितैः सरोभि-
ग्छायाद्रुमै र्नियमितार्कमरीचितापः ।
भूयात्कुशेशयरजोऽरुदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः ॥ (११९)

सर्वे ॥ सविस्मयमाकर्णयन्ति । (१२०)

मकर्मकत्वात्कर्तरि क्तो भावकान्नादयं ण्यादित्वादप्रत्ययो वा तत्रार्थप्रतिपादक । यस्मन्मते तु भौव्यगत्यदनार्थाड्डेचेति चकारेण कर्मभावकर्तृषा सदुच्चयात्पानस्य चादनार्थान्तर्गतत्वात्कर्तरि क्त समाधानकृत् । या प्रिय प्रीतिकर मण्डन भूषणं यस्या सा तथोक्तापि स्नेहेन हेतुना भवता मञ्जुल नादत्ते भूषणाय न मटङ्गति । ण्यादाडोऽस्वप्रधार इत्यात्मनेपदम् । यस्या शकुन्तलेत्या यो युष्माकमादौ प्रथमे कुसुमप्रसूतिसमये कुसुमानां पुष्पाणा प्रसूतेरुद्गमस्य समये उत्सव परमानन्दो भवति । सैयं शकुन्तला पतिगृह याति सर्वै युष्माभिरनुज्ञायतामनुमन्यताम् । वृत्तं शार्दूलविक्रीडितम ॥

(११९) चाकाशे इति । कोपि कमप्यनुद्दिश्य शून्ये पठन् तदानीं श्रुतो भूतमाकाशवाणीं रूपयति रम्येति । यस्या शकुन्तलाया पन्था गतिभूमि कमलिनीभि पद्मिनीभि हरितैं पालाशवर्णै पालाशोहरितो हरिदित्यमर । सरोभि काशारै रम्यं मनोहरमन्तरं मध्यं यस्य स । रम्यं मनोरम इति विश्व । तथा छायाप्रधाना द्रुमास्तरवस्छायाद्रुमा । शाकपार्थिवादित्वान्मध्यपद-लोप । तै र्नियमित प्रयमितोऽर्कमरीचीनां रविकराणां तापो यस्मिन् स तथा कुशेशयानां कमलाना रजोभि परागै पवनचलितागमैरिति शेष । रूढ्य शकु-न्तारा रेणवो भूलयो यस्य स तथोक्त । रेणुर्द्वयो स्त्रिया धूलि पाशु र्नी नद्वयोरज इत्यमर । तथा यानो मन्दोऽनुकूलो गम्यदिग्गामिव पवनो यत्र स तथाभूतश्च शिव कल्याणकरश्च भूयात् । व्याख्यि टी । तथा चोक्तम् । वामे मधुरवाक्पक्षी दक्ष पल्लविलोऽयत । यस्यनुकूलोवहन् वायु प्रयाणे शुभयत्रि इति । वसन्ततिलक वृत्तम् ॥

(१२०) सर्वे इति । आकर्णयन्ति रम्येत्यादिवाक्यमिति शेष ॥

शार्ङ्ग ॥ कोकिलशब्दं श्रुत्वा । भगवन् । (१२१)

अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभि ।
परभृतविरुतं कलं यतः प्रतिवचनीकृतमेभिरात्मनः ॥ (१२२)

गौत्त ॥ जादे णादिजणस्सिणिद्धाहिं अणुण्णादगमणाहि तवोवण-
देवदाहिं ता गणम अच्चवदीणं ॥ (१२३)

शङ्ग ॥ सप्रणाम परिक्रम्य जनान्तिकम् ॥ हला पिअंवदे अज्जउत्त-
दंसणुस्सुआएवि अस्समपदं परिच्चअन्तीए दुक्खदुक्खेण चलणा मे
पुरोमुहा ण पिअवड्न्ति । (१२४)

---

(१२१) शार्ङ्गेति । श्रुत्वेति व्याविष्कृत्य ॥

(१२२) अनुमतेति । भगवच्चिन्तिवाक्यस्येनाशब्दपदेन योज्यम । इयं शकुन्तला वनवासेन एकत्र धर्मारण्ये वासेन बन्धुभि ज्ञातिसौहार्दैस्तरुभि रत्न-मनुज्ञात गमन यस्या सा तथोक्ता भवतीतिशेष । यत एभि कलं मधुराक्षुटं परै काकै भिर्यत इति परभृत कोकिल । वनप्रिय परभृतः कोकिल पिक इत्यमरः । तस्य विरुत ध्वनिमात्मन प्रतिवचनीकृत उत्तरी-कृतम् । ध्वनौ तु मधुराक्षुटे कल इत्यमर । इत्तमिद सपरवक्त्र नाम । व्यञ्जि मनरक्षा गुरुः वमे तदपरवक्त्रमिद नजौ जरौ इति । वृत्तेतस्तु प्राग्वत् ॥

(१२३) गौतमि । जादे इत्यादि जाते ज्ञातिजनस्निग्धाभिरनुज्ञातगमनाभि तपोवनदेवताभिस्तमधन भगवती । ज्ञातिजनस्य तातजनस्य स्निग्धाभिः स्नेहयुक्ताभि । ज्ञातिस्तातसगोत्रयोरिति मेदिनी । स्निग्धस्तु वत्सलोऽत्र स्नेहयुक्तजने भवेदिति भट्टरतावली । भगवती वनदेवता ॥

(१२४) शकु इति । जनान्तिक विपताकरेणापवार्येत्यर्थ । हलेत्यादि । सखि प्रियवदे आर्यपुत्रदर्शनोत्सुकाया अपि आश्रमपद परित्यजन्त्या दुःख-दुःखेन चरणौ मे पुरोमुखौ न निपतत । आर्यपुत्रस्य पत्यु दर्शने उत्सुकाया उत्कण्ठिताया । आश्रमपदमाश्रमस्थानम् । दुःखदुःखेनातिकष्टेन । पुरोऽग्रतो मुखं ययो स्तौ तथोक्तौ ॥

प्रियं ॥ ण केवलं तुमं ज्जेव तवोवणविरहकादरा तए उवट्ठिद विओअंस्स तवोवणस्सवि अवत्थं पेक्ख दाव ॥ (१२५)

उग्गिण्णदब्भकवला मए परिच्चत्तणत्तणा मोरी ।
ओसरिअपाण्डुपत्ता सुअन्ति अस्सुं विअ लदाओ ॥ (१२६)

अक्खु ॥ अत्ता ॥ ताद लदावहिणीं दाव माहवीं आमन्तइस्सं ।
(१२७)

कण्व ॥ वत्से अवैमि ते तस्यां सौहार्दं स्नेहसा दक्षिणेऽपश्य । (१२८)

---

(१२५) प्रियमिति । णेत्यादि । न केवलं त्वमेव तपोवनविरहकातरा त्वयोपस्थितवियोगस्य तपोवनस्यापि अवस्था प्रेक्षस्व तावत् । तपोवनस्य विरहे त्यागे कातरा अधीरा । रहत्यागे इति कविकल्पद्रुमः । त्वयेति उपस्थित आसन्न त्वया वियोगो यस्य तत् तथोक्तस्य । अवस्थां दशाम ॥

(१२६) तामेव दशां दर्शयति उग्गिण्णेति । उद्गीर्णदर्भकवला मृगी परित्यक्तमर्कटेना मयूरी । अपहृतपाण्डुपत्रा शुष्यन्त्यश्रुण इव लता । उद्गीर्णा उद्गता दर्भकवला कुशग्रासा यया सा तथोक्ता भवति मृगी । मयूरी च परित्यक्तमर्कटेना परिच्छृतन्द्रत्यव्यापारा । तथा लता अपहृतानि पतनादपगन्तुमारब्धानि पाण्डुपत्राणि परिणतपत्राणि यासां ता तथोक्ता सत्य अश्रुणामिव शुष्यन्ति किरन्ति । पाण्डुपत्रापगम एव वाष्पमोक्षनैरन्तर्येण उत्प्रेक्षित इत्युक्तेवाबद्धार । इय गाथा । तस्सवणछक्कं प्राकृतपिङ्गले यथा । पढमं बारहमत्ता बीए अट्ठारहेहि संजुत्ता ॥ जह पढमं तह तीअं दहपञ्च विहूसिआ गाहा ॥ अत्र गणनियमोपि तत्रोक्तो यथा । सत्तगणादीहन्ता जो ण लहइ छट्ठएण्हे जो विसमे । तह गाहे विअ अन्ते छट्ठ लहूअं विआणेऊ । सप्तगणादीर्घान्ता जो न लभते षष्ठो नेह जो विषमे । तथा गायायां द्वितीयार्द्धे षष्ठं लघु विजानीहि ।

(१२७) अक्खु इति । अत्ता भाधवीमितिशेष । ताद इति । तात सखा-मगिनीं तावन्माधवीमामन्त्रयिष्ये । आमन्त्रयिष्ये आह्वयिष्ये ॥

(१२८) कण्व इति । अवैमि जानामि । तस्यां भाधव्याम् । सौहार्दं सहृदयत्वम् । सुपद्माद्यादित्वात् हृदो हृदयो राद्यभो हृदि ।

गाङ्गं ॥ कोकिलशब्दं श्रुत्वा । भगवन् । (१२१)

अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः ।
मरकतविकृतं फलं यतः प्रतिवचनीकृतमेभिरात्मनः ॥ (१२२)

गौरं ॥ जादे णादिजणस्सिणिद्धाहिं अणुण्णादगमणाहि तवोवण-देवदाहिं दा पढमं अब्भवदीणं ॥ (१२३)

अलं ॥ वनपादपं परिक्रम्य जनान्तिकम् ॥ हला पिअम्वदे अज्जउत्त-इंसएणसुआएवि अत्तमपदं परिच्चअन्तीए दुक्खदुक्खेण चलणा मे पुरोमुहा ण णिअड्डन्ति । (१२४)

---

(१२१) गाङ्गेति । श्रुत्वेत्यादि आनिष्कृत्य ॥

(१२२) अनुमतेति । भगवच्चिन्तिवाचस्येनात्मशब्देन योज्यम् । इयं शकुन्तला वनवासेन एकस्य धर्मारण्ये वासेन बन्धुभि र्जातसौहार्दैस्तरुभि रत्त-वनमनुज्ञातं गमनं यस्याः सा तथोक्ता भवतीत्यर्थः । यत एभि स्तरुभिः कण्वं मधुराण्युदकं परैः काकैः क्रियत इति परम्परतः कोकिलः । वनलिय: परम्परतः कोकिलः पिअ इत्यपीत्यमरः । तस्य निकटं ध्वनिनात्मन' प्रतिवचनीकृत उत्तरी-कृतम् । ध्वनौ तु मधुराण्युदकं वन' इत्यमरः । इत्तनिद मपरपर्यायं नाम । अयुजि नयरवा णुदः वमे तदपरपर्यायमिदं गजौ जरौ इति । वृत्तेतस्तु प्रागुक्तः ॥

(१२३) गौतमि । जादे इत्यादि जाते प्राप्तिजनस्निग्धाभिरनुज्ञातगमनाभि तपोवनदेवताभिराश्रमस्य । प्राप्तिजनस्य तातजनस्य स्निग्धाभिः स्नेहयुक्ताभिः । प्राप्तिस्तातजनोत्पत्तोरिति मेदिनी । स्निग्धस्तु वस्तुतोऽन्यः स्नेहयुक्तजने भवेदिति यद्वरलाक्षी । भगवती वनदेवता ॥

(१२४) अलं इति । जनान्तिकं निपुणाकर्णयेत्यर्थः । हलेत्यादि । यदि प्रियंवदे आर्यगौतमीमुद्दिश्योक्तवाक्या अपि आश्रमपदं परित्यजन्त्या दु:ख-दुःखेन चरणौ मे पुरोगतौ न निपतत: । आर्यगौतमी वस्तु दैवमे वमुक्तवाक्या वत्सविश्लेषाया: । आश्रमपदमाश्रमस्थानम् । दु:खदु:खेनातिकष्टेन । पुरोगतौ सुखं यथा स्यात्तथा निष्क्रमेयं ॥

प्रियं ॥ ण केवलं तुमं ज्जेव तवोवणविरहकादरा तुए उवट्ठिद विओअंस्स तवोवणस्सवि अवत्थं पेक्ख दाव ॥ (१२५)

उग्गिण्णदब्भकवला मइं परिच्चत्तणत्तणा मोरी ।
ओसरिअपाण्डुपत्ता मुअन्ति अस्सुं विअ लदाओ ॥ (१२६)

अज्ज ॥ सुत्ता ॥ ताद लदावहिणीं दाव माहवीं आमन्तइस्सं ।

(१२७)

कण्वः ॥ मत्तो अवैमि ते तस्यां सौहार्दं स्नेहसा दक्षिणेतरस्याम् । (१२८)

---

(१२५) प्रियमिति । णेत्यादि । न केवलं त्वमेव तपोवनविरहकातरा त्वयोपस्थितवियोगस्य तपोवनस्यापि अवस्थां प्रेक्षस्व तावत् । तपोवनस्य विरहे त्यागे कातरा अधीरा । रहस्तु त्यागे इति कविकल्पद्रुमः । त्वयेति उपस्थित आगत स्वया वियोगो यस्य तत् तथोक्तस्य । अवस्थां दशाम् ॥

(१२६) तामेव दशां दर्शयति उग्गिण्णेति । उद्गीर्णदर्भकवला मृगी परित्यक्तनर्तना मयूरी । अपहृतपाण्डुपत्रा शुष्यन्त्यश्रुण्य इव लताः । उद्गीर्णा उद्गान्ता दर्भकवला कुशग्रासा यया सा तथोक्ता भवति मृगी । मयूरी च परित्यक्तनर्तना परिहृतनृत्यव्यापारा । लता अपहृतानि पेलवादगन्तुमारब्धानि पाण्डुपत्राणि परित्यक्तपत्राणि याभ्य ता तथोक्ताः सत्य अश्रुबाष्पमिव स्रवन्ति किरन्ति । पाण्डुपत्रापगम एव बाष्पमोक्षो नोत्प्रेक्षित इत्युत्प्रेक्षालङ्कारः । इयं गाथा । लक्षणपक्षं प्राकृतपिङ्गले यथा । पढमं बारहमत्ता बीए अट्ठारहेहि संजुत्ता ॥ जह पढमं तह तीअं दहपञ्च विभूसिआ गाहा ॥ अत्र गणनियमोपि तल्लक्षो यथा । सत्तगणादीहन्ता जो ण लहू अट्ठमेह जो विसमे । तह गाहे विअ अद्धे अट्ठ लहूअं विआणेहु । सप्तगणादीर्घान्ता जो न लघु अष्टमो नेह जो विषमे । तथा गायाया द्वितीयार्द्धे सप्त लघु विजानीहि ।

(१२७) यत्र इति । स्नुषा माधवीमित्यर्थः । ताद इति । तात सताभगिनीं तावन्माधवीमामन्त्रयिष्ये । आमन्त्रयिष्ये आह्वयिष्ये ॥

(१२८) कण्व इति । अवैमि जानामि । तस्यां माधव्याम् । सौहार्दं सुहृद्भावम् । सुहृच्छब्दादिताद् भावे, यदयो राद्यचो इति ।

अनु ॥ उपेत्य सतामाशिष्य ॥ सदाबहिणि पच्चालिङ्गअ मं साहा-मएहिं वाउहि अज्ज पउदि दूरवत्तिणी क्खु दे भविस्स। तादं अहं विअ दूअं तुए चिन्तणीआ। (१२९)

कण्व ॥ वत्से । (१३०)

सङ्कल्पितं प्रथममेव मया त्वदर्थ
भर्त्तारमात्मसदृशं सुतरां गतासि ।
अस्यास्तु सम्प्रति वरं त्वयि वीतचिन्तः
कान्तं समीपसहकारमिमं करिष्ये ॥ (१३१)
त्वरितः प्रस्थानं प्रतिपद्यस्व । (१३२)

---

(१२९) अनु इति । सतामित्युभयत्राप्येति । उपेत्यादि । सतामग्रिमं प्रत्याशिष्य मां माधवायैव बान्धवि अद्यप्रभृति दूरवर्त्तिनी खलु ते भविष्यामि । तात अहमिव दूरं त्वया चिन्तनीया । माधवायं माधवात्मके मयट् तद्रूप इति मयट् । अद्येति । अद्यप्यग्निमहमीत्यद्येति निपातित तथाप्यस्मोपेक्षणीय सम्भ्रमोक्तिभावार्थं यस्मादङ्ग प्रभृतीत्यर्थं । अहमिव चिन्तनीया नियसङ्गमनाय चिन्तनीया ॥

(१३०) कण्व इति । सुगमम् ॥

(१३१) सङ्कल्पित मिति । मया प्रथम त्वदर्थमेव सङ्कल्पित चिन्तितमात्मसदृश अनुरूपं भर्त्तार त्वपुत्रे निजसौन्दर्यादिभि रेवभि गैतासि प्राप्तासिसम्प्रति तु त्वयि वीतचिन्तो विगतभावमोह कान्तं मनोहरमिमं समीपसहकारं अभिलष्ट अतिशौरभवन्तम् । आम्रवृक्षो रसालोऽयो सहकारोऽतिसौरभ इत्यमर । अस्या माधव्या वर वोढारम् । वरो जामातृवोढारावित्ति वैजयन्ती । अथवा वरं भजनीयं । इदूसमन्ताभिति अविकल्पेन । करिष्ये ।

(१३२) त्वरित इति । त्वं सदा । इत पश्च मनेनेति भाव । प्रस्थानं गमनम् । प्रतिपद्यस्व प्राप्नुहि ।

गङ्ग ॥ सख्यानुपेत्य ॥ हला एसा दीसं पि वो हत्थे णिक्खेवो ।
(१२३)

सख्यौ ॥ अयं जणो दाणिं कस्स हत्थे समप्पिदो । इति वाष्पं विसृजत : (१२४)

कण्व ॥ अनसूये प्रियंवदे अलं रुदितेन ननु भवतीभ्यामेव शकुन्तला स्थिरीकर्त्तव्या । (१२५)

इति सर्व्वे परिक्रामन्ति । (१२६)

गङ्ग ॥ विलोक्य ॥ ताद एसा उडअपव्वन्तचारिणी गव्भ-भारमन्थरा मिअबहू जदा सुहप्पसवा भविस्सदि तदा मे कम्पि पिअणिवेदअं विसज्जइस्ससि मा एदं विसुमरिस्ससि । (१२७)

कण्व ॥ वत्से नेदं विस्मरिष्यामि । (१२८)

---

(१२२) गङ्ग इति । हलेत्यादि । अयि एषा हयोरपि युवयो र्हस्ते निक्षेप । रेषा माधवी । निक्षेपो निधिर्न्यासः ॥

(१२४) सख्याविति । अथमित्यादि । अयं जन इदानीं कस्य हस्ते समर्पितः । अयमित्यात्मानं निर्दिशति । युगपदेव हे आत्मानमात्मानं निर्दिशतीत्ययमित्येक-वचनम् । वाष्पमस्रु ॥

(१२५) कण्व इति । रुदितेनेत्यलमर्थेन तृतीया । मङ्गलतूर्यये ॥

(१२६) इतीति । इति एवमुक्ते सतीत्यर्थः ॥

(१२७) गङ्ग इति । तादेत्यादि । तात एषा उटजपर्य्यन्तचारिणी गर्भं भारमन्थरा मृगवधूर्यदा सुखप्रसवा भविष्यति तदा मे कमपि प्रियनिवेदकं विसर्ज्ज-यिष्यसि मा एनं विस्मरिष्यसि । उटजपर्य्यन्ते उटजसीम्नि चरितं शीलं यस्या सा । गर्भस्य भारेण गौरवेण मन्थरा मन्दगामिनी । मन्दगौ तु मन्थर इत्यमरः । तदेत्यादि । तदा प्रियनिवेदकं प्रियवार्त्ताहरं कमपि सुहृदं मे मम सम्बन्धे विस-र्ज्जयिष्यसि प्रेरयिष्यसीत्यन्वयः । विस्मरिष्यसीति भाटोक्तेति विकल्पाद्रटौ ॥

(१२८) कण्व इति । सुगमम् ॥

यङ्क ॥ गतिभेद रूपयित्वा ॥ अम्मो को णु क्खु एसो पदक्कन्तो विअ से पुणो पुणो वसणन्ते सज्जदि । इति परावृत्यावलोकयति ॥ (१३९)

कण्व ॥ वत्से । (१४०)

यस्य त्वया व्रणविरोहणमिङ्गुदीना
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे ।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥ (१४१)

यङ्क ॥ वच्छ किं मं सहवासपरिच्चाइणीं अणुवन्धेसि णं अचिरप्पसूदोवरदाए जणणीए विणा जधा मए वड्ढिदोसि तधा दाणिं पि मए विरहिदं तादो तुसं चिन्ताइस्सदि ता णिउत्तम्ह ।

इति रुदती प्रस्थिता ॥ (१४२)

---

(१३९) यङ्क इति । गतिभेद गतिविशेषं । अम्मो इत्यादि । अम्मो को नु खल्वेष पदाक्रान्तइव मे पुनः पुनर्वसनान्ते सज्जते । तत्सदृश्यात् पितृकर्मगर्भमत्रो-द्योत्यते । वसनान्ते वल्कान्ते सज्जते लगति । वसन इत्येके पठन्ति । परावृत्य आवृत्य ॥

(१४०) कण्व इति । सुगमम् ॥

(१४१) यस्येति । त्वया यस्य मृगस्य शुभानां लक्षणैः शिखाभि र्विद्धे सति लक्षिते व्यधनीभिक्षतयोरपीति दीर्घः । व्रणविरोहणं व्रणविनाशि इङ्गुदीनां तापसतरूणां तैल मतृफलसम्भवस्नेहो न्यषिच्यत निषिक्त श्यामाकानां दृष्टधान्य'वयेमाणां मुष्टिभि परिवर्धितको ऽल्पपरिवर्धित सोयं पुत्रकृतक सन्नि-धनुच्चभूत । सामान्याधिकरण्येऽपि नित्यत्वात्तल विशेषणस्य प्राङ्निपात । तत्तस्मात् पुत्रकृतकः पुत्रसदृशे चाश्रमसम्भवे । पुत्रभेदे तत्रिभे लक्षिते सिद्धिति यद्वाक्षि । मृग को नव पदवीं पन्थानं न जहाति न त्यजति ॥

(१४२) यङ्क इति । वत्सेत्यादि । वत्स किं मां सहवासपरित्यागिनीमतु अम्माषि मम्बविरप्रसूतोपरतया जनन्या विना यदा यथा वर्धितोऽपि तथेदानी-

कण्व ॥ वत्से शार्ङ्गरवादिभिरयं रुद्धितेन स्थिरा भव दूतः पन्थानमालोकय । (१४३)

उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं
वाष्पं कुरु स्थिरतया शिथिलानुबन्धम् ।
अस्मिन्नलक्षितनतोन्नतभूमिभागे
मार्गे पदानि खलु ते विषमीभवन्ति ॥ (१४४)

शिष्यौ ॥ भगवन्नोदकान्तं स्निग्धोऽनुगम्यत इति श्रूयते तदिदं सरसीतीरम् अत्र नः सन्दिश्य प्रतिगन्तुमर्हसि । (१४५)

मपि मया विरहितं तात श्लथं चिन्तयिष्यति तद्विसर्जय । सहेति । सहगमनेकृत वासं परित्यक्तुं शीलं यस्या सा तथा । भुजमूलेत्यादि वक्षध्यात् क्षिपि चजो कगाविति जस्य ग । चतुरश्रासि चतुरासि । अतएवामर । दोषोत्पादेऽनुबन्ध स्यात् प्रकृत्यादिषु मत्वरे । सख्यानुयायिनि शिष्यौ प्रकृतस्यानिवर्तन इति । अचिरं मद्य प्रवृत्तं यया सा अचिरप्रवृता तथोक्ता मत्परता अचिरप्रवृतोपरता तथा । मया विरहितं मया त्यक्तम् । निवर्तस्व प्रतिगच्छ ॥

(१४३) कण्व इति । सुगमम् ॥

(१४४) उत्पक्ष्मेति । उद्गत पक्ष्म लोमावली ययो स्ते तयो नेत्रयो- रुपरुद्धा व्याहता वृत्ति विषयग्रहो दर्शनमिति यावत् येन स तथोक्तं वाष्पं नेत्राम्बु कुरु स्थिरतया स्थैर्येण शिथिलो मन्दीभूतो अनुबन्ध प्रवृत्ति र्यस्य स तथोक्तं कुरु किन्तु यस्मात् अलक्षितोऽदृष्टो नतोन्नतभूमिभागो निम्नोन्नतभूमिभागो यत्र स तस्मिन् अस्मिन् मार्गे ते तव पदानि चरणविन्यासा विषमीभवन्ति न समीभवन्ति स्खलन्तीति यावत् ॥

(१४५) शिष्याविति । ओदकान्तम् आ उदकान्तं उदकसमीपपर्यन्त गिति यावत् । अन्तं स्वरूपे नाशे ना न स्त्री भेदेऽन्तिके त्रिष्विति मेदिनी । स्निग्धः स्नेहाक्षदलन । श्रूयत इति । तथा च श्रुति । ओदकान्तं शिवं प्रोथमनुव्रजेदिति । नो अस्माकं सम्बन्धे । सन्दिश्य सन्देशं दत्वा ॥

कण्व ॥ तेन हीमां चीरिच्छायामाश्रयास ॥ (१४६)

सर्वे तथा नाटयन्ति । (१४७)

कण्व ॥ किन्नु खलु तत्भवतो दुष्मन्तस्य युक्तरूपं सन्देष्टव्यम् ।

इति चिन्तयति । (१४८)

चन ॥ सहि अम्हमपदे ण अत्थि कोवि चित्तवन्तो जो तए विरहिज्जन्तो ण ताम्मदि पेक्ख दाव । (१४९)

पुडइणिवत्तन्तरिअं वाहरिओवि ण ङ्क वाहरेइ पिअं ।
मुहउव्वूढमिणालो तङ्क दिहिं देइ चक्काओ ॥ (१५०)

---

(१४६) कण्वेति । चीरिच्छायां चीरिणो वृक्षस्य च्छायाम् । यद्यपि न्यग्रोधो डुम्बराश्वत्थपारिभद्रचपादपा । पञ्चैते चीरिणो वृक्षा क्षेमा त्वक पञ्चनक्षणमिति राज निर्घण्टस्तथापीह घनच्छायतया ग्रीष्मसमयौचित्यात न्यग्रोधमेव प्रतिपादयति चीरि शब्द । तथाचोक्तम् । अर्थात्प्रकरणाल्लिङ्गादौचित्यादेशकालत । शब्दार्थास्तु विभिद्यन्ते न रूपादेश केवलादिति ॥

(१४७) सर्वेइति । तथा चीरिच्छायोपवेशनम् ॥

(१४८) कण्वइति । युक्तरूपमनुरूपम । किन्नुखलुभ्यां सन्तिक मन्त्रोद्योत्यते । किमु मन्त्रणिकयोरिति मेदिनी ॥

(१४९) चनेति । सख्योत्यादि । सखि आश्रमपदे नास्ति कोपि चित्तवान् यस्त्वया विरह्यमाणो न म्लायति पेक्षस्व तावत् । चित्तवान् चेतन । विरह्यमाणस्त्यज्यमान । रहस्कर्तृयाग इति क्षपिकल्पद्रुम । म्लायति खिद्यति । पेक्षस्व दर्शयिष्यमानमिति यत्न ॥

(१५०) सङ्गमयति पुडेत्यादि । पुटकिनीपत्रान्तरिता व्याहृतोपि न हि व्याहरति प्रियं । यत्र यदृच्छयोत्कण्ठाल स्वयि दृष्टि ददाति चक्रवाकः । पुटकिन्या पद्मिन्या पत्रेणान्तरितं व्यवधिताम् । मालिकिनी पुटकिनी विघनाखिय पद्मिनीत्युत्पलिनी । व्याहृतोपि उक्तोपि प्रिययेतियोग । चक्रवाक प्रिया न व्याहरति प्रतिवदति । अपितु यत्र यदृच्छ इत्र कृणाल येन स तथोक्त सन् स्वयि दृष्टि ददाति स्वामीक्षते । इयं गाथा । सङ्गमन्त प्रागुक्तम् ॥

कण्व ॥ वत्स शार्ङ्गरव इति त्वया मद्वचनात् स राजा यक्षतलां पुरस्कृत्याभिधातव्यः । (१५१)

शार्ङ्ग ॥ आज्ञापयतु भवान् । (१५२)

कण्व ॥

अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलस्यात्मन-
स्तय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिञ्च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतःपरं न खलु तत् स्त्रीबन्धुभिर्याच्यते ॥ (१५३)

शार्ङ्ग ॥ गृहीतोऽयं सन्देशः । (१५४)

---

(१५१) कण्व इति । पुरस्कृत्य अग्रेकृत्वा व्यस्यन्यनुकारेति समासस्तेन क्त्वाचो यप् । मद्वचनात् मदुक्ततयेत्यर्थः । अभिधातव्यो वक्तव्यः ॥

(१५२) शार्ङ्ग इति । सुगमम् ॥

(१५३) अस्मानिति । अस्मान् संयमधनान् संयमस्तप एव धनं येषां ते तथोक्तान् । तपःप्रभाविन इति यावत् । साधु विचिन्त्य सम्यगवधार्य एतेनावज्ञाकोपत्वमात्मन प्रकटितं । तथा आत्मन स्वस्य कुलं वंशञ्च उच्चैर्मंहत् अजातदोषलेशमितियावत् । महत्य उच्चैरित्यमरः । विचिन्त्य । अन्यथा पक्षपातितादोषप्रसक्तिरिति भावः । तथा त्वयि अस्याः शकुन्तलाया स्ता माक्षाच्चादनुभूता स्नेहप्रवृत्तिं प्रणयपातं कथमपि केनापि प्रकारेण अबान्धवकृता बान्धवजनैरजनिताञ्च विचिन्त्य । अन्यथा [illegible] स्नादित्याशयः । इयं शकुन्तला दारेषु पत्नीषु मध्ये सामान्यप्रतिपत्तिपूर्वकं [illegible]धपूर्वकम् । प्रतिपत्तिः प्रवृत्तौ च प्रागल्भ्ये गौरवेपि च । सम्प्राप्तौ च प्रबोधे च पदप्राप्तौ च योषितीति मेदिनी । त्वया दृश्या द्रष्टव्या । ऋदुडत्वात् क्यप् । अत परमितोऽधिकं भाग्यायत्तं दैवायत्तं तत् खलु स्त्रीणा बन्धुभिः पितृादिभिः नं याच्यते अभ्यर्थ्यते । इतोऽधिकार्थं नाभ्यर्थये इति भावः ॥

(१५४) शार्ङ्गेति । गृहीतो विदितः । सन्देशः संवादः ॥

कण्व ॥ शकुन्तलां विलोक्य ॥ वत्से त्वमिदानीमनुशासनीयासि वनौकसोऽपि वयं लोकज्ञा एव । (१५५)

शार्ङ्ग ॥ भगवन् न खलु कश्चिदविषयो नाम धीमताम् (१५६)

कण्व ॥ सा त्वमितः प्रतिगृहं प्राप्य । (१५७)

गुरूंस्तव गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥ (१५८)

---

(१५५) कथ्व इति । अनुशासनीया उपदेश्या । अदृष्टबध्वाधारस्य ब्रह्मचारिकुलपतेः कथं वधूपदेशपरिज्ञानमित्यत आह वनौकस इति । वनमेव ओकः यद्वा येषां ते तथोक्ताः । लौकिकाचारमपश्यन्तोपीत्यर्थः । लोकज्ञा लौकिकाचारं जानीम एव । यौक्तेतिशब्दहेतुरिति भावः ॥

(१५६) शार्ङ्गेति । न खलु नैव । अविषयो अज्ञातः । विषयो यस्य यो ज्ञात इत्यर्थः । धीमता बुद्धिप्रधानिगताम् । तथाच धीमन्तो नाम बुद्धिबलेनैव सर्वंवस्तुभवन्तीति भावः ॥

(१५७) कण्व इति । सा गौतमी त्वम् । इतः आश्रमात् । प्राप्येति लौकीय-क्रियाभिरन्वितम् ॥

(१५८) गुरूंश्चेति । गुरून् गुरुजनान् श्वशुरादीन् शुश्रूषस्व परिचर । शृणोतेः क्यप् । घोऽन्तेति सूत्रात्तिलोपः दीर्घः । शुश्रूषेत्यात्मनेपदम् । समान एक. पतिं यंस्या. सा सपत्नी । समाना. एकोऽर्थो यस्यास्तत्समर्थ. । समानैकपुत्रपितृकौरभ्रातृव्यश्च इति यत्प्रत्ययनिपातनात् यत्वु. पत्न्यादेशः । ज्योतिर्जनपदेति समानस्य स । सपत्नी चासौ जनश्चेति सपत्नीजनो भर्तृदारान्तरं तस्मिन् प्रियसखा हृत्तिमाचारं कुरु । विप्रकृतापि निकृतापि तिरस्कृतापीति यावत् । निकारो विप्रकार एवा दिगणत्र । भर्त्रेतिशेष । रोषणतया क्रुद्धतया भर्तुः पत्युः प्रतीपं पराङ्मुखं वाममाचारं मा । प्रतिमोन्य परा-ङ्मुखे । मामान्तनो स्त्रीपतिरूपं भागे इति यद्वाधि । मास्मगम न याहि । मास्म

गौतमी वा किं मन्यते । (१५९)

गौत ॥ एत्तिओ क्खु वहूजणे उवदेसो । जादे एदं क्खु हिअए करेहि मा विसुमरिस्ससि । (१६०)

कण्वः ॥ वत्से एहि परिष्वजस्व मां सखीजनञ्च । (१६१)

यकु ॥ ताद इदो ज्जेव किं पिअसहीओ णिउत्तिस्सन्ति ।(१६२)

कण्व ॥ वत्से इमे अपि प्रदेये तन्न युक्तमनयोस्तत्र गन्तुं त्वया सह गौतमी गमिष्यति । (१६३)

साधञ्च वारणे इत्यमरः । अमेति मागधस्यापि यङ्णाचामागमः । तथा भोगेषु सुखेषु । भोगः सुखे स्त्रादिभुजाविति यादवः । अनुत्सेकिनी अनुत्सृष्टाङ्गिनी सती परिजने परिचारकजने भूयिष्ठं बहुतरं दक्षिणा सरला भव । दक्षिणे सरलोदारावित्यमरः । एवमनेन प्रकारेण युवत्यः प्रमदाः । प्रमदा चेति विज्ञेया युवतिश्च तथा स्मृतेति भागुरिः । दक्षिणस्याः गेहकार्यैकुशलाया पदं व्यवसायं यान्ति । दक्षिणो क्षिया । भार्यायाञ्च गेहकार्यैकुशलायामिति शब्दाब्धिः । वामा एतद्विपरीताचारिण्यः कुलस्य आधयो व्यसनभूता भवन्तीतिशेषः । आधि र्मानसपीडायां प्रत्याधायाञ्च बन्धके । व्यसने चाप्यधिष्ठान इति विश्वः । अत्र दक्षिणीपदं यान्तीति साधर्म्येण वामा इत्यादि वैधर्म्येणार्थान्तरन्यासोलङ्कारः । तदुक्तं प्रकाशे । सामान्यं वा विशेषो वा तदन्येन समर्थ्यते यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वेति । वृत्तं शार्दूलविक्रीडितम् ॥

(१५९) गौतमीति । किं मन्यते गौतम्या किं मतमित्यर्थः ।

(१६०) गौतेति । एत्तिअमित्यादि । एतावान् खलु वधूजने उपदेशः । जाते एतत् खलु हृदये कुरु मा विस्मरिष्यसि । वधूजने नवोढस्त्रीजने । विधू-स्नुषानवोढस्त्रीभार्याः शब्दाङ्गनासुषेति विश्वः । एतदुपदेशम् । हृदये कुरु धारय ॥

(१६१) कण्व इति । परिष्वजस्व आलिङ्ग । स्वनृज दनुभ्येति न खोप ।

(१६२) यकु इति । तादेत्यादि । तात इत एव किं प्रियसख्यौ निवर्त्तिष्येते । निवर्त्तिष्येते प्रतिगमिष्यतः ॥

(१६३) कण्व इति । प्रदेये प्रदानार्हे अनूढे इति यावत् ॥

शङ्ग ॥ पितरङ्कमारोप्य ॥ कथं दाणिं तादस्स अङ्काओ परिब्भट्ठा मलअपव्वदादो उम्मूलिदा चन्दनलदा विअ देसन्तरे जीविदं धारइस्सं । (१६४)

कण्व ॥ वत्से किमेवं कातरासि । (१६५)

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैरस्य प्रतिक्षणमाकुला ।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ॥ (१६६)

---

(१६४) शङ्ग इति । अङ्कादङ्कम् । उत्सङ्गचिह्नयोरङ्क इत्यमरः । आरोप्य आलिङ्ग्य । कथमित्यादि । कथमिदानीं तातस्याङ्कात्परिभ्रष्टा मलयपर्वतादुन्मूलिता चन्दनलतेव देशान्तरे जीवितं धारयिष्यामि । अङ्कात् क्रोडात् । परिभ्रष्टा च्युता । उन्मूलिता उत्पाटिता । धारयिष्यामि अहमितिशेषः । चन्दनलतापि मलयादन्यत्र नीता न जीव तीति प्रसिद्धिः ॥

(१६५) कण्व इति । किं कथम् । कातरा अधीरा ॥

(१६६) अभीति । अभिजनवतः कुलप्रशस्तिमतः ख्यातिमतो वा । अभिजनः कुले ख्यातावितिविश्वः । भर्तुर्दुष्मन्तस्य श्लाघ्ये गौरविते । गौरवितात्कार्यमिश्र श्लाघ्यात्तत्प्रभवत्वेन इति विकल्पेयम् । गृहिणीपदे गृहिणीव्यवसाये स्थिता वर्त्तमाना तथा अस्य भर्तुर्निभत्वेन सम्मत्या गुरुभि र्महद्भि । गुरुर्महति चान्यवदितिविश्वः । कृत्यैः कार्यैः प्रतिक्षणं क्षणे क्षणे आकुला व्यग्रा च सती । व्यग्रे त्वप्रयुक्ताकुलावित्यमरः । प्राची पूर्व्वा दिक् । प्राच्यप्राची प्रतिच्यग्रा पूर्व्वदक्षिणपश्चिमा इत्यमरः । पावनं पवित्रताकारणमर्कं दिवाकरमिव । तथाच पवित्रताकारणाय नमः शुद्धात्मने नम इति कृत्याधिकारे विष्णुपुराणम् । अचिरात्प्रसवनं पवित्रम् । अस्मिंस्तु पक्षे अप्रसवो न विवक्षितः । तनयं पुत्रं प्रसूय उत्पाद्य हे वत्से त्वं मम विरहजां मत्परित्यागभवां शुचं शोकम् । अन्यशोको तु शुक् स्त्रियामित्यमरः । न गणयिष्यसि नानुभविष्यसि । अत्रोन्मालङ्कारः । इदं हरिणी नाम वृत्तम् । लक्षणन्तूक्तम् ॥

शकु ॥ पितुः पादयोः पतित्वा ॥ तात वन्दामि । (१६७)

कण्व ॥ वत्से यदहमिच्छामि तदस्तु ते । (१६८)

शकु ॥ सख्यावुपगम्य ॥ सहीओ एध दुवेवि मं समं जेव परिस्व-जध । (१६९)

सख्यौ ॥ तथा कृत्वा ॥ सहि जइ णाम सो राएसी पच्चहिणान-मन्थरो भवे तदो से दूमं अत्तणो णामधेअङ्कदं अङ्गुलिअअं दंसइस्सामि । (१७०)

शकु ॥ इमिणा वो सन्देसेण कम्पिदं मे हिअअं । (१७१)

सख्यौ ॥ सहि मा भाआहि सिणेहो पावमासङ्कदि । (१७२)

आर्द्धं ॥ भगवन् दूरमधिरूढः सविता तत्त्वरयात्मभवतीम् ।(१७३)

---

(१६७) शकुरिति । सुगमम् ॥

(१६८) कण्व इति । यदिच्छामि अभीष्टमित्यर्थः ॥

(१६९) शकु इति । सख्यावुपगम्य सख्योरन्तिकं गत्वा । एधेत्यादि । एतं वै अपि मा समेव परिष्वजेथाम् । एत आगच्छतम् । इम इह । परिष्वजेथामालिङ्गतम् ॥

(१७०) सख्याविति । तथाज्ञत्वा युगपत्परिष्वज्य । सहीत्यादि । सखि यदि नाम स राजर्षिः प्रत्यभिज्ञानमन्थरो भवेत् तदास्येदमात्मनो नामधेयाङ्कितमङ्गुलीयकं दर्शयिष्यसि । यदि नाम यदिवा । नाम विकल्पे । नाम कोपेऽभ्युपगमे विस्मये स्मरणेऽपि च । सम्भाव्यानुत्साहाक्षेपविकल्पेऽपि च दृश्यते इति मेदिनी । प्रत्यभिज्ञाने सेयमिति ज्ञाने मन्थरो विलम्बीभवेत् । नामधेयाङ्कितं नामाक्षराङ्कितम् ॥

(१७१) शकु इति । इमिणेत्यादि । अनेन वा सन्देशेन कम्पितं मे हृदयम । वा युवयोः । सन्देशेन उपदेशेन ॥

(१७२) सख्याविति । सहीत्यादि । सखि मा बिभीहि स्नेह पापमाशङ्कते । पाप-माशङ्कते अनिष्टसंशयमारोपयति ॥

(१७३) आर्द्धमिति । सविता सूर्यं दूरमुदयस्थानादनल्पान्तरं व्योम अधिरूढ आक्रान्त-वान् । त्वरय त्वरायै प्रेरय । , घटादिसत्वात् हुस्व ॥

शकु ॥ भूयः पितरमाश्रित्य आत्ममाभिमुखीभूय च ॥ ताद कदा णु खलु भूओ तवोवणं पेक्खिस्सं । (१७४)

कण्वः ॥ वत्से । (१७५)

भूत्वा चिराय सदिगन्तमहीसपत्नी
दौष्मन्तिमप्रतिरथं तनयं प्रसूय ।
तत्सन्निवेशितधुरेण सहैव भर्त्रा
शान्तेय करिष्यति पदं पुनराश्रमेऽस्मिन् ॥ (१७६)

गौत ॥ जादे परिहीअदि दे गमणवेला ता णिउत्तावेहि पिदरं अधवा चिरेणवि एसा ण णिउत्तइस्सदि ता णिउत्तदु भवं । (१७७)

---

(१७४) शकु इति । भूयः पुनः । ताटेत्यादि । तात कदा नु खलु भूयस्तपोवनं प्रेक्षिष्ये । खलुजिज्ञासायाम् ॥

(१७५) कण्व इति । सुगमम् ॥

(१७६) भूत्वेति । चिराय बहुनू कालानू व्याप्य दिगन्ता दिगन्ता स्तैः सह वर्त्तमाना सदिगन्ता निरवग्रहेति यावत् । साचासौ महीचेति सदिगन्तमही तस्याः सपत्नी एकभर्तृका भूत्वा तथा दुष्मन्तस्यापत्यं दौष्मन्तिम् । अदन्तादपत्ये ञिणः । अप्रतिरथमेकाविपगिति यावत् तनयं पुत्रं प्रसूय तस्मिं स्तनये सन्निवेशितः समर्पितो धूः साम्राज्यभारो येन स तेन । धूस्तु स्याद्धारविन्नयो रित्येकाक्षरकोषः । धुरोऽनक्षस्या इत्यत्ययः । भर्त्रा दुष्मन्तेन सहैव शान्त्यै गोत्राय पुनरस्मिन्नाश्रमे पदं स्थानं करिष्यसि । स्थानमस्याश्रमोयम् । यथाह विष्णुपुराणम् । स्वयंभरिष्यतो राजन् क्षत्रक्षत्यो महाबलो । पुत्रस्तु भार्यां निक्षिप्य वनं गच्छेत् सहैव वेति । कूर्मपुराणञ्च । ये तु सम्यगिमं शास्त्रं विप्रमाश्रयत्यग्निपुञ्जनामकम् । ते विमन्ति पदमैश्वरं परं यान्ति चैव जगतोऽस्य संस्थितिमिति । वसन्ततिलकं नाम वृत्तमिदम् ॥

(१७७) गौतेति । ताते इत्यादि । ताते परिहीयते ते गमनवेला तस्त्रियतां त्वं पितरम् । अथवा चिरेणापीयं न निष्क्रमिष्यति तस्त्रियतां भवान् । परिहीयते स्वयमेव परिभ्रश्यते । क्रियायाः कर्मण्यत्वात् कर्मकर्तृयोरात्मनेभाषा । तातप्रियाया कद-

कण्व॰ ॥ वत्से उपरुध्यते मे तपोऽनुष्ठानम्। (१७८)

शक्र ॥ तपश्चरणव्यापारेण निरुत्कण्ठो तादो अहं उण उक्कण्ठा-आदूणी संवुत्ता। (१७९)

कण्व ॥ वत्से मामेवं जडीकरोषि। (१८०)

नि श्वस्य। (१८१)

अपयास्यति मे शोकः कथं नु वत्से त्वया रचितपूर्व्वम्।
उटजद्वारविरूढं नीवारबलिं विलोकयतः ॥ (१८२)

यत्नतया महर्षिमेव स्वयं निवर्त्तने प्रवर्त्तयति यथवेति। चिरेणापि विलम्बेनापि॥ शक्र। भूय॰ पितुरङ्कमास्थिय। तवश्चरणपीडिदं तादसरीरं। ता मा अदिमेत्तं मम किदे उक्कण्ठिदुमिति क्वचित् पाठ॰। तत्र तपश्चरणपीडितं तातशरीरं। तदेव मत्-मार्त्तं मम कृते उत्कण्ठेत्यर्थ।

(१७८) कण्व इति। मम तपसोवेधकर्म्मणोऽनुष्ठानमुपरुध्यते व्याहन्यते॥

(१७९) शक्र इति। तवेत्यादि। तपश्चरणव्यापारेण निरुत्कण्ठस्तात अहं पुन रुत्कण्ठाभागिनी संवृत्ता। तप इति। तपोनुष्ठानव्यापारेणेत्यर्थं। निरुत्कण्ठो निश्चिन्त। अहं पुनरुत्कण्ठा। उत्कण्ठा तातादर्शनजनितमनोवेदना। रागे त्वलब्ध-विषये महती वेदना हृदया। सयोगिनी तु गात्राणा तामुत्कण्ठां विदुर्बुधा इत्यर्थः॥

(१८०) कण्व इति। एवमनेन प्रकारेण मा जड़ीकरोषि जड़िमानं लम्भयसि। जड़िमानमाह। दृष्टानिष्टापरिज्ञानं यत्र मन्ये त्वदुत्तरम्। दर्शनस्पर्शनाभावो जड़िमा सोभिधीयत इति॥

(१८१) निश्वस्येति। दीर्घमिति शेष॰॥

(१८२) उपेति। तु भो वत्से त्वया रचितपूर्व्वं विहङ्गमानां भोजनाय स्थापितपूर्व्वं साधुना उटजद्वारे पर्णशालाया उपतो विरूढमङ्कुरितम्। विरूढोऽङ्कुरिते जाते इति मेदिनी। नीवारबलिं नीवारस्वरूपोपहारं विलो-कयतः पश्यतो मे कथं शोकोऽपयास्यति निवर्त्तिष्यते। कथमपि न तस्यैव स्वतः-सारकत्वादिति भावः। इयं भार्य्या॥

शक्र शिवास्ते सन्तु पन्थानः । (१८३)

इति निष्क्रान्ता शकुन्तलया सह गौतमीशार्ङ्गरवयोरन्तर्हिताः । (१८४)

सख्यौ ॥ चिरं विचिन्त्य सकरुणम् ॥ हद्धी हद्धी अन्तरिदा सउन्तला वणराइहिं । (१८५)

कण्व ॥ मनि श्वासम् ॥ अनसूये प्रियंवदे गता वा सङ्गचरी निगृह्य शोकावेगं मामनुगच्छतम् । (१८६)

सर्वे मस्मिता । (१८७)

उभे ॥ ताद सउन्तलाविरहिदं सुण्णं विअ तवोवणं पविसह्म । (१८८)

कण्व ॥ स्नेहप्रवृत्तिरेवंदर्शिनी । (१८९)

---

(१८३) शक्रेति । शिवा मङ्गलदायिन ॥

(१८४) इतीति । इति एव शब्दे ॥

(१८५) सख्याविति । सकरुण करुणरस श्रितम् । हद्धीत्यादि । हाधिक् हाधिक् अन्तरिता शकुन्तला वनराजिभि । शकुन्तला वनराजिभि र्वनश्रेणी-भिरन्तरिता अन्तर्धापिता ॥

(१८६) कण्व इति । मनि श्वासं सदीर्घश्वासम् । वा शुचयो । सङ्गचरी सखी । निगृह्य दमयित्वा । शोकावेग शोकवेगम् ॥

(१८७) सर्वे इति । सर्वे कण्वोऽनुसूया प्रियंवदा च । पुंसोत्व प्राधान्यात् पुंस्त्वम् । प्रधानेन हि व्यपदेशा भवन्तीति न्यायात् ॥

(१८८) उभे इति । तादेत्यादि । तात शकुन्तलाविरहितं शून्यमिव तपोवनं प्रविशाम । शकुन्तलाविरहित शकुन्तलया हीनम् । शून्यमिव शून्यम् प्रतीयमानम् ॥

(१८९) कण्व इति । स्नेहप्रवृत्ति स्नेहप्रसङ्ग । प्रवृत्तिस्तु गमने स्या दुदन्ते च प्रवर्तने इति मेदिनी । एव दर्शयतीत्येवंदर्शिनी ॥

सविमर्शं परिक्रम्य ॥ हन्त भोः शकुन्तलां प्रतिगृह्य विसृज्य लब्ध-
मिदानीं स्वास्थ्यम् । कुतः । (१९०)
न्यर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः ।
जातोऽस्मि सद्योविशदान्तरात्मा चिरस्य निक्षेपमिवार्पयित्वा ॥ (१९१)

इति निष्क्रान्ताः सर्वे । चतुर्थोऽङ्कः । (१९२)

---

(१९०) सविमर्शमिति । सवितर्कं विचारेण सङ्गेति यावत् । वितर्कः स्यादुच्चयनं परामर्शो विमर्शनम् । अध्याहारस्तर्क इह इति क्षेमचन्द्रः । हन्नकारो हर्षद्योतकः । विसृज्य प्रेष्य ॥ स्वास्थ्यं प्रकृतिस्थता । हेतुगर्भत्वादयति कुत इति ॥

(१९१) न्यर्थ इति । कन्या व्ययः कन्यात्मकं धनं परकीयः परस्वामिक एव । व्यवश्यदातव्यत्वेनोपदेशादन्यदीयत्वस्य भावित्वेऽपि भूतवदुपचारेण कन्यासामान्यस्य परकीयत्वोक्तिः । यद्वा तां कन्यां परिग्रहीतुः स्वीकर्तुः सम्बन्धे समेत्य विसृज्य । व्यवहार्यन्यकर्तृव्यस्वीकारः प्रतिग्रहः । परिग्रहस्वाधिकस्वीकारस्य वस्तुनः स्वयं स्वीकारः । यतोऽत्र युक्तः परिग्रहेः प्रयोगः । नन्वस्यामपि स्वीकारात् प्राक् प्रहर्षेः स्वामित्वात् स्वाधिकोऽस्तु दानः स्वीकारः स्वत्वस्य स्वत्वान्तरविरोधित्वादिति चेन्न कन्यायामस्युः परिणेतृसजातीयस्वत्वाभावात् स्वजातीयस्वत्वस्य च सजातीय-स्वत्वान्तरस्यैव प्रतिबन्धकत्वस्य निबन्धृभिरङ्गीकृतत्वात् । अतएव अनन्यपूर्विकां कान्तामवरुन्ध्यां यवीयसीमिति वैवाहिकविधिरुपपद्यते । चिरस्य निक्षेपं चिरन्याशी-कृतम् । चिराय चिरतरायेत्यादयो चिरार्थका इत्यमरः । अर्थमर्पयित्वा दत्त्वैव सद्य सपदि विशदो निर्मलो व्यक्तरात्मा यस्य स तथोक्तो जातोऽस्मि । व्यक्तोक्तेश्चाच्छहारः । वृत्तमुपजातिनामैव ॥

(१९२) इतीति । व्यङ्कः परिच्छेदः ॥

इति श्रीकृष्णनाथपण्डितविरचितायामभिज्ञानशकुन्तलटीकायां
प्रवेशिकाख्यायां चतुर्थाङ्कविवरणम् ॥

अभिज्ञानशाकुन्तलम् ।

पञ्चमोऽङ्कः ।

ततः प्रविशति कञ्चुकी । (१)

कञ्च, ॥ अहोवत कीदृशो वयोवस्थामापन्नोऽस्मि । (२)

आचार इत्यधिकृतेन मया गृहीता
या वेत्रयष्टिरवरोधगृहेषु राज्ञः ।
काले गते बहुतिथे मम सैव जाता
प्रस्थानविक्लवगतेरवलम्बनाय ॥ (३)

---

(१) तत इति । कञ्चुं किलक्षणमाह भरत । अन्तःपुरचरो वृद्धो विप्रो-गुण्यगर्वान्वित । सर्वकार्यार्थकुशल कञ्चुकीत्यभिधीयते । जरावैक्लव्ययुक्तेन विशेषणेन कञ्चुकीति ॥

(२) कञ्चु इति । अहोवतेत्याद्या अविनय. खेदो द्योत्यते । वयोऽवस्थां वयस कालकृतविशेषम् । आपन्न प्राप्त । अस्मि अस्मीत्यमर ॥

(३) आचार इति । राज्ञोऽवरोधगृहेषु अन्तःपुरगृहेषु अधिकृतेना-ध्यक्षेण । अध्यक्षाधिकृतौ समावित्यमर । अन्तर्वंशिकेनेति यावत् । अन्तः-पुरेत्यधिकृत इत्यादन्तर्वंशिको लभ्य इत्यमर । मया आचारोऽस्माकमय-माचार इति विचिन्त्य या वेत्रयष्टि वेत्रदण्डो गृहीता धृता । अथ यष्टिश्च शक्ती च यष्टिर्वेणौ च यष्टिका । दण्ड. काण्डोपि स्यगुड पलाशो दण्डकापि वेति मेदिनीकरौ । बहुतिथे बहुनाम्नूरणे । बहुगणपूगसघातोक्तिरयडिति तिथट् । काले गते इति चैव आचारगृहीतैव वेत्रयष्टि प्रस्थाने यात्राया

यावदभ्यन्तरगताय देवाय स्वमनुष्ठेयमकालक्षेपार्हं निवेदयामि । (४)

लोकमन्तरं गत्वा ॥ किं पुनस्तत् । (५)

विचिन्त्य ॥ यां ज्ञातं कण्वशिष्यास्तपस्विनो देवं द्रष्टुमिच्छन्ति भो चित्रमेतत् । (६)

क्षणात् प्रबोधमायाति लङ्घ्यते तमसा पुनः ।
निर्व्वास्यतः प्रदीपस्य शिखेव जरतो मतिः ॥ (७)

विक्लवा विक्लता गतिर्यस्य स तस्य मम अवलम्बनाय आश्रयाय जाता । देहदौर्ब्बल्यादिति भावः ॥

(४) यावदिति । अभ्यन्तरगतायान्तःपुरस्थाय । देवाय राज्ञे । राजा भट्टारको देव इति भाषोक्तावसरः । स्वमात्मीयम् । अनुष्ठेयं वक्तव्यम । अकालक्षेपार्हं विलम्बानर्हम् ॥

(५) लोकमिति । लोकमल्पम् अन्तरमवधिम् । किं पुनस्तत् तत् अनुष्ठेयं पुनः किम् । एतेन विस्मृतिरूपणम् ॥

(६) विचिन्त्येति । स्मृत्वेत्यर्थः । यामितिस्मृतिं द्योतयति । या ज्ञाने निश्चयोस्मृत्योरिति मेदिनी । ज्ञातं कृतम किमित्याह कण्वेत्यादि । भो कार्यानधिकारामन्त्रणम् ॥ एतत् क्षणादिस्मरणं स्मरणञ्च ॥

(७) क्षणादिति । जरतो वर्षीयसो मतिर्बुद्धिः । वर्षीयान् दशमो ज्यायान् जीमो जीर्णो जरत्पीत्यमरः । निर्व्वास्यतो निर्व्वाणं गमिष्यत प्रदीपस्य शिखेव क्षणात् प्रबोधं परिस्फुरणमायाति प्राप्नोति पुनस्तमसा मोहादिभीरुकगुणविशेषेण पक्षे अन्धकारेण लङ्घ्यते आक्रियते । अत्रोपमालङ्कारः । तदुक्तं चन्द्रालोके । उपमा यत्र साधर्म्यमौत्कर्षमिति द्वयोरिति ॥

परिक्रम्यावलोक्य च ॥ एष देवः । (८)

प्रजाः प्रजाः स्वा इव तन्वयित्वा
(९) निषेवते चात्तमना विविक्तम् ।
यूथानि सञ्चार्य रविप्रतप्तः
यीतं गुहास्थानमिव द्विपेन्द्रः ॥ (९)

भोः सत्यं धर्म्मकार्य्यमनतिपात्यं देवस्य तथापि शङ्कितवानस्मि इदानीमेव धर्म्मासनादुत्थिताय देवाय करवधियागमनं निवेदयितुम् । अथवा कुतो विश्रामो लोकपालानाम् । तथाहि । (१०)

---

(८) परीति । एष समीपतर इत्यर्थः ॥

(९) प्रजा इति । स्वा स्वीया प्रजाः सन्तानेरिव प्रजा विषयवासिनो जनान् । प्रजा इति सन्तानो जन इत्यमरः । तन्वयित्वा धारयित्वा । तन्वि इङ धारण इति कविकल्पद्रुमः । धारणं न्यायपथस्थापनम् । सत्त्वा तु मर्य्यादा धारणा स्थितिरित्यमरः । यात्त यातिमान् मनो यस्य स तथोक्त एष देवो यूथानि हस्तिना कुलानि । सजातीयं कुलं यूथमित्यमरः । सञ्चार्य चारयित्वा रविप्रतप्तो भास्करकरसन्तप्तो द्विपेन्द्रो हस्तिपतिर्यं धनाथ इति यावत् । दन्ती दन्तावलो हस्ती हिरदोऽनेकपो द्विप इत्यमरः । यीतं यीतलं गुहास्थानं पर्व्वतविलमद्देशमिव विविक्तं विजनं निषेवते अधिवसति । अत्रोपमालङ्कारः । वृत्तञ्चोपजातिरिति ॥

(१०) भोरिति । देवस्य राज्ञो धर्म्मकार्य्यं धर्म्मार्थं कर्म्म । अनतिपात्यमनतिक्रमणीयमिति सत्यम् । सत्यमित्यङ्गीकारार्थमव्ययम् । सत्यमस्त्रेऽभ्युपगमे इति मेदिनी । तथापि इदानीमधुनैव धर्म्मासनात् धर्म्माधिकरणासनादुत्थिताय देवाय करवध्यि यागमनं निवेदयितुं विज्ञापयितुं शङ्कितवान् भीतवानस्मि । अहो विस्मये आह अथवेति । लोकपालानां प्रजापालानाम् ।

भानुः सप्तसप्तियुक्तत्वरथ एव
रात्रिन्दिवं गन्धवहः प्रयाति ।
शेषः सदैवाहितभूमिभारः
षष्ठांशवृत्तेरपि धर्म एषः ॥ (११)

इति परिक्रामति । (१२)

नन्द प्रविशति राजा विदूषको विभवश्च परीवारः । (१३)

राजा । अधिकारखेद मिदानीम् ॥ सूर्यः प्रार्थितमधिगम्य सुखी सम्पद्यते जन्तुः राज्ञान्तु चरितार्थता दुःखोत्तरैव । श्रुतः (१४)

---

(११) भानुरिति । भानुः सविता सप्तसप्तियुक्तो यानवरो रथो यस्य स तथोक्तः । एतत्तमेव गच्छति न विश्राम्यतीत्यर्थः । तथा गन्धवहो वायुः रात्रिञ्च दिवा च द्वयोः समाहारो रात्रिन्दिवम् । निपातनात् सिद्धम् । षष्ठोंऽशस्तिस्तस्यर्थः । प्रयाति षष्ठति । तथा शेषोऽन्यैः सदैः आहितो अर्पितो भूमे र्भारो यस्य स तथोक्तः । एतत्तमेव भूभारं वहतीति भावः । सहस्र षष्ठांश मजोमादित्यद्रव्यजातानां षष्ठो भागो दृत्ति रार्जीवो यस्य स तस्य राज्ञोऽपि एष एवंविधस्वरूपो धर्मः । अत्रैकदेशविवर्तिरूपकमाक्षेपालङ्कारः । यद्यपि सामान्यो धर्मो विशिष्यशब्दैः पृथक् पृथक् निर्देशात् प्रतिवस्तूपमालङ्कारः । यद्यपि सामान्यरूपा । तदुक्तमग्रे । प्रतिवस्तूपमा तु सा । सामान्यस्य विशेषेण यत्र साक्ष्यद्वये स्थितिरिति । इदमिन्द्रवज्राख्यम् वृत्तम् । तदुक्तम् । यदा स्थिरौ षट्कलयौ गुरू तदा सामिन्द्रवज्रा भवतेऽक्षरैर्दशेति ॥

(१२) इतीति । सुगमम् ॥

(१३) नन्द इति । विभवश्च ऐश्वर्यांशुगारात् ॥

(१४) राजेति । अधिकारखेदम् अधिकारात् स्थिरात् यो दैन्यम् तस्यो-त्थम् इत्यन्वयः । अधिगम्य लब्ध्वा । सम्पद्यते भवति । जन्तु रित्यस्यः ।

औत्सुक्यमात्रमवसादयति प्रतिष्ठा
क्लिश्नाति लब्धपरिपालनवृत्तिरेव ।
नातः श्रमापनयनाय यथा श्रमाय
राज्यं स्वहस्तधृतदण्डमिवातपत्रम् ॥ (१५)

नेपथ्ये ॥ वैतालिकौ ॥ जयति जयति देवः । (१६)

एकः ॥

स्वसुखनिरभिलाष खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते वृत्तिरेवंविधैव ।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम् ॥ (१७)

शन्तुजन्यशरीरिण इत्यमरः । परितार्थता प्रयोजनसिद्धिः राज्यलाभ इति यावत् । दे.खोत्तरा दुःखं परिपालनकष्टोत्तरत्व परत्वादेव यस्याः सा तथोक्तैव न सुखहेतुरित्यर्थः ॥

(१५) औत्सुक्येति । प्रतिष्ठा स्थातिरौत्सुक्यमात्रं विचारेऽस्मिन् लोक किं करयतीत्युत्सुक्यमात्रमवसादयति शमयति । लब्धस्य राज्यस्य परिपालनवृत्तिः पालनाचारः क्लिश्नात्येव पीडयत्येव यत स्वहस्तेन धृतो दण्डो यस्य तत् तथाभूतमातपत्रं छत्रमिव राज्यं यथा श्रमाय भवति तथा श्रमापनयनाय न । श्रान्तिश्रमापनयनायेति पाठे । यत इत्यध्याहार्यं श्रमस्यातिशयमनायेति व्याख्यातव्यम् । यथोपमालङ्कारः । वसन्ततिलकं वृत्तम् ॥

(१६) नेपथ्यइति । वैतालिकौ बोधकरौ । वैतालिका बोधकरा इत्यमरः । जयति उत्कर्षेण वर्त्तताम् । जेसुरन्यो ऽस्यन्योऽति वक्ष्यात्युपलिप् ॥

(१७) एक इति । वैतालिकयो रन्यतर इत्यर्थः । स्वसुखेति । त्वं स्वसुखात्मक सुखेषु निरभिलाषो निःस्पृहः सन् लोकहेतोः प्रजासुखहेतोः प्रतिदिनं दिनेदिने खिद्यसे खेदं गच्छसि अथवा ते एवंविधा एवमकारैव वृत्तिः स्थिति ।

द्वितीय० ॥

नियमयसि विमार्गप्रस्थितानात्तदण्डः
प्रथमयसि विवादं कल्पसे रक्षणाय ।
अतनुषु विभवेषु ज्ञातयः संविभक्ता-
स्वयि तु परिसमाप्तं बन्धुकृत्यं जनानाम् ॥ (१८)

विधा विधौ प्रकारे चेत्यमरः । सृष्टिस्तु निर्मितौ । स्वभावे चादि कथितेति मेदिनी । यत्र दृष्टान्तयति व्यनुभवतीति । तथाहि पादपो विटपी मूर्ध्वा यिख-रेण तीव्रं हु सहसुष्णपातमम् । उप्यंदत्तेवि नातपेऽति शिक्षाखड्गेव । यद्-मनति मत्यङ्गीकरोति गृह्णातीति यावत् छायया करणेन संश्रितानामात्मान-माश्रितानां परितापं सन्तापं शमयति नाशयति । यत्र दृष्टान्तोऽलङ्कार । उप-मानधर्मस्य क्रियायाश्च प्रतिबिम्बनात् । तदुक्तं प्रकाशे दृष्टान्त पुनरेतेषां धर्मैर्धां प्रतिबिम्बनादिति । वृत्तं मालिनी नाम ॥

(१८) द्वितीय इति । वैतालिकयोरिति शेष । नियमयसीति । त्वमात्तदण्डो गृहीतदण्डविधि. त्वं विमार्गे विपथे व्यतिष्ठितकर्मणीत्यर्थः । प्रस्थितान् गच्छतः प्रवृत्तानिति यावत् । नियमयसि विपथप्रवृत्ते त्वगयसि तथा विवाद व्यवहारं शमयसि निष्पादयसि विवादो व्यवहार स्यादित्यमर । तथा रक्षतीति रक्षण' । नन्द्यादित्वाद्न । रक्षणाय प्रजाना पालकाय कल्पसे सम्पद्यसे रक्षणो भवती-त्यर्थः । छान्दसत्वात्तादर्थे चतुर्थी । विकारे सम्पद्यमानादभेदे इति वक्ष्यमाणत्वात्तुर्थी । विकारो न विव-क्षितः । ज्ञातयश्च दायादा व्यतनुषु व्यनल्पेषु विभवेषु धनेषु । अर्थो विभव धनोत्यमर । संविभक्ता विभागं गता । कर्तरि क्त । छन्दो वशात् इत्यङ्गेरन्य-स्यापि प्रयोगस्य इत्यभिधानात् । किन्तु जनाना बन्धुकृत्यं बन्धूचितं कर्म त्वयि परिसमाप्तं निर्वृत्तम् । न ते ज्ञातिषु तेषामराजत्वादिति भाव । एतेन तेभ्यो-ऽस्योत्कर्षख्यापनाद्राजानउत्साहयति । मालिनी नाम वृत्तमिदम् ॥

राजा । आकर्ण्यतां साश्चर्यम् ॥ एतेन कार्यानुशासनपरिश्रान्ताः पुनर्नवीक्रियन्ताः स्मः । (१९)

विदू ॥ विहस्य ॥ भोः गोविन्दारक्खिअ भणिदस्स विसभस्स किं परिस्समो एत्थदि । (२०)

राजा ॥ स्मितम् ॥ ननु क्रियतामासनपरिग्रहः । (२१)

उभौ । उपविशौ परिजनस्य यथास्थानं स्थितः ॥ (२२)

नेपथ्ये वीणाशब्दः ॥ (२३)

विदू ॥ कर्णं दत्त्वा ॥ भो वअस्स सङ्गीदसालब्भन्तरे कण्णं देहि सालत्तअमुद्धाए वीणाए सलसंजोओ उग्गिच्चदि जाणे तत्तभोदी हंसपदी वसमचिच्चं करेदि त्ति । (२४)

राजा ॥ तूष्णीमेव यावदाकर्णयामि । (२५)

कञ्चु ॥ विलोक्य ॥ अत्यासक्तो देवस्तदयसरं प्रतिपालयामि । एकान्ते स्थितः ॥ (२६)

नेपथ्ये गीयते ॥ (२७)

यं करोति । गृहीतस्य प्रेक्षणार्थंस्यगीतवाद्यरूपस्य गाढा दृढं गृहीतमाया । गीतवाद्यकृत्यत्वर्थं गार्द्धं लौल्यलिकश्च तत् । गृहीतं प्रेक्षणार्थं कार्यं यादृशोक्ते गार्द्धधर्मिका इति क्षेमचन्द्रः । तद्भ्यन्तरे तद्भ्यन्तरप्रति । कर्णं देहि तद्गतध्वनि-ग्रहणाय श्रोत्रं नियोजय । गाढेति । कार्यविशेषेण गीतस्य क्रियाविशेषमानं गाढ० । गीतवाद्ययोः साम्यं लयः । गाढ० कालक्रियामानं लयः साम्यमित्यमरः । साम्यं सुखाया निर्द्वीपायाः । शुद्धं खाद्यिषु केशे निर्द्वीपे च पवित्रे मेदिनी । गवाक्षोक्तं गृहीतदामोदरे । खञ्जितं गीतखेषु व्यक्तक्रमत्वमाधि-क्यम् । काकुस्वरः गिरं कम्पोल्लयस्थानविवर्जितम् । विस्वरं विषमस्थैर्य विच्छिन्नं विषमाहतम् । व्याकुलं गाढहीनत्व गाढहीनाधिकत्वमिति । स्वरसंयोगः स्वर-साम्यत्वः । जाने मन्ये इतीत्यत्रैव कर्मतदाख्यः । हुंकरणी देवीविशेषः । वर्षा गीतिक्रमः । भेदे गीतिक्रमे विले इति वर्षंशब्दार्थं क्षेमचन्द्रः । निषादादीनामारो-हावरोहक्रम इति यावत् । तस्य परिचयमभ्यासम् ॥

(२५) राजेति । तूष्णीमाव श्रोत्रीभव । श्रोत्रे च तूष्णीं तूष्णीकामित्यमरः । तूष्णीं गच्छ्य वर्त्यादिलाक्षुण्यव्यतुकारेति धातुना वर्षाशब्दोत्तरारोर्घो व्यवहित व्याख्यातार्थोत्यय । मत पृथक् पदम् । धर्मपरत्वेनानन्वयापत्तेः । यावत् यत्काल-मित्याद्य । आकर्णयामि शृणोमि यावत् पुरा भ्यां भव्ये इति भविष्यति को ॥

(२६) कञ्चु इति । अत्यासक्तः अन्यस्मिन् विषये क्षणमनोयोग । अवसर-मवकाशम् । प्रतिपालयामि प्रतीक्षे । एकान्ते निर्जने । एकान्तं क्लीवमत्यर्थंनिर्जने नद्युते त्रिलिङ्गे शब्दार्थे ॥

(२७) नेपथ्य इति । गीयते कञ्चुकोत्थितस्वरैरिति शेष ॥

राजा । आकर्ण्यतां साश्चर्यम् ॥ एतेन कार्य्यानुशासनपरिश्रान्ताः पुनर्नवीकृताः स्मः । (१९)

विदू ॥ विहस्य ॥ भोः गोविन्दारब्भत्ति भणिदस्स विसमस्स किं परिस्समो एत्थदि । (२०)

राजा ॥ सस्मितम् ॥ ननु क्रियतामासनपरिग्रहः । (२१)

उभौ । उपविशौ परिजनतो यथास्थानं स्थितः ॥ (२२)

नेपथ्ये वीणाशब्दः ॥ (२३)

विदू ॥ कर्णं दत्त्वा ॥ भो वअस्स सङ्गीदसालब्भन्तरे कस्सं देहि तालतअणुज्जाए वीणाए सलसंजोओ सुणिअदि जाणे तत्तभोदी हंसवदी वसन्तपरिचअं करेदि त्ति । (२४)

---

(१९) राजेति । साश्चर्यं सविस्मयम् । एतेन वाक्येन । कार्य्यानुशासनेन कर्त्तव्योपदेशेन परिश्रान्ता वयं पुनर्नवीकृता सान्तरागीकृताः स्म ॥

राजा ॥ श्रुतम् ॥ सकृत्कृतप्रणयोऽयं जन इत्यक्षरार्थः । तदहं देवीं हंसवतीमन्तरेण उपालम्भनमागतोऽस्मि सखे माधव्य मद्वचनादुच्यतां देवी हंसवती सम्यगुपालब्धोऽसीति । (२१)

विदू ॥ जं तवं आणवेदि । (२२)

उत्थाय ॥ भो वअस्स गहीदो तुए परकीएहि हत्थेहिं सिहण्डए अच्छभल्लो ता वीदराअस्स असरणअस्स णत्थि मे मोक्खो । (२३)

राजा ॥ सखे ! गच्छ नागरिकतया सान्त्वयैनाम् । (२४)

गृहीतो भवता अक्षरार्थः । अस्या गीतिकाया अक्षरार्थो वर्णार्थो भवता किं गृहीत किमवगत । अक्षरं ब्रह्मवर्णयोरिति विश्वः । अपि प्रश्नम् द्योतयति ॥

(२१) राजेति । सकृदेकवारं कृत प्रणय प्रेम्णि यस्मिन् स तथोक्तोऽयं जनो हंसवतीरूप । इत्यक्षरार्थ एव वर्णार्थः । हंसवतीमन्तरेण हंसवतीं विना । तत्सहयोगाभावेनेति यावत् । पृथक् विनान्तरेणेत्यमरः । उपालम्भन वाच्यतास् । मद्वचनादुच्यता महाराज एवमाहेत्युच्यताम् । उपालब्धो दुरुक्त ॥

(२२) विदू इति । जमित्यादि । यद्भवानाज्ञापयति । सुगमम् ॥

(२३) उत्थायेति । भो इत्यादि । भो वयस्य गृहीतस्त्वया परकीयाभ्या हस्ताभ्या शिखण्डके अच्छभल्लगृहीतरागस्यागरणकस्य नास्ति मे मोक्ष । त्वया परकीयाभ्यामन्यदीयाभ्यां हस्ताभ्या करणाभ्यामच्छभल्लो भालूक । अत्राच्छभल्लभालूकयोरमरः । शिखण्डके शिखावच्छेदे गृहीतो धृत । येन सर्व्वेनैवंविदा यस्मिन् यक्षोतीति भाव शिखण्डे तु शिखावच्छे इति रभस । एतेन त्व कृत्वा देवीमन्येन सान्त्वयितुं यतसे इति गम्यते । सत् तस्मात् । वीतरागस्य विगतक्रोधादिकस्य क्रोधाद्यनुभवशून्यस्येति यावत् । राग क्रोधादिके रक्ते इति यावत । नास्ति शरण रक्षिता यस्य सोऽशरणकस्यास्य मे मोक्षो देह्या सकाशाद्विमुक्तिर्नास्ति ॥

(२४) राजेति । नागरिकतया विदग्धस्वभावेन एना सान्त्वय कोपान्निवर्तय ॥

अहिणवमञ्जुलोहभाविदो
तह परिचुम्बिअ चूअमञ्जरिम् ।
कमलवसदिमेत्तणिव्वुदो
मञ्जुअर विस्सरिदोसि णु कहं ॥ (२८)

राजा ॥ अहो रागपरिवाहिणी गीतिः । (२९)

विदू ॥ भो वयस्स किं दाय से गीदिआए अवि गहीदो भवदा अक्खरत्थो । (३०)

---

(२८) गानमाह अहिणवेत्यादि । अभिनवमधुलोभभावितस्तथा परिचुम्ब्य चूतमञ्जरीम । कमलवसतिमात्रनिर्वृतो मधुकर विस्मृतोसीदृशं कथम ॥ हे मधुकर भ्रमर अभिनवस्य अचिरोद्भूतस्य मधुनो रसस्य लोभेन भावित प्राप्त सन् । मधु क्षौद्रे जले क्षीरे मद्ये पुष्परस इति विश्व । भावित वासिते प्राप्ते इति मेदिनी । चूतमञ्जरीमात्रमुकुलं तथा परिचुम्ब्य कमले पद्मे वसतिमात्रेण वासमात्रेण निर्वृत. सन्तुष्टस्त्वम् । यावेवि वसतिरिति त्रिकाण्डशेष । एतां चूतमञ्जरीं कथं विस्मृतो विस्मर्तुंकारणमात्रोऽपि । क्षेपादिके क्त कृत्यादिकर्मण्यपि कर्त्तरि क्त । यद्वाधनं विभक्ता भ्रातर इतिवत् क्वचिदन्यत्रापि कर्त्तरि क्तो वक्तव्य । प्राकृतत्वाद्वाच्या-भ्यंशो वा । एवंविधमपरवक्त्रं नाम । तदुक्तम । व्ययुजि न नरला गुरु वसे तदपरवक्त्रमिदं नजौ जरावियति । तच्च गीयमान प्रच्छेदकाक्षलाक्षाङ्गं भवति तदुक्तम् । अन्यासक्तं पति मत्वा प्रेमविच्छेदमन्युना । वीणा पुरः परं गान स्त्रिया विच्छेदको मत इति ॥

(२९) राजेति । अहो विस्मये । रागो गान्धारादिस्वर । रागस्तु मालव्ये लोहितादिषु क्षेत्रादावनुरागे च गान्धारादौ स्वरेऽपि चेति मेदिनी । तत्परि अभ्यस्तलोभावेन सुष्ठिर विनेति यावत् । परवतीति रागपरिवाहिणी । गीति-र्गीतम् ॥

(३०) विदू इति । भो इत्यादि । भो वयस्य किं तादृश्या गीतिकाया अपि

इत्यस्मृतिनिमित्तमुन्मनस्कत्वं रूपयति । (३८)

कञ्चु ॥ उपसृत्य ॥ जयति जयति देव एते खलु हिमगिरेरुपत्यकारण्यवासिनः कण्वसन्देशमादाय सख्लीकास्तपस्विनः समायाताः । श्रुत्वा देवः प्रमाणम् । (३९)

राजा ॥ सविस्मयम् ॥ किं कण्वसन्देशहारिणः सख्लीकास्तपस्विनः । (४०)

कञ्चु ॥ यथकिम् । (४१)

राजा ॥ तेन हि विज्ञाप्यतां मच्चनादुपाध्यायः सोमरातः आश्रमवासिनः औतेन विधिना सत्कृत्य स्वयमेव प्रवेशयितुमर्हतीति । अहमप्येतांस्तपस्विदर्शनोचितप्रदेशे प्रतिपालयामि । (४२)

धौहार्या, महाश्वेतायाः स्थानसम्पर्केण मनसः क्षते पुण्डरीकस्यौत्सुक्यं द्रष्टव्यम् । वसन्ततिलकं नाम वृत्तम् ॥

(३८) इतीति । अस्मृतिरूपकाष्ठाहेतोरस्मरणं निमित्तं हेतुर्यस्य तत् तथोक्तम् उन्मनस्कत्वमन्यमनस्कता ॥

(३९) कञ्चु इति । हिमगिरेर्हिमालयस्य । उपत्यका आसन्नभूमिः । उपत्यकाद्रेरासन्ना भूमिरित्यमरः । तदरण्यवासिनस्तस्या वनवासिन । कण्वसन्देशं कण्वसंवादम् । श्रुत्वा इति । श्रुत्वा देवो राजा प्रमाणं कर्त्तव्यनिश्चयस्तु भवतिति शेषः । प्रमाणं हेतुसव्यादाशास्त्रेयत्तापरामर्शेष्वमरः ॥

(४०) राजेति । सख्लीका इति विस्मये हेतु व्यतस्तस्य ध्वनिविशेषः ॥

(४१) कञ्चु इति । यथकिमस्वीकारे । अस्वीकारेऽपि चायकिमिति शब्दावली ॥

(४२) राजेति । सोमाय रायते दीयत इति सोमरातः देवरात इति यत् दानेऽत्यक्काचाम्नान्योतिक्केति संज्ञायां क्तः । तस्यामा पुरोधा इत्यर्थः । विज्ञापयितव्यमाह इत्यन्तम् । आश्रमवासिनस्तापसान् । औतेन वैदिकेन वैधेन वा । विधिना विधानेन । सत्कृत्य पूजयित्वा । व्यञ्जनमुकारेति समासात् ह्रस्वो-

विदू ॥ का गई । इति निष्क्रान्त । (२५)

राजा ॥ स्वगतम् ॥ किन्नु खलु गीतमेवंविधमाकर्ण्य दुष्टजनविरहा-
हतेऽपि बलवदुत्कण्ठितोऽस्मि । अथवा । (२६)

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुको भवति यत् सुखितोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि ॥ (२७)

---

(२५) विदू इति । का गई का गतिः । गतिरूपाय । गतिर्मार्गे दशायाञ्च ज्ञाने यात्राभ्युपाययोरिति विश्व. ॥

(२६) राजेति । स्वगतमगतिसृष्टम् । दुष्टजनस्य मणियजनस्य । विप्रयोगाद् विरहात् । क्षते विना । बलवदुत्कण्ठितः अत्युत्कण्ठितः । उत्कण्ठा तु रागे लब्धविषये महती वेदना तु या । संयोगेषणे तु गाढाया ताछत्कण्ठा विदुर्बुधा इत्युक्ता । तया गीत्या शकुन्तलाविरहेणापि स्मरणादिति भाव । उत्कण्ठाशैल मनसा परिकल्पनाद् इति ॥

(२७) रम्येति । सुखितो जातसुखोऽपि अजातशोकोऽपीति यावत् । जन्तुः शरीरी रम्याणि मनोरमाणि वस्तूनि वीक्ष्य तथा मधुरान् प्रियान् शब्दाश्च निशम्य श्रुत्वा । स्वादुप्रियौ तु मधुरावित्यमरः । यत् यस्मात् पर्युत्सुक उत्कण्ठितो भवति तत् तस्मान्नूनमवश्यमबोधपूर्वमबुद्धिपूर्वं यथा स्यात्तथा स्मर्यमाणं विशेषतो अनुद्बोधार्थं । भावस्थिराणि स्वभावस्थिराणि । भाव सत्तास्वभावाभिप्रायचेष्टासु इत्यमरः । जननान्तरसौहृदानि सौहार्दानि । विकल्पेन शुभगादौ पाठाच्च द्विपदबुद्धिः । चेतसा मनसा स्मरति । तथाहुक्तं रघुवंशे । रतिर्वरौ नूनमिमावभूतां राज्ञा सहस्रेषु तथाहि वाञ्छा । सतेयमात्मप्रतिरूपमेव मनोहि जन्मान्तरसंगतिज्ञमिति । तथाच ऐहिकोत्कण्ठाहेतुभूतमणियजनविप्रयोगाभावेऽपि जन्मान्तरीणमणयदृष्टतेरियमुत्कण्ठेति भाव. । एवमेव कादम्बर्यां जननान्तरजात-

किन्नावद्रतिनासुपोढतपसा विघ्नैरलं दूषितं
धर्मारण्यचरेषु केनचिदुत प्राणिष्वसच्चेष्टितम् ।
आहोस्वित् प्रसवो समापरिचितैर्विष्टम्भितो विरुधा-
मित्यारूढवऊप्रतर्कमपरिच्छेदाकुलं मे मन ॥ (४८)

प्रती ॥ देवस्सुभुअदण्डणिव्वुदे अस्समपदे कुदो एवं किन्तु सुचरि-
दाभिणन्दिणो इसीओ देवं सभाजइदुं आअदे त्ति तक्केमि । (४९)

---

(४८) किन्नावदिति । किं वितर्के । व्रतिनामारब्धयागानाम् । आदेरा त्वध्वरे व्रती यज्ञे च यजमानस्येत्यमर । उपोढं कृतं तपो वैघक्षेयकरं कर्म यैस्ते तैर्वा तापसानामित्यर्थः । तपो यागादि किन्नावत् विघ्नै राक्षसादिभिर्दूषितं व्याकृतम् । ततो विशल्ये । धर्मारण्ये चरन्ति ये ते धर्मारण्यचरास्तेषु प्राणिषु केनचिज्जनेन असच्चेष्टितमसदाचरितम् । आहोस्वित्यनेन विकल्पवितर्को द्योत्येते तेन आहोस्वित् अथवा किं नास्ति परिचितं परिचयो येषां ते अपरिचिता । मम अपरिचितैरज्ञातमत्परिचयैर्जनै कर्तृभि र्वीरुधां विस्तारवतीनां लतानाम् । लता प्रतानिनी वीरुदित्यमर । प्रसव फलम् । प्रसवस्तु फले पुष्पे इत्यजयः गर्भमोचन इति विश्व । विष्टम्भित प्रतिबन्ध प्रापित । कुसुमभक्षणादिनेति यावत् । विष्टम्भ प्रतिबन्धे स्यात् प्रभेदे चामयस्य चेति मेदिनी । इति एवमारूढा उल्लासा बहव प्रतर्का यत्र तत् तथोक्त मे मम अपरिच्छेदेनानवधारणेनाकुलं भवति । शार्दूलविक्रीडित नाम वृत्तमिदम् ॥

(४९) प्रतीति । देवस्येत्यादि । देवस्य भुजदण्डनिर्वृते आश्रमपदे कुत एवं किन्तु सुचरिताभिनन्दिन कृपयो देव सभाजयितुमागता इति तर्कयामि । भुज-दण्डेन बाहुदण्डेन निर्वृते सुस्थिते आश्रमपदे एवम् असदाचरणं कुत कस्माद्विव-तमर्हतीत्यर्थः । सुचरितानि सदाचरणानि अभिनन्दन्ति प्रयच्छन्ति ये ते सुचरिता-भिनन्दिन । सभाजयितुम् आनन्दयितुम् । दृष्ट वा । आनन्दसभाजने इत्य-मरः । सभाजनसेवने प्रीतिदर्शन इति कविकल्पद्रुम ॥

कञ्चु ॥ यथाज्ञापयति देवः । इति निष्क्रान्तः । (४३)

राजा ॥ उत्थाय ॥ वेत्रवति अग्निशरणमार्गमादेशय । (४४)

प्रतीहारी ॥ इदो इदो एदु देवो । (४५)

परिक्रम्य ॥ एसो अग्गिसरणालिन्दो सण्णिहिदहोमधेणु अग्गिसरणालिन्दो ता आरोहदु देवो । (४६)

राजा । आरुह्य परिजनं सावलम्बी लिख्नन् । वेत्रवति किमुद्दिश्य तत-भवता कण्वेन मत्सकाशमृषयः प्रेषिताः । (४७)

यप् । तपस्विदर्शनोचितप्रदेशे पवित्रभूमौ होमदेशे इति यावत् । एतान् तपस्विनः । प्रतिपालयामि प्रतीक्षे ॥

(४२) कञ्चु इति । सुगमम् ।

(४४) राजेति । वेत्रवतीति प्रतिहार्यां नाम्ना सम्बोधनम् । अग्निशरण-माहितस्याग्नेर्गृहम् । शरणं गृहरक्षिलोरित्यमरः । तत्र मार्गं पन्थानम् । आदे-शय दर्शय ॥

(४५) प्रतीहारीति । इदो इत्यादि । इत इत एतु देव ॥

(४६) परीति । एसो इत्यादि । एषोऽभिनवसम्मार्ज्जनरमणीय सन्निहित-होमधेनुरग्निशरणाभिन्द । तदारोहतु देव । अभिनवसम्मार्ज्जनेनाचिरसम्मा-र्जनेन रमणीय सुन्दर । सन्निहिता अवस्थिता होमधेनुर्होमीयदुग्धोपयोगिनी धेनुर्यत्र स तथोक्त । एष अग्निशरणस्याग्निगृहस्य अभिन्दो बहिर्द्वारगतचत्वर-भूमिविशेष । प्रथमान्तस्याभिन्दः बहिर्द्वारप्रकोष्ठक इत्यमरः । तत् तस्मात् आरोहतु एनमिति शेषः ॥

(४७) राजेति । परिजनस्य परिवारजनस्य । सावलम्बी स्वन्याङ्गिसङ्गत । वेत्रवतीत्यादि प्रश्न । किमुद्दिश्य किमभिसन्धाय । मत्सकाशं मत्समीपम् । प्रेषिताः प्रेरिताः ॥

किन्नावद्भूतिनासुपोढ़तपसां विघ्नैस्तपो दूषितं
धर्मारण्यचरेषु केनचिदुत प्राणिष्वसच्चेष्टितम् ।
आहोस्वित् प्रसवो ममापरिचितैर्विष्टम्भितो विद्युधा-
मित्यारूढ़वऊप्रतर्कमपरिच्छेदाकुलं मे मन. ॥ (४८)

प्रती ॥ देवस्सभुचदण्डणिव्वुदे अस्समपदे कुदो एवं किन्नु सुचरि-
दाहिणन्दिणो मूसीओ देवं सभाजइदुं आअदे त्ति तक्केमि । (४९)

---

(४८) किन्नावदिति । किं किंतर्के । प्रतिमारम्भयागानाम् । व्याहृता स्वध्वरे प्रसो यदा च यजमानश्चेत्यमर. । उपोढं धृतं तपो वैधक्षेत्रकरं कर्म यैस्ते तेषां तापसानामित्यर्थ. । तपो यागादि किन्नावत् विघ्नै राक्षसादिभिर्दूषितं व्याहतम् । उतो विकल्पे । धर्मारण्ये चरन्ति ये ते धर्मारण्यचराश्चेषु प्राणिषु उत केनचिज्जनेन व्यवच्चेष्टितमसदाचरितम् । व्याहोस्वित्यन्द्वाभ्या विकल्पयितव्यौ द्योत्येते तेन व्याहोस्वित् व्यथवा किं नास्ति परिचितं परिचयो येषां ते अपरि-चिता । मम अपरिचितैरज्ञातमत्परिचयैर्जनै. कर्तृभिः चौरघां विस्तारयतीर्मा स्वतामाद् । सुता प्रतानिनो चौरुदित्यमर. । प्रसव. फलम् । प्रसवस्तु फले पुष्पे दृष्टाणां गर्भमोचन इति विश्व. । विष्टम्भित प्रतिबन्धं प्रापितः । सुप्तसभङ्गादिनेति यावत् । विष्टम्भ' प्रतिबन्धे स्याद् प्रभेदे चामयस्य चेति मेदिनी । इति एवमाकुलः व्याप्तो मे मम. अपरिच्छेदेनानवधारणेनाकुलं भवति । सार्दूलविक्रीडितं नाम वृत्तमिदम् ॥

(४९) प्रतीति । देवस्येत्यादि । देवस्य भुजदण्डनिर्वृते आश्रमपदे कुत एवं किन्नु सुचरिताभिनन्दिन ऋषयो देवं सभाजयितुमागता इति तर्कयामि । भुज-दण्डेन बाहुदण्डेन निर्वृते सस्थिते आश्रमपदे एवम् अमदाचरणं कुतः कस्माद्धेतो-रसम्भवीत्यर्थ. । सुचरितानि सदाचरणानि अभिनन्दन्ति प्रशंसन्ति ये ते सुचरिता-भिनन्दिनः । सभाजयितुम् आनन्दयितुम् । दृष्ट वा । आनन्दसभाजने इत्य-मरः । सभाजनपूजयोने प्रीतिदर्शन इति विश्वकल्पद्रु म. ॥

ततः प्रविशति गौतमीसहितौ सकुल्लसामादाय कण्वशिष्यौ
पुरतश्चैषां पुरोहितसकञ्चुकिनौ ॥ (५०)

सकञ्चु ॥ इत इतो भवन्तः । (५१)

शार्ङ्गरव ॥ सखे शारद्वत ! । (५२)

महाभागः कामं नरपतिरभिन्नस्थितिरसौ
न कश्चिद्वर्णानामपयमपकृष्टोऽपि भजते ।
तथापीदं शश्वत्परिचितविविक्तेन मनसा
जनाकीर्णं मन्ये द्रुतवहपरीतं वटकमिव ॥ (५३)

शारद्वत ॥ शार्ङ्गरव स्थाने खलु पुरप्रवेशात्तवेदृश. संवेगः ।
अथवा । (५४)

---

(५०) तत इति । एषां गौतमीसकुल्लसाकण्वशिष्याणाम् । पुरोहितसकञ्चुकिनौ राज्ञ इति शेष. ॥

(५१) सकञ्चु इति । भवन्त इति पुंस. प्राधान्यात् पुंस्त्वम् ॥

(५२) शार्ङ्ग इति । सुगमम् ॥

(५३) महेति । महान् भागो भागधेयं यस्य स महाभाग. । भागो रूपार्जके प्रोक्तो भागधेयैकदेशयोरिति विश्वः । असौ नरपतौ राजा कामं पर्याप्तमभिन्ना अव्याहता स्थितिर्लोकमर्यादा येन स तथोक्त. । संस्था तु मर्यादाधारणास्थितिरित्यमरः । इतरा-मेसत्यपराधे न सम्भाविता भीतिरिति भावः । भृत्येभ्योपि साध्वसानवकाशं दर्शयति न कश्चिदिति । वर्णानामपकृष्टः शूद्रादिरपि कश्चिद्राजभृत्यमूल इति यावत् । अपथमसदाचरणं न भजते । सदापि सुतोपि कारणाद्भयानवकाशेपि शश्वत्परिचित आजन्मसेवितो विविक्तो निर्जनबलप्रदेशो येन तत् तथोक्तेन मनसा करणेन जनाकीर्णं लोकैः सङ्कुलमिदं राजभवनं द्रुतवहपरीतमनलाक्रान्तं वटकमिव सद्याध्वसप्रवेशमिति भावः । मन्ये । विवि-क्तान्तं जनाकीर्णमिति च हेतुगर्भविशेषणम् । अत्रोपमालङ्कारः । शिखरिणी नाम वृत्तम् ॥

(५४) शारेति । स्थाने युक्तम् । युक्ते हे साध्वसं स्थाने इत्यमरः । पुरप्रवेशाद्राज-प्रवेशात् । संवेगः सम्भ्रमः । अथवेति लोकोक्त्यन्तरेणान्वयः ॥

अभ्यक्तमिव स्नातः, शुचिरशुचिमिव, प्रबुद्ध इव सुप्तम् ।
भद्रमिव स्वैरगतिर्जनमिह सुखसङ्गिनमवैमि ॥ (५५)

पुरोधा ॥ अतएव भवद्विधा महान्तः । (५६)

गङ्गुन्नला ॥ दुर्निमित्तमभिशंसय ॥ अम्मो किं मे वामेदरं सत्थणं विप-
फुरदि । (५७)

गौतमी ॥ जादे पडिहदं अमङ्गलं सुहाइं दे होन्तु । (५८)

---

(५५) अभ्यक्तमिति । स्नातः कृतस्नानो यथा अभ्यक्तं कृततैलाभ्यङ्गम् अवैति विरा-दरौ सम्लापनाद्यान्मत्वाऽङ्गं सञ्जात इतीति भाव । शुचिः शुचिमान् शुभान् यथा अशुचिं पुमांसमवैति । अयमीदानीमनधिकारीति भाव. । प्रबुद्धो जागत्प्रायदवस्थो यथा सुप्तं निद्राणमवैति । नाशो परमार्थत. किमपि जानातीत्येवमिति भाव. । यथाच स्वैरगतिः स्वैरा स्वच्छन्दा अव्याहतेति यावत् गति पादविहरणं यस्य स तथोक्तो जनो यत्तं प्राप्त-मञ्चनं जनमवैति । कथमप्यधुनासौ न सत्पथमधिरोढुं समर्थं इत्येवमिति भाव । स्वर-स्वच्छन्दयो. स्वैरमित्यमर. । भद्रन्तु सुखसङ्गिनं सांसारिकसुखासक्तं जनं तथा अवैमि जानामि । अयन्तावद्धाकं दूरे आस्तामिति भाव. । इयं बालोपमा । यद्वृत्तं दर्पणे । बालोपमा यदेकस्योपमानं बहु दृश्यत इति । आर्य्येयम् ॥

(५६) पुरो इति । अतएव तुच्छीकृतसांसारिकसुखत्वादेव । भवद्विधा. भवत्प्रकारा: सर्व्वे । महान्तो लोकोत्तरा ॥

(५७) गङ्गुन्नलेति । दुर्निमित्तं दक्षिणाक्षिस्पन्दम् । सूचयित्वा सूचयित्वा । अम्मो इत्यादि । अम्बो किं मे वामेतरत् नयनं विस्फुरति । किं कथम् । वामेतरत् दक्षिणम् । विस्फुरति स्पन्दते ॥

(५८) गौतमीति । जादे इत्यादि । जाते प्रतिहतमङ्गलं शुभानि ते सन्तु । प्रति हतमपगतम् । अमङ्गलं दक्षिणाक्षिविस्फुरणसूचितम् । भ्रूभ्राणमध्ये प्रियसङ्गम: स्यान्नासाक्षिमध्ये च सङ्गायलाभ इत्यनेनाक्षिस्पन्दनस्य शुभसूचकत्वेपि, यात्रा सलाभा हि मलमकम्पे पुंसा सदा दक्षिणदेदभागे । स्त्रीणाञ्च वामावयवे प्रसात. स्पन्द. फलानि प्रदिशत्यवश्यमिति वचनान्तरानिर्देशात् दक्षिणाक्षिस्पन्दनस्याशुभसूचकत्वम् ॥

इति परिक्रामति । (५९)

पुरो । राजानं निर्दिश्य ॥ भो भो सभासिन. असावतिभवान् वर्णाश्रमाणां रक्षिता प्रागेव मुक्तासनः प्रतिपालयति यः पश्यतैनम् । (६०)

आर्द्धं ॥ भो महामन् कामसेतदभिनन्दनीयं तथापि वयमत्र मध्यस्थाः । कुतः । (६१)

भवन्ति नम्रास्तरवः फलोद्गमै-
र्नवाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥ (६२)

---

(५९) इतीति । इति पूर्वोक्तायामुक्तौ सत्याम् । परिक्रामति सर्वे इति शेष ॥

(६०) पुरो इति । निर्दिश्य अङ्गुल्या प्रदर्श्य । वर्णाश्रमाणां वर्णानामाश्रमाणाञ्च । रक्षिता पालयिता । प्रागेव अवदुपगमात् पूर्वमेव । मुक्तासन ऊर्द्धीभूत । प्रतिपालयति प्रतीक्षते । एनं राजानम् ॥

(६१) आर्द्धमिति । एतत् अनौद्धत्यम् । काम पर्य्याप्तमभिनन्दनीय प्रशंसार्हम् । तथापि पर्य्याप्तप्रशंसार्हत्वेपि अत्र अनुद्धतभावे वयं मध्यस्था उदासीना न निन्दामो न वा प्रशंसाम इत्यर्थः ॥

(६२) कुत औदासीन्यमिति प्रश्ने नैसर्गिकत्वादित्याह भवन्तीति । फलोद्गमै फलानामुद्गमैरुत्पत्तिभिस्तरवो नम्रा नतशाखा भवन्ति घना मेघा नवाम्बुभि प्रथमवारिसङ्गमै दूरादि सम्बन्ध इति दूरविलम्बिनो भूयेरनतिदूरवर्त्तिनो भवन्ति तथा सन्त साधवश्च ते पुरुषाश्चेति सत्पुरुषा. समृद्धिभिर्धनसम्पत्तिभिरनुद्धता नम्रा भवन्ति परानु खेतरानु उपकर्त्तुं शीलं येषा तेषामेष स्वभाव प्रकृतिरेव तथाच उदकपङ्कजादीना शीतोष्णतादिवत् प्राकृतिकत्वादेतस्य न स्तुतिनिन्दे इति भाव । अत्यानौद्धत्यरूपैकस्य गुणस्य पृथक निर्देशात् प्रतिवस्तूपमालङ्कार । अन्त्यचरणेत्वर्थान्तरन्यास । यदुक्तं दर्पणे। प्रतिवस्तूपमा सा स्याद्वाक्ययोर्गम्यसाम्ययो । एकोपि धर्म्म सामान्यो यत्र निर्दिश्यते पृथगिति । इत्थं मध्यस्थविलं नाम ॥

प्रती ॥ देव प्रसन्नमुखा दृष्टीयो दीसन्ति । (६३)

राजा ॥ यकुन्तलां निर्व्वर्ण्य ॥ अये अत्र । (६४)

केयमवगुण्ठनवती नातिपरिस्फुटशरीरलावण्या ।
मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम् ॥ (६५)

प्रती ॥ भट्टा कुदूहलगब्भो पडिच्छदो ण मे तक्को पसरदि दंसणीआ उण से आकिदी लक्खीअदि । (६६)

राजा ॥ भवत्यनिर्व्वर्ण्य खलु परकलत्रम् । (६७)

अनु ॥ उर्वशि हृदं दत्त्वा खगतम् ॥ हिअअ किं एवं वेवसि अज्ज-उत्तस्स तादिसभावाणुबन्धं सुमरिअ धीरत्तणं दाव अवलम्बस्स । (६८)

---

(६३) प्रतीति । इतः प्रतीहारी राजानमावेदयति देवेत्यादि । देव प्रसन्नमुखा दृष्टयो दृश्यन्ते । प्रसन्नानि प्रसादवन्ति मुखानि येषां ते प्रसन्नमुखाः । एतेनाज्ञातदुःखत्वमनुभावितम् ॥

(६४) राजेति । निर्व्वर्ण्य विशेषेणावलोक्य । निर्व्वर्णनन्तु निध्यानं दर्शनालोकनेक्षणमित्यमरः । अये इति सम्भ्रमे ॥

(६५) केयमिति । पाण्डुपत्राणां परिणतपत्राणां मध्ये किसलयं नवपल्लवमिव तपोधनानां तापसानां मध्ये अवगुण्ठनवती शिरःप्रच्छादनवती । अवगुण्ठनञ्चावगुण्ठिका । योषाशिरःप्रावरणक्रियायां स्यादिति यद्वाच्यिः । अतएव नातिपरिस्फुटनातिव्यक्तं शरीरस्य लावण्यं चैक्यं यस्याः सा तथोक्ता दृयं नारी का । अत्रोपमालङ्कारः । आर्य्याजातिरियम् ॥

(६६) प्रतीति । भट्टेत्यादि । भर्त्तः कुतूहलगर्भः प्रतिहतो न मे तर्कः प्रसरति । दर्शनीया पुनरस्या आकृतिर्लक्ष्यते । कुतूहलं जिघ्राणा गर्भे अभ्यन्तरे यस्य स तथाभूतो मे तर्कः विचारणं प्रतिहतः पराङ्मुखः खलु न प्रसरति नाग्रतोवर्त्तते न निर्णेतुमर्हतीति यावत् । आकृतिस्तस्या दर्शनीया दर्शनयोग्या रमणीयेति यावत् ॥

(६७) राजेति । अनिर्व्वर्ण्यं न विशेषेण प्रेक्षणीयम् । परकलत्रं परभार्य्या । कलत्रं श्रोणिभार्य्ययोरित्यमरः । खलु निषेधद्योतकः ॥

(६८) अनु इति । उरसि गच्छसि । हिअएत्यादि । हृदय किमेवं वेपसे आर्य्य-

पुरो ॥ पुरोगत्वा ॥ स्वस्ति देवाय देव एते खलु विधिवदर्च्चिता-स्तपस्विनः कश्चिदेतेषु उपाध्यायसन्देशोऽस्ति तं देवः श्रोतुमर्हति । (६९)

राजा ॥ अवहितोऽस्मि । (७०)

शिष्यौ ॥ वृत्तमुद्दिश्य ॥ भो राजन् विजयतां भवान् । (७१)

राजा ॥ सर्व्वानभिवादये वः । (७२)

शिष्यौ ॥ स्वस्ति देवाय । (७३)

राजा ॥ अपि निर्व्विघ्नं तपः । (७४)

शिष्यौ ॥

कुतो धर्म्मक्रियाविघ्नः सतां रक्षितरि त्वयि ।
तमस्तपति धर्म्मांशौ कथमाविर्भविष्यति ॥ (७५)

पुत्रस्य साहसभावानुबन्धं स्मृत्वा धीरत्वं सावदवलम्बस्व । एवं सातिशयम् । वेपसे कम्पसे । आर्य्यपुत्रस्य भर्त्तुरार्य्य इति यावत् । साहसभावानुबन्धं प्रागनुभूताभिप्रायप्रवृत्तिम् । धीरत्वं धैर्य्यम् ॥

(६९) पुरो इति । पुरोऽग्रत० । स्यात् पुर पुरतोऽग्रस इत्यमरः । कर्म्मपदमेतत् व्यत्ययतुकारेति समासप्रसक्तापि सोत्व नाङ्गीकर्त्तव्य समासविधेरनित्यत्वात् तथात्वे क्त्वाषो यथापत्ते । स्वस्ति सङ्गलं भवत्विति शेष० । देवायेति यस्मैदेत्यादिना स्वस्ति-योगाच्चतुर्थी । विधिवत् यथाविधि । अर्च्चिता सत्कृता० । एते तपस्विन इति साक्षा दर्शयति । एषु तपस्विषु । उपाध्यायस्य एतेषामध्यापकस्य कण्वस्येति यावत् सन्देश० संवाद० ॥

(७०) राजेति । अवहित सावधान ॥

(७१) शिष्याविति । सुगमम् ॥

(७१) राजेति । अभिवादये पादौ वटङ्कामि । सर्वेषु पादकृत्यमभिवादनमित्युभे इत्यमर० ॥

(७३) शिष्याविति । सुगमम् ॥

(७४) राजेति । अपि इत्यै । गर्भे सञ्जयन्नन्धयङ्कासन्भावनास्वपीत्यमरः ॥

(७५) शिष्याविति । कुत इति । त्वयि रक्षितरि परिपालनपरायणे इति सतां

राजा ॥ आत्मगतम् ॥ सर्व्वथा चार्थवान् खलु मे राजशब्दः । (७६)

प्रकाशम् ॥ तत्भवान् कुशली कण्वः । (७७)

शार्ङ्गः ॥ राजन् स्वाधीनकुशलाः सिद्धिमन्तः । स भवन्तमनामय-प्रश्नपूर्व्वकमिदमाह । (७८)

राजा ॥ किमाज्ञापयति भगवान् । (७९)

शार्ङ्गः ॥ यन्नियःसमयादिमां मदीयां दुहितरं भवानुपयेमे तन्मया प्रीतिमता युवयोरनुज्ञातम् । कुतः । (८०)

साधूनां कुतः कस्मात् धर्म्मक्रियायां श्रेयःसाधनक्रियायां विघ्नः स्यात् । यदुक्तम् । द्रव्य-क्रियागुणादीनां धर्म्मत्वं स्थापयिष्यते । तेषामैन्द्रियकत्वेपि न तादृष्येण धर्म्मता । श्रेयः-साधनताह्येषां नित्यं वेदात्प्रतीयते । तादृष्येण तु धर्म्मत्वं तस्मादैन्द्रियगोचर इति । अत्र दृष्टान्तयति तप इति । घर्म्मो उष्णो अंशवो यस्य स तस्मिन् सूर्य्ये । घर्म्मः स्यादातपे ग्रीष्मे उष्णस्वेदाम्भसोरपीति विश्व० । तपति सन्तापयति सति कर्त्तरि तमस्तिमिरमावि-र्भविष्यति आगमिष्यति । अत्र दृष्टान्तोऽलङ्कार० । यदुक्तं प्रकाशे । दृष्टान्तः पुनरेतेषां सर्व्वेषां प्रतिबिम्बनादिति ॥

(७६) राजेति । आत्मगतमनतिप्रकाशम् । सर्व्वथा अङ्गीकारे । अर्थवान् लोक-रञ्जकत्वमर्थमनुगतः । खलुरवधारणे ॥

(७७) प्रकाशमिति । सर्व्वश्राव्यमित्यर्थः । कुशली मङ्गलवान् । ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम् । वैश्यं चेमं समागम्य शूद्रमारोग्यमेव चेति मनुः । अतएव परत्वानामयप्रश्नोक्तिः ॥

(७८) शार्ङ्गेति । स्वाधीनानि स्वेच्छामात्रसुलभानि कुशलानि येषां ते । सिद्धिमन्तः सिद्धाः । स कण्वः । अनामयप्रश्न आरोग्यप्रश्नः । अनामयं स्यादारोग्यमित्यमरः । तत्पूर्व्वकं तत्पुरस्सरम् । इदं वक्ष्यमाणम् ॥

(७९) राजेति । सुगमम् ॥

(८०) शार्ङ्गेति नियःसमयात् अन्योन्यप्रतिज्ञानात् गान्धर्व्वविधिनेति यावत् । गान्धर्व्वः समयान्नियेति यादवप्रकाशः । समयाः अपधाचारकालसिद्धान्तसम्विद इत्य-मरः । संविन्मतिज्ञा । उपयेमे उदवहत् । उपयमो विवाह इत्यात्मनेपदम् । प्रीति-

त्वमर्हतामग्रसरः स्मृतोऽसि नः
शकुन्तला मूर्त्तिमतीव सत्क्रिया ।
समानयंस्तुल्यगुणं वधूवरं
चिरस्य वाच्यं न गतः प्रजापतिः ॥ (८१)

तदिदानीमापन्नसत्वेयं गृह्यतां सहधर्मचरणायेति । (८२)

गौत ॥ भट्टुणो किम्पि वत्तुकामस्सि ण मे वअणावसरो अत्थि । (८३)

राजा ॥ आर्ये कथ्यताम् । (८४)

अस्या आसन्नोपेक्ष । युवयोः सम्बन्धे । अनुज्ञातमनुमतम् । साहसप्रवृत्तैः सख्यासन्नोम-न्त्रणायां कृत. प्रीतिरित्याह कृत इति ॥

(८१) त्वमिति । त्वम् अर्हतां योग्यानां सत्क्रियाया इति शेषः । अर्हंयोग्यत्वे इति कविकल्पद्रुमः । अग्रसरः । प्रथमः स्मृतश्चिन्तितोऽपि शकुन्तला नोऽस्माकं मूर्त्तिमती शरीरिणी सत्क्रिया सत्कारभूतेव सत्कारार्हंस्यैव सत्कारस्याभो न शोचनीय इति भाव. । तुल्या अन्यूनातिरिक्ता गुणा यस्य तत् तथोक्तं वधूर्नवोढा योषित् । वधूः स्नुषा-नवोढस्त्रीभार्य्याष्टकाङ्गनासु चेति विश्वः । वरो वोढा । वरो जामातृवोढ़ारावितिं वैज-यन्ती । साच सच द्वयोः समाहारस्तत् समानयन् एकीकुर्वन् मेलयन्निति यावत् । समानाः सत्त्वमेकेष्वरित्यमरः । प्रजापतिर्विधाता चिरस्य भाविनः कालस्य वाच्यं दूषणं न गतः । अतुल्यगुणयोर्योजने विधिर्दूषितः स्यादिति भावः । वाच्यन्तु कुत्सिते क्लीने वचनार्हे न पुंसि तु । दूषणे पालने इति यादवश्च. । इदं वंशस्थविलं वृत्तम् ॥

(८२) तदिति । आपन्नसत्वा गर्भिणी । आपन्नसत्वा स्याद्दुर्विज्ञेयगर्भवती च गर्भिणी-त्यमरः । सहेति । सपत्नीको धर्ममाचरेदिति स्मृतेरिति भाव. ॥

(८३) गौतेति । भट्टेत्यादि । भद्रमुखं किमपि वक्तुकामासि न मे वचनावसरोऽस्ति । भद्रं साधु सुखं यस्य स भद्रमुख सुमुखः । कक्षिजात्यन्तरे भद्रो वाच्यवत् श्रेष्ठसाधुनोरिति विश्व । न मे वचनावसरोऽस्ति भवतोवांगतुपत्त्वादिति शेषः ॥

(८४) राजेति । सुगमम् ।

गौत ॥

णाविक्खिदो गुरुअणो इमिए ण तुएवि पुच्छिदो बन्धू ।
एक्कक्कस्स चरिए भणादु किं एक्कएक्कम्मि ॥ (८५)

शक ॥ आत्मगतम् ॥ किणु खलु अज्जउत्तो भणिस्सदि । (८६)

राजा ॥ सागद्धमाकर्ण्य ॥ अये । किमिदमुपन्यस्तम् । (८७)

शक ॥ आत्मगतम् ॥ हद्धी हद्धी सावलेवो से वअणावक्खेवो । (८८)

पार्श्व ॥ किं नाम किमिदमुपन्यस्तमिति । ननु भवन्तएव खुतरा लोकवृत्तान्तनिपुणाताः । (८९)

---

(८५) गौतेति । णेति । नापेक्षितो गुरुजनोऽनया न त्वयापि दृष्टोबन्धुः । एकैकस्य च चरिते भणतु किम् एक एकस्मिन् ॥ अनया शकुन्तलया गुरुजन पित्रादि नापेक्षितो नानुज्ञापित । तया त्वयापि बन्धु बधूस्वजनो न दृष्ट । एकैकस्य शकुन्तलाया स्वं च एकस्मिन्नभिज्ञे अनपेक्षणरूपे इति यावत् । चरिते आचारे एक अनपेक्षितत्वादु परभूतः कश्च किं भणतु उक्तादन्यत् किं कथयतु यदाह तदेवोचितमितिभाव. । एके मुख्यान्य-केवला इत्यमर' । इय गाथा ॥

(८६) शक इति । किमित्यादि । किणु खलु आर्यपुत्रो भणिष्यति । किणु किंतर्के । खलु प्रश्ने ॥

(८७) राजेति । सागद्ध' सभयम् । अये सम्भ्रमे । अये कोपे विषादे च सम्भ्रमे सर-सेपि चेति मेदिनी । उपन्यस्तं वक्तुमारब्धम् । उपन्यासस्तु वाङ्मुखमित्यमर ॥

(८८) शक इति । हद्धीत्यादौ । हा धिक् हा धिक् सावलेपोऽस्य वदनावक्षेप । सावलेपः सगर्वं । अवलेपस्तु गर्वं स्यादिति विश्व । वदनावक्षेपो वदनव्यापारविशेष. । वचनावक्षेप इति क्वचित् पाठः तत्रावक्षेप प्रयोग ॥

(८९) पार्श्वेति । किमिदमुपन्यस्तमिति किं नाम । नाम क्रोधे । नाम प्राकाम्य-सम्भाव्यक्रोधोपगमकुत्सने इत्यमर । भवन्त एव खुतरामतिशयेन लोकानां वृत्तान्तस्य वार्तायां निष्णाता अभिज्ञा ननु । प्रवीणे निपुणाभिज्ञविज्ञनिष्णातधिषणा इत्यमर. । ननु प्रश्ने । खुतरामिति किमेव्याद्यारब्धे इति खयशब्दादुत्कर्षे खतराम् ॥

सतीमपि ज्ञातिकुलैकसंश्रयां
जनोऽन्यथा भर्तृमतीं विशङ्कते ।
अतः समीपे परिणेतरिष्यते
प्रियाऽप्रिया वा प्रमदा स्वबन्धुभिः ॥ (९०)

राजा ॥ किमत्रभवती मया परिणीतपूर्वा । (९१)

शकु ॥ सविषादमात्मगतम् ॥ हिअअ संपदं संजुत्ता दे आसङ्का । (९२)

शार्ङ्गः ॥

किं कृतकार्यंऽस्मे पाङ्क्तिं प्रति विमुखतोचिता राज्ञः । (९३)

राजा ॥ कुतोऽयमसत्कल्पनाप्रसङ्गः । (९४)

---

(९०) सतीमिति । ज्ञातिकुलं पितृकुलं एकं केवलं संश्रयतीति ज्ञातिकुलैकसंश्रयाम् । ज्ञाति स्वगोत्रे वितरीति विश्व । सतीमपि प्रमदा जनोलोकोऽन्यथाभर्तृमतीं व्यभिचारिणीं विशङ्कते । ज्ञातिकुलैकसंश्रयां भर्तृमतीं सधवा सतीमपि जनो अन्यथा-व्यभिचारित्वेन विशङ्कते । इति वा योजना । अतो अस्मात् स्वबन्धुभि बंधुवा पित्रादिभि प्रिया अप्रिया वा भर्तुरिति शेष । प्रमदा युवति परिणेतु वोढु समीपे विद्यमानेति शेष । रक्ष्यते अभिलष्यते । प्रमदा चेति विशेषेण युवतिश्च तथा स्मृतेति भागुरि । बंधुस्वविलं दृश्यम् ॥

(९१) राजेति । परिणीतपूर्वा पूर्वं परिणीता ॥

(९२) शकु इति । सविषादं सखेदम् । हिअअ इत्यादि । हृदय साम्प्रतं संवृत्ता ते आशङ्का । आशङ्का सवृत्ता आशङ्कनीयोऽर्थं सम्भूत ॥

(९३) शार्ङ्गेति । किमिति । कृतकार्यस्य शकुन्तलाया युष्मैनङ्गीकारेऽपि परिणयस्य स्नेहादविच्छिताचारतयाऽधारणात् धर्मं प्रति विमुखता धर्मभ्रष्टता परिणयानङ्गीकारादिति भाव । किं राज्ञ उचिता । नियत येनाधर्मान्निवर्त्तनीयो लोकस्य इति भाव । एतत्पूर्वोक्तानन्तर राजवचनान्ते परार्द्धं द्रष्टव्यम् ॥

(९४) राजेति । असत्या अवृत्तायां कल्पनाया उद्भावनाया अयं प्रसङ्ग कुत. ॥

माढ़ं ॥ सक्रोधम् ॥ (९५)

मूर्च्छन्त्यमी विकाराः प्रायेणैश्वर्यमत्तानाम् । (९६)

राजा ॥ विशेषेणाधिच्चिप्तोऽस्मि । (९७)

गौत ॥ शकुन्तलां प्रति ॥ जादे मुहुत्तअं मा लज्ज अवगुण्ठणं दाव दे अवणुएमि तदो भट्टा तुमं अहिजाणिस्सदि ।

इति तथा करोति । (९८)

राजा ॥ शकुन्तलां निर्वर्ण्य स्वगतम् । (९९)

इदमुपनतमेवं रूपमक्लिष्टकान्ति
प्रथममपरिग्टहीतं स्यान्नवेत्यध्यवस्यन् ।
भ्रमर इव निशान्ते कुन्दमन्तस्तुषारं
न खलु सपदि भोक्तुं नापि शक्नोमि मोक्तुम् ॥ (१००)

---

(९५) माढ़मिति । सक्रोधं क्रोधेन सह श्लोकोत्तरार्द्धमाहेत्यर्थः ॥

(९६) मूर्च्छन्तीति । ऐश्वर्येण मत्तानां मदं गतानाम् अमी विकाराः प्रसक्तिविप्रलम्भाः प्रायेण मूर्च्छन्ति उच्छ्रयन्ति । मूर्च्छा मोह उच्छ्राये इति कविकल्पद्रुमः । इत्यार्यां जाति. ॥

(९७) राजेति । विशेषेणातिशयेन अधिच्चिप्तो भर्त्सितः । अधिच्चिप्तं प्रक्षिप्ते कुत्सिते भर्त्सिते त्रिष्विति मेदिनी ॥

(९८) गौतेति । प्रति लक्ष्मीकृत्य । प्रति प्रतिनिधौ वीप्सालक्षणादौ प्रयोगत इत्यमर । जादे इत्यादि । जाते मुहूर्त्तं मा लज्जस्व अपनेष्यामि तेऽवगुण्ठनं ततो भर्त्ता त्वामभिज्ञास्यति । मुहूर्त्तं कांचित् क्षणान् मा लज्जस्व लज्जिता मा भव । अपनेष्यामि उद्घाटयिष्यामि । अवगुण्ठनं शिरःप्रच्छादनम् । अभिज्ञास्यति सेयमिति परिच्छेत्स्यति । तथा करोति अवगुण्ठनमपनयति ॥

(९९) राजेति । निर्वर्ण्य सविशेषं प्रेक्ष्य ॥

(१००) इदमिति । एवमित्यध्यकारेण उपनतमुपगतम् अक्लिष्टा अम्लाना कान्तिः शोभा यस्य तत् अक्लिष्टकान्ति इदं रूपं प्रथमपरिग्टहीतमादौ स्वीकृतं स्यान्न वा इति

इति विचारयन् स्थित । (१०१)

प्रती ॥ सगतम ॥ अम्मो धम्मावेक्खिणो भट्टिणोदंदिसं णाम सुहोवणदं दूरवीरयणं पेक्खिअ को अणो विआरेदि । (१०२)

माढ्र्व ॥ भो राजन् किमिति जोपमास्यते । (१०३)

राजा ॥ भीरुप्रस्थितः चिन्तयन्नपि न खलु स्वीकरणमतभवत्याः स्मरामि तत् कथमिमामभिव्यक्तसत्त्वलक्षणामात्मानमक्षत्रियं मन्यमानः प्रतिपत्स्ये । (१०४)

शकु ॥ सगतम् ॥ हद्धी हद्धी कधं परिणएज्जेव सन्देहो अम्गा दाणिं दूरारोहिणी आसालदा । (१०५)

स्तस्मिन् विषये अध्यवस्यन् मनोऽभिनिवेशयन्नपि निशान्ते निशावसाने भ्रमरो अन्तर्मध्ये तुषारो नीहारो यस्य तत् तथोक्तं कुन्दं पुष्पमिव सपदि सद्यो न खलु भोक्तु सेवितुं नापि भोक्तुं त्यक्तुं शक्नोमि । शकुन्तलाया अधरस्य सत्यत्वात् कुन्दसौसादृश्यम् । अत्रोपमालङ्कारः । यदुक्तम् दण्डिना । यथा कथञ्चित् सादृश्यं यत्रोद्भूतं प्रतीयते । उपमेति । इदं मालिनी नाम वृत्तम् ॥

(१०१) इतीति विचारयन् तर्कं कुर्वन् ॥

(१०३) प्रतीति । अम्मो इति । यद्भो धर्मावच्छिणो भर्तार इदृशं नाम सुखोपनतं स्त्रीरत्नं प्रेक्ष्य कोऽन्यो विचारयति । धर्ममवच्छेत्ते धर्मं प्रति जानाति अनन्यमनसा धर्मं पश्यन्तीति यावदिति धर्मावेक्षिण । अवेक्षा प्रतिचागर इत्यमर । इदृश मित्यादि हेतु । सुखोपतनमप्रयत्नोपगतम् । स्त्रीरत्नमुत्कृष्टस्त्रियम् । जातौ जातौ यदुत्कृष्टं तद्रत्नमिति यादव । विचारयति तर्कयति ॥

(१०३) माढ्र्वेति । जोमं तुष्णीम् । आस्यते स्थीयते । तूष्णीमर्थं सुखे जोपमित्यमर* ॥

(१०४) राजेति । चिन्तयन विचारयन् । स्वीकरण परिग्रहम् । अभीति । अभिव्यक्त स्पष्टमनुभूयमानं सत्त्वलक्षणं गर्भलक्षण यस्या सा ताम् । अक्षत्रियेति । तत क्षत्रियत्वव्याघात इति भाव । प्रतिपत्स्ये ग्रहीष्ये ॥

(१०५) शकु इति । हद्धीत्यादि । हा धिद् हा धिक् कथं परिणय एव सन्देह भजन्ती दूरारोहिणी आशालता । परिणय एव विवाह एव का कथा प्रत्यभिज्ञान

शार्ङ्ग ॥ मा तावत् । (१०६)

कृतावमर्षामनुमन्यमान·

सुता त्वया नाम मुनि र्विमान्यः ।

सुष्टं प्रतिग्राह्यता स्वमर्थं

पात्रीकृतो दस्युरिवासि येन ॥ (१०७)

शार ॥ शार्ङ्गरव विरम त्वमिदानीं शकुन्तले वक्तव्यमुक्तमस्माभिः

सोऽयमत्रभवानेवमाह दीयता मस्मै प्रत्ययप्रतिवचनम् । (१०८)

इति भाव । दूरमारोढुमीति दूरारोहिणी । आगामिता राजगृहमासाद्य एवमेवं सुखमनुभविष्यामीति वासनारूपा लता । अत्र रूपकालङ्कार । यदुक्तं दण्डिना । उपमैव तिरोभूतभेदा रूपकमुच्यत इति ॥

(१०६) शार्ङ्गेति । मा तावदिति । मा भवतु स्मरणमिति शेषः । तावत् तदा त्वया मुनिर्विमान्य इति श्लोकीयेन पूरणम् ॥

(१०७) कृतेति । कृतावमर्षां त्वया कृतस्मर्षां सुतां कन्यामनुमन्यमान परिग्रहीष्यमाणमेव भवितव्यनुजानन् मुनि कण्व त्वया नाम विमान्य [1]अवमाननीय । नाम क्रोधे । नाम प्राकाश्यसम्भाव्यक्रोधोपगमकुत्सन इत्यमरः । तदानुरवमाननमेवोचितमत्र भाव । तदनौचित्यं प्रतिपादयितुमुद्दिश्य विधेयभावेन विशेषणमाह सुष्ठमित्यादिना । सुष्ठ चोरितं पुनर्लब्धमित्यर्थः । स्वं स्वीयमर्थं स्वर्णादिकं प्रतिग्राह्यता पात्रसात् कुर्वता त्वनेन दस्युरिव येन मुनिना व्य पात्रीकृत सुतासम्प्रदानीकृतोसि । दानमात्रं सम्प्रदानमित्युक्तं । चोरित स्वर्णादिकमासाद्य पुनस्तच्चोर एव यथा पात्रीक्रियते तद्वदिति भाव । अत्रावमर्षं स्वयं । तथाच स्मृतयो स्मर्यीति कविकल्पद्रुमव्याख्याने अनिर्दिष्टार्थत्वात् स्वयंन प्रणिधानञ्चास्यार्थः । स्वप्ने यथा परामृशन् रुषजङ्घेन पाणिना तदीयमङ्गं कुलिशव्रणाङ्कित मिति रघु । प्रणिधाने यथा रामप्रवासे व्यक्तमद्यदोषं जनापवादं मनरेन्द्रस्मृत्यु गिति भट्टिरिति धातुदीपिका । अत्रोपमालङ्कार । वृत्त सुपजातिः ॥

(१०८) शार्ङ्गेति । विरम वचनाद्विवर्त्तस्व । शकुन्तला प्रत्याह शकुन्तले इति । यस्माभिरुक्तव्यमुक्तम् । सोयं यमुद्दिश्योक्तमित्यर्थः । एवं भवत्या स्मृतमित्यर्थः । अस्मै राज्ञे । प्रत्ययप्रतिवचनं विश्वासकर प्रतिवचनम् ॥

अकु ॥ स्वगतम् ॥ दूरं अवत्थन्तरं गदे तादिसे अणुराए किंवा सुमरावि(दे)ण अधवा अत्ता दाणिं मे सोधणीओ होदु त्ति किञ्चिवदिस्सं । (१०९)

प्रकाशम् ॥ अज्जउत्त । इत्यर्धोक्ते ॥ अधवा संसद्दो दाणिं एसो समुदाचारो । पोरव जुत्तं णाम तुह पुरा अस्समपदे सब्भावुत्ताणहिअअं इमं जणं तधासमअपुव्वअं सब्भाविअ सम्पदं ईदिसेहिं अक्खरेहिं पच्चाक्खादुं । (११०)

राजा ॥ कर्णौ पिधाय ॥ शान्तं शान्तम् । (१११)

---

(१०९) अकु इति । स्वगतमनतिप्रकाशम् । इमामित्यादि । इदमवस्थान्तरं गते साढ्येऽनुरागे किंवा स्मारितेन अथवा आत्मेदानीं शोधनीयो भवत्विति किञ्चिद्वदिष्यामि । इदमवस्थान्तरं वैपरीत्यदशाम् । साढ्ये प्रागनुभूतानिर्वचनीये । स्मारितेन स्मरणाय प्रेरितेन । अनेन किं फलमित्यर्थः । फलानुपलभ्याह अथवेति । शोधनीयो निर्हीकरणीय इति हेनो' ।

(११०) प्रकाश मिति । स्पष्टमित्यर्थः । अज्जउत्त आर्यपुत्र इति अर्धोक्ते सत्याह अधवेत्यादि । अथवा संशयित इदानीमेष समुदाचारः । पौरव युक्तं नाम तव पुरा आश्रमपदे सद्भावोत्तानहृदयमिमं जनं तथा समयपूर्वकं सम्भाव्य साम्प्रतमीदृशै रक्षरैः प्रत्याख्यातुम् । एष समुदाचारः पत्नीत्वव्यवहारः आर्यपुत्रपदप्रयुक्तेति भावः । आर्यपुत्रेति सम्बोध्य. पति. पत्नीजनेन वेति भरत. । संशयितः संशयविषयतां गत. । यद्वा एष समुदाचारो रूपतेराशयः संशयितो जातसंशयः । समुदाचारा स्वभिप्राया इति विकारखण्डनेयम् । पुरा प्राक् । आश्रमपदे आश्रमस्थाने । सद्भावेन प्रणयेन उत्तानं विपर्यस्तगाम्भीर्यं हृदयं यस्य तं जनम् । निम्नं गभीरं गम्भीरमुत्तानं तद्विपर्यये इत्यमर. । समयपूर्वकं प्रतिज्ञापूर्वकं तथा तादृशेन परिग्रहबन्धेपीत्यादृशेन वाक्येनेति यावत् । सम्भाव्य बहुमत्य साम्प्रतमिदानीमीदृशै. चिलयन्नपि न खलु स्वीकरणमर्हभवत्या इत्यादिभिरक्षरै र्वर्णै. प्रत्याख्यातुं निराकर्तुं तव नाम युक्तम् ॥

(१११) राजेति । शान्तं शान्तं विरमतु विरमतु । शान्तं वारणे अव्ययम् । वारणे शान्त अव्ययमिति मेदिनी ॥

व्यपदेशमाविलयितुं समीहसे मां च नाम पातयितुम् ।
कूलङ्कषेव सिन्धुः प्रसन्नमोघं तटतरुं च ॥ (११२)

भक्कु ॥ ओदु जइ परमत्थदो परपरिग्गहसङ्किणा तुए एवं पउत्तं ता अहिण्णाणेण केणवि तुह्य आसङ्कं अवणइस्सं । (११३)

राजा ॥ प्रथमः कल्पः । (११४)

भक्कु ॥ उद्दाणान पराग्रह्य ॥ हद्धी हद्धी अङ्गुलीअअहूणा मे अङ्गुली । इति सविषाद गौतमीमुखमीक्षते ॥ (११५)

---

(११२) व्यपदेशमिति । कूलं कषति भिनत्तीति कूलङ्कषा । प्रियवयादिति कृत्योपपदात्कषे ख । खिच्चात् कूलस्य गन् । सिन्धुर्नदी । सिन्धु समुद्रे नद्यां च नदे देशेभदान योरिति विश्व । यथा प्रसन्नं स्वच्छमोघ जलवेगमाविलयितुं कलुषीकर्तुम् । कलुषोऽनच्छ आविल इत्यमर । तटतरुं तीरस्थतरुञ्च पातयितुं समीहते तथा त्व नाम व्यपदेश व्यवहारम् आचार मिति यावत् । व्यपदेशस्तु नामनि । आद्ये च व्यवहारे चेति शब्दाब्धि । अथवा व्यपदिश्यते व्यवह्रियते अनेनेति व्यपदेशं कुलम् आविलयितुं मां च पातयितुं पतित कर्तुं समीहसे वाञ्छसि । अत्रोपमालङ्कार । आर्यां जाति ॥

(११३) भक्कु इति । ओदित्यादि । भवतु यदि परमार्थत. परपरिग्रहशङ्किना त्वया एव प्रदत्तम् तदभिज्ञानेन केनापि तवाशङ्कामपनेष्यामि । परमार्थतो यथार्थत । परपरिग्रहशङ्किना परकलत्रसन्देहिना । पत्नी परिजनादानमूलशापा* परिग्रहा इत्यमर । एव प्रदत्तमित्थमाचरितम् । तत् तदा । अभिज्ञायते परिचीय तेऽनेनेत्यभिज्ञानं संशयच्छेदि वस्तु तेन । तवाशङ्का तव संशयारोपम् । अपनेष्यामि अपसारयिष्यामि ।

(११४) राजेति । प्रथम कल्पो मुख्यकल्प ॥

(११५) भक्कुइति । मुद्रास्थानमङ्गुलीयस्थानम् । अङ्गुलिदेयमिति यावत । परामृश्य स्पृष्ट्वा । हद्धीत्यादि । हा धिक हा धिक अङ्गुलीयकशून्या मे अङ्गुलि । सुगमम् । सविषादं सखेदम् ॥

गौत्त ॥ णूणं दे सक्कावदारे सचीतीत्थोदअं वन्दमाणाए पब्भट्ठं अङ्गुलीअअं । (११६)

राजा ॥ सस्मितम् ॥ इदं तावत् प्रत्युत्पन्नमतित्वं स्त्रीणाम् । (११७)

शकु ॥ एत्थ दाव विहिणा दंसिदं पच्चक्खं अवरं दे कम्म-दुक्खं । (११८)

राजा ॥ श्रोतव्यमिदानीम् । (११९)

शकु ॥ णं एक्कदिअहे वेदसलदामण्डवे णलिणीवत्तभाअणगदं उदअं तुह हत्थे सण्णिहिदं आसी । (१२०)

राजा ॥ श्रद्धुमस्यायत् । (१२१)

---

(११६) गौतेति। णूणमित्यादि। नूनं ते शक्रावतारे शचीतीर्थोदकं वन्दमानाया प्रभ्रष्टमङ्गुलीयकम्। शक्रावतारो भागीरथीतीरस्थजनपदविशेष तत्र शचीतीर्थं जाह्नव्या शचीलाभवत्। तीर्थमुक्तमित्युपक्रम्य घट्टे माले च सन्निधीति यद्दाम्नि। अतएव वक्ष्यति शचीतीर्थं सलिलं वन्दमानायास्ते सख्या हस्ताज्जाह्नवीस्रोतसि परिभ्रष्टमिति। तस्य उदकं तत्स्थं जाह्नव्या जलं वन्दमानाया. स्वयंपूर्वक प्रणमन्त्या। प्रभ्रष्टमङ्गुल्या स्खलितम् ॥

(११७) राजेति। इदम् अङ्गुलीयकस्यानदर्शनं पुन पतनाभिव्यञ्जनञ्च। प्रत्युत्पन्नमतित्व प्रतिभान्वितत्वम्। प्रतिभातु प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मतेति रुद्रोक्ता ॥

(११८) शकु इति। एत्थेत्यादि। अत्र तावत् विधिना दर्शितं प्रभुत्वम्। अपरम्ते कथयिष्यामि। अत्र अङ्गुलीयकपाते तावत् विधिना दैवन प्रभुत्वम् अलङ्घनीयप्रभावत्वं दर्शितं प्रकटितम्। अपर अभिज्ञानमित्यर्थे ॥

(११९) राजेति। श्रोतव्यं श्रवणार्हम् ॥

(१२०) शकु इति। णमित्यादि। नन्वेकदिवसे। वेतसलतामण्डपे नलिनीपत्रभाजनगतमुदक तव हस्ते सन्निहितमासीत्। वेतसलता वानीरलता लता लताभिर्मण्डपे निकुञ्जे। नलिनीपत्रभाजनगत नलिनीपत्रपुटकस्थम्। सन्निहितमवस्थितम् ॥

(१२१) राजेति। श्रद्धुम स्यावत् न सवात् स्मरामि इति भाव ॥

शकु ॥ तक्खणं सो मे पुत्तकिदओ दीहापङ्गो णाम मिअपोदओ उवट्ठिदो तदो तुए अअं दाव पढमं पिअदु त्ति अणुकम्पिणा उवच्छन्दिदो उदएण ण उण सो अपरिचिदस्स दे हत्थादो उदअं उवगदो पाडुं पच्चा तस्सिं ज्जेव उदए मए गहिदे किदो तेण पणओ एत्थन्तरे विहसिअ तुए भणिदं सव्वो सगणे वीससदि जदो दुवेवि तुम्हे आरण्णआ त्ति । (१२)

राजा ॥ आभिरात्मकार्यप्रवर्त्तिनीभिर्मधुराभिरनृतवाग्भिराराध्यन्ते विदुषिणः । (१३)

---

(१२) शकु इति । तक्खणमित्यादि । तत्क्षणं स मे पुत्रकृतको दीर्घापाङ्गोनाम मृगपोतक उपस्थित सतस्तया अयं तावत् प्रथमं पिबतिति अनुकम्पिना उपच्छन्दित उदकेन, न पुन सोऽपरिचितस्य ते हस्तादुदकमुपगत पातुं पश्चात्तस्मिंश्चोदके गृहीते कृतस्तेन प्रणय । अत्रान्तरे विहस्य त्वया भणित सर्वं स्वगणे विश्वसिति यतो हे एर यूयमारण्यका इति । तत क्षणमिति देशाध्यक्षत्वभावनित्यनेन कर्म्मणा । पुत्रकृतक कृत्रिमपुत्र । दीर्घापाङ्गौ नेत्रान्तौ यस्य स । मृगपोतको मृगशिशु । पोत पाकोऽर्भकोऽस्त्र पृषुक शावक शिशुरित्यमर । तत इति । अनुकम्पिना सदयेन त्वया अय मृगशिशुस्तावत प्रथम पिबतिति कृत्वा उदकेन तेन नलिनीपत्रभाजनगतेन जलेन उपच्छन्दित प्रलोभित । स पुनर्मृगपोतक अपरिचितस्य अज्ञातपरिचयस्य ते हस्तादुदक पातुं नोपगत । प्रणयो विश्वास । प्रणयास्त्वमी । विस्रब्ध याच्ञा प्रेम णेत्यमर । स्वगणे आत्मीयगणे । त्वञ्च मृगपोतकयोरेकशेषादन्यपदलोपे सुवामिति स्त्रीत्वम । आरण्यके । अरण्योद्भवे । इति भणितमित्यन्वितम ॥

(१३) राजेति । आत्मकार्येषु स्वोद्देश्येषु प्रवर्त्तयितुं नियोजयितुं शीलं यासा तासिरात्मकार्यप्रवर्तिनीभि । मधुराभि प्रियाभि । स्वादुप्रियौ तु मधुरावित्यमर । अनृतवाग्भिरन्यवाग्भि । सत्य तथाभूत सम्यगित्यमर ।

गौत० ॥ महाभाग नार्हस्येनं मन्त्रयितुं तपोवनसंवर्द्धितो ह्यं जनोऽनभिज्ञ कैतवस्य । (१२४)

राजा ॥ अयि तापसवृद्धे । (१२५)

स्त्रीणामशिक्षितपटुत्वममानुषीणां
संदृश्यते किमुत याः परिबोधवत्यः ।
प्रागन्तरीक्षगमनात् स्वमपत्यजात-
मन्यद्विजैः परभृताः किल पोषयन्ति ॥ (१२६)

शकु० ॥ अनसूये ॥ अणज्ज अत्तणो हिअआणुमाणेण किल सव्वं मेक्खसि कोणाम अणो धम्मकञ्चुअव्वदेसिणो तिणच्छण्णकूवोवमस्स तुह अणुचारी भविस्सदि । (१२७)

व्याख्यास्यन्ते वशीक्रियन्ते । विषयिणः इन्द्रिय धैकताना । कामिन इति यावत् ॥

(१२४) गौतेति । महेत्यादि । महाभाग नार्हस्येनं मन्त्रयितुं तपोऽनभिज्ञ-त्वित स्वस्यं जनोऽनभिज्ञ कैतवस्य । मन्त्रयितुं विश्वासयितुम् । कैतवस्य छम-नभिज्ञ कपटानभिज्ञ । कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे इत्यमर ॥

(१२५) राजेति । तापसेषु तपस्विजनेषु वृद्धे अथवा तापसी चासौ वृद्धा चेति समास ॥

(१२६) स्त्रीणामिति । अमानुषीणा मानुषीभिन्नाना मनुष्यादिस्त्रीणाम-शिक्षितपटुत्वमनुपदिष्टचातुर्यं संदृश्यते उत भो या परि सर्वतोभावेन बोध-यत्यसेतनाथमो मानुष्य इति यावत् । ता. किं किं निर्दिशन्न इत्यर्थ । अमानु-षीणां चातुर्य दर्शयति प्रागित्यादि । परभृता कोकिला किल अन्तरीक्षगम-नादुड्डयनात् प्राक् पूर्वं स्वं स्वोयमपत्यजातमण्डजमूक्ष अन्यद्विजै रितरपक्षिभि काकैरिति यावत् । द्विजविषाण्डजा द्विजा इत्यमर । पोषयन्ति पालयन्ति । किल वार्तायाम् । अथस्यर्थिल इत्यम ॥

(१२७) शकु इति । अणज्जेति । अनार्य आत्मनोऽहृदयानुमानेन किल

राजा ॥ आत्मगतम् ॥ वनयात्राद्यभिज्ञमः पुनरत्रभवत्याः कोपो लक्ष्यते । तथाहि । (१२८)

न तिर्य्यगवलोकितं भवति चक्षुरालोहितं
वचोऽतिपरुषाक्षरं नच पदेषु संगच्छते ।
हिमार्त्त इव वेपते सकल एव बिम्बाधरः
प्रकामविनते भ्रुवौ युगपदेव भेदं गते ॥ (१२९)

सर्वं प्रेक्षसे को मामन्यो धर्मैकशुल्कव्यपदेशिनकृपणव्रतकूपोपमस्य सत्रात्तकारी भविष्यति । अमार्य अत्रेव । आत्मनोहृदयानुमानेन आत्महृदयवदनुमानेन किल सम्भावनायाम् । आर्त्तासम्भाव्ययोः किलेयमरः । नाम कुत्सने । धर्म्मैसि धर्म्मैकशुल्केन धर्म्मैकपणबहिरङ्गावरणेन व्यपदेशिन आख्यस्य । बहिरङ्गावरणेनान्तर्होषमदर्शयत इति यावत् । अतएव हृषैम्बन्ध आहतसुखो य कूपस्तदुपमस्य तत्रैकोऽन्य स्तदितर अनुष्ठारी सदृशो भविष्यति । त्वमेवात्मानमनुकर्त्तुमर्हसीति भावः ॥

(१२८) राजेति । वनयात्राद्यभिज्ञातनागरीक्षभावत्वात् । अविभ्रमः स्वाङ्गारभावजातविकाररहित । नागरीणान्तु कोपो न विभ्रमं छलतीति भाव । सहर्षयति तथाहीति ॥

(१२९) न तिर्य्यगिति । अस्या अवलोकितं दर्शनं न तिर्य्यक् वक्रम् । सविभ्रमे तु कोपे दृष्टि र्वक्रैव भवतीति भाव । चक्षु र्नैत्रमालोहितमतिरक्तम्भवति । सति तु विभ्रमे चक्षुषो नातिलौहित्यमिति भाव । तथा वचो भाषितम् अतिपरुषाण्यतिनिष्ठुराण्यपि अक्षराणि वर्णा यस्मिन् तत तथोक्तम् । तथा पदेषु लक्ष्यविशेषेषु साहसपुरुषेष्विति यावत् । न सङ्गच्छते च न सङ्गतं भवति च । नागरीभिस्तु न तथोच्यत इति भाव । हिमार्त्तः शीतार्त्त इव सकल एव अत्यधभागमात्रं सविभ्रमे तु तथैव भवतीति भाव । बिम्बाधरो बिम्बिकाफलमिवाधरो लोहितवर्णोऽधर इति यावत् । वेपते कम्पते । बिम्बस्तु प्रतिबिम्बेपि मण्डले पुंसयुसकम् । बिम्बिकाया फले क्लीवं प्रकाशे पुन

अपिच । सन्दिग्धबुद्धिं मामधिष्ठाय अकैतव इवास्याः कोपः सम्भाव्यते । तथाह्यनया । (१२०)

मय्येवमस्मरणदारुणचित्तवृत्तौ
दृत्तं रहः प्रणयमप्रतिपद्यमाने ।
भेदाद्भ्रुवोः कुटिलयोरतिलोहिताक्ष्या
भग्नं शरासनमिवातिरुषा स्मरस्य ॥ (१२१)

प्रकाशम् ॥ भद्रे प्रथितं दुष्यन्तस्य चरितं प्रजास्वपीदं न-दृश्यते । (१२२)

मुमानिति मेदिनी । तया प्रकाशनिते व्यक्तनक्षोभते भ्रुवौ भ्रुगपदेकदैव भेदं द्वैधं गते । चन्यथा न तथेति भाव । इदं वृत्तं नाम वृत्तम् । तदुक्तम् । द्वितीय-मञ्जिकुन्जे यदि षष्ठटमं ह्रादगम । चतुर्दशमथ प्रिये गुरुगभीरनाभिह्रदे । यमञ्चदशमन्तिमं तदनु यत्र कान्ते यतिर्विलासिनि गजमहैर्भवति साम्र वृत्तमिदमिति ॥

(१२०) अपिचेति । सन्दिग्धा सन्देहवती बुद्धिर्यस्य स तम । अधि-ष्ठाय उद्दिश्य । अकैतव इव कापट्यशून्य इव सत्यइवेति यावत् । तदेवोपपादयि-तुमाह तथाहीति । अनया शकुन्तलया ॥

(१२१) मयीति । एवमित्यभूतेनास्मरणेन दारुणा भीषणा चित्तवृत्तिर्मनो-वृत्तिर्यस्य स तस्मिन् । दारुणं भीषणं भीष्मभित्यमर० । अतएव रहो निर्जने वृत्तं भूतं प्रणयम् । विविक्तविजनच्छन्नानि गुप्ताकाङ्क्षया रह० । रहश्चोपायु चालिङ्गे इत्यमर । अप्रतिपद्यमाने अमन्यमाने मयि अतिरुषा अतिक्रोधेन हेतुना अतिलोहिते अतिशयेन रक्ते अक्षिणी यस्या सा तया अनया शकुन्तलया कुटिलयो० कुञ्चि-तयो र्भुवो भेदात् द्वैधीकरणात् स्मरस्य कामस्य शरासनं धनु भग्नं खण्डित-मिव । साम्प्रति कुङ्केव स्मरस्य धनुर्भग्नं येन पुनरसौ न प्रहर्तुं शक्नुयादिति भाव । अत्रोत्प्रेक्षालङ्कार । यमन्ततिलकं वृत्तम् ॥

(१२२) प्रकाशमिति । दुष्यन्तस्य चरितमाचरणं प्रथितं विख्यातं । यतः

यक्ष ॥

तुह्मे ज्जेय पमाणं जाणध धम्मत्थिदिञ्च लोअस्स ।
लज्जाविणिज्जिदाओ जाणन्ति ण किम्पि महिलाओ ॥ (१३३)
सट्ठु दाव अत्तच्छन्दाणुचारिणी गणिआ समुवट्ठिदा । (१३४)

गौत । जादे इमस्स पुरुवंसपच्चएण सुहसञ्चरणो छिन्नअविस्सम्भ इत्थं समुवगदासि । (१३५)

इद मरकतोपादान प्रत्यक्षेपि न दृश्यते प्रजाभिरस्येवं न क्रियत इत्यर्थः । यथा दुष्यन्तस्य चरितमाचरण यत्प्रथितमधर्मामर इत्युक्तत्वेन विख्यातं यपि किं इदं प्रजासु न दृश्यते नानभूयते भवत्येति शेष । दृष्टि ज्ञानेऽक्षिण दर्शन इत्यमर । तथाच प्रजाभिरपि नाधर्म्म क्रियत इति भाव ॥

(१३३) यक्ष इति । तुह्मेइत्यादि । यूयमेव प्रमाणं जानीथ धर्म्मस्थितिञ्च लोकस्य । लज्जाविनिर्जिता जानन्ति न किमपि महिला । यूयमेव प्रमाणं विधिनिषेधात्मक तथा लोकस्य जनस्य धर्म्मस्थितिं धर्म्ममर्य्यादाञ्च जानीथ । मर्य्यादा धारणा स्थितिरित्यमर । लज्जया विनिर्जिता यभिभूता महिला माद्दश्यो मार्य्य किमपि न जानन्ति । यत कथ प्रजासु मे द्रष्टव्यमित्याशय । यनिता महिलाह्वयेत्यमर । यत्र स्तुत्या निन्दाया गम्यत्वा] व्याजरूपस्तुतित्वेन व्याजस्तुतिरलङ्कार । यदुक्त प्रकाशे । व्याजस्तुति र्मुखे निन्दा स्तुतिर्वा रूढिरन्यथेति । यन्यथा रूढिरन्यथाव्यक्ति । निन्द्या स्तुते स्तुत्या निन्दाया इत्यर्थ । इय गाथा ॥

(१३४) सुट्ठिति । सुट्ठु तावदात्मच्छन्दानुचारिणी गणिका समुपस्थिता । सुष्ठु भद्रमित्यर्थ । तावत् तदा । यात्मेति । यात्मनश्छन्देनाभिप्रायेण यनुचारिणी स्वेच्छाचारिणीत्यर्थ । यभिप्रायश्छन्द यायय इत्यमर । गणिका वश्या । वारस्त्री गणिका वेश्या इत्यमर । समुपस्थिता भवत्संमुखमुपस्थिता ॥

(१३५) गौतेति । जादे इत्यादि । जाते यस्य पुरुवंशप्रत्ययेन सुखमधो-

शकु ॥ पटान्तेन मुखमाच्छाद्य रोदिति । (१२६)

शार्ङ्ग ॥ कृत्यमप्रतिहतं चापल्यं दहति । (१२७)

अतः परीक्ष्य कर्त्तव्यं विशेषात् सङ्गतं रहः ।
अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् ॥ (१२८)

राजा ॥ अयि भो किमत्रभवतीप्रत्ययादेवास्मानसम्भृतदोषै-
रधिक्षिपन्ति भवन्त । (१२९)

हृदयविषयं हृत्तं सत्त्वमगतासि । पुरुषप्रत्ययेन महात्मन पुरोवर्ग इति विश्वासेन । सुखे मधु यस्य स तस्य । तथा हृदये विधं यस्य स तथोक्तस्य अस्य पुरुषस्य हृत्तं सत्त्वगतासि परिग्रहविषयता गतासि । प्रश्नोयम् ॥

(१२६) शकु इति । पटान्तेन वस्त्रान्तेन ॥

(१२७) शार्ङ्गेति । चापल्यमात्मनश्चाञ्चल्य अप्रतिहत येन केनापि प्रणय-करणादिकार्य्यादनिवारितं सत् कृत्यमिदमुपकारेण दहति तापयति । चपलधिकुरे चले इति विश्व ॥

(१२८) अत इति । अतोऽस्मात् आत्मचाञ्चल्याप्रतिघातस्य तापादुपलक्षिता-दिति यावत् । विशेषात् परीक्ष्य रहो निर्ज्जने सङ्गतं सौहार्दं कर्त्तव्यम् । अनेनाज्ञता सङ्गताजर्य्ययो पर्य्यायता दर्शिता । अजर्य्यस्तु सौहृद्ये क्लीवलिङ्ग मकीर्त्तितमिति भट्टाम्बि । अज्ञातं हृदयं मनो येषा ते तेषु पुरुषेषु सौहृदं प्रणय एवमित्थं वैरीभवति अवैरमपि वैरं भवति । प्रणयोपि विद्वेषायत इति भाव । अत्र वाक्यान्येनार्थान्तरेण प्रस्तुतार्थसमर्थनादर्थान्तरन्यासोऽलङ्कार । यदुक्तं दण्डिना । ज्ञेय सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किञ्चन । तत्साधर्म्यसम-र्थस्य न्यासो योऽन्यस्य वस्तुन इति ॥

(१२९) राजेति । अत्रभवत्यां प्रत्ययादेतस्यां विश्वासादेव भवन्तोऽस्मान् किमसम्भृतदोषैरनाहृतदोषैरधिक्षिपन्ति निन्दन्ति । प्रश्नोयम् । भवच्छब्दस्य युष्मदर्थस्यैव सर्व्वनामसंज्ञानियमादत्र भवतीत्यस्य न पुंवत् स्त्रीति पुंवद् भाव ॥

यावद्भिः ॥ सास्रवम ॥ स्रुतं भवद्भिरधरोत्तरम् । (१४०)

आजन्मनः साध्यमधिचितो य-
स्यास्यप्रमाणं वचनं जनस्य ।
पराभिसन्धानमधीयते यै-
र्विद्येति ते सन्तु किलाप्तवाचः ॥ (१४१)

राजा ॥ अहो सत्यवादिन, अभ्युपगतं तावदस्माभिः एवंविधा एव वयं किं पुनरिमामभिसन्धाय लभ्यते ! (१४२)

---

(१४०) यावद्भिरिति । भवद्भिरित्येतेन तत्स्था सोमरातादय उच्यन्ते । अधरोत्तरं विपरीतं । वैपरीत्यार्थे अधरोत्तरशब्दो मनुना प्रयुक्तो यथा सप्तमाध्याये राज्ञो दण्डप्रणयिक्ये । अद्यात् काक पुरोडाशं श्वानयेदधरोत्तरान् । स्वाम्यञ्च न क्षयात् क्षिप्रं प्रवर्त्तेताधरोत्तरमिति । तथाष्टमाध्याये वादिन प्रतीपोक्तौ । अदेश्यं यश्च दिशति निर्दिश्यापह्नुते च य । यश्चाधरोत्तरानर्थान् विगीतान्नाभ्युपैत्यसु इति च ॥

(१४१) वैपरीत्यं दर्शयति । आजन्मन इति । यो जन आजन्मन जन्मावधि साध्यमधिचित केनापि पठतां न चिन्तित तस्य जनस्य वचनमप्रमाणं प्रमीयते अनेनेति प्रमाणं निश्चयहेतुर्न । यै पुरुषै परेषा मत्सूया दोषप्रदर्शनपरत्वा दन्येषामित्यपि ध्वनि । अपर वैजयन्तिदूरान्योत्तरे क्षीवन्तु केवल इति मेदिनी । अभिसन्धानं प्रतारणमिति भरतसङ्गीतनम् । अधीयते ते किल पुरुषा आप्ता प्रत्ययिता वाचो येषां ते तथोक्ता सन्तु भवन्तु । आप्त प्रत्ययित त्रिलिङ्गयमर । उपजातिर्वृत्तम ॥

(१४२) राजेति । अहो गम्भ सम्बोधनार्थं । अहो धिगर्थे योके च करुणार्थविषादयो । सम्बोधने प्रशंसायामिति मेदिनी । अस्माभिस्तावदभ्युपगतमङ्गीकृतम् । अङ्गीकाराभ्युपगमप्रतिश्रवसमाधय इत्यमर । वयमेवंविधा

मार्ष ॥ विनिपातः । (१४३)

राजा ॥ विनिपातः पौरवैर्लभ्यत इत्यश्रद्धेयमेतत् । (१४४)

मार्ष ॥ भो राजन् विमलोत्तरैः अनुष्ठितो गुरुनियोगः सम्प्रति प्रतिनिवर्त्तामहे वयम् । (१४५)

तदेषा भवत पक्षी त्यज वैना गृहाण वा ।
उपयन्तुर्हि दारेषु प्रभुता विप्रतोमुखी ॥ (१४६)

गौतमि गच्छाग्रतः । (१४७)

इति सर्व्वे प्रस्थिता । (१४८)

शकु ॥ अहं दाणिं दूमिणा किदवेण विप्पलद्धा तुह्मेवि मं परिच्चअध । दत्थनुपस्थिता । (१४९)

गौत ॥ स्थित्वा परिहृत्यावलोक्य च ॥ यच्छ सङ्गरव चणुगच्छदि णो करुणपरिदेविणी सउन्तला पच्चादेसपरुसे अत्तरि किं करेदु तवस्सिणी । (१५०)

शार्ङ्ग ॥ सरोषं प्रतिनिदिश्य । क्वाः पुरोभागिनि किमिदं स्वातन्त्र्यमवलम्बसे । (१५१)

शकु ॥ भीता वेपते । (१५२)

शार्ङ्ग ॥ शकुन्तले प्रतीहि भवती । (१५३)

---

(१४९) शकु इति । व्यहमित्यादि । व्यहमिदानीमनेन कितवेन विप्रलब्धा । यूयमपि मां परित्यजथ । कितवेन धूर्त्तेन । कितवो धूर्त्तउन्मत्ते वञ्चके कनकाङ्गये इति विश्व । विप्रलब्धा विप्रयुक्ता वञ्चिता वा । विप्रलम्भो विप्रयोग इत्यमर । अनुप्रस्थिता अनुगच्छति सर्व्वानिति शेष ॥

(१५०) गौतेति । स्थित्वा गमनान्निवृत्य । वत्सेत्यादि । वत्स शार्ङ्गरव अनुगच्छति न करुणपरिदेविनी शकुन्तला । प्रत्यादेशपरुषे भर्त्तरि किं करोतु तपस्विनी । करुणेन करुणरसेन परिदीव्यति विलपति या सा करुणपरिदेविनी । विलाप परिदेवनमित्यमर । प्रत्यादेशेन प्रत्याख्यानेन परुषे निष्ठुरे भर्त्तरि तथाविध भर्त्तृसमीपे । सामीप्याधिकरणे सप्तमी । सामीप्यात्तेन्द्रियं व्यापाराधारस्यानुविधरित्युक्ते । किं करोतीति सम्पन्ने गौ । तपस्विनी अनुकम्पार्हा । तपस्वी तापसे चानुकम्पार्हे चेति विश्व ॥

(१५१) शार्ङ्गेति । क्वा इति कोपे । पुरोभागिनि दोषैकदर्शिनि । दोषैकदृक पुरोभागीत्यमर । येन कर्म्मणानुष्ठितेन केवल दोषमात्रं लायते न कश्चित् गुणसम्भावानुयायी दोषैकदृक । स्वातन्त्र्य स्वाधीनता । तथाचोक्तम । पिता रक्षति कौमारे भर्त्ता रक्षति यौवने । पुत्रश्च स्थविरे रक्षे न स्त्री स्वातन्त्र्यमर्हतीति ॥

(१५२) शकु इति । वेपते कम्पते ॥

(१५३) शार्ङ्गेति । सुगमम् ॥

यदि यथा वदति क्षितिपस्तथा
त्वमसि किं पुनरुत्कुलया त्वया ।
अथ तु वेत्सि शुचिव्रतमात्मनः
प्रतिगृह्यतां तव दासमपि क्षणम् ॥ (१५४)
तिष्ठ साधयामो वयम् । (१५५)
राजा ॥ भीरुपरिहृत्य किमत्यभयतो विप्रलभसे । कुतः (१५६)
कुसुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव ।
यद्यिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः ॥ (१५७)

---

(१५४) यदीति । क्षितिपो राजा यथा वदति नेयं मया परिणीतपूर्वेति । यदि त्वं मन्यसि तदा उत्कुलया उद्गतं कुलं यस्या सा तयोक्तया त्वया पुनः किं अस्माकं किं कार्यंकिमर्थम् । अथतु यदितु आत्मनोऽनुसदाचारं शुचि पवित्रं वेत्सि जानासि तदा प्रतिगृह्यतां राजगृहे तव दासं दासीभावोपि क्षणं स्थितम् । क्षण अल्पे स्थिते विश्रम्य पर । इदं द्रुतविलम्बितं नाम वृत्तम् ॥

(१५५) तिष्ठेति । साधयामो गच्छाम । तदुक्तम् । प्रायेण क्रियन्तरु साधिर्गमे स्थाने प्रयुज्यत इति ॥

(१५६) राजेति । आत्मभवतो शकुन्तलां किं कथं विप्रलभसे परित्यजसि । विप्रलम्भो विप्रयोग इत्यमर । अलं विप्रलम्भेनात्मनं मयैनामहमस्य पराङ्मुख एवेति भाव । सत्यं चेत् शङ्कसे कुल इति ॥

(१५७) कुसुदानीति । हि यस्मात् यशाङ्कचन्द्रमाः कुसुदानि कैरवाण्येव बोधयति सन्मीलयति । न पङ्कजानीत्यर्थं । सविता भास्करः पङ्कजानि पद्मान्येव बोधयति न कुसुदानीत्यर्थं । एवं यमिनां जितेन्द्रियमानवानां वृत्तिः प्रकृतिः । वृत्तिर्विवरणाजीव कौशिकादिप्रवर्त्तन इति मेदिनी । परेषामितरेषा परित्यक्तानां पत्नीनां संश्लेषेव स्वयंपु पराङ्मुखो विमुखो भवति । पत्नीपरिग्रहणादानमूलयापा परित्यक्ता इत्यमर । अत्र एवकारद्वयनेतरपरित्यक्तपराङ्मुखत्वधर्मस्यैव निर्देशात् प्रतिवस्तूपमालङ्कार । तदुक्तं दर्पणे । प्रतिवस्तूपमा सा स्याद्यत्र वाक्यार्थयोर्धर्म्यसाम्ययो । एकोपि धर्मः सामान्यो यत्र विन्यस्यते पृथगिति । एवार्थो ज्ञातः ॥

आर्द्रं ॥ राजन् अथ पूर्ववृत्तं व्याक्षेपाद्विस्मृतं भवेत् तदा कथमधर्मभीरोर्दारपरित्यागः । (१५८)

राजा ॥ भवन्तमेवात्र गुरुलाघवं पृच्छामि । (१५९)

मूढः स्यामत्रमेधा वा यद्निष्ठ्येति संशये ।
दारत्यागी भवाम्याशो परस्त्रीस्पर्शपांशुलः ॥ (१६०)

पुरोधा ॥ विचार्य ॥ यदि तावदेवं क्रियताम् । (१६१)

राजा ॥ अनुशास्तु मां गुरुः । (१६२)

उभे ॥ अत्रभवती तावदाप्रसवादन्तःपुरे तिष्ठतु । (१६३)

---

(१५८) आर्द्रेति । अथेति प्रश्नद्योतकं । मङ्गलानन्तरारब्धप्रश्नकात्वेष्वथो अथेत्यमरः । पूर्ववृत्तं पूर्वचरितम् । वृत्तं पद्ये चरित्रे चेत्यमरः । व्याक्षेपात् कार्यान्तराक्षेपात् । अधर्मभीरोरधर्मोद्विग्नस्य । परपरिग्रहसंश्लेषगर्हित्वप्रतिपादनादिति भावः । कथं केन प्रकारेण । दारपरित्यागः कथं त्वं दारान् परित्यजसीत्यर्थः । यतोऽस्ति तत्राधर्म इति भावः ॥

(१५९) राजेति । अत्र विषये । भवन्तं गाम्भीर्यं । गुरुलघ्वोर्भावो गुरुलाघवम् । भावे ष्यञ् । सुपस्थाक्षादित्वादन्त्यपदवृद्धिः । राजेत्यनन्तरं पुरोधसं प्रतीति क्वचित्पाठः । तत्र भवन्तं गुरुम् ॥

(१६०) प्रश्नमाह । मूढ इति । अहं मूढः प्राप्तमोहः विकृतविषादवृत्तान्त इति यावत् । स्यां भवेयं अथवा एषा नारी मिथ्या वदेत् इति संशये दारत्यागी धर्मपत्नीपरित्यागी भवामि । मूढत्वे सतीति भावः । आहो किम्वा । आहो उताहो किमुत विकल्पे किं किमूत चेत्यमरः । परस्त्रीस्पर्शेन परदारस्पर्शेन पांशुलो मलिनो भवामि अस्यामिथ्यावादित्वे इति भावः । इति पृच्छामीत्यन्वयः । संशये परस्त्रीसंस्पर्शाहारत्यागो वरमिति राजाभिप्रायः ॥

(१६१) पुरोधा इति । यदि तावत् यदि तथा तदा एवं पृच्छनमार्यं क्रियताम् ॥

(१६२) राजेति । अनुशास्तु उपदिशतु ॥

(१६३) पुरो इति । आप्रसवात् प्रसवपर्यन्तम् । अन्तःपुरे अन्तर्गृहे भवने ॥

– राजा ॥ कुत इदम् । (१६४)

पुरो ॥ त्वं साधुनैमित्तिकैरुपदिष्टपूर्वः प्रथममेव चक्रवर्त्तिनं पुत्रं जनयिष्यसीति । स चेन्मुनिदौहित्रस्त्वल्लक्षणोपपन्नो भविष्यति ततोऽभिनन्द्य शुद्धान्तेन प्रवेशयिष्यसि विपर्य्यये त्वस्याः पितुः समीपगमनं स्थितमेव । (१६५)

राजा ॥ यथा गुरुभ्यो रोचते । (१६६)

पुरो ॥ उत्थाय ॥ वत्से इत इतो ऽनुगच्छ माम् । (१६७)

यकु ॥ भवदि यसुन्धरे 'देहि मे अन्तरं । इति सह पुरोधसा गौतमीतपस्विभिश्च इदतो निष्क्रान्ता (१६८)

---

(१६४) राजेति । इदं भवद्गृहावस्थानम् ॥

(१६५) पुरो इति । निमित्तानि शुभाशुभलक्षणानि जानन्तीति नैमित्तिका । निमित्तं हेतुलक्षणोरित्यमरः । साधुनैमित्तिकैरुत्कृष्टगणकैः प्रथममादावेव चक्रवर्त्तिनं सार्वभौमं पुत्रं जनयिष्यसि उत्पादयिष्यसि इति त्वयुपदिष्टपूर्वं पूर्वमुपदिष्टः । स गर्भात् प्रसूतो मुनिदौहित्रो मुनिदुहितुस्तवेत् यदि तल्लक्षणैश्चक्रवर्त्तिचिह्नैः । यस्य पादतले पद्मं चक्रं वाप्यथ तोरणम् । अङ्कुशं कुलिशं वापि स राजा भवति ध्रुवमिति तथा आजानुलम्बिनौ बाहू इत्तौ पीनौ नृपेश्वरे इत्यादिभिः रूपपन्नो युक्तो भविष्यति तदा अभिनन्द्य आदाय एनां नारीं शुद्धान्तमन्तः पुरं प्रवेशयिष्यसि । विपर्य्यये वैपरीत्ये राजलक्षणाभावे इति यावत् । अस्या नार्य्याः पितुः समीपगमनं कण्वसमीपगमनं स्थितमव्याहतमेव ॥

(१६६) राजेति । यथा यत्प्रकारो गुरुभ्यो रोचते गुरुणा भवता प्रीतिरुत्पादयति । यथैव दित्यादूयाक्रोधेष्यांकचिद्रोहेत्यादिना गुरुभ्य इति चतुर्थी ॥

(१६७) पुरो इति । मामनुगच्छ मदनुगामिनी भव ॥

(१६८) यकु इति । भवदीति । भगवति वसुन्धरे देहि मे अन्तरम् । वसुन्धरे वसुमति । अन्तरमवकाशम् अहमत्र गच्छामीति भावः । इति इत्युक्त्वा रुदतो क्रन्दनी पुरोधसा राजपुरोहितेन गौतमी च तपस्विनो च ते सर्व इह निष्क्रान्ता अपगता ॥

राजा ॥ शापव्यवहितस्मृति शकुन्तलागतमेव चिन्तयति ॥ (१६९)

नेपथ्ये ॥ आश्चर्यमाश्चर्यम् । (१७०)

राजा ॥ कर्णं दत्त्वा ॥ किन्नु खलु स्यात् । (१७१)

पुरोधा ॥ प्रविश्य सविस्मयम् ॥ देव अद्भुतं खलु संवृत्तम् । (१७२)

राजा ॥ किमिव । (१७३)

पुरो ॥ देव परावृत्तेषु करणीयेषु । (१७४)

सा निन्दन्ती स्वानि भाग्यानि बाला

बाहूत्क्षेपं रोदितुञ्च प्रवृत्ता ॥ (१७५)

राजा ॥ ततः किम् । (१७६)

---

(१६९) राजेति । शापेन दुर्वासस शापेन व्यवहिता कृतव्यवधाना स्मृतिर्यस्य स तथोक्त । शकुन्तलागतं शकुन्तलासम्बद्धम् ॥

(१७०) नेपथ्य इति । सुगमम् ॥

(१७१) राजेति । कर्णं दत्त्वा साभिनिवेशं श्रुत्वा । किन्नु चिन्तकौ । किन्नु प्रत्यभिज्ञायोरिति मेदिनी । खलु प्रश्ने ॥

(१७२) पुरो इति । अद्भुतसमाधय क । विस्मयोऽद्भुतसमाधय्यं नित्यमर ॥

(१७३) राजेति । किमिव कीदृक ॥

(१७४) पुरो इति । परावृत्तेषु निवृत्तेषु करणीयेषु सपत्निव । तत श्लोकीयार्थान्वय ॥

(१७५) सेति । स्वानि स्वीयानि भाग्यानि दैवानि निन्दन्ती सा बाला च बाहूत्क्षेपं बाहू उत्क्षिप्य रोदितुं प्रवृत्ता आरब्धवती । एतदनन्तरं राजवचनान्ते वक्तव्यमाणेन परार्द्धेन वाक्यसमापनम् । बाहूत्क्षेपमिति द्वया स्वाङ्गादप्रवादिमि वक्तव्याङ्गणम् । मान्नाव्ययेन समाउ । यत्किञ्चिद्वे क्षिप्ते न क्षियते तदङ्गमभूतम् ॥

(१७६) राजेति । सुगमम् ॥

द्वरो ॥

स्त्रीसंस्थानक्षाम्यरक्षीर्थमारा-
दुत्क्षिप्याङ्के ज्योतिरेना तिरोऽभूत् ॥ (१७७)

पर्व ॥ विपर्यं रूपयन्ति । (१७८)

राजा ॥ भगवन् प्रागेवास्माभिरेषोर्थः प्रत्यादिष्टः किं त्वया तर्के-णान्विष्यते विश्राम्यताम् । (१७९)

प्रतीहा ॥ विजयस्व । इति निष्क्रान्त । (१८०)

राजा ॥ वेत्रवति पर्य्याकुलोऽस्मि शयनीयमत्रभवान्मार्गमादे-शय । (१८१)

---

(१७७) द्वरो इति । द्वरोद्धा मनुष्यश्लोकस्यापरार्धं गाढ स्त्रीति । स्त्रीणां संस्थान-मिवातिरिक्तं संस्थानं यस्य तत् तथोक्तम् । संस्थानमाकृतौ स्त्र्यां सन्निवेशे चतुष्पथे इति मेदिनी । अक्षरक्षीर्थं अक्षरसामिव तीर्थं दर्शनं यस्य तत् अक्षरोपदृश्यमान मिति यावत् । तीर्थमुपायमित्युपक्रम्य उपाध्याये दर्शने चेति शब्दाब्धि । अथवा अक्षरस तीर्थं योनि र्यस्य तत् अक्षरोयोनि इत्यर्थं । तीर्थं योनौ जलावतारे चेति शब्दायुध । ज्योति रेवत् । गन्धर्वव्याहृत्यर्थं स्त्रीसंस्थानमिति । आरात् समीपादेनां बालामङ्के क्रोडे उत्क्षिप्य उत्तोल्य तिरोऽभूत् अन्तर्हितमभूत् । तिरोऽन्तर्धौ तिर्यगर्थे इत्यमर । हो धकारो बालाद्वयगतौ स्त्रियो पौष्पोपर्यंमध्यवर्त्तिनं बोधयत । इदं मालिनी नाम वृत्तम् । तल्लक्षम् । द्वौ यौ वर्णौ भायते यत्र यत्र कम्बुग्रीव सहदेवाष्टमान्यो । विश्राम स्यात्तस्मि वेदै रुद्रैर्न्नौ भावन्ते मालिनी छान्दसीया इति ॥

(१७८) पर्व इति । रूपयन्ति नाटयन्ति ॥

(१७९) राजेति । एषोऽर्थ शकुन्तलारूपं वस्तु । प्रत्यादिष्टो निराकृत । इदानी मानुपत्वेपि सन्देहादर्थपदप्रयोग । तर्केण किमेवं किमेवमिति विचारेण । मृषा मिथ्या । अन्विष्यते अनुसन्धीयते ॥

(१८०) प्रतीहो इति । सुगमम् ॥

(१८१) राजेति । पर्य्याकुल परिश्रान्त । शय्यतेऽस्मिन्निति शयनीयम् । अधि-करणे अनीय । तत्र तत् मार्ग इति तस्य मार्गम् ॥

प्रती ॥ हृदो हृदो देवो । इति मल्लिनाथः। (१८२)

राजा ॥ परिक्रम्य खगतम् । (१८३)

कामं प्रत्यादिष्टा स्मरामि न परिग्रहं मुनेस्तनयाम् ।
बलवत्तु दूयमानं प्रत्याययतीव मा हृदयम् ॥ (१८४)

इति निष्क्रान्ता सर्वे । पञ्चमोऽङ्कः । (१८५)

---

(१८२) प्रतीति । हृद इत्यादि । हृद हृदो देव । सुगमम् ॥

(१८३) राजेति । सुगमम् ॥

(१८४) काम मिति । प्रत्यादिष्टा निराकृतां मुने कन्यां परित्यक्ष परिणीता कामं पर्याप्तं न स्मरामि । बलवद्दूयमानमतिभयेन खिद्यमानम् । दूङ्य खेदे इति कविकल्पद्रुम । हृदयं मनस्तु मां प्रत्याययति परिणीतपूर्वंतया विश्वासयतीव । इय माया ॥

(१८५) इतीति । एवमुक्तो सत्यामित्यर्थं ॥

इति श्रीकृष्णनाथन्यायपञ्चाननभट्टाचार्यविरचितायामभिज्ञानशकुन्तलटीकायां
प्रथमिकाख्यायां पञ्चमोऽङ्कविवरणम् ॥

अथ पञ्चमाङ्कांशोऽङ्कावतारः ।

तत प्रविशति नागरकश्याल पत्नीताडितं पुरुषमादाय

रक्षिण्यौ च । (१)

रक्षिणौ ॥ पुरुषं ताडयित्वा ॥ अले कुम्भिलक्ष्या कधेहि [illegible] तुए एधे महामणिभाणुले उक्किण्णामाक्खले लाक्षंकीए [illegible]ए ममाधादिदे । (२)

पुरुष ॥ भीतिनाटितकेन ॥ पढीदन्तु पढीदन्तु मे भायामण्णे ण हग्गे दैदिगस्स चक्काञ्जस्स कालके । (३)

---

(१) तत इति । नागरको नगरस्य प्रधानरक्षक कलश्यालय पत्नीभ्राता । श्यालाभ्यन्तर पत्न्याश्चत्यगर । पश्चाद्ताडितं पृष्ठलग्नताडितं कृत्वा पतितम् । पुरुषं कमपि जनम् । चाटाद्येत्यस्य कर्त्तरी रक्षिणौ । रक्षिणौ रक्षको च प्रविशत इति शेष ॥

(२) रक्षिणाविति । ताडयित्वा आहत्य । अले इत्यादि । अरे कुम्भिलक कथय कस्त्वया एतन्महामणिभास्वरसुत्कीर्णनामाक्षरं राजकीयमङ्गुरीयकं समासादितम् । कुम्भिलकचोर । कुम्भिल वाक्यमीने च चोरे श्लोकार्धचोरयोरिति मेदिनी । अक्खेति । महामणिना भास्वरं दीप्तिमत् । सिद्धासभक्खो घुर इति घुर । उत्कीर्णानि अङ्कितानि नामाक्षराणि यत्र तत् । समासादितं प्राप्तम् ॥

(३) पुरुष इति । भीतिनाटितकेन भितिक्षुभयकृव्यापारेण । पढीति । प्रढीदन्तु प्रढीदन्तु मे भायनिच्चा नाडमोडणलाकार्यंक्ष कारक । भायनिच्चा भावेषु विद्यन्तु गोरक्षिता । भावेषु विद्यानित्यगरः । गोरक्षिताक्षार्यंमिश्राः चाध्याक्षभक्षभक्षया इति सिक्षाजघेषः । अक्षार्यंक्ष औध्वंक्ष ॥

एक ॥ किणु खु भोदणे बम्हणेणि त्ति कदुअ लज्जा दे पडिग्गहे दिणे । (४)

* पुरुष ॥ शुणुध दाव हगे खु अक्काअदालवासी धीवले । (५)

द्वितीयः ॥ अले माअच्चले किं तुमं अम्हेहिं सधदिं जादिश्च पुच्छीअदि । (६)

नाग ॥ सूअअ कधेदु सव्वं अणुक्कमेण मा अन्तरा पडिबन्धेअ । (७)

उभौ ॥ जं आउत्ते आणवेदि तधेहि ले । (८)

---

(४) एक इति । रच्चिणोरितिशेष । किणित्यादि । किमु खलु भोगनो ब्राह्मणीभीति लत्वा राज्ञा ते प्रतिग्रहो दत्त । प्रतिग्रह प्रतिग्राह्य ॥

(५) पुरुष इति । शुणुधेत्यादि । शृणुत तावत् अहं खलु अक्काअतारवासी धीवर । अक्काअतारो गङ्गातीरगत प्रदेशविशेष । धीवर कैवर्त्त । कैवर्त्तो दाशधीवरावित्यमर ॥

(६) द्वितीय इति । रच्चिणोरिति शेष । अले इत्यादि । अरे माटश्वर किं त्वमस्माभि वंसति जातिश्च पृच्छसे । माटश्वरश्चौर । चौरैकागरिकस्तेनदस्युतस्कर मोषका । प्रतिरोधिपरारुन्दिपाटश्वरमलिम्लुचा इत्यमर । पृच्छते हिंकम्मकगणने याचादौ पाठात् त्वमिति गौणकर्म्मणि कर्म्मप्रत्ययो न वसतिजात्योर्मुख्ययोरपि । तदुक्तं न्यादिव्रजनाटगत्यर्थाः सख्यौ ढे दत्यमाद्रुषु । गौणे याचादयोऽन्येतु यथेष्टं द्विदुषिनीति ।

(७) नागेति । सूअअ इत्यादि । सूचक कथयतु सर्वंमनुक्रमेण । मा अन्तरा प्रतिबध्नीया । ' सूचक इति द्वितीयरन्धिषे । आमेधेयम् ' अनुक्रमेण अथक्रमेण ' अन्तरा मध्ये वाक्यस्येति शेष । अथान्तरेऽन्तरा । अन्तरेण च मध्येस्युरित्यमर । मा प्रतिबध्नीया प्रतिबन्धको मा भू ॥

(८) उभाविति । रच्चिणावित्यर्थं । जमित्यादि । यदायुक्त आज्ञापयति । तथ रे । आउत्तो भगिनीपति । भगिनीपतिरायुक्त इत्यमर । तथ कथय ॥

अथ पञ्चमाङ्कांशोऽङ्कावतारः ।

सत प्रविशति नागरकस्यात पश्चाद्दाक्षिणं पुरुषमादाय रक्षिणी च (१)

रक्षिणी ॥ पुरुषं साडयित्वा ॥ अले कुम्भिलआ कधेहि [illegible] तुए एधे सहामणिभाइणे दक्षिणणामाअले लाअकीए [illegible] ए यमाआदिदे । (२)

पुरुष ॥ भीतिनाटितकेन ॥ पसीदन्तु पसीदन्तु मे भायणिअमणे ण हग्गे ईदिअस्स अकज्जस्स कारके । (३)

---

(१) सत इति । नागरको नगरस्य प्रधानरक्षक स्वस्य श्यालाय पत्नीभ्रात्रे । श्याला स्वभगिनीं पत्न्याहत्यर्थः । पश्चाद्दाक्षिणं दृष्टलग्नपार्श्वं लात्वा सदम् । पुरुषं जनमपि जनम् । आदाबेत्यस्य कर्त्तारौ रक्षिणौ । रक्षिणौ रक्षकौ च प्रविशत इति शेषः [illegible] दक्षिणामिति [illegible] । अन्यत्सुगमम् । अथ श्रोत्रिय एकां शाखां सकल्पां वा सङ्गिरन्प्रोत्य वा षट्कर्मनिरतो विप्र श्रोत्रियो नाम धर्मविदिति हैमशेषोक्तलक्षणो विप्र । अनुकम्पया कृपया बहुश्च शतकुमारस्वभावोपि पशुमारणकर्मणः पापत्वं श्वेतच्छागलगाखभेत । अग्नीषोमीयं पशुमालभेत । तेषां छन्दसां गोदिग्यादिषु विहन्तुदिनपशुघातेषु दक्षणो क्षीवणो भवतीति शेष । तथा च सदोमपि मरणागतं कर्म न गर्हणीयमिति भाव । अतएव गीतायाम् । सहजं कर्म कौन्तेय सदोष मपि न त्यजेत् । यज्ञोत्थाहि दोषेण धूमेनाग्निरिवावृता इति । सुन्दरी नाम हरमेखलम् । लक्षणन्तूक्तं प्राक ॥

(३) भागेति । सदो सदो सलक्षणः ॥

एक॰ ॥ किण्णु खलु शोहणे बम्हणेत्ति कदुअ लज्जा दे पडि-ग्गहे दिसे । (४)

॰ पुरुष ॥ शुणुध दाव हग्गे खलु शक्कावदालवासी धीवले । (५)

द्वितीयः ॥ अले माअच्छले किं तुमं अम्हेहिं सद्धिं जादिश्च पुच्छीअदि । (६)

भाग ॥ हूअअ कधेदु सव्वं अणुक्कमेण मा अन्तरा पडि-बन्धेअ । (७)

ओ ॥ जं आउत्ते आणवेदि तवेहि ले । (८)

---

(४) एक इति । रक्षिणोरितियेम॰ । किण्णित्यादि । किमु खलु शोभनो ब्राह्मणो-ऽयमिति कृत्वा राज्ञा ते प्रतिग्रहो दत्त॰ । प्रतिग्रह प्रतिग्राह्यः ॥

(५) पुरुष इति । शुणुधेत्यादि । ॰शृणुत तावत् अहं खलु शक्रावतारवासी धीवर । शक्रावतारो गङ्गातीरगत॰ प्रदेशविशेष॰ । धीवर॰ कैवर्त्त॰ । कैवर्त्तो दासधीवरावित्यमर॰ ॥

(६) द्वितीय इति । रक्षिणोरिति भेदः । अले इत्यादि । अरे माटश्वर किं त्वम-स्माभि र्वंशतिं जातिञ्च पृच्छ्यसे । माटश्वरश्चौरः । चौरैकागरिकस्तेनदस्युतस्कर-[illegible] । प्रतिरोधिपरास्कन्दिमाटश्वरमलिम्लुचा इत्यमर । पृच्छते हिंकर्म्मकरणे

(७) नागति । आमाव[illegible]गोरपि अन्तर-गतमिति नास्ति सन्देह॰ यतोऽयमाभियगन्धो याति । आगम इदानीमेतस्येव विचारणीय॰ सन्देह राजकुलमेव गच्छाम॰ । जाणुक इति प्रथमरक्षिणो नाम । यस इत्यादि । यतो यस्मादयमाभियगन्धो गन्धप्रगन्धो याति गच्छति । एतस्य अद्भुतीयकस्य एष धीवरोक्त आगम आगतेर्वृत्तान्त इदानीं विस्पष्टयो विचारणीय॰ न उपेक्षणीय इत्यर्थ । एत आगच्छत । राजकुलं राजभवनम् । कुलं जनपदे गोत्रे सजातीयगणे पिच । भवने च ननौ क्लीबमिति मेदिनी ॥

(८) रक्षिणाविति । धीवरं चौरत्वेनाभियुक्तम् । गच्छेत्यादि । गच्छ रे ग्रन्थि-च्छेदक, गच्छ । रे इति तुच्छसम्बोधने । सम्बोधनेऽङ्ग भो॰ माट् माट् हे हे हंहोऽरेरेपि चेति हेमचन्द्र । ग्रन्थिच्छेदकचौर॰ ॥

इति परिक्रामति । (१७)

नाग ॥ सूच्यश्च भूय गोउलदुआले अप्पमत्ता पडिपालेध मं जाव लाचउलं पवेसिअ णिक्कमामि । (१८)

उभौ ॥ पविशतु आयुक्तो स्वामिप्रसादार्थम् । (१९)

नाग ॥ परिक्रम्य निष्क्रान्त । (२०)

सूच ॥ जाणुअ चिलाअदि कधु आयुत्ते । (२१)

जाणु ॥ णं अवग्गलोवग्गपणीआ राआणो होन्ति । (२२)

सूच ॥ फुरन्ति मे अग्गहत्था दूरं गन्धिच्छेदअं वावादिदुं । (२३)

---

(१७) इतीति । इति एतदुक्तौ सत्यामित्यर्थः । परिक्रामन्ति राजकुलगमनं रूपयन्ति धीवरसहिता सर्व्वे इति शेषः ॥

(१८) नागेति । सूचक इत्यादि । सूचक इह गोपुरद्वारे अप्रमत्तौ प्रतिपालयतं मा यावद्राजकुलं प्रविश्य निष्क्रामामि । गोपुरद्वारे गोपुरसंज्ञके द्वारे । पुरद्वारन्तु गोपुरमित्यमरः । अप्रमत्तौ धीवर प्रति सावधानौ । प्रमादोऽनवधानतेत्यमरः । प्रतिपालयतं युवां प्रतीक्षेथाम् । निष्क्रामामि । प्रत्यागच्छामि । क्रमोऽयमिति केचित् ॥

(१९) उभाविति । पवीत्यादि । प्रविशतु आयुक्त स्वामिप्रसादार्थम् । स्वामिनो भर्त्तुः प्रसादार्थं प्रसन्नतार्थम् ॥

(२०) नागेति । परिक्रम्य राजकुलप्रवेशं रूपयित्वा ॥

(२१) सूचेति । जाणुअ इत्यादि । जाणुक चिरयति खलु आयुक्त । चिरयति विलम्बं करोति । खलु प्रश्ने कथमित्यर्थः ॥

(२२) जाणु इति । णमित्यादि । नन्वग्रहरोपसर्पणीया राजानो भवन्ति । नन्वत्र खलु प्रश्ने । नन्वसन्दो विमर्शदृष्टे । खलु प्रश्ने इति मेदिनी । राजानोऽग्रहरेणावश्याधेन सद उपसर्पणीया उपगम्या भवन्ति नन्वु ॥

(२३) सूचेति । फुरन्तीत्यादि । स्फुरतो मे अग्रहस्तो दूरं गन्धिच्छेदकं व्यापादयितुम् । स्फुरत सम्पदने । अग्रहस्तो मणौ । व्यापादयितुं मारयितुम् ॥

धीव ॥ णालिहदि भावे अच्चालणमालके भविदुम् । (२४)

जाडु ॥ विलोक्य ॥ एथे अह्माणं दूरदले पत्ते गेण्हिअ लाअ-णायणं आअच्छदि ग्रम्पदं एथे शउलाणं मुहं पेक्खदु अहमा गिद्ध-णिआलाणं बली होदु । (२५)

णाग ॥ प्रविश्य ॥ सिग्घं सिग्घं एदं । इत्यर्धोक्ते । (२६)

धीव ॥ हा हदोस्मि । इति विषादं नाटयति । (२७)

णाग ॥ सुस्सुध जालोवजीविणं । उवणेदु से अङ्गुलिअस्स आगमे अह्म आमिणा जाव कधिदं । (२८)

---

(२४) धीवेति । णालीत्यादि । नाहंति भावोऽकारणमारको भवितुम् । भावो विद्वान् । अकारणमारक. अनिमित्तघातक ॥

(२५) जालु इति । विलोक्य मन्यानं दृष्ट्वा । एथे इत्यादि । एषोऽस्माकमीश्वर. पत्रे दृष्ट्वोत्वा राजशासनमागच्छति । सामन्तमेव स्वकुल्यानां सुखं प्रेक्षता अथवा दृष्टभृङ्गा-लानां बलिर्भवतु । अस्माकमीश्वरो नागरकश्शाल. । पत्रे दृष्ट्वोत्वा पत्राद्दृष्ट्वा । राजशासनं राजादेशम् । एव धीवर. । स्वकुल्यानां निजबंधूनाम् । बलिरुपहार. । दण्डादण्डयोरुभयोरेव सम्भवादिति भाव. । करोपहारयो. पुंसि बलि. प्राप्तयज्ञजे स्त्रियामित्यमर. ॥

(२६) नागेति । प्रविश्य रङ्गभूमि मिलित्वेव । सिग्घमित्यादि । शीघ्रं शीघ्रमेतम् । इत्यर्धोक्ते सुस्वतं जालोपजीविन मित्यनस्य वाक्यस्यार्धं उक्ते ॥

(२७) धीवेति । हेत्यादि । हा हतोस्मि । हा विषादे । विषादं विषण्णतां नाट-यति रूपयति । मारयतमिति वाक्यशेषमनुमायेति भाव ॥

(२८) नागेति । सुस्वधेत्यादि । सुस्वतं जालोपजीविनम् । उपपन्नोऽस्याङ्गुरीयस्या-नाम. । अस्मत्स्वामिना यावत् कथितम् । उपपन्नो युक्त. । यावत् यदा अस्मत्स्वामिना राज्ञा कथितं तदा उपपन्न इत्यन्वय. ॥

ह्रच ॥ जह। आणवेदि आउत्ते जमवशदिं गदुअ पडिणिउत्ते खलु एशे। इति धीवरं बन्धनान्मोचयति। (२९)

धीव ॥ भट्टके शम्मदं तुह केलके मे जीविदे। इति पादयोः पतति। (३०)

नाग ॥ उट्ठेहि एसे भट्टिणा अङ्गुलीअमुल्लसम्मिदे पारितोसिए दे पसादीकदे ता गेह्ण एदं। इति धीवराय कटकं ददाति। (३१)

धीव ॥ संदिशं शप्रणामञ्च प्रतिगृह्य ॥ अणुग्गहीदोह्मि। (३२)

जालु ॥ एशे क्खु रण्णा तधा अणुग्गहिदे जधा शूलादो ओदालिअ हत्थिक्खन्धे शमारोविदे। (३३)

ह्रच ॥ आउत्ते पारितोशिएण जाणामि महालिहलदशेण अङ्गुलीशएण शामिणो बद्धमदेण होदव्वं। (३४)

---

(२९) ह्रचेति। जधेत्यादि। यथाज्ञापयत्यायुक्तः। यमवसतिं गत्वा प्रतिनिवृत्तः खलु एषः। यमवसतिं यमवेश्म ॥

(३०) धीवेति। भट्टके इत्यादि। भर्तः. साम्प्रतं तव क्रीतकं मे जीवितम्। क्रीतकं क्रीतम् ॥

(३१) नागेति। उट्ठेहीत्यादि। उत्तिष्ठ एतद्भर्त्रा अङ्गुलीयमूल्यसम्मितं पारितोषिकं ते प्रसादीकृतं तद्गृह्णाणैतत्। भर्त्ता राजा। अङ्गुलीयस्य यन्मूल्यं सत्सम्मितं तत्परिमितं पारितोषिकं परितोषदत्तं वस्तु प्रसादीकृतं प्रसन्नताखरूपीकृतम्। कटकं वलयं। कटकं वलयोऽस्त्रियामित्यमरः ॥

(३२) धीवेति। अणुग्गहीतोऽस्मि। अनुगृहीतः कृतानुग्रहः ॥

(३३) जालुरिति। एशे इत्यादि। एष खलु राज्ञा तथानुगृहीतः यथा शूलाद्वतार्य्य हस्तिस्कन्धं समारोपितः। एष धीवरः शूलान्मत्स्यबन्धार्थंरोपितादयः क्रीलकात्। अवतार्य्य उत्तीर्य्य नमयित्वा। समारोपितो निवेशितः ॥

(३४) ह्रचेति। आयुक्ते इत्यादि। आयुक्त पारितोषिकेण जानामि महार्हरत्नेन अङ्गुलीयकेण स्वामिनो बद्धमतेन भवितव्यम्। जानामि अनुमिनोमि। महार्हरत्नेन महामूल्यरत्नभूतेन। स्वामिनो बद्धमतेन राज्ञः सगादरेण ॥

नाग ॥ ण तस्सिं भट्टिणो महालिङ्गलद्दणं त्ति कदुअ पलिदोसो एत्ति उण तक्केमि। (३५)

उभौ ॥ किं उण। (३६)

नाग ॥ तस्स दंसणेण भट्टिणा कोवि अच्चिमदो जणो सुमरिदो त्ति जदो सुइत्तअं पडुदिगभीरोवि पज्जुसुअमणा आसी। (३७)

खच ॥ दोसिदे शोदूदे अ दाणिं भट्टा आउत्तेण। (३८)

जाडु ॥ णं भणेमि दूसणए मच्छअत्तुणो कदे। इति धीवरमसूयया पश्यति। (३९)

धीव ॥ भट्टालके इदो चइदं तुह्माणम्मि शुलासुल्लं होदु। (४०)

---

(३५) नागेति। ऐत्यादि। न तस्मिन् भर्तुर्महाहरत्नमिति ज्ञात्वा मरितोस। एतत्पुनस्तर्कयामि। तस्मिन्नङ्गुरीये। महाहरत्नमुत्कृष्टरत्नम्। एतत् षष्ठ्यगाणम् ॥

(३६) उभाविति। किं पुण। किं पुन ॥

(३७) नागेति। तस्सेत्यादि। तस्य दर्शनेन भर्त्ता कोप्यभिमतो जन स्मृत इति यतो मुहूर्त्तं प्रकृतिगम्भीरोपि पर्य्युत्सुकमना आसीत्। तस्य अङ्गुरीयस्य। भर्त्ता राजा। अभिमतो वाञ्छित। इतीति तर्कयामीत्यन्वितम्। मुहूर्त्तं कञ्चित्कालं व्याप्य पर्य्युत्सुकमना आसीतिति सम्बन्ध। प्रकृतिगम्भीर प्रकृत्या स्वभावेन गम्भीर। पर्य्युत्सुकमना उत्कण्ठितमना ॥

(३८) स्वचेति। दोसिदे इत्यादि। तोषित योषित चेदानीं भर्त्ता आयुक्तेन। योषित योकं गमित। आयुक्तेन भवता ॥

(३९) जाडु इति। णमित्यादि। ननु भणामि अस्य मत्स्यगन्धो इति। नन्वहं भणामि यत् अस्य मत्स्यगन्धोर्धीवरस्य इते अर्थे भर्त्ता आयुक्तेन योषित इति शेष। नन्वायुक्तेन स्वार्थं भर्त्ता योषित इति भाव। अर्थे इतेऽव्यय तावत् तादर्थ्ये वर्त्तते द्वयमिति कोषसार। असूयया दोषारोपणेन ॥

(४०) धीवेति। भट्टेत्यादि। भट्टारक इतोऽहं युष्माकमपि सुरामूल्यं भवतु। इतो राजप्रसादीकृतकटस्य। सुरामूल्य मद्यक्रयोपयोगि ॥

अभिज्ञानशाकुन्तलम् ।

षष्ठोऽङ्कः ।

ततः प्रविशत्याकाशयानेन गिश्रसेणी । (१)

मिश्र ॥ णिव्वत्तिदं मए पज्जाअणिव्वत्तणिज्जं अच्छरातित्थसन्दिट्ठं ता जाव साऊजणस्स अहिसेअकालो भवे दाव सम्मदं इमस्स राएसिणो वुत्तन्तं पच्चक्खीकरिअ णं मेणआसअम्बेण सरीरब्भूदा दाणिं मे सउन्तला तएअ दुच्चिंतिअमित्तं सन्दिट्ठपुव्वत्ति । (२)

जाणु ॥ धीवल महत्तले अम्हदं अहाणं पिअवअस्सके संदुत्तेशि कादम्बलीअक्खिके खलु पढमं ओहिदे दुक्खीअदि ता एहि गुणिड-आलअं जेव गच्छम्ह । (४१)

इति निष्क्रान्ता सर्वे । अङ्कावतारः । (४२)

---

(४१) जाणु इति । धीवलेत्यादि । धीवर महत्तर अस्माकं प्रियवयस्य संदृष्टोसि कादम्बरीसाक्षिकं खलु प्रथमसौहृदमिष्यते तदेहि गौण्डिकालयमेव गच्छाम । महत्तर अतिमहान् । साम्प्रतमिदानीम् । कादम्बरीत्यादि । प्रथमसौहृदं प्रथमसौहार्दं कादम्बरी मदिरैव साक्षी प्रत्यक्षदर्शिजनस्वरूपा यस्य तत् तथोक्तं खलु तथाभूतमेव दृश्यते लोकैरिति शेषः । उक्तं समक्षदर्शनात् साक्षीति । चाण्डालादयो मद्यसाक्षिकमेव परिणयनव्यापारं निर्वर्तयन्तीति प्रथमसौहृदमुक्तम् । गन्धोत्तमा प्रसन्नेरा कादम्बर्यः परिस्तृता । मदिराकश्यमद्येत्यमरः । साक्षिशब्दोत्र प्रत्यक्षदर्शिजनवाचकतया दृष्टेरुद्देश्यविधेयभावान्विततया न पुष्कलं जहाति । अत उक्तम् । उद्देश्यविधेयभावे लिङ्गानां नास्ति तन्त्रतेति । तत् तस्मात् एहि आगच्छ गौण्डिकालयं सुराकारालयमेव गच्छामः ॥

(४२) दुरीति । एवमुक्तो सत्यामित्यर्थः । अङ्कावतारः षष्ठाङ्कावतरः पञ्चमाङ्कांश । तदुक्तम् । अङ्कान्ते क्वचित पात्रैस्तदङ्कस्याविभागतः । यत्राङ्कोऽवतरत्येषोऽङ्कावतार इति स्मृत इति । अत्र पात्रैर्नागरकश्यालादिभिर्नृपतेरुत्कण्ठासूचनादिरङ्कावस्यामदर्शनात्मक षष्ठाङ्कोऽवतरति ॥

इति श्रीकृष्णनाथशर्मकृतायामभिज्ञानशकुन्तलटीकायां

प्रवेशिकाख्यायामङ्कावतारनाम

पञ्चमाङ्कांशविवरणम् ॥

तत्त प्रविशति चूताङ्कुरमाघोषयन्ती चेटी सतृष्टेऽपरा च। (४)

प्रथमा॥ कधं उवत्थिदो मङ्कमासो। (५)

आतम्बहरिअवेण्टं उच्छुसिअं विअ वसन्तमासस्स।

दिट्ठं चूअङ्कुरअं कणमङ्गल्लं णिअच्छामि॥ (६)

द्वितीया॥ मरुअदिए किं एदं एआइणी मन्तेसि। (७)

प्रथमा॥ मङ्कअरिए चूअकलिअं पेक्खिअ उम्मत्तिआ क्खु मरुअदिआ होदि। (८)

अङ्गुलिप्रहारा यतो उपलक्षेत्र व्याख्यामि। नाट्येनावतीर्यं आकाशादवतरणं रूपयित्वा॥

(४) सत इति। चूताङ्कुरमाघोषयन्तम्। चेटी अत्याविशेष। सतृष्टे सतृष्णा। अपरा चेटीत्यर्थः॥

(५) प्रथमेति। प्रथमा चेटीत्यर्थः। कथमित्यादि। कथमुपस्थितो मधुमास। मधुमासो वसन्तमास। मधु। दैत्ये चैत्रे वसन्ते चेति विश्व। चूताङ्कुरेण चूत कलिकालोकनान्मधुमासस्यानुमानम्॥

(६) आतम्रेत्यादि। आताम्रहरितपत्रं उच्छ्वसितमिव वसन्तमासस्य। दृष्टं चूताङ्कुरकं क्षणमङ्गल्यं नियच्छामि। आताम्रगोपक्षोद्भिन्नं हरितं पालाशवर्णञ्च छन्नं बन्धनं यस्य तत्। आताम्रं पाटलं विपदारुण मिति धनञ्जय। पालाशो हरितो हरिदिति छन्नं प्रसवबन्धनमिति चामर। वसन्तमासस्य उच्छ्वसितं जीवितमिव दृष्टं चूताङ्कुरकं चूतकुसुम क्षणे चञ्चले वसन्तमासविहिते इति यावत् मङ्गल्यं मङ्गलाय हितं नियच्छामि निश्चिनोमि। वसन्तमासस्य उच्छ्वसितमिव दृष्टमिति उत्सवमङ्गल्यत्वे हेतुरत्रेय। निर्व्यापारस्थितौ कालविशेषोत्सवयो क्षण इत्यमर। नियमो यन्त्रणायाञ्च प्रतिज्ञानिश्चये व्रते इति मेदिनी। अत्रोच्छ्वसितमिवेत्युत्प्रेक्षा। अन्दस्तु गाथाख्यम्॥

(७) द्वितीयेति। अपरा चेटीत्यर्थः। मरुअदिए इत्यादि। मरुद्भतिके किं एकाकिनी मन्त्रयसे। मरुद्भतिकेति प्रथमचेटीसखा। मन्त्रयसे अस्पष्टं व्याहरसि॥

(८) प्रथमेति। मङ्क इत्यादि। मधुकरिके चूतकलिकां प्रेक्ष्य उन्मत्ता खलु मरुद्भतिका भवति। मधुकरिकेति। द्वितीयचेटीनाम॥

द्वितीया ॥ सहर्षं त्वरया उपगम्य ॥ कथं उवत्थिदो मज्झमासो । (९)

प्रथमा ॥ मञ्जरिए तवापि एसो कालो मदविब्भमुग्गी-

दाणं । (१०)

द्वितीया ॥ सहि अवलम्बस्सु मं जाव अग्गपदे परिट्ठिदा भविअ

चूअप्पसवं गेण्हिअ सम्मादेमि कामदेवस्स अच्चणं । (११)

प्रथमा ॥ जइ एवं ता ममावि अङ्गं अच्चणफलस्स । (१२)

द्वितीया ॥ सहि अभणिदेवि एदं सम्पज्जइ एव्व जदो एक्कं

ज्जेव णो एदं सरीरं द्विधा भिण्णं पजावइणा । (१३)

---

(९) द्वितीयेति । उपगम्य चूतसन्निधिमिति शेषः । कथमित्यादि । कथमुपस्थितो मधु मास । कथं किं ॥

(१०) प्रथमेति । मञ्जेत्यादि । मञ्जरिके तवापीयं कालो मदविभ्रमोद्गीरणानाम् । तवापि मदविभ्रमोद्गीरणा मदेन मत्ततया यो विभ्रमस्तस्याश्चल्य तत्प्रयुक्तानामुच्चैर्गीतानामेष काल ॥

(११) द्वितीयेति । सखीत्यादि । सखि अवलम्बस्व मा यावदग्रपदे परिस्थिता भूत्वा चूतप्रसवं गृहीत्वा सम्पादयामि कामदेवस्यार्चनम् । अवलम्बस्व पतनप्रतिबन्धाय धारय । अग्रपदे अङ्गुलिदलमात्रे । दैर्घ्यायासक्तपाणिर्भूत्वेत्यर्थः । चूतप्रसव चूतकुसुमम् । स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने इत्यमरः । कामदेवस्य मदस्य वसन्तोत्सवे कामस्यार्चनयोस्त्वात् ॥

(१२) प्रथमेति । जइइत्यादि । यद्येव तन्नगाप्यस्मदर्चनफलस्य । यदि एव मत्कृतावलम्बनेन चूतप्रसवग्रहणं तत् तदा अर्चनफलस्य त्वत्कृतकामदेवार्चनफलस्य अहं ममापि स्यात् ॥

(१३) द्वितीयेति । सखीत्यादि । सखि अभणितेपि एवं सम्पद्यतएव यत एकमेवायोरिदं शरीरं द्विधाभिन्नं प्रजापतिना । एव मत्कृतकर्मणोऽर्चनफलावाप्ति । सम्पद्यते जायते । हेतुमाह यत इत्यादि । द्विधाभिन्नं द्विधाकृतं प्रजापतिना विश्वस्रष्टा ।

उभे ॥ भीते ॥ पसीददु पसीददु अज्जो अगहिदत्था अम्हे । (१८)

कञ्चु ॥ ङ्कं न किल श्रुतं भवतीभ्यां यद्दासन्तैरहमिरपि देवस्य शासनं प्रमाणीकृतं तदाश्रयिभिश्च । तथाहि । (१९)

चूतानां चिरनिर्गतापि कलिका बध्नाति न स्वं रजः
सन्नद्धं यदपि स्थितं कुरुवकं तत् कोरकायस्यया ।
कण्ठेषु स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां शतं
शङ्के संहरति स्मरोऽपि चकितस्तूणार्द्धकृष्टं शरम् ॥ (२०)

---

(१८) उभे इति । पेच्चादित्यर्थे । भीते सत्यौ । पसीदत्वित्यादि । प्रसीदतु प्रसीदत्वार्यः अगृहीतार्थे आवाम् । अगृहीतोऽविदितो वसन्तोत्सवप्रतिषेधरूपोऽर्थो याभ्यां ते अगृहीतार्थे ॥

(१९) कञ्चु इति । ङ्कमिति परिग्रहे । ङ्कंमितकं परिग्रहे इत्यमरः । देवस्य राज्ञो यत् शासनमाज्ञा । अपवादस्तु निर्देशो निदेशः शासनञ्च सः । विधिराज्ञा चेत्यमरः । शासन्तैरनुसन्धिभिः । पुंस्त्वमुपयोगादिति भावः । तदाश्रयिभिरनुसन्धिभिश्च प्रमाणीकृतं सत्यं भवतीभ्यां किल भवतीभ्यामेव न श्रुतम् । तत्पूर्वार्धं तदाश्रयिणाञ्च देवशासनापगमं दर्शयितुमाह तथाहीति ॥

(२०) चूतानामिति । चूतानां रसालानां चिरनिर्गता प्राप्तोद्गमापि कलिका 'शुकुलं स्वकीयं रजः परागं न बध्नाति न जनयति । तदवस्थैव स्थितिमतीत्या इति भावः । यद्यपि कुरुवकं तत्कुसुमं सन्नद्धं सज्जीभूय वर्तिष्यते तत्कोरकावस्थया अस्फुटावस्थया स्थितं तिष्ठति तथा पुंस्कोकिलानां ते कोकिलाश्चेति तेषां शतं ध्वनिरपि । पुंसः सङ्गिनि अस्त्रे शरे । शिशिरे हेमन्ते गतेऽपि कण्ठे स्खलितं भग्नं अतीव्रमेवं यद्वे यतः स्मरोऽपि चकितो भीत सन् । चकितः शङ्कितो भीत इति विश्वप्रकाशः । तूणादिषु-धेरर्धमात्रकृष्टं शरं कार्ये संहरति । त्यजतीति । अत्र यद्वे शुकं पक्षिणां दर्शयता । अन्ये यद्वे भ्रुवंशयोन्नमनिन्देत्यादिभिः । उक्तेषां व्यक्ष्यते यद्वे-त्यपदेऽपि गाहय इति । यादृच्छिकोऽत्रिर्दृष्टम् ॥

मिश्र ॥ णत्थि एत्थ सन्देहो महाप्पहावोक्खु राएसी । (२१)

प्रथमा ॥ अज्ज कदिचिदिअसाइं मित्तावसुना रट्ठिएण भट्टिणो पादमूलं पेसिदा अम्हे दूध पमदवणे चित्तकम्म अप्पिदुं ता आगन्तुअदाए ण सुदपुव्वो अम्हेहिं एसो वुत्तन्तो । (२२)

कञ्चु ॥ तेन हि न पुनरेवं प्रवर्त्तितव्यम् (२३) ।

उभे ॥ सकौतूहलम् ॥ अज्ज जइ दूमिणा जणेन सोदव्वं ता कधेदु अज्जो किं निमित्तं भट्टिणा वसन्तुच्छवो पडिसिद्धोत्ति । (२४)

मिश्र ॥ उच्छवप्पिआ खु राआणो होन्ति ता एत्थ गुरुणा कारणेण होदव्वं । (२५)

---

(२१) मिश्रेति । णत्थीत्यादि । नास्त्यत्र सन्देहो महाप्रभाव खलु राजर्षि । अत्र खलादिभिरानन्त्ये. शासनप्रमाणीकरणे । खलु हेत्वर्थे. ॥

(२२) प्रथमेति । अज्जेत्यादि । आर्यं कतिचिद्दिवसानि मित्रावसुना राष्ट्रियेण भर्तुः पादमूलं प्रेषिते आर्यां दृष्ट प्रमदवने चित्रकर्मार्पयितुं तदागन्तुकतया न श्रुतपूर्वं आवाभ्यामेव इत्तान्त. । मित्रावसुना तत्सञ्ज्ञेन । राष्ट्रियेण राजश्यालेन । राजश्यालस्तु राष्ट्रिय इत्यमर. । पादमूलं सदान्तिकम् । मूलं शिफाद्ययो । मूलविस्तोऽन्तिके वा नेति मेदिनी । प्रयोजनमाह दृष्टेति । चित्रकर्म अर्पयितुं चित्रविन्यासमावाभ्यां कारयितुम् । आगन्तुकतया आहार्यतया अनित्यस्थायितयेति यावत् । स्यादागन्तुक माहार्यं मिति त्रिकाण्डशेष । श्रुतं श्रवणं पूर्वं यस्य स श्रुतपूर्व. ॥

(२३) कञ्चुकीति । न प्रवर्त्तितव्यं प्रवर्त्तितं कर्त्तव्या ॥

(२४) उभे इति । सकौतूहलं सयुत्सुकम् । अज्जेत्यादि । आर्यं यद्यनेन जनेन श्रोतव्यं तत् कथयत्वार्यं. किं निमित्तं भर्त्रा वसन्तोत्सव. प्रतिषिद्ध इति । श्रोतव्यं श्रवणा र्हम् । तत् तदा ॥

(२५) मिश्रेति । उच्छवेत्यादि । उत्सवप्रिया खलु राजानो भवन्ति तदत्र गुरुणा कारणेन भवितव्यम् । भवितव्यमिति भावे तव्य ॥

कञ्चु ॥ स्वगतम् ॥ बद्धलीभूतोऽयमर्थः तत् किं न कथ्यते । (२६)

प्रकाशम् ॥ अस्ति भवत्योः कर्णपथमायातं शकुन्तलाप्रत्या-देशकौलीनम् । (२७)

उभे ॥ अज्ज सुदं रट्ठिअसुहादो अङ्गुलीअदंसणं जाव । (२८)

कञ्चु ॥ तेन हि स्वल्पं कथयितव्यम् । यदैवाङ्गुरीयदर्शनादनु-स्मृतं देवेन सत्यमूढ़पूर्वां रहसि मया तवभवती शकुन्तला मोहा-त्प्रत्यादिष्टेति तदाप्रभृत्येव पश्चात्तापमुपगतो देवः । तथाहि (२९)

रम्यं द्वेष्टि यथा पुरा प्रकृतिभिर्न प्रत्यहं सेव्यते
शय्योपान्तविवर्त्तनैर्विगमयत्युन्निद्र एव क्षपाः ।
दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा
गोत्रेषु स्खलितस्तदा भवति च व्रीडावनम्रश्चिरम् ॥ (३०)

---

(२६) कञ्चु इति । स्वगतमप्रकाशम् । अनतिस्पष्टमिति यावत् । अयमर्थोऽभिधेयो बद्धलीभूतः क्रमेण बद्धलीभूतः तत् तदा किं न कथ्यते न कथनीयम् ॥

(२७) प्रकाशमिति । सुस्पष्टमित्यर्थः । शकुन्तलाया अन्यादेयस्य निराकृते. कौलीनं लोकवादः । स्यात् कौलीनं लोकवादे इत्यमर. । भवत्यो. कर्णपथमायातं श्रुतिगोचर-मस्ति । यद्यागूलात् कथयितव्यं तदुपेक्ष्यं यदि त्वपरिष्टं किञ्चित् तदा कथयिष्यामीत्य-भिप्रेत्य प्रश्नीयम् ॥

(२८) उभे इति । अज्जेत्यादि । श्रुतं राज्ञियसुखादङ्गुरीयदर्शनं यावत् । "अङ्गुरीय-दर्शनं धीरात्मबन्धेति शेष. ॥

(२९) कञ्चु इति । स्वस्मगतमप्रकाशमिति शेषः । कथयति यदैवेति । अङ्गुरीयदर्शना-देतो. "सत्यमसंशयं मया रहसि निर्जने मूढ़पूर्वां परिणीतपूर्वां सत्यभवती शकुन्तला मोहात् विकारत्वात् प्रत्यादिष्टा निराकृतेति" यदनुस्मृतं तदाप्रभृति तत्कालमारभ्यैव देवो राजा पश्चात्तापमुपगत. प्राप्त. ॥

(३०) रम्यमिति । रम्यं मनोरमं वस्तु द्वेष्टि नाभिनन्दति तथा पुरा प्राक् यथा अधुनेति तथा प्रत्यहं प्रकृतिभिरमात्यै र्न सेव्यते नोपासते । प्रकृतिर्मन्त्रिणाम्ये स्यादमात्यादिस्वभा-वयोरिति मेदिनी । तथा उन्निद्रा निद्रा यस्य स तथोक्तः सन् । शय्यायाः उपान्तयो. शीघ्रोः

मिश्र ॥ पियं मे पियं । (२१)

कञ्चु ॥ अस्मात् प्रभवतो वैमनस्यादुत्सवः प्रत्याख्यातः । (२२)

उभे॥ जुज्जदि । (२३)

नेपथ्ये ॥ एदु एदु भवं । (२४)

कञ्चु ॥ कर्णे दत्त्वा ॥ अये इत एवाभिवर्त्तते देवः तद्गच्छतं स्वकर्मानुष्ठानाय । (२५)

उभे ॥ तह । इति निष्क्रान्ते । (२६)

तत प्रविशति प्रच्छन्नापसादमवेषो राजा विदूषक प्रतीहारी च । (२७)

विवर्त्तनेन पार्श्वपरिवर्त्तनेन यातायातं करणे क्षपा रात्रौ विंगमयति यापयति। तथा दाक्षिण्येन सर्व्वासु समरागितया यदा अन्त पुरेभ्य पत्नीभ्य उचितामुपयुक्ता वाचं ददाति तदा गोत्रेषु तत्तन्नामसु । गोत्रन्तु नाम्नि चेत्यमर । स्खलित ललितकुन्तलानामग्रहोग. चिरं क्रीडया अवनम्रो अवभतशिराश्च भवति । दक्षिणनायक उक्तो यथा । एकान्वितो-ऽनुकूल समरागो दक्षिणस्तु सर्व्वासु । यउ एकत्रैव रतो बहिरन्यत्र प्रियोऽप्रियो मन-सीति । यादृं लविक्रीडितं वृत्तम् ॥

(२१) मिश्रेति । पियमित्यादि । प्रियं मे प्रियम् । विरहवेदनोपदर्शितप्रियसखी-प्रणयाधिक्यादिति भावः ॥

(२२) कञ्चु इति । प्रभवतो निरङ्कुशात् वैमनस्यादुन्मनस्कत्वात् । प्रत्याख्यातो निराकृत ॥

(२३) उभे इति । जुज्जदि युज्यते ॥

(२४) नेपथ्य इति । एदु एदु भवं एतु एतु भवान् ॥

(२५) कञ्चु । इतोऽत्र । अभिवर्त्तते आधावति । मच्छसमिति चेष्टौ मति । स्वक-र्मानुष्ठानाय चित्रकर्मार्पणाय ॥

(२६) उभे इति । तह तथा ॥

(२७) तत इति । सुगमम् ॥

कञ्चु ॥ राजानं विलोक्य ॥ अहो सर्व्वावस्थासु रमणीयकमाकृतिविशेषाणाम् । तथाह्येवं वैमनस्यपरीतोऽपि प्रियदर्शनो देवः ।

य एषः (३८)

प्रत्यादिष्टविशेषमण्डनविधिर्बालप्रकोष्ठे स्खलं
स्रंसन्ती शिथिलं च धारयति यो बाहौ पुनर्बाहुना ।
चिन्ताजागरणप्रताम्रनयनश्रीर्योगुणैरात्मनः
संस्कारोल्लिखितो महामणिरिव क्षीणोऽपि नालक्ष्यते ॥ (३९)

---

(३८) कञ्चु इति । सर्व्वावस्थासु दौस्थ्यावस्थास्वपि । रमणीयस्य भावो रामणीयकं रमणीयता । आकृतिविशेषाणां विशिष्टानामाकृतीनाम् । हेतुमाह तथाहीति । वैमनस्यपरीत उत्कण्ठायुक्त । प्रियं प्रीतिकरं दर्शनमवलोकनं यस्य स प्रियदर्शन । य एष इति क्षीणोऽपि नालक्ष्य इति श्लोकीयेनान्वितम् ॥

(३९) प्रत्यादिष्टेति । प्रत्यादिष्टो निराकृतो विशेषमण्डनविधिर्नानाभूषणपरिधानं येन स तथोक्त । तथा बालेन शिरीषमयं स्खलं शिथिलं श्रोणिदेशादिति भाव । शिथिल मस्खलः स्खल इति जटाधरः । एकमेव वलय वामप्रकोष्ठे वामकूर्परादधो विभ्रत् धारयन् । तथा श्वासैर्निःश्वासमारुतैरुपरक्तो व्यसनार्त्तं पीडां गत इति यावत् । अधरो यस्य स । एतेन श्वासानां दीर्घत्वसुष्णत्वञ्च व्यञ्जितम् । उपरक्तं व्यसनार्त्तं राहुग्रस्तेन्दुसूर्य्ययोरिति मेदिनी । तथा चिन्तया यज्जागरणं तेन प्रताम्रे अतिलोहिते नयने यस्य स तथोक्तो य एष देव सत्कारेण मानादिना महामकरध्वजेन उल्लिखितः सन्नूकृतः । स्वादुल्लिखितस्तत्कोर्वी सन्नूकृते च वाच्यवदिति मेदिनी । महामणिर्महार्घं रत्नमिव क्षीणोऽपि श्रोणिदेशतां गतोऽपि मणिपक्षे क्षुद्रोऽपि आत्मनोजोगुणैः प्रभावरश्मिभिश्च दीप्तिगणैश्च नालक्ष्यते क्षीयतया नावधार्य्यते । तेज प्रभावे दीप्तौ वेत्यमरः । आत्मनद्रव्यानां क्रियायो दर्शिता । तथा वात्स्यायन । इदानं सङ्गसङ्कल्पा जागरः क्षयता रतिः । क्षीणागोन्मादमूर्च्छानां दृश्यनद्रदया दृशेति । अत्रोपमालङ्कारः । इदं मार्दूलविक्रीडितम् ॥

मिश्र ॥ राजानं विलोक्य ॥ ठाणे खलु पत्त्यादेसविमाणिदाबि डुमस्स किदे सउन्तला किलिस्सदि । (४०)

राजा ॥ ध्यानमन्दं । परिक्रम्य । (४१)

प्रथमं सारङ्गाक्ष्या प्रियया प्रतिबोध्यमानमपि सुप्तम् ।
अनुशयदुःखायेदं हृतहृदयं सम्प्रति विबुद्धम् ॥ (४२)

मिश्र ॥ णं ईदिशाइं तवस्सिणीए भागधेआइं । (४३)

विदू ॥ अपसार्य ॥ ङं भूयोवि लद्धिदो एसो सउन्तलावादेण ण आणे कधं चिकिच्छिदव्वो भविस्सदि । (४४)

---

(४०) मिश्रेति । विलोक्येति कस्तु किमिहेंगादिति भाव । ठाणे इत्यादि । स्थाने खलु पत्न्यादेयविमानितापि यस्य कृते शकुन्तला क्लिश्यति । पत्न्यादेयेन प्रत्याख्यानेन विमानितावमानितापि शकुन्तला यस्य राजर्षे कृते यत् क्लिश्यति क्लेशमनुभवति तत् स्थाने युक्तम । युक्ते हे साध्वं स्थाने इत्यमर० । श्रीमत्तमप्रवायमिति भाव ॥

(४१) राजेति । ध्यानमन्दं चिन्तालसम् ॥

(४२) प्रथममिति । सारङ्गवत् हरिणवदक्षिणी यस्या सा तया । सक्-ष्यक्षण प स्वाङ्गदति प । षित्त्वादीप् । प्रियया शकुन्तलया प्रथममादौ प्रति-बोध्यमान बोधाय व्यापार्यमाणमपि सुप्तं मोहाभिभूतम इद हृतहृदयं सम्प्रति इदानीम अनुशयदुःखाय अनुतापकष्टाय विबुद्ध स्मृतिमत भवतीति शेष । अथानुशयो दीर्घहेपानुतापयोरित्यमर । इदमार्या जाति ॥

(४३) मिश्रेति । णमित्यादि । नन्वीदृशानि तपस्विन्या भागधेयानि । नन्वनुपधारणे ईदृशान्येवेत्यर्थ । तपस्विन्या अनुकम्पार्हाया शकुन्तलाया इत्यर्थ ॥

(४४) विदू इति । ङमित्यादि । ङं भूयोपि लब्धित एष शकुन्तलावातेन न जाने कथ चिकित्सितव्यो भविष्यति । ङं वितर्के प्रश्ने वा । ङ वितर्के परि-प्रश्ने इत्यमर । भूयोपि पुनरपि । लब्धित्रोऽभिभूत । शकुन्तलावातेन शकु-न्तला शकुन्तलेति वातव्याधिना ॥

कञ्चु ॥ उपसृत्य ॥ जयति जयति देवः, देव प्रत्यवेक्षिताः प्रमदवनभूमयः यथाकाममध्यास्तां विनोदस्थानानि देवः । (४५)

राजा ॥ वेत्रवति बहुधनादमात्यपिशुनं ब्रूहि अद्य चिरप्रबोधान्न सम्भावितमस्माभिर्धर्मासनमध्यासितुम् यत्पत्यवेक्षितमार्येण पौरकार्यं तत्पत्तमारोप्य प्रख्याप्यतामिति । (४६)

प्रती ॥ जं देवो आणवेदि । इति निष्क्रान्ता । (४७)

राजा ॥ पार्वतायन त्वमपि स्वनियोगमनूनं कुरु । (४८)

कञ्चु ॥ यदाज्ञापयति देवः । इति निष्क्रान्तः । (४९)

---

(४५) कञ्चु इति । प्रत्यवेक्षिता सावहितमीक्षिताः । यथाकामं यथाभिलाषम् । अध्यास्तामुपविशतु । विनोदस्थानानि विरहव्यापनस्थानानि । अधियोक्ष्यामेत्युपादानादधिकरणस्य कर्मत्वम् ॥

(४६) राजेति । वेत्रवतीति प्रतीहार्यां सम्बोधनम् । बहुधनात् राधोच्यत इत्युक्ता इति सातृपर्यम् । अमात्यो मन्त्री चासौ पिशुनश्चाऽमात्यपिशुनम् । मन्त्रीधीसचिवोऽमात्य इत्यमरः । चिरप्रबोधादनिजागरणात् । धर्मासनं धर्माधिकरणगतविचारासनम् । तथाच मनुः । धर्मासनमधिष्ठाय सम्यगाप्तः समाहितः । प्रणम्य लोकपालेभ्यः कार्यदर्शनमारभेदिति । प्रत्यवेक्षितं दृष्टम् । आर्येण भर्त्रा । पौरकार्यं पुरजनसम्बन्धि कर्म । राज्यकार्यव्यामात्यावेक्षणीयत्वं राज्ञस्तु पौरकार्यावेक्षकत्वमिति भावः । पत्तमारोप्य पत्रारूढं कृत्वा । प्रख्याप्यतां प्रचार्यताम् । इति मूर्धोत्क्षेपः । यत्र मनुः । अमात्यमुख्यं धर्मज्ञं प्राज्ञं दान्तं कुलोद्गतम् । स्थापयेदासने तस्मिन् विप्रः कार्येक्षणे नृपमिति ॥

(४७) प्रतीति । अभिलाषादि । यद्देव आज्ञापयति । सुगमम् ॥

(४८) राजेति । पार्वतायन कञ्चुकिन् । स्वनियोगं स्वाधिकारम् । अनूनं पूर्णं न कुरु । स्वाधिकार एवेत्यर्थः ॥

(४९) कञ्चु इति । सुगमम् ॥

कञ्चु ॥ उपसृत्य ॥ जयति जयति देवः, देव प्रत्यवेक्षिताः प्रमदवनभूमयः यथाकाममध्यास्ता विनोदस्थानानि देवः । (४५)

राजा ॥ वेत्रवति मद्वचनादमात्यपिशुनं ब्रूहि अद्य चिरप्रबोधान्न सम्भावितमस्माभिर्धर्मासनमध्यासितुम् यत्प्रत्यवेक्षितमार्य्येण पौरकार्य्यं तत्प्रत्यारोप्य प्रस्थाप्यतामिति । (४६)

प्रती ॥ जं देवो आणवेदि । इति निष्क्रान्ता । (४७)

राजा ॥ पार्व्वतायन त्वमपि स्वनियोगमशून्यं कुरु । (४८)

कञ्चु ॥ यदाज्ञापयति देवः । इति निष्क्रान्तः । (४९)

---

(४५) कञ्चु इति । प्रत्यवेक्षिता सावहितमीक्षिता । यथाकामं यथाभिलाषम् । अध्यास्तास्तूपविशतु । विनोदस्थानानि विरहव्यापनस्थानानि । अधिशीङस्थासेत्युपादानादधिकरणस्य कर्म्मत्वम् ॥

(४६) राजेति । वेत्रवतीति प्रतीहार्य्या सम्बोधनम् । मद्वचनात् राज्ञोच्चैरुच्चा इति तात्पर्य्यम् । अमात्यो मन्त्री चासौ पिशुनस्तद्वामा चेत्यमात्यपिशुनस्तम् । मन्त्रोधीसचिवोऽमात्य इत्यमरः । चिरप्रबोधादतिजागरणात् । धर्म्मासनं धर्म्माधिकरणगतविचारासनम् । तथाच मनुः । धर्म्मासनमधिष्ठाय सम्यगाढ्य समाहितः । प्रणम्य लोकपालेभ्यः कार्य्यदर्शनमारभेदिति । प्रत्यवेक्षितं दृष्टम् । आर्य्येण भवता । पौरकार्य्यं पुरजनसम्बद्धं कर्म्म । राज्ञश्चार्य्यस्यामात्यावेक्षणीयत्व राज्ञस्तु पौरकार्य्यावेक्षकत्वमिति भावः । प्रत्यारोप्य पत्राकृष्ट कृत्वा । प्रस्थाप्यता प्रेष्यताम् । इति ब्रूहीत्यन्वयः । अत्र मनुः । अमात्यमुख्यं धर्म्मज्ञं प्राज्ञं दान्तं कुलोद्भवम् । स्थापयेदासने तस्मिन् विप्रकार्य्यविधौ नृपः इति ॥

(४७) प्रतीति । जमियादि । यद्देव आज्ञापयति । सुगमम् ॥

(४८) राजेति । पार्व्वतायन कञ्चुकिन् । स्वनियोगं स्वाधिकारम् । अशून्यं कुरु शून्य मा कुरु । स्वाधिकार मा त्यजेत्यर्थः ॥

(४९) कञ्चु इति । सुगमम् ॥

राजा ॥ ईदृशमेव हृदयास्वासनं तत्तदेवादेयय माधवीलता-गृहम् । (५७)

विदू ॥ इदो इदो एदु भवं । इत्यभौ परिक्रामतः । (५८)

मित्रकेयौ ॥ अनुगच्छति । (५९)

विदू ॥ एसो मणिसिलावट्टसणाहो माहवीलदामण्डवो विवित्तदाए उवआररमणीअदाए णिसग्गमारुदेण अ सागदेण विअ पडिच्छदि तुमं ता पविसिअ णिसीददु भवं । (६०)

फलके मे स्वहस्तलिखितां तत्प्रतिकृत्या मकरन्दलतायाः प्रतिकृतिमानयेति । ननु रत्नमञ्जे । भवता मेधाविनी इत्यादिष्टा मन्तिव्यम् । चाटुपरिचारिका सततप्रियवचनपरिचारिका । लिपिकरी लेखननिपुणा । मेधाविनी स्मृतिमती या न विस्मरिष्यतीति भावः । आदेयमाह माधवीत्यादि । अतिवाहयिष्यामि यापयिष्यामि । तत्रेत्यानयेत्यनेन सम्बद्धम् । चित्रफलके चित्रार्थदारुमयपट्टके । स्वहस्तलिखिता स्वहस्तचित्रिताम् । प्रतिकृतिं प्रतिमूर्त्तिम् ॥

(५७) राजेति । ईदृशमेव चित्रदर्शनादिकमेव हृदयास्वासनं मनोनिर्वृतिकारणम् । तथाहोक्तम् । वियोगावस्थासु प्रियजनसङ्गात्सुभगं ततश्चित्रं कर्म स्वप्नसमये दर्शनमपि । तदप्रेक्षणानासन्नगतत्वेन स्मर्यमाणमपि प्रतीकारः कामव्यथितमनसां कोपि गदित इति । आदेयय दर्शय ॥

(५८) विदू इति । इदो इत्यादि । इतइत एतु भवान् । सुगमम् ॥

(५९) मित्रेति । सुगमम् ॥

(६०) विदू इति । एसो इत्यादि । एष मणिशिलापट्टसनाथो माधवीलतामण्डपो विविक्ततया उपकाररमणीयतया च निसर्गमारुतेन स्वागतेनेव प्रतीक्षति त्वां तत्प्रविश्य निषीदतु भवान् । मणीति । मणिभूता रत्नभूता या शिला तस्याः पट्टः पीठकत्वेनाधस्तद्युक्तः । पट्टः शेषणपाषाणे व्रणादीनाञ्च बन्धने । कक्षान्तरेपि राजादिप्रासनान्तरपीठयोरिति मेदिनी । विविक्ततया विजनतया उपकारेण विकीर्णकुसुमादिना रमणीयतया मनोज्ञतया च । प्रकरणोप-

अनुशयादनुरोदिमि चोत्सुकः
सुरभिमासमुखं समुपैति च ॥ (५३)

विदू ॥ भो वयस्स चिट्ठ दाव जाव इमिणा दण्डकट्ठेण कन्दप्प-वाणं णासेमि । इति दण्डकाष्ठमुद्यम्य घृताङ्गुरं ताड़यितुमिच्छति । (५४)

राजा ॥ सम्मतम् ॥ भवतु हृष्टं ब्रह्मवर्चसं सखे क्वेदानीमुपविष्टः प्रियायाः किञ्चिदनुकारिणीषु लताषु दृष्टिं विनोदयामि । (५५)

विदू ॥ एंभमदा आसण्णपरिचारिआ लिविअरी मेहाविणी आदिट्ठा माहवीलदाहरए दूमं वेलं अदिवाहिअं तहिं चिन्नफलए मे सहत्थलिहिदं तत्थभोदीए सउन्तलाए पडिकिदिं आणेहित्ति । (५६)

---

(५३) उपेति । अङ्गुलिसङ्ग्या साचराङ्गुलीयदर्शनेन । अङ्गुलीयकसन्निभेका साचराङ्गुलिसङ्ग्या स्यादित्यमरः । उपहिता जनिता स्मृतिः स्मरणं यस्य स तथोक्तोऽहम् उत्सुकोदर्शनाभिलाषी सप्तनिमित्तनिराकृतामकारणप्रत्याख्यातां प्रियतमा मनुजत्क्षीकृत्य घनसमया दनुतापात् रोदिमि क्रन्दामि सुरभिमासस्य वसन्तमासस्य सुखञ्च समुपैति उपगच्छति । वसन्ते पुष्पसमयः सुरभिरित्यमरः । प्रियाविप्रयोगदुःखावकाशमाषाद्यैव वसन्तमासागम इति स्त्रीप्रयातिता । चकारद्वयं उक्तञ्च पूर्ववत् ॥

(५४) विदू इति । भो इत्यादि । भो वयस्य तिष्ठ तावत् यावदनेन दण्डकाष्ठेन कन्दर्पबाणं नाशयामि । दण्डकाष्ठेन खण्डेन । कन्दर्पबाणं घृताङ्गुरं । ताडयितुमाहन्तुम् ॥

(५५) राजेति । ब्रह्मणो वेदाध्ययनस्य तदर्थपरिपालनस्य च यद्ब्रह्मतेजो ब्रह्मवर्चसम् । ब्रह्मक्षत्रियराजन्यशब्दाद्वर्चस इत्यमरव्ययः । वेदाश्चक्षुः तपो ब्रह्मेति । तेज पुरीषयोर्वर्च इति । साधुब्रह्मवर्चसं वेदाध्ययनर्द्धिरिति चामर । क्व कुत्र । किञ्चिदनुकारिणीषु स्वल्पसादृश्यवतीषु । यतएवोक्तम् । वियोगावस्थासु प्रियजनसदृश्यात्सुभवनमिति । दृष्टिं विनोदयामि दृष्टिसुखमनुभवामि ॥

(५६) विदू इति । एमित्यादि । नूनं भवता व्यासन्नपरिचारिका लिपिकरी मेधाविनी चादिष्टा माधवीलतागृहे द्रुमं वेलामतिवाहयिष्यामि तत्र चित्र-

राजा ॥ दृष्टमेव हृदयाश्वासनं तत्तदेवादेयम माधवीलता-गृहम् । (५७)

विदू ॥ दूरो दूरो एदु भवं । दृष्टभौ परिक्रामतु । (५८)

मिश्रकेशी ॥ व्यतिगच्छति । (५९)

विदू ॥ एसो मणिसिलावट्टसणाहो माहवीलदामण्डवो विवित्तदाए उवआररमणीअदाए णिसग्गमारुदेण अ सागदेण विअ पडिच्छदि तुमं ता पविसिअ णिसीददु भवं । (६०)

फलके मे स्वहस्तलिखितां तत्प्रभवत्या मकरन्दाया प्रतिकृतिमानयेति । मनुरत्नु-मत्ते । भवता मेधाविनी दक्षादिष्टा मन्वितव्यव । व्याहृतपरिचारिका सततमन्ति-कपरिचारिका । लिपिकरी लेखननिपुणा । मेधाविनी स्मृतिमती या न विस्म-रिष्यतीति भाव । व्यादेयमाह माधवीत्यादि । व्यतिवाहयिष्यामि यापयि-ष्यामि । तत्रेत्यानयेत्यनेन सम्बद्धम् । चित्रफलके चित्रार्पदारुमयपट्टके । स्वहस्त-लिखिता स्वहस्तचित्रिताम् । प्रतिकृतिं प्रतिमूर्त्तिम् ॥

(५७) राजेति । दृष्टमेव चित्रदर्शनादिकमेव हृदयाश्वासनं मनोनिर्वृति-कारणम् । तथाचोक्तम् । वियोगावस्थासु प्रियजनसहचारानुभवन ततश्चित्र कर्म स्वप्नसमये दर्शनमपि । तदङ्गस्पृहानानुपगतवता स्वर्शनमपि प्रतीकार काम-व्यथितमनसा कोपि गदित दृति । व्यादेयय दर्शय ॥

(५८) विदू इति । दूरो इत्यादि । इतइत एहु भवान् । सुगमम् ॥

(५९) मिश्रेति । सुगमम् ॥

(६०) विदू इति । एसो इत्यादि । एष मणिशिलापट्टसनाथो माधवीलता-मण्डपो विविक्ततया उपकाररमणीयतया च निसर्गमारुतेन स्वागतेनेव प्रती-क्षति त्वां तत्प्रविश्य निषीदतु भवान् । मणीति । मणिभूता रत्नभूता या शिला तया पट्ट पीठस्तत्वनाथस्तद्युक्त । पट्ट पेटपण्यपाषाणे मण्यादीनाञ्च वन्धने । कल्पान्तरेपि राजादियासनान्तरपीठयोरिति मेदिनी । विविक्ततया विजनतया उपकारेण विकीर्णकुसुमादिना रमणीयतया मनोज्ञतया च । प्रकरणोप-

उभौ ॥ प्रविश्योपविष्टौ ॥ (६१)

मिश्र ॥ जदासंस्सिदा पेक्खिस्सं दाव पियसहीए ।मण्डिकिदिं तदो से भत्तुणो बहुमदं अणुराअं णिवेदइस्सं । इति तथा कृत्वा स्थिता । (६२)

राजा ॥ निपुण ॥ सखे सर्व्वमिदानीं स्मरामि शकुन्तलायाः प्रथमदर्शनवृत्तान्तं यं कथितवानस्मि भवते । स भवान् प्रत्यादेशसमये मत्समीपगतो नासीत् किन्तु पूर्व्वमपि न त्वया कदाचित् सङ्कीर्त्तितं तत्भवत्या नामादिकं कञ्चिदप्यसिव विस्मृतवास्यमपि । (६३)

कारश्च विकीर्णकुसुमादिष्विति विश्व. । स्वागतेन कुशलप्रश्नेनेव । स्वागतं कुशलप्रश्न इति हारावली । निसर्गमारुतेन स्वाभाविकानिलेन मन्दवेगिनेत्यर्थ. । कर्णेन त्वा प्रतीच्छति गृह्णाति । यत्र पवनस्य लतागृहागतत्वेन शैत्यं विकीर्णकुसुमसम्पर्कात्सौगन्ध्यं निसर्गत्वाच्च मान्द्यं दर्शितम् । स्वागतेनेव निसर्गमारुतेनेत्युत्प्रेक्षा ॥

(६१) उभाविति । सुगमम् ॥

(६२) मिश्रेति । जदेत्यादि । लतासंश्रिता प्रेक्षिष्ये तावत् प्रियसख्या प्रतिकृतिं ततोऽस्याभर्त्तुर्बहुमतमनुरागं निवेदयिष्यामि । लतासंश्रिता लतामाश्रिता । प्रियसख्या शकुन्तलायाः । ततस्तदनन्तरं भर्त्तुर्बहुमतं बहुमानयुक्तमनुरागमस्याः सम्बन्धे निवेदयिष्यामि । तथाकृत्वा लतामाश्रित्य ॥

(६३) राजेति । यं प्रथमदर्शनवृत्तान्तम् । कथितवानस्मि तदानीमेवेति शेष. । स भवान् श्रुतवृत्तान्तो भवान् । प्रत्यादेशसमये प्रत्याख्यानसमये । पूर्व्वमपि शकुन्तलायाश्चागमनात् पूर्व्वमपि । सङ्कीर्त्तितमुल्लिखितम् । कञ्चित् किम् । कञ्चित् कामप्रवेदन इत्यमर. । कामप्रवेदनमभिलषितप्रश्न । तथा चानतिचिरेणैवातिविस्मरणादात्मनोऽल्पमतित्वदोषतिरोधानाय साधव्यस्यापि विस्मरणमिष्टमस्येति भाव. ॥

मिश्र ॥ अदोज्जेव मट्टीमदिट्ठिं पणम्मि सट्ठिमच्चाओ सच्चा आच्चो ण विरट्ठिदव्वाओ । (६५)

विदू ॥ ण विसुमरामि किन्तु सव्वं कहिअ अवसाणे उण तुए भणिदं परिहासविअप्पिओ एसो ण भूदत्थोत्ति मएवि मन्दबुद्धिणा तथा ज्जेव गट्ठिदं अधवा भविदव्वदा खलु एत्थ बलवदी । (६५)

मिश्र ॥ एवखेदं । (६६)

राजा ॥ क्षणं ध्यात्वा ॥ सखे परित्रायस्व माम् । (६७)

विदू ॥ भो वयस्स किं एदं तुह उवरणं ण कदाबि सप्पुरिसा सोअचित्ता होन्ति णं भवादिवि णिक्कम्मा ज्जेव गिरिओ । (६८)

---

(६४) मिश्रेति । अदो इत्यादि । अतएव मट्टीपतिभि. क्षणमपि सच्छ्रद्धया सहाया न विरट्ठितव्या. । सच्छ्रद्धया समनस्का. । विरट्ठितव्या त्यक्तव्या. । रट्ठल्क त्याग इति कविकल्पद्रुमः ॥

(६५) विदू इति । णेत्यादि । न विस्मरामि । किन्तु सर्व्वं कथयित्वा अवसाने पुनस्त्वया भणितं परिहासविकल्पित एष न भूतार्थ इति । मयापि मन्दबुद्धिना तथैव गट्ठीतम् अथवा भवितव्यता खल्वत्र बलवती । सर्व्वं शकुन्तलाख्यानम् । एष वृत्तान्त अवसाने परिशेषे भूतार्थ सत्यार्थ । युक्तो ह्यादाहृते भूतं प्राह्यमीति सभे विश्वित्यभर । तथैव परिहासानिश्चिततयैव । गट्ठीतं ज्ञातम् । भविष्यतीति भवितव्यम् । सङ्घोः कभाव इत्युत्ते. कर्त्तरि तव्य. । तद्भावो भवितव्यता अवश्यम्भावितेत्यर्थं ॥

(६६) मिश्रेति । एवखेदं एवमिदम् ॥

(६७) राजेति । ध्यात्वा चिन्तयित्वा । परित्रायस्व रक्ष ॥

(६८) विदू इति । भोइत्यादि । भो वयस्य किमेतत् तवोपयुक्तं न कदापि सत्पुरुषा शोकचित्ता भवन्ति । नतु भवानेपि निष्कम्मा एव गिरय । एतत् विरट्ठितव्याधिक्यत्वं किं तव सम्बन्धे उपपन्नं युक्तम् । शोक इष्टवियोगदुःख

राजा ॥ यस्य निराकरणविक्लवायास्ते सख्यासामवस्थामनुरुध्य बलवदशरणोस्मि । सा हि (६९)

इतः प्रत्यादिष्टा स्वजनमनुगन्तुं व्यवसिता
स्थिता तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे ।
पुनर्दृष्टिं बाष्पप्रकरकलुषामर्पितवती
मयि क्रूरे यत्तत् त्वरितमिव गल्यं दहति माम् ॥ (७०)

मिश्र ॥ अम्हहे दूरिसी परवसदा दूमस्स मम्मि सन्दावेदि । (७१)

विदू ॥ भो अत्थि मे तक्को केण उण तत्थभोदी आआससञ्चारिणा वीदेत्ति । (७२)

चित्ते येषां ते शोकचित्ता । ननु यत । प्रवातेपि प्रबलमारुतेपि सति । गिरय पर्वता निष्कम्पाएव तरवस्तायव ॥

(६९) राजेति । निराकरणेन प्रत्याख्यानेन विक्लवाया विह्वलायास्ते सख्या शकुन्तलायाश्चानवस्था दुरवस्थां अनुरुध्य स्तुत्वा बलवदतिशयेन अशरणोऽरक्षितोस्मि । हि यस्मात् । सा शकुन्तला ॥

(७०) इत इति । इतो मत्सकाशात् प्रत्यादिष्टा निराकृता तदनु स्वजनं शार्ङ्गरवादिकमनुगन्तु व्यवसिता कृताध्यवसाया तदनु गुरुसमे गुरुवन्माननीये गुरौ कण्वस्य शिष्ये शार्ङ्गरवे तिष्ठेत्युच्चैर्वदति सति स्थिता विह्वलगमना सा शकुन्तला क्रूरे निष्ठुरे मयि बाष्पप्रकरेणाश्रुसम्हूहेन कलुषामनच्छाम । बाष्पो नेत्रजलोष्णोरिति विश्व । प्रकरस्तु पुमान् वृन्दे विकोर्वकुसुमादिष्विति मेदिनी । दृष्टिं यत् पुनरर्पितवती दत्तवती तत् अविष विषाक्त शल्य शेल इति प्रसिद्ध मत्सकाशं मां दहति ज्वालाभयं न । इद विरुद्धिणी नाम वृत्तम ॥

(७१) मिश्रेति । अम्हहे इत्यादि । अहो दैवस्य परवशता अस्य मामपि सन्तापयति । परवशता शकुन्तलायत्तचित्तता ॥

(७२) विदू इति । भो इत्यादि । भो अस्ति मे तर्कः केन पुनस्तत्रभवती

राजा ॥ वयस्य कः पतिव्रता तामन्य परामर्तुमुत्सहते मेनका किल सख्यास्ते जन्मप्रतिष्ठेति तत्रैवाजनादस्मि श्रुतवान् तत्सहचरीभिस्तया वा नीतेति हृदयमाशङ्कते । (७३)

मिश्र ॥ सम्मोहेवि विम्हअणीओ क्खु [दि]मस्स पडिबोधो । (७४)

विदू । भो जइ एवं ता समस्सदु भवं अत्थि क्खु समागमो कालेण तत्थभोदीए । (७५)

राजा ॥ कथ मिव । (७६)

विदू ॥ ण क्खु मादापिदरा भत्तिविओअदुक्खिदं दुहिदरं चिरं पेक्खिदुं पारेन्ति । (७७)

आकाशसञ्चारिण्या नीतेति । आकाशसञ्चारिण्येति । सोमरातेन ज्योतिषदाभिधेयखेचरजनहरणस्याभिहितत्वात्तदागमोऽस्येव इदानीं केन तनेति प्रश्न । इतीति नकोऽङ्कीति सम्बन्ध ॥

(७३) राजेति । पतिव्रता साध्वीम् । परामष्टु स्पृष्टुम । उत्सहते अध्यवस्यति । जन्मप्रतिष्ठा जन्मस्थानम् । प्रसविनीत्यर्थ । प्रतिष्ठा गौरवचितौ । स्थाने च यागनिमित्तमिति मेदिनी । तत्सखीमुखात् मकुन्दसखीमुखात् । तत्सहचरीभि मेनकासखीभि । तया मेनकया । तयावति पाठ क्वचिच्च दृश्यते । नीता स्वस्थान प्रापिता ॥

(७४) मिश्रेति । सम्मोहेवीत्यादि । सम्मोहेपि विस्मयनीय खलु प्रतिबोध । सम्मोहेपि प्रियावियोगशोकपि । विस्मयनीयो विस्मयजनक । प्रतिबधोऽनुभव ॥

(७५) विदू इति । भो इत्यादि । यद्येव तत समाश्वसितु भवान् अस्ति खलु समागम कालेन तत्प्रभवत्या । एव यदि मेनकया तत् सख्या वा उच्चयनञ्चेत् । समाश्वासितु चाश्वास गच्छ । खलु यस्मात् । समागम सयोगसम्भव ॥

(७६) राजेति । मृगम्म् ॥

(७७) विदू इति । णेत्यादि । न खलु मातापितरौ भर्तृवियोगदु खिता दुहितरं चिरं प्रेक्षितु पारयत । माता च पिता च तौ मातापितरौ । कृतोऽत्र तत्र चेत्रतिङा । मातापितरावीत्यर्थ । चिर दीर्घकाल । पारयत शक्नुत ॥

राजा ॥ वयस्य । (७८)

स्वप्नो नु माया नु मतिभ्रमो नु क्रूरं नु तावत् फलमेव पुण्यैः ।
असन्निधानौ तदतीव मन्ये मनोरथानामतटप्रपातम् ॥ (७९)

विदू ॥ ओ मा एवं णं चञ्चलीअअं जेव एत्थ णिदंसणं अव-
ग्गाहिणो अचिन्तणीअसमागमा होन्ति । (८०)

---

(७८) राजेति । सुगमम् ॥

(७९) स्वप्न इति । शकुन्तलापरिणयनादिकं स्वप्नोनु किं स्वप्नः मायानु किं माया पेन्द्रजालिकम् । मतिभ्रमोनु किं मतेर्भ्रमः किं पुण्यैरहं कृतत्वादिदं सामान्यं सम्पन्नमेव फलम् । यावत्तावच्च सावल्येऽनवो मानेऽवधारणे क्रियते । महतामतिदुष्करपुण्यानां तावदेव फलं नतु जायमेवमितिभावः । नुयद्वा वितर्कार्थः । यतस्मात् अवधिरहितो तस्या चपलताहतो मूलाया मनोरथाना तन्निष्पत्त्यभिलाषाणां पूराणेऽधिकारितिभावः । अतीवात्यर्थं पुनरहंतिसम्भावनावधारणमिति यावत् । अतटात् अगोचरादिति यावत् प्रपातं पतनं मन्ये उत्प्रेक्षे । अन्यथाकारणात्तु मनोरथानामतटप्रपातो न पुनरहंतिसम्भावनावधिको मन्तव्यः अत्र तु पूर्वोक्तकारणपञ्चष्टयान्यतमजन्या दान्तिकप्रपातटप्रपातो लाभो न कार्येण समानं सम्पाद्य समाप्तिरिति भावः । प्रपात पाठनो अनुत्तिष्ठतः । अन्येधान्तु अवधिरहितैव तदसीसमेव मनोरथानामगोचरप्रपात इत्यादि पाठान् परिकल्प्य व्याख्यानच्याकुलभावो मोरवसिया नोदृतः । अत्र पूर्वार्धे सन्देहालङ्कारः अत्र सन्देहमात्रपर्यवसितत्वात् गुणः । यदुक्तं दर्पणे । सन्देहः सन्देहो संशय. प्रतिभोत्थित. । गुणो निश्चयगर्भोसौ निश्चान्त इति तिर्यगिति । परार्धे अतट-प्रपातयोः एकार्थजोतिभावत्वात् पुनरुक्तवदाभासोऽलङ्कार. । यदुक्तं तत्रैव । पदार्थानां पौनरुक्त्याभासत्वम् । पुनरुक्तवदाभास. स विज्ञेयोऽर्थस्य इति । कथोद्देशक्रमेणैवेत्यादौ तु विशेषोऽत्र वक्ष्यते । यदुक्तं तत्रैव । सत्या इत्यन्तसङ्गता संदृष्टिः पदपद्धतिः । विदूषकस्यैतस्या विशेषः पदपद्धत इति । कथमत्रानिर्वाहः ॥

अत्र विदूषकः । ओ इति । भो भैवं वक्तुमीदृशमेवास्ति विदूषकस्य । अवधानविशेषो चपलतादोषस्तस्या भवति । एवं मनोरथानामगोचरप्रपातं कथं इति वा यत् मनो नाम पदार्थस्य विदूषकस्य विदूषकं तदाह. । कोदृशोऽसौ पुनरसौ तथाविध-

राजा ॥ अङ्गुरीयकं विलोक्य ॥ अये इदं तदसुलभस्थानभंशि शोचनीयम् । (८१)

तव सुचरितैरङ्गुरीय नूनं प्रतनु शुभेन विभाव्यते फलेन ।
करुणनखमनोहरासु तस्या सुतमसि लब्धपदं यदङ्गुलीषु ॥ (८२)

मिश्र ॥ जइ अणण्णगदं भवे तदो सच्चं सोअणीअं भवे सहि दूरे वट्टसि एआकिणी एव्व कण्णसुहाइं अणुभवेमि । (८३)

विदू ॥ भो इअं णामसुद्दा केण उद्देसेण भवदा तत्थभोदीए हत्थसंसग्गं पाविदा । (८४)

मिश्र ॥ ममवि कोदूहलेण वावारिदो एसो । (८५)

मिति भावः । अवश्यम्भविष्यन्तीत्यवश्यम्भाविनो अर्थाः कश्चिन्नीयोऽनिर्वचनीयः गमागम आगमो येषा ते तथोक्ता भवन्ति ॥

(८१) राजेति । अये इति स्मरणे । अये क्रोधे विषादे च सम्भ्रमे स्मरणेऽपि चेति मेदिनी । असुलभं दुर्लभं यत् स्थानं प्रियाया अङ्गुलिरूपं तस्मात् भंशि पतितमतएव शोचनीयं दुःखानुभवार्हं तदङ्गुरीयकमिदम् । अङ्गुरीयपदेनैव तस्य स्मरणात् ॥

(८२) तवेति । हे अङ्गुरीय तव सुचरितं सुकृतं लघुनाल्पेन फलेन नूनं निश्चितं प्रतनु अवश्यं विभाव्यते निश्चीयते । यत् यस्मात् तस्याः प्रियायाः करुणैर्दयार्द्रैर्नखैर्मनोहरासु अङ्गुलिषु लब्धं पदं स्थानं येन तत् तथोक्तं सत् च्युतं भ्रष्टमसि । सुचरितातिरेकेण तु स्थितिरनपभ्रंशेनाङ्गुलीष्वभविष्यदिति भावः । इदं पुष्पितायां नाम वृत्तम् । तदुक्तम् । अयुजि नयुगरेफतो यकारो युजि तु नजौ जरगाश्च पुष्पितायां इति ॥

(८३) मिश्रेति । जइ इत्यादि । यद्यन्यहस्तगतं भवेत् तदा सत्यं शोचनीयं भवेत् । सखि दूरे वर्त्तसे एकाकिन्येव कर्णसुखान्यनुभवामि । अन्यहस्तगतं महाराजेतरस्य हस्तगतम् । दम्पत्योः सुखदायकत्वादिति भावः । अकुन्तलामुद्दिश्याह सखीति । न खं श्रोतव्यं श्रुणोषीति भावः ॥

(८४) विदूष इति । भो इत्यादि । भो इयं नामसुद्रा केनोद्देशेन भवता तत्रभवत्या हस्तसंसर्गं प्रापिता । नामसुद्रा नाम्नाक्षराङ्गुलीयम् । उद्देशेनाभिसन्धिना ॥

(८५) मिश्रेति । अमेत्यादि । ममापि कौतूहलेन व्यापारित एव । अपिः मन्ये । किं मम कौतूहलेन स्ववेच्छया एष राजवयस्यो व्यापारितः वचनव्यापारं कारितः । काल-

राजा ॥ वयस्य श्रूयताम् । तदा स्वनगराय तपोवनात् प्रस्थितं मां प्रिया स्वाम्यमाह स्म कियच्चिरेणार्यपुत्रः पुनरस्माकं स्मरिष्यतीति । (८३)

विदू ॥ तदो-तदो । (८७)

राजा ॥ अथैना मुद्राभङ्ग्यां निवेशयता मया प्रत्यभिज्ञिता । (८८)

विदू ॥ किं त्ति । (८९)

राजा ॥

एकैकमत्र दिवसे दिवसे मदीय
नामाक्षरं गणय गच्छसि यावदन्तम् ।
तावत् प्रिये मदवरोधनिदेशवर्त्ती
नेता जनस्तव समीपमुपैष्यतीति ॥ (९०)

जन्या भवदिच्छा इच्छाजन्या कृतिर्भवदित्यनेनात्मजन्याया इच्छाया नरव्यापाररूपायाः कृतेश्च सामानाधिकरण्येनैव कार्यकारणभावस्य प्रतिपादितत्वात् तयोर्वैयधिकरण्यप्रदर्शनेनात्मसङ्कल्पा अवद्धियते । यदुक्तं दर्पणे कार्यकारणयोर्भिन्नदेशतायामसङ्गतिरिति ॥

(८६) राजेति । तदा परिणयात् परम् । स्वनगराय हस्तिनापुराय । गत्यर्थमन्येत्यनेन चतुर्थी । स्वाम्यं साधु । कियच्चिरेण कियद्विलम्बेन । अस्माकमिति स्मृत्यर्थकर्म्मणि षष्ठी ॥

(८७) विदू इति । तदो तदो ततस्ततः ॥

(८८) राजेति । अथ तया वचनानन्तरम् । मुद्रा साक्षराङ्गुलीयम् । निवेशयता प्रवेशयता प्रत्यभिज्ञिता प्रत्युक्ता ॥

(८९) विदू इति । किं त्ति किमिति । किमभिज्ञितेत्यर्थः ॥

(९०) राजेति । एकैकमिति । हे प्रिये अत्र आश्रमे दिवसे दिवसे प्रतिदिनं मदीयमेकैकमेकमेकं नामाक्षरं अङ्गुलीयगतमिति शेषः । गणय यावत् यदा अन्तं चरममक्षरं गच्छसि गणनया प्राप्नोषि । यावत्पुराभ्यां अव्ये इति भविष्यति को । तावत् तदा मदवरोधस्य मदन्तःपुरस्य निदेशे आज्ञायां वर्त्तते यः स निदेशवर्त्ती भूत्वो अस्मत्कल्प-

तच्च दारुणात्मना मया मोहान्नानुष्ठितम् । (९१)

मिश्र ॥ रमणीओ खु अवही विहिणा विसंवादिदो । (९२)

विदू ॥ भो कधं लोहिदमच्छस्स वडिसं विअ मुहप्पविट्ठं एदं आसी । (९३)

राजा ॥ अचीतीर्थं सलिलं वन्दमानायास्ते सख्या हस्तान्निक्षिप्तं स्रोतसि परिभ्रष्टम् । (९४)

विदू ॥ जुज्जदि । (९५)

मिश्र ॥ अदो खु तवस्सिणीए सउन्तलाए अधम्मभीरुणो दुरन्तस्स राएसिणो परिणए सन्देहो जादो अधवा ण ईदिसो अणुरागो अहिण्णाणं अवेक्खदि ता कधंविअ एदं । (९६)

कोति यावत् । नेता त्वामन्त पुरं नापयिष्यन् तत्र समीपमुपैष्यति आगमिष्यति । नेतेति भविष्यति तृच् । इति मत्स्यभिज्ञितेति सम्बन्धः । वसन्ततिलकं नाम वृत्तम् ॥

(९१) तच्चेति । दारुणो भीषण आत्मा यस्य स तेन मया मोहात् भ्रमात् तत् आनन्दनं नानुष्ठितम् न कृतम् ॥

(९२) मिश्रेति । रमणीओ इत्यादि । रमणीय खलु अवधिर्विधिना विसंवादित । अवधिरन्त.पुरानयनकालसीमा । विसंवादितो विमुखत्व वञ्चित इति यावत् । विप्रलम्भो विसंवाद इत्यमर ॥

(९३) विदू इति । भो इत्यादि । भोः कथं रोहितमत्स्यस्य वडिशमिव मुखप्रविष्टमेतदासीत् । वडिशं मत्स्यप्रवेधन मित्यमर । एतदद्भुतीयकम् ॥

(९४) राजेति । अचीतीर्थं मन्त्रावतारस्य अचीवट्टे । वन्दमानाया. स्वयंपूर्वकं नमन्त्या ॥

(९५) विदू इति । जुज्जदि युज्यते ॥

(९६) मिश्रेति । अदो इत्यादि । अत. खलु तपस्विन्या शकुन्तलाया अधर्मभीरोरस्य राजर्ष. परिणये सन्देहो जात. । अथवा नेदृशोऽनुरागोऽभिज्ञानमपेक्षते तत्कथ-

राजा ॥ उपालप्स्ये तावदिदमङ्गुरीयकम् । (९७)

विदू ॥ सम्मतम ॥ भो अहम्मि दाव एद दण्डकट्ठं उवालक्खिस्सं कधं उज्जुअस्स मे कुडिलं तुमं सित्ति । (९८)

राजा ॥ तदुपालप्स्ये एव । (९९)

कथं नु तं कोमलबन्धुराङ्गुलिं
करं विहायासि निमग्नमम्भसि । (१००)

अथवा । (१०१)

मित्येतत् । अत खलु अभिज्ञानभूताया अङ्गुलिमुद्राया विरहादेव । तपस्विन्या अकृतार्थाया शकुन्तलाया परिणये उभयमनिपये अधर्माद्भीरो भयशीलस्य अस्य राजर्षेः सन्देहोजात । एतदनुमानस्यायुक्तत्वमनुभूयाह अथवेति । दैवेव इदानीं दृश्यमान । प्रागप्येवमेवासीदिति भाव । अभिज्ञान स्मृतिहेतुम । अपेक्षते स्मारयितुमिति शेषः । तत् तस्मात् एतत् विस्मरण केवलमिव क्रीडामात्रम् । अनधिकारप्रश्न ॥

(९७) राजेति । उपालप्स्ये निन्दिष्यामि । तावत् तस्मादित्यर्थ ॥

(९८) विदू इति । भो इत्यादि । भो अहमपि तावदेतद्दण्डकाष्ठमुपालप्स्ये अधऋजुकस्य मे कुटिल त्वमसीति । तावत तदा । ऋजुकस्य सरलस्य । मे मम सम्बन्धे । कुटिल वक्रम । इति उपालप्स्ये इत्यन्वितम् ॥

(९९) राजेति । तद्विदूषकवाक्यम् । एवकार प्रतिवचन सदूरं निरस्यति ॥

(१००) कथमिति । नु भो कथ कोमला सुकुमारा बन्धुरा उन्नतानता न विषिढा इत्यर्थ । अङ्गुलयो यस्य स तम । बन्धुरोन्नतानतमित्यमर । तदुक्तं वाग्भट्टे । दीर्घाङ्गुलीभिः कुशला लक्ष्याभिरतिनिम्नगा । सुस्निग्धा स्वाश्च सुस्थायुर्भग्नाभिर्भुग्न-वक्त्रिणी । विषिढाभिर्भवेद्धात्री विरलाभिर्दरिद्रिणीति । तथा । सुस्निग्धं मृगशावीणां बद्धभोगाय जायते । सद्वृत्तं रक्तं तल पाण्योरकृत्रिमम् । त करं प्रियाया पार्श्वं विहाय त्यक्त्वा अम्भसि सलिले निमग्न पतितमसि ॥

(१०१) प्रश्नोक्तिनु खदमेवोत्तरमभिप्रेत्याह अथवेति ॥

अचेतनं नाम गुणं न वीक्षते
मयैव कस्मादवधीरिता प्रिया ॥ (१०२)

मिश्र ॥ सच्चं ज्जेव मडिबण्णो जं अहि वत्तुकामा । (१०३)

विदू ॥ भो सव्वधा अहं बुभुक्खाए मारिदव्वो । (१०४)

राजा ॥ अनाद्त्य ॥ प्रिये यत्कारणपरित्यागादनुशयदग्धहृदय-
स्तावदनुकम्पतामयं जन पुनर्हि मूढेन । (१०५)

प्रविश्य चित्रफलकहस्ता चटी ॥ भट्टा दूसं चित्तगदा भट्टिणी ।

इति चित्रफलक दर्शयति । (१०६)

---

(१०२) सहेतुकमुत्तरमाह अचेतन मित्यादि हिनोमार्द्धेन । नाम सम्भाव्ये । अचेतन चेतनारहित वस्तु गुण पदार्थविशेषमाधुर्य्यं न वीक्षते नालोकयति । अन्यद्या लोकेषु मध्ये मयैव कस्मादहेतो प्रिया प्रीतिकरी रमणी अवधीरिता प्रत्याख्याता । अन्येन केनापि तथाविधा मत्याख्यायत इति भाव । एतेनात्मनोऽचेतनत्व दर्शितम् । वयस्यविदूषकस्य दत्तम् ॥

(१०३) मिश्रेति । सच्चमित्यादि । स्वयमेव प्रतिपन्नो यदसि वक्तुकामा । अहं यद्वक्तुकामा प्रतिषिद्धुरसि तत् नाचेतनस्य गुणदर्शित्वमितीत्यर्थ । स्वयमेव प्रतिपन्नो अवगतवानु क्षितिपतिरिति शेष । पदैकदेशेऽपादुपसर्गस्तालार्थवाचेपि गत्यर्थाटेति कर्त्तरि क्त ॥

(१०४) विदू इति । भो इत्यादि । भो सव्वथाह वभच्चया मारयितव्य । सव्वथा वादम् । सर्वथा हेतुगाढयो रिति मेदिनी । भोक्तुमिच्छा वभच्चा तया क्षुधया कर्त्रा मारयितव्यो विनाशयितव्यः ॥

(१०५) राजेति । अनाद्त्य विदूषकवाक्य श्रुतमश्रुत कृत्वा । अनुशयेति । अनुशयेनानुतापेन दग्ध हृदय मनो यस्य स ॥

(१०६) प्रविश्यति । चित्रफलकहस्ता चित्रपटहस्ता । भट्टेति । अन्तरिय चित्रगता भट्टिनी । चित्रगता चित्रस्था । भट्टिनो क्षत्रियाभिषेकान्ते पत्नी । देवी कृताभिषेकाया मित्यमरः च भट्टिनी इत्यमरः ॥

राजा ॥ विलोक्य ॥ अहो रूपमालेख्यगतायाऽपि प्रियायाः ।

तथाहि (१०७)

दीर्घापाङ्गविसारिनेत्रयुगलं लीलाञ्चितभ्रूलतं
दन्तान्तःपरिकीर्णभासकिरणज्योत्स्नाविलिप्ताधरम् ।
कर्कन्धुद्युतिपाटलोष्ठरुचिरं तस्यास्तदेतन्मुखं
चित्तेप्यालमतीव विभ्रमलसत्प्रोद्भिन्नकान्तिद्रवम् ॥ (१०८)

विदू ॥ विलोक्य ॥ साधु वयस्स साधु जं तए भवरो भङ्गिणीए दंसिदो भावाणुप्पवेसो खलदि विअ मे दिट्ठी णिज्जइअ देवेसुं किं बहुणा सत्ताणुप्पवेत्तसङ्काए आलवणकोदूहलं मे जणअदि । (१०९)

---

(१०७) राजेति । आलेख्यगतायां चित्रगतायां अपि प्रियायां रूपं अहो आश्चर्यं । रूपोत्कर्षं दर्शयितुमाह तथाहीति ॥

(१०८) दीर्घेति । दीर्घेणाकर्णगामिना अपाङ्गेन नेत्रयोरन्तेन विसारि प्रसारि विसारदिति यावत् नेत्रयुगलं यत्र तत् तथा । विस्तृतरो विस्तरः प्रसारो च विसारिणीत्यमरः । लीलया विलासेन अञ्चिता मनोरमा भ्रूलता यत्र तत् तथोक्तम् । दन्तानां दन्तमध्ये परिकीर्णो व्याप्तो यो भासकिरणः भासजनितधवलिमा तदात्मकज्योत्स्ना या विलिप्तो अधरो यस्मिन् तत् । कर्कन्धुद्युतिरिव बदरीफलकान्तिरिव पाटलः श्वेतरक्तो य ओष्ठस्तेन रुचिरं मनोज्ञम् । बिम्बोष्ठीतिवत् कर्कन्धुशब्दोपि पक्वं फलमभिधत्ते । श्वेतरक्तस्तु पाटल इत्यमरः । विभ्रमेण भ्रूक्षेपभावविकारविशेषेण शोभया वा लसति क्रीडतीति विभ्रमलसत् । विभ्रमः भ्रूक्षेपभावजातक्रियाविशेषके । भ्रान्तावपि च शोभायामिति मेदिनी । लसच्चिति क्रीडे इति कविकल्पद्रुमः । प्रोद्भिन्नकान्तिर्लावण्यं येन स प्रोद्भिन्नकान्तिः । लावण्यमुद्भिद्य जातमित्यर्थः । तथाभूतोद्भवः स्वेदबिन्दुर्यत्र तत् तथाभूतं तस्याः मकरन्दलतायाः एतद्दृश्यमानं तत् प्रागनुभूतं मुखं चित्तेपि आलेख्यगतमपि आयसति आभासते इव । स्वादाभावश्च नाताप इत्यमरः । आर्द्रखचिक्रीडितं कृतम् ॥

(१०९) विदू इति । विलोक्य चित्रपटमिति शेषः । साधु इत्यादि । साधु वयस्य साधु यत्त्वया भवरो भङ्गिन्या दर्शितो भावानुप्रवेशः खलतीव मे दृष्टिर्निर्भरमरेणेव किं

मिश्र ॥ अहो एषा राएसिणो वत्तिआलेहाणिउणदा जाणे पिअसही मे अग्गदो वट्टदित्ति । (११०)

राजा ॥

यद्यत् साधु न चित्रे स्यात् क्रियते तत्तदन्यथा ।
तथापि तस्या लावण्यं रेखया किञ्चिदन्वितम् ॥ (१११)

तथाहि । (११२)

अस्यास्तुङ्गमिव स्तनद्वयमिदं निम्नेव नाभिः स्थिता
दृश्यन्ते विषमोन्नताश्च वलयो भित्तौ समायामपि ।

अङ्गना सत्वानुप्रवेशशङ्कया आलपनकौतूहलं मे जनयति । साधुत्वे हेतुमाह यदित्यादि । भङ्ग्या. मङ्गुलतया. । मधुरो लोकप्रिय. । स्वादुप्रियौ तु मधुराभिलाषवरौ. । भावानुप्रवेशो भावसम्बन्ध । दर्शितविलक्षणयेति शेष. । निम्नतप्रदेशेषु गुह्यभागेषु स्तनादिष्वित्यर्थ. । मे मम दृष्टिः स्खलति वास्तविकत्ववद्धा न पततीत्यर्थः । सत्वानुप्रवेशशङ्कया प्राणसम्बन्धशङ्कया । 'दृव्यास्तु व्यवसायेषु सत्वमस्त्री तु जन्तुष्वित्यमरः । आलपनकौतूहलमालापपरायणम् ॥

(११०) मिश्रेति । अहो इत्यादि । अहो राजर्षेर्वर्त्तिकालेखानिपुणता जाने प्रियसखी मे अग्रतो वर्त्तत इति । राजर्षेर्मम राजस्य वर्त्तिकाभिर्वर्णवर्त्तिभिर्लेखायां चित्रणायां निपुणता कौशलं अहो आश्चर्यम् । जाने मन्ये किमित्याकाङ्क्षायामित्यन्वयः ॥

(१११) राजेति । यद्यदिति । यद्यद्रूपं चित्रे साधु अविकलं न स्यात् तत्तदन्यथा अन्यविधं क्रियते सर्वैरिति शेष. । तथापि तथाव्यवहारस्य चित्रनिपुणानां सर्वेषां स्वभावसिद्धत्वेपि तस्याः अङ्गुलतायाः किञ्चित् किमपि लावण्यं अङ्गाना सविशेषरूपं रेखया वर्णविशेषरेखया अन्वितं सम्बन्धम् ॥

(११२) तथाहीति । हि यस्मात्तत्परेखायोगात् एवमेव मिति स्त्रीकीयपरपदयो-रेकान्वय. । स्तनोदरचतुर्थपदयो. रूपान्तरप्रदर्शनाय हेत्वन्तरनिर्देशात् ॥

अङ्गे च प्रतिभाति माईवमिदं स्निग्धप्रभावाच्चिरं
प्रेम्ना मत्सुखमीपदोच्छत इव क्षोरा च वक्त्रीव सान् ॥ (११३)
मिश्र ॥ सरिसं एव्वं पच्चादाणुरूवो सिणेहस्स । (११४)
राजा निश्वस्य । (११५)
साचात् प्रियामुपगतामपहाय पूर्वं
चित्रार्पितामहमिमा वृक्षमन्वमानः ।
स्रोतोवहा पथि निकामजलामतीत्य
जातः सखे प्रणयवान् मृगतृष्णिकायाम् ॥ (११६)

---

(११३) अस्या इति । समायामवन्ध्यतया अपि भिन्नो फलके । उत्तरवितवेष्वन्वित-
मिदम् । अस्या. शकुन्तलाया. इदं लावण्यं तद्वपमिव उच्चयदालक्ष्यमाणम् । उच्चमाभू-
तयोदयोच्छ्रिता सुझे इत्यर्थः । नाभिनिम्ना गभीरेव स्थिता । तथा वलयैश्च यक्-
तरङ्गाः शिराजाला नीलोत्पला इवाभान्ति । रेखोपरञ्जितविशेषकं निर्दिश्य
इदानीं क्षेत्रत्रजनिरपेक्षं दर्शयति अङ्गे चेत्यादिना । चकारः स्निग्धप्रभावादित्यनेन
योजनीयः । तथाच स्निग्धस्य सेवाकरणस्य प्रभावात् मनोपक्षेत्रो रक्षेगात्रे । अङ्गं
गात्रे प्रणोक्षायाश्चेति मेदिनी । इदं दृश्यमानं माईवं कोमलता स्थिरं स्थायिभावेन
प्रतिभाति प्रकाशते तथा प्रेम्ना प्रणयेन मत्सुखं इयत्स्वीक्षते पश्यतीव नयनाभ्यां
स्निग्धयोगादिति भावः । इदं क्षीरा स्वदुक्षसा सतो मां व्यक्ति किमपि व्याकरोति च
आज्ञापयतीव क्षेत्रादिति भावः । यद्वृत्तमिलोक्तिरियं द्रष्टव्या ॥

(११४) सिणेहेति । सदृशमेवं पत्याशापगुरोः क्षेत्रस्य । एवं स्निग्ध-
भावात् अपि मङ्गलानम् । पत्याशापेव गुरोः प्रणयस्य क्षेत्रस्य प्रेम्नः सदृशम् ॥

(११५) राजेति । स्निग्धस्य दीर्घमिति शेषः ॥

(११६) स साक्षादिति । अवलोकनोपस्थिता साक्षात्प्रतिमा स्निग्धं पूर्वं प्रणयेन
सह विचारितानाविलिङ्गितवतीं अनङ्गमिव मन्मथमपि आदिशब्दात् अन्यं पथिकजन-
मपि पश्चात्प्रणयी आलोक्य महीतलोत्थं अतिस्निग्धं मृगतृष्णिकायां मरीचिकायां
महीरजोमात्रमात्रायामिति भावः । सखायवान् सखार्थी जातः । मृगतृष्णा पतेदित्यत्र
अतः । अत्र पूर्वार्धस्थितस्य पदार्थालङ्कारस्यैव विम्बप्रतिविम्बभावादिदमेवालङ्कारः ।

विदू ॥ भो तिलिआ आइदिओ दीसन्ति सव्वाओ ज्जेव दक्खणी-आओ ता कदमा एत्थ तत्थभोदी सउन्तला । (११७)

मिश्र ॥ अणाहिणो क्खु एसो सद्दीए रूवस्स मोहचक्खु इमं क्खु ण से गदा मच्चुक्खदं । (११८)

राजा ॥ त्वं तावत् कतमा तर्कयसि । (११९)

विदू ॥ निब्बण्णं ॥ तक्केमि जा एसा सिढिलबन्धणुब्भन्तकुसुमेण केसहत्थेण वहुस्सेअविन्दुणा वअणेण विसेसदो णमिदसणाहिं वाहु-लदाहि उच्चलिदणीविणा वसणेण अ ईसीपरिस्सन्ता विअ अवि-सेअ सिणिद्धदरपडुवस्स वालचूअस्स पासे आलिहिदा एसा तत्थभोदी सउन्तला दूदराओ सच्चीओत्ति । (१२०)

यद्वा दक्षिणा । अर्थान्तरसङ्क्रमेण किञ्चित्तत्सदृशं फलम् । सदृशा निदर्शनेति । सत्यम्भवत् । असत् असम्भवत् । वसन्ततिलकं नाम वृत्तम् ॥

(११७) विदू इति । भो इत्यादि । भोस्त्रिय आकृतया ह्यन्ते सर्वाएव दर्शनीया तत्कतमात्र तत्रभवती शकुन्तला । दर्शनीया अवश्यमीक्षणीया रूपवत्य इत्यर्थ । कतमा आसा मध्ये का । किं यत्तदेकान्यादिति बहूनामेकनिर्धारणे डतम ॥

(११८) मिश्रेति । अणेति । अनभिज्ञ खेलूप सखीरूपस्य मोघचक्षु इयं खलु नास्य गता मृत्यचताम् । अनभिज्ञ दत्तयातुभवाक्षम । मोघ निष्फलं चक्षुर्यस्य स मोघचक्षु । मोघ निरर्थकमित्यमर । उक्तरत्र खलु प्रश्नार्थः । किमियमस्य मृत्यचतां न गता इत्यर्थ ॥

(११९) राजेति । कतमामासां मध्ये काम् ।

(१२०) विदू इति । निब्बण्णं निरीक्ष्य । निर्ब्बर्णनन्तु निधान दर्शनावलोकनेच्छय मित्यमर । तक्के मीत्यादि । तर्कयामि यैषा शिथिलबन्धनोद्गान्तकुसुमेन केशहस्तेन वहत्स्वेद-बिन्दना वदनेन विशेषतो नमिताभ्यां बाहुलताभ्याम् उच्चलितनीविना वसनेन च ईषत् परिस्रान्तेव अभिषेकस्निग्धतरपल्लवस्य बालचूतवृक्षस्य पार्श्वे आलिखिता एषा तत्र-भवती शकुन्तला । इतरे सख्याविति । शिथिलबन्धनेन बन्धनशैथिल्येन उद्गान्तानि सुकुमा-रकुसुमानि येन स तेन केशहस्तेन केशकलापेन विभिन्ना । नमीभा विशेषते । प्रथमस्यापि ।

अङ्गे च प्रतिभाति मार्दवमिदं स्निग्धप्रभावाच्चिरं
प्रेम्णा मन्मुखमीषदोन्नत इव क्षोरा च वक्त्रीव माम् ॥ (११३)
मिश्र ॥ सरिसं एव्वं पच्चादावरुअणो सिणेहस्स । (११४)
राजा निश्वस्य । (११५)
साक्षात् प्रियामुपगतामपहाय पूर्वं
चित्रार्पितामहमिमां बहुमन्यमानः ।
स्रोतोवहां पथि निकामजलामतीत्य
जातः सखे प्रणयवान् मृगतृष्णिकायाम् ॥ (११६)

---

(११३) अङ्गेति । मृगायामवस्थायामपि भित्तौ फलके । उत्तरक्रियेयमन्वित-मिदम् । अस्या: शकुन्तलाया: इदं स्तनदयं तुङ्गमिव उच्चैर्दालच्यमाणम् । उच्चप्राभूत्योदयोच्छ्रिता सुन्दरे इत्यमर । नाभिर्निम्ना गभीरेव स्थिता । तथा वलयश्च वक्तरङ्गाश्च त्रिवलीवता नोदोह्या दृश्यन्ते आलक्ष्यन्ते । रेखोपदर्शितविशेषरूपं निर्दिश्य इदानीं हेत्वन्तरजनितविशेषरूपं दर्शयति अङ्गे चेत्यादिना । चकार: स्निग्धप्रभावादित्यत्रापि योजनीय । तथाच स्निग्धस्य तेलाक्तवर्णस्य प्रभावात् धर्मोपे हेतौ रङ्गे गात्रे । अङ्गं गात्रे प्रतीकोपाङ्गयोरिति मेदिनी । इदं दृश्यमानं मार्दवं कोमलता चिरं स्थायिभावेन प्रतिभाति प्रकाशते तथा प्रेम्णा प्रणयेन मन्मुख इवदुन्नमोन्नते पश्यतोऽपि नयनतारयोः निधयोगादिति भावः । एवं क्षोरा स्वदुच्छ्वासा सती मां व्यक्ति किमपि व्याहरतीव च ओष्ठयोः स्नेहादिति भावः । शार्दूलविक्रीडितं वृत्तम् ॥

(११४) सिणेहेति । सदृशमेवं पश्चात्तापगुरो: स्नेहस्य । इदं चित्र-गताया अपि वर्द्धमानम् । पश्चात्तापेन गुरो: प्रकृष्टस्य स्नेहस्य प्रेम्न: सदृशम् ॥

(११५) राजेति । निश्वस्य दीर्घमिति शेष: ॥

(११६) साक्षादिति । उपगतामुपस्थितां साक्षादसन्निधानां प्रियां पूर्वं प्रागपह्नाय कृत्वा चित्रार्पितामाकृतिविशेषामिव कृतक्रियां बहुमन्यमान आदृद्रायो:ऽहं पथि निकाम-जला पर्याप्तजला स्रोतोवहां नदीमतीत्य अतिक्रम्य मृगतृष्णिकायां मरीचिकायां मरीचिदाभासमानायामिति भाव: । प्रणयवान् जातार्थी जात: । मृगतृष्णा मरीचिकत्य-मर: । अत्र पूर्वार्द्धोक्तस्य परार्द्धोक्तवस्त्वन्तरेण बिम्बप्रतिबिम्बभावादिदृष्टान्तालङ्कार: ।

विदू॥ भो तिस्सिआ आदूदिओ दीसन्ति सव्वाओ जेव दसणी-आओ ता कदमा एव्व तत्थभोदी सउन्तला। (११७)

मिश्र॥ अणत्थिओ क्खु एसो सहीए रूवस्स मोहचक्खु इअं क्खु ण से गदा पच्चक्खदं। (११८)

राजा॥ त्वं तावत् कतमा तर्कयसि। (११९)

विदू॥ निब्बण्णं॥ तक्केमि ज्जा एसा सिढिलबन्धणुब्भन्तकुसुमेण केसहत्थेण वङ्कसेअविन्दुणा वअणेण विसेसदो णमिदंसणाहिं वाङ्क-लदाहि उच्चलिदणीविणा वसणेण अ ईसीपरिस्सन्ता विअ अवि-सेसं सिणिद्धरपल्लवस्स वाअचूअरुक्खस्स पासे आलिहिदा एसा तत्थभोदी सउन्तला दूदराओ सहीओत्ति। (१२०)

वङ्क दक्षिणा। अर्थान्तरप्रवृत्तेन किञ्चित्तत्सदृशं फलम्। सदृशा निदर्शेत यदि सा स्यादिर्धनेति। सत्सम्भवत्। असत् असम्भवत्। वसन्ततिलकं नाम वृत्तम्॥

(११७) विदू इति। भो इत्यादि। भोसिस्स आकृतया दृश्यते सर्वाएव दर्शनीया तत्कृतमात्र तत्रभवतो यकुन्तला। दर्शनीया अवश्यमीक्षणीया रूपवत्य इत्यर्थ। कतमा आसां मध्ये का। किं वत्तदेकान्यादिति बहूनामेकनिर्धारणे ङतम॥

(११८) मिश्रेति। अणेति। अनभिज्ञ खेलेय सखीरूपस्य मोहचक्षु इयं खलु नास्य गता प्रत्यक्षताम्। अनभिज्ञ इदन्तयानुभवाक्षम। मोहं निर्धनकमित्यमर। उत्तरत्र खलु प्रश्नार्थः। किमियमस्य प्रत्यक्षता न गता इत्यर्थं॥

(११९) राजेति। कतमामासां मध्ये काम्।

(१२०) विदू इति। निब्बण्णं निरीक्ष्य। निर्वर्णनन्तु निधानं दर्शनालोकनेक्षण मित्यमर। तक्केमीत्यादि। तर्कयामि यैषा शिथिलबन्धनोद्भ्रान्तकुसुमेन केशहस्तेन वक्रस्वेद-बिन्दना वदनेन विशेषतो नर्मितैकाभ्यां वाङ्कताभ्याम् उच्चलितनीविना वसनेन च ईषत् परिम्लान्त्र अभिपेक्षस्निग्धरपल्लवस्य वातचतद्वृक्षस्य पार्श्वं आलिखिता एषा तत्र-भवती यकुन्तला। इतरे सख्याविति। शिथिलबन्धनेन बन्धनशैथिल्येन उद्भ्रान्तानि च्युतानि कुसुमानि यत्र स तेन केशहस्तेन केशकलापेन शिथिलः। तृतीया विशेषणे। एवमन्यत्रापि।

राजा ॥ निपुणो भवान् अनुग्रह ममापि भावचिह्नम् । (१२१)
स्विन्नाङ्गुलिर्विनिवेशाद्रेखा प्रान्तेषु दृश्यते मलिना ।
अश्रु च कपोलपतितं लक्ष्यमिदं वर्णकोच्छ्वासात् ॥ (१२२)

चेटीं प्रति ॥ चतुरिके अर्द्धलिखितमेतद्विनोदस्थानमस्माभिः तन्नच्छ वर्त्तिकास्तावदानय । (१२३)

चेटी ॥ अज्ज माढव्व अवलम्ब चित्तफलकं जाव आग-च्छामि । (१२४)

याय॰ पङ्कज इत्तस्य कलापार्थाः कथान्तरे इत्यनर॰ । विशेषत इति । विशेषतोऽतिशयया-न्वितो नम्रोन्नतावंसौ स्कन्धौ याभ्यां ते ताभ्याम् । उन्नतिर्नम्रतेति विरुद्धतनोर्विना । तनौ कटीवक्षसश्च । स्त्रीकटौ वक्षसश्चेति नौमी यादवेऽपि चेत्यमरः । अभिषेकेति । अभिषेकेण सलिलावर्जनेन स्निग्धगौरोऽतिमनोहरः पक्ष्मणो यस्य स तस्य । चिक्कणं मनोहरं स्निग्धमित्यमरः । एतेन स्वल्पावनतिमात्रत्वोक्तिसंगतेति । स्त्रीकोच्छ्वासस्था पतिरि-तेति गम्यते ॥

(१२१) राजेति । निपुणोऽभिज्ञ । प्रबोधे निपुणोऽभिज्ञविज्ञनिष्णातधिषणा इत्यमरः । अत्र आलिखितायामलभत्वात् । भावचिह्नम् भावस्य सात्विकभावस्य स्वेदादे-र्चिह्नम् । लक्षणम् । स्तम्भ स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः । वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्विका॰ स्मृता इति ॥

(१२२) पूर्वोक्तमेव सात्विकभावचिह्नं दर्शयति स्विद्येति । स्विद्यायाः स्वेदत्या अङ्गुलेर्निवेशादर्पणात् प्रान्तेषु पार्श्वेषु मलिना रेखा दृश्यते तथा वर्णकस्य रक्त-च्छायात् स्खलितभावाद्वे । अधोयातं गण्डात् पतितमश्रु नेत्रजादि च दृश्यं लक्ष्यं निर्दे-श्यम् । तथाच स्वेदश्च द्वौ सात्विकभावौ दृश्यौ । इत्यभावो ध्वनिः ॥

(१२३) चेटीमिति । राजाहेति शेषम् । अवलिखितं विनोदस्थानं चित्रस्थापनस्थान आलेख्यमित्यर्थः । तत्पतितं कर्मभूते । अवाङ्मिरर्धलिखितमसम्यक् लिखितम् । वर्तिका वर्णकवर्तीः ।

(१२४) चेटीति । अज्जेत्यादि । आर्य माधव्य अवलम्बस्व चित्रफलकं यावदाग-च्छामः । अवलम्बस्व धारय । यावदागच्छाव आगमनपर्यन्तम् ॥

राजा ॥ अहमेवावलम्बे। इति यथोक्तं करोति। (१२५)

चेटी ॥ निष्क्रान्ता। (१२६)

विदू ॥ भो किं एत्थ अवरं आलिहिदव्वं। (१२७)

मिश्र ॥ जो जो मिअसद्दीए अहिमदो पदेसो तं तं आलिहिदु-
कामोत्ति तक्केमि। (१२८)

राजा ॥ सखे श्रूयताम्। (१२९)

कार्य्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी
पादास्तामभितो निषण्णचमरा गौरीगुरोः पावनाः।
शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः
शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम् ॥ (१३०)

---

(१२५) राजेति। यथोक्तं करोति अवलम्बते ॥

(१२६) चेटीति। सुगमम् ॥

(१२७) विदूष इति। भो इत्यादि। भोः किमत्र अपरमालिखितव्यम्। आलिखि-
तव्यम् चिन्तितव्यम् ॥

(१२८) मिश्रेति। जो इत्यादि। यो वः प्रियसख्या अभिमतः प्रदेशस्तं तमालिखितु-
काम इति तर्कयामि। तर्कयामि तस्य तस्यासङ्गादिति शेषः ॥

(१२९) राजेति। श्रूयतां यदालिखितव्यमिति शेषः ॥

(१३०) कार्य्येति। सैकतेषु सिकतामयपुलिनेषु लीनानि उपविष्टानि हंसमिथुनानि
हंसयुग्मानि यस्याः सा तथोक्ता। सिकता वालुकाः। सिकताः क्लीबालुकापीति। सैकतं
सिकतामयमिति अमरः। मालिनी नाम्नी स्रोतोवहा नदी कार्य्या चालेख्या तां मालिनी
मभितः उभयतः। तस्याः समीपे वा। समीपोभयतः पीप्रसाकल्याभिमुखेऽभित इत्य-
मरः। अभ्यभवपरिसवत इत्युक्तेरभिरुभयेति द्वितीया। गौर्याः पार्वत्या गुरोः पितु-
र्हिमालयस्य निषण्णा अवस्थिताश्चमरा मृगविशेषा येषु ते। चमरं चामरेऽस्त्री तु मञ्जरी-
मृगभेदयोरिति मेदिनी। पावनाः पवित्रताहेतवः पादाः प्रत्यन्तपर्वताः कार्य्याः। पादाः
प्रत्यन्तपर्वता इत्यमरः। तथा शाखासु लम्बितानि वल्कलानि तपस्विनां वसनभूतानि यस्य

विदू ॥ स्वगतम् ॥ जधा मन्तेदि तधा तक्केमि पूरिदव्वं अणेण चित्तफलअं आकिदिहिं लम्बकुच्चाणं वक्कलपरिहाणाणं तावसाणं त्ति । (१३१)

राजा ॥ वयस्य अन्यच्च शकुन्तलायाः प्रसाधनमभिप्रेतं लेखितुं विस्मृतमस्माभिः । (१३२)

विदू ॥ किं विअ । (१३३)

मिश्र ॥ वणवासस्स कसणआभावस्स अ जं सरिसं भविस्सदि । (१३४)

अ तथोक्तस्य तरोरधस्ताद्धे कृष्णमृगस्य कृष्णसारस्य वामे विषाणे दक्षिणनयन सव्यमतिसुन्दरं दानेत्यम् । वामं सव्ये प्रतीपे च दूरिणे चातिसुन्दर इति विश्व । कण्डूयमानां कण्डूं खर्जनं कुर्वतीम् । कण्डू खर्जने । कण्डूया इत्यमर । नवशष्पोपरिव इति क्व । मह्यादित्वादात्मनेपदम् । मृगी हरिणीञ्च निर्मातु आलिखितुमिच्छामि । यादृङ्-निर्क्रीडितं छत्तम् ॥

(१३१) विदू इति । स्वगत मनसिकृत्य । जवेत्यादि । यथा मन्त्रयति तथा तर्कयामि पूरयितव्यमनेन चित्रफलकमाकृतिभिर्लम्बकूर्चानां वल्कलपरिधानानां तापसानामिति । यथा यथाकारं मन्त्रयति निरूपयति तथा तेन प्रकारेणाहमपि तर्कयामि किमित्याह पूरयितव्यमित्यादि । अनेन राज्ञा लम्बकूर्चानां दीर्घश्मश्रूणां कृष्णसर्पी भ्रुवोर्मध्ये कठिनत्वमुक्तवता इति मेदिनी । वल्कलपरिधानानां तापसानामाकृतिभिः चित्रफलकं पूरयितव्य मिति ॥

(१३२) राजेति । प्रसाधनं वेषरचनम् । आकल्पो वेषः प्रसाधनमित्यमरः । अभिप्रेतं सेव्यतयावधारितम् ॥

(१३३) विदू इति । किं विअ किमिव ॥

(१३४) मिश्रेति । वनेत्यादि । वनवासस्य कन्यकाभावस्य च यत् सदृशं भविष्यति । सदृशपदयुक्तं सदृक्षतमिति शेषः । कन्यकाभावसदृशमाभरण्यम् । वनवाससदृशं तस्य पुष्पादिमण्डनमिति भावः ॥

राजा ॥

कतं न कर्णार्पितबन्धनं सखे
शिरीषमागण्डविलम्बिकेशरम् ।
न वा शरच्चन्द्रमरीचिकोमलं
मृणालसूत्रं रचितं स्तनान्तरे ॥ (१२५)

विदू ॥ किंणु खु तत्तभोदी रत्तकुवलअसोहिणा अग्गहत्थेण मुहं आवारिअ चकिदचकिदा विअ ट्ठिदा । (१२६)

सावधानं दृष्ट्वा ॥ आ ही ही भो एसो दासीए पुत्तो कुसुमरस-पाडच्चरो दुट्ठमज्झरो तत्तभोदीए वअणकमलं अहिलसदि । (१२७)

---

(१२५) राजेति । कृतमिति । सखे कर्णे अर्पितं न्यस्तं बन्धनं सूत्रमन्वियंस्य तत् तथोक्तं तथा आगण्डं कपोलपर्यन्तं विलम्बी केशरः शिखा यस्य तत् तथाभूतं शिरीषं शिरीषपुष्पं न कृतं न लिखितम् । एवं स्तनान्तरे स्तनयोरभ्यन्तरे शरच्चन्द्रस्य शरदिन्दो-र्मरीचिवत् कोमलं सुकुमारं मृणालसूत्रमा मृणालतन्तुरिव किम्वा मृणालकृतहारस्य न रचितम् न चित्रितम् । अन्ये सूत्रपदं मालामभिधत्ते अक्षसूत्रादिवत् । मा सदुच्चये । वंशस्थविलं नाम वृत्तम् ॥

(१२६) विदू इति । किंणु त्यादि । किंणु खलु तत्तभवती रक्तकुवलयशोभिना अग्रहस्तेन मुखमावार्य्य चकितचकितेव स्थिता किंचुखलुभ्या वितर्कगर्भः प्रश्नोद्योत्यते । रक्तकुवलयमिव रक्तोत्पलमिव शोभत इति रक्तकुवलयशोभी तेन । स्यादुत्पलं कुवलय-मित्यमरः । अग्रहस्तेन हस्ताग्रेण पाणिनेत्यर्थः । आचार्य्य आच्छाद्य । चकितचकिता भीतभीता । अतिभीतेत्यर्थः । चकितः शङ्कितो भीत इति विश्वप्रकाशेन ॥

(१२७) सावधानमिति । सप्रणोभिनिवेशमित्यर्थः । आहत्यादि । आ ही ही भो एष दास्याः पुत्रः कुसुमरसपाटच्चरो दुष्टमधुकरस्तत्तभवत्या वदनकमलमभिवपति । आः क्रोधे पीड़ायां वा । हीहीति विस्मये हासे वा । हीहीमहो विस्मयहासयोरिति मेदिनी । दास्याः पुत्रो दासः । कुसुमरसस्य पाटच्चरचोरः ॥

राजा ॥ नन्वु वार्यंतामेष धृष्टः । (१३८)

विदू ॥ भो तुमं ज्जेव अविणीदाणं सासिदा दूमस्स वारणे पहवसि । (१३९)

राजा ॥ युज्यते । अयि भोः कुसुमलतामिवातिथे किमत्र परि-
मतनखेदमनुभवसि । (१४०)

एषा कुसुमनिषण्णा त्वयितापि सती भवन्तमनुरक्ता ।
प्रतिपालयति मधुकरी न खलु मधु त्वां विना पिबति ॥ (१४१)

मिश्र ॥ अदिअत्थं क्खु वारिदो । (१४२)

विदू ॥ भो पडिसिद्धवामा क्खु एषा जादी । (१४३)

---

(१३८) । राजेति । वार्यंता निवार्यंताम् धृष्टो निरंङ्कुश. ॥

(१३९) विदू इति । भोइत्यादि । भो त्वमेव अविनीताना शासिता अस्य वारणे प्रभवसि । अविनीतानां दुराचारिणाम् । प्रभवसि प्रभुर्भवसि ॥

(१४०) राजेति । युज्यते तदेव युक्तम् । अयिरनुनये । अयि प्रत्यादुनयोक्तया सम्बोधनेमिश्रेति मेदिनी । कुसुमेति । कुसुमयुक्ता लता कुसुमलतास्तासा प्रियातिथे प्रीतिवर्द्धनातिथिभूत । किं कथम् । परिपतनखेदं उड्डीयोपवेशनजु खम् । नेयं कुण्ठ खेतेति भाव. ॥

(१४१) प्रथम म्परिपतनव्यग्रता प्रदर्श्य पतनाद्दूरं भूमिं विलोभनया प्रदर्शयति एषेति । कुसुमे पुष्पे निषण्णा स्थिता सती पतिव्रता अतएवानुरक्ता सानुरागा एषा मधुकरी त्वयितापि मकरन्दं पिपासुरपि भवन्तं प्रतिपालयति प्रतीक्षते खलु यस्मात् त्वां विना मधु पुष्परस न पिबति । मधु चौद्रे जले क्षीरे मद्ये पुष्परसे इति विश्व । इयमार्या ॥

(१४२) मिश्रेति । अदीत्यादि । अत्यर्थं खलु वारित । पर्य्याप्तं वारित इत्यर्थं ॥

(१४३) विदू इति । भो इत्यादि । भो प्रतिषिद्धवामा खलु एषा जाति । प्रति-षिद्धा निषिद्धा चासौ वामा प्रतिकूला चेति प्रतिषिद्धवामा । निषिद्धा सती निषेधप्रतिकूला-चारिणीत्यर्थ । वामो वक्रो प्रतिपक्षोरित्यमर. । किम्वा प्रतिषिद्धेन प्रतिषेधेन वामा भावे क्त. । एषा जातिर्मधुकरजाति. ॥

राजा ॥ सकोपम् ॥ भो न मे पासने तिष्ठसि भृयतां तर्हि सम्मति हि । (१४४)

अक्लिष्टबालतरुपल्लवलोभनीयं
पीतं मया सदयमेव रतोत्सवेषु ।
बिम्बाधरं दशसि चेद्भ्रमर प्रियाया-
स्त्वां कारयामि कमलोदरबन्धनस्थम् ॥ (१४५)

विदू ॥ भो एवं तिक्खदण्डस्स दे कधं ण भाइस्सदि । (१४६)

विदूषकान्तिकगतम् ॥ एसो दाव उम्मत्तो अहम्पि एदस्स सङ्केण ईदिसो ज्जेव संवुत्तो । (१४७)

राजा ॥ निवार्यमाणोऽपि कथं स्थित एव । (१४८)

---

(१४४) राजेति । पासने आदेशे । तिष्ठसि वर्तसे । सम्मति हि सम्मत्येव । हि हेताववधारणे इत्यमरः ॥

(१४५) अक्लिष्टेति । बालो अचिरोद्गतश्चासौ तरुपल्लवश्चेति सः । अक्लिष्टो अज्ञानो यो बालतरुपल्लवस्तमिव लोभनीयम् अतिसुकुमारमिति यावत् अतएव मया रतोत्सवेषु निधुवनोत्सवेषु सदयमेव नतु दृढमिति भावः । पीतं चुम्बितं प्रियायाः शकुन्तलायाः बिम्बाधरं पक्वबिम्बिकाफलवदधरं भ्रमर त्वञ्चेद्दशसि तदा बध्यतेऽस्मिन्निति बन्धनं कारागृहं कमलस्य उदरमभ्यन्तरमेव बन्धनं तत्र तिष्ठतीति स तथा भूतं कारयामि । कथित्तु कमलोदरस्येव बन्धनं कमलोदरबन्धनं तेन तिष्ठतीति स तं पुटकनिक्षिप्तमिति यावदिति व्याचष्टे तच्च उक्तत्व विदूषकवचसोऽसङ्गतेर्दुष्परिहरत्वात् । बधन्तिष्ठकं नाम दृक्षम् ॥

(१४६) विदूषकेति । भो इत्यादि । भो एवं तीक्ष्णदण्डस्य ते कथं न भेष्यति तीक्ष्णोऽसिर्दुष्टो दण्डो यस्य स तस्य । ते तव सम्बन्धे ॥

(१४७) विदूषकेति । एसो इत्यादि । एष तावदुन्मत्तः अहमप्येतस्य सङ्गेन ईदृश एव संवृत्त । एष राजा । सङ्गेन सहकारेण । ईदृश उन्मत्त इव ॥

(१४८) राजेति । स्थित एव भ्रमरकनिषेधः ॥

राजा ॥ ननु वार्यंतामेष धृष्टः । (१३८)

विदू ॥ भो तुमं ज्जेव अविणीदाणं सासिदा दूमस्स वारणे पभवसि । (१३९)

राजा ॥ युज्यते । अयि भोः कुसुमलतापियातिथे किमत्र परि-
पतनखेदमनुभवसि । (१४०)
एषा कुसुमनिषण्णा त्वयिताऽपि सती भवन्तमनुरक्ता ।
प्रतिपालयति मधुकरी न खलु मधु त्वां विना पिबति ॥ (१४१)

मिश्र ॥ अदिअत्थं क्खु वारिदो । (१४२)

विदू ॥ भो पडिसिद्धवामा क्खु एषा जादी । (१४३)

---

(१३८) । राजेति । वार्यंता निवार्यंताम् धृष्टो निर्लज्ज० ॥

(१३९) विदू इति । भोइत्यादि । भो त्वमेव अविनीताना शासिता अस्य वारणे प्रभवसि । अविनीताना दुराचारिणाम् । प्रभवसि प्रभुर्भवसि ॥

(१४०) राजेति । युज्यते तदेव युक्तम् । अयिरन्तुनये । अयि प्रश्नानुनयोक्त्या सम्बोधनेपिचेति मेदिनी । कुसुमेति । कुसुमयुक्ता लता कुसुमलतास्तासु प्रियातिथे प्रीतिवर्द्धनातिथिभूत । किं कथम् । परिपतनखेदं ऽङ्गीयोपवेयनदु खम् । नेयं कुसुम लतेति भाव० ॥

(१४१) प्रथम म्परिपतनव्यर्थता प्रदर्श्य पतनाङ्गं भूमिं विलोभनया प्रदर्शयति एषेति । कुसुमे पुष्पे निषण्णा स्थिता सती पतिव्रता अतएवानुरक्ता सानुरागा एषा मधुकरी त्वयिताऽपि मकरन्दं पिपासुरपि भवन्तं प्रतिपालयति प्रतीक्षते खलु यस्मात् त्वां विना मधु पुष्परस न पिबति । मधु चौद्रे जने क्षीरे मद्ये पुष्परसे इति विश्व० । दयमाद्यौ ॥

(१४२) मिश्रेति । अदीत्यादि । अत्यर्थं खलु वारित । पर्य्याप्तं वारित इत्यर्थं ॥

(१४३) विदू इति । भो इत्यादि । भो प्रतिषिद्धवामा खलु एषा जाति । प्रति-षिद्धा निषिद्धा चासौ वामा प्रतिकूला चेति प्रतिषिद्धवामा । निषिद्धा सती निषेधप्रतिकूला चारिण्यीत्यर्थं । वामो वक्रु प्रतिपथोरित्यमर० । किम्वा प्रतिषिद्धेन प्रतिषेधेन वामा भावे क्त० । एषा जातिर्मंधकरजाति० ॥

इति काष्ठं निक्षिपति ॥ (१५५)

मिश्र ॥ पुव्वापरविरुद्धो अपुव्वो एसो विरच्छिमग्गो । (१५६)

राजा ॥ वयस्य कथमेवमविश्रामं दुःखमनुभवामि । (१५७)

प्रजागरात् खिलीभूतसन्ध्याः स्वप्नसमागमः ।
वाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि ॥ (१५८)

मिश्र ॥ सव्वधा पमज्जिदं तुए पच्चादेसदुक्खं पिअसहीए पच्चक्खं जेव सहीजणस्स । (१५९)

. कान्ता शकुन्तला पुनरपि चित्रीकृता पदुभवनमादर्शचित्रमयी स्थिता चित्रमयो जाता। आर्येयम् ॥

(१५५) दृतीति । पाशं नेत्रजलम् ॥

(१५६) मिश्रेति । पुव्वेत्यादि । पूर्वापरविरुद्धोऽपूर्वं एष विरक्तिमार्गः पूर्वापरै-र्भूतभाविभिर्विरुद्धो विद्विष्ट. सेवनाविषय इति यावत् । विरोधो विद्वेष इत्यमर । अत-एव अपूर्वोऽभिनव. । एष विरक्तिमार्गो विरक्तावस्याचारः । तथाचेदृशाचारो न भूतो न भविष्यतीति भावः ॥

(१५७) राजेति । अविश्रामशब्दरत्नम् ॥

(१५८) प्रजागरादिति । प्रजागरादतिजागरणात् तस्याः प्रियायाः स्वप्नसमागम स्वप्नावस्थायां सङ्गयोग. खिलीभूत संच्छिन्नीभूत. । प्रायेण न भवतीत्यर्थ. । खिलं भवेद्-प्रस्तरे सारसंच्छिन्नभेदयोरिति विश्व. । वाष्पस्तु नेत्रजलाभ्युत्करेण चित्रगतामपि द्रष्टुं न ददाति अतृप्तामिति शेष. । तथाच ततश्चित्रं कर्म स्वप्नसमये दर्शनमपीत्युक्तं विरह-विनोदनमपास्तमिति भावः ॥

(१५९) मिश्रेति । सव्वधेत्यादि । सर्वथा प्रमार्जितं त्वया प्रत्यादेशदुःखं प्रियसख्याः प्रत्यक्षमेव सखीजनस्य । सर्वथा । भृशम् । सखीजनस्य मम प्रत्यक्षं समक्षमेव प्रियसख्या. शकुन्तलायाः प्रत्यादेशदुःखं प्रत्याख्यानजनितदुःखं त्वया प्रमार्जितं क्षालितम् ॥

मिश्र ॥ अहो धीरमपि जनं रसो विकारयति । (१४९)

विदू ॥ प्रकाशम् ॥ भो चित्तं खु एदं । (१५०)

राजा ॥ कथं चित्तम् । (१५१)

मिश्र ॥ अहमपि दानिं अवगदत्था किं पुण जधाचिन्तिदाणुसारी एसो । (१५२)

राजा ॥ किमिदमनुष्ठितं पौरोभाग्यम् । (१५३)

दर्शनसुखमनुभवत साक्षादिव तन्मयेन हृदयेन ।
स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता कान्ता ॥ (१५४)

---

(१४९) मिश्रेति । अहो इत्यादि । अहो धीरमपि जनं रसो विकारयति । रसः प्रमाणविप्रलम्भाख्य शृङ्गार । विकारयति अन्यथयति । मिश्रकेश्या अपीदानीं भ्रमरे तात्त्विकत्वयद्विरस्येव पतङ्गस्य तथापसारणे राज्ञ प्रयासाधिक्यदर्शनात्त् एवमुक्त्यत इति बोध्यम् । अत्राङ्क । विप्रलम्भोय सम्भोग इत्येष द्विविधो मत । यत्र तु रति प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ । स च पूर्वरागमानप्रवासकरुणात्मकयत्नधा स्यादिति । तथा । प्रवासो भिन्नदेशत्व कार्य्योच्छापाच्च सम्भ्रमादिति च ॥

(१५०) विदू इति । प्रकाश श्रव्यम् । भो इत्यादि । भोचित्तं खल्विदम् ।

(१५१) राजेति । सुगमम् ॥

(१५२) मिश्रेति । अहम्भोत्यादि ॥ अहमपीदानीमवगताथों कि पुनरयथा चिन्तितानुसार्येष । अहमपि इदानीमधना अवगतो विदितोऽथ चिन्तितभङ्गरूप वस्तु यया सा तथोक्ता । अहमपि अधना भङ्गस्य चिन्तामवगच्छामि इत प्राक नवायि तात्त्विकत्वयद्विरासीदिति भाव । यथा चिन्तित अनुसरतीति यथाचिन्तितानुसारी सात्काल्किकभङ्गादिक मनसा यथा चिन्तयति तदनुसारेणानुशयीति स्वभम । एष राजा पुन कि कि वक्तव्य । तदेकान्तखिन्नावधात् तत्तुभ्यमो न वक्तव्यता जनयतीति भाव ।

(१५३) राजेति । पौरोभाग्यं दोषैकदर्शित्वम् । येन कर्म्मणामनुष्ठितेन केवल दोषएव जायते न कश्चित् गुणस्तन्मात्रप्रियत्वनित्यथः । दोषैकदृक पुरोभागीत्यमर ॥

(१५४) दर्शनेति । तन्मयेन तन्मात्रविषयकेण हृदयेन मनसा साक्षात् प्रत्यक्षत इव दर्शनसुख प्रियाया इति यथ । अनुभवतो मे मम स्मृतिकारिणा परिमोषकारिणा त्वया

इति वाष्पं विसृजति ॥ (१५५)

मिश्र ॥ पुव्वापरविरुद्धो अपुव्वो एसो विरच्छिमग्गो । (१५६)

राजा ॥ वयस्य कथमेवमविश्रामं दुःखमनुभवामि । (१५७)

प्रजागरात् खिलीभूतस्तस्याः स्वप्नसमागमः ।
वाष्पस्तु न ददात्येना द्रष्टुं चिरगतामपि ॥ (१५८)

मिश्र ॥ सव्वधा पमज्जिदं तए मच्चादेसदुक्खं पिअसहीए पच्चक्खं ज्जेव सहीजणस्स । (१५९)

कान्ता अकुन्तला पुनरपि चित्रीकृता अनुभवपथादचित्रमयी स्थिता चित्रमयी जाता। आर्येयम् ॥

(१५५) इतीति । वाष्पं नेत्रजलम् ॥

(१५६) मिश्रेति । पुव्वेत्यादि । पूर्वापरविरुद्धोऽपूर्वं एव विरच्छिमार्गं पूर्वापरै र्भूतभाविभिर्विरुद्धो विद्विष्ट सेवनाविषय इति यावत् । विरोधो विद्वेष इत्यमर । अत-एव अपूर्वोऽभिनव । एष विरच्छिमार्गो विरङ्कावस्थाधार । तयाधेयाधारो न भूतो न भविष्यतीति भाव ॥

(१५७) राजेति । अविश्रामम्अनारतम् ॥

(१५८) प्रजागरादिति । प्रजागरादतिजागरत्वात् तस्या प्रियायाः स्वप्नसमागम स्वप्नावस्थायां सङ्गयोग खिलीभूत सच्छिद्रीभूत । प्रायेण न भवतीत्यर्थः । खिल अवट-प्रकृते धारसच्छिद्रभेदयोरिति विश्व । वाष्पस्तु नेत्रजलम्पुनरेना चिरगतामपि द्रष्टुं न ददाति अङ्कायमिति शेष । तथाच ततश्चित्रं कर्म स्वपनसमये दर्शनमपीत्युक्तं चिरवि-नोदनमपास्तमिति भाव ॥

(१५९) मिश्रेति । सव्वेत्यादि । सर्वथा प्रमार्ज्जितं त्वया प्रत्यादेशदुःखं प्रियसख्याः प्रत्यक्षमेव सखीजनस्य । सर्व्वथा । अवश्यम् । सखीजनस्य मम प्रत्यक्ष समक्षमेव प्रियसख्या अकुन्तलाया. प्रत्यादेशदुःख प्रत्याख्यानजनितदुःखं त्वया प्रमार्ज्जितं क्षालितम् ॥

चतुरिका ॥ प्रविश्य ॥ जेदु जेदु भट्टा वत्तिआकरण्डअं गेण्हिअ इदो अच्च पत्थिदम्हि । (१६०)

राजा ॥ ततः किम् । (१६१)

चेटी ॥ तं मे हत्थादो पिङ्गलिआवेदिआए देवीए वसुमदीए अहं ज्जेअ अज्जउत्तस्स उवणेहि त्ति भणिअ सवलक्कारं गहीदं । (१६२)

विदू ॥ तुमं कधं विमुक्का । (१६३)

चेटी ॥ जाव देवीए लदाविडवलग्गं उत्तरीअञ्चलं पिङ्गलिआ मोएदि ताव णिच्चुविदो मए अप्पा । (१६४)

---

(१६०) चतुरिकेति । चतुरिका वर्त्तिकानयनाय नियुक्तपूर्व्वा चेटी । जेदु इत्यादि । जयति जयति भर्त्ता वर्त्तिकाकरण्डं गृहीत्वा इतोऽहं प्रस्थितास्मि । वर्त्तिकाकरण्डं वर्त्तिकास्थापनोपयोगिगंधादिलेपेटकम् । करण्डोगंधादिलेपेटके मञ्जूषायाम् इति यादवः ।

(१६१) राजेति सुगमम् ॥

(१६२) चेटीति । तमित्यादि । तन्मे हस्तात् पिङ्गलिकावेदितया देव्या वसुमत्या अहमेवार्य्यपुत्रस्य उपनेष्यामीति भणित्वा सवलात्कारं गृहीतम् । ततो वर्त्तिकाकरण्डं कर्म । पिङ्गलिका अपरा चेटी तया वेदितया चित्रकर्म्मणे वर्त्तिकाकरण्डकं भर्त्तारमियं नयतीति निवेदितया । गृहीतं हस्तादिति सम्बन्धः ॥

(१६३) विदूषक इति । तुममित्यादि । त्व कथं विसृष्टा । विसृष्टा देव्येति-शेषः ॥

(१६४) चेटीति । जावेत्यादि । यावद्देव्या लताविटपलग्नोत्तरीयाञ्चलं पिङ्गलिका मोचयति तावच्चिच्छुतो मयात्मा । लताविटपो लताविटपो लताविस्तारः । विस्तारो विटपोऽस्त्रियामित्यमरः । तत्र लग्नम् । उत्तरीयस्य अर्द्धप्रावरणस्य

राजा ॥ वयस्य उपस्थिता देवी वर्द्धमानगर्विता च तद्भवानिमा प्रतिकृतिं रचतु । (१६५)

विदू ॥ अत्ताणम्मि किंत्ति ण भणासि । (१६६)

चित्रफलकमादायोत्थाय च ॥ जइ भवं अन्तेउरकूडागुरादो मुच्चिस्सदि तदो मं मेघच्छण्णपासादे सद्दाविस्सदि एदञ्च तहिं गोवाएमि जहिं पारावदं उक्खिच्च अण्णो कोवि ण पेक्खिस्सदि ।

इति द्रुतपद निष्क्रान्त ॥ (१६७)

घञ्चलमन्तम् । क्लीवेऽञ्चलञ्च वस्त्रान्त इति यादवः । मिङ्खिका मोचयतीति द्वयोरेवानयकाथो दर्शित । निह्नुतोऽपवर्पित गोपायित इति यावत् । निह्नव पुंसि निह्नतावविश्वासापलापयोरिति मेदिनी ॥

(१६५) राजेति । वर्द्धमानगर्विता वर्द्धमानेनातिसम्मानेन गर्विता सदर्पा ।

(१६६) विदू इति । अत्ताणमित्यादि । आत्मानमपि किमिति न भणसि । आत्मानमिति रचेति शेष । तथाचात्मानमपि रच्च इति किं कथ न भणसीत्यर्थ । देवीसमागतावात्मरक्षापि न सुकरा तत्र युक्त ममात्मख्यातुमिति भाव ।

(१६७) चित्रेति । जइ इत्यादि । यदि भवानन्त पुरकूटागुरादो मोच्यते तदा मां मेघच्छन्नप्रासादे यन्त्रायिष्यते एदञ्च तत्र गोपायामि यत्र पारावत सुक्ष्मत्वा अन्य कोपि न प्रेक्षिष्यते । अन्त पुर देवी तैव कूटागुरा यन्त्रमय-मृगबन्धनोपाय तस्या मोच्यते खय युक्ति गमिष्यति । कर्मकर्तरि प्रयोगोयम् । कूटं यन्त्रेऽन्तते रामाभिति विश्व । आगुरा मृगबन्धिनीत्यमर । एतेन राजनि मृगत्व व्यङ्गम् । मेघच्छन्नप्रासादे केवच्छन्नाख्यदिगवलोकनप्रासादे । गन्धायि-ष्यते आमन्त्रयिष्यते । इद चित्रफलक । पारावतमिति तस्य पारावता यथोप-विष्यन्तीति भावः । द्रुतपद द्रुत वेगवत्पद पादविक्षेपस्य यस्य तत् तथोक्तम । क्रियाविशेषणम् ॥

मिश्र ॥ अहो अन्यसंक्रान्तहृदयोपि प्रथमसम्भावनं रक्षति स्थिरसौहृदस्तावदेष । (१६८)

प्रविश्य पत्रहस्त. प्रतीहारी ॥ जेदु जेदु देवो । (१६९)

राजा ॥ वेत्रवति न खल्वन्तरे त्वया दृष्टा देवी । (१७०)

प्रती ॥ देव दिट्ठा मत्तइत्थ मं पेक्खिअ पडिणिउत्ता । (१७१)

राजा ॥ कार्यव्ग्रा देवी कार्योपरोधं मे परिहरति । (१७२)

प्रती ॥ देव अमच्चो विण्णवेदि अज्ज रज्जकज्जस्स बहुलदाए एक्कं ज्जेव मए पोरकज्जं पच्चवेक्खिदं तं देवो मत्तारोविदं पच्चक्खीकरेदु त्ति । (१७३)

---

(१६८) मिश्रेति । अहो इत्यादि । अहो अन्यसंक्रान्तहृदयोपि प्रथमसम्भावनं रक्षति स्थिरसौहृदस्तावदेष । अन्यसंक्रान्तहृदय अन्यत्रासक्तचित्तः । प्रथमसम्भावनं प्रथमकृतबहुमानम । स्थिरसौहृद अविचलितप्रेमा ॥

(१६९) प्रविश्येति । जयतीत्यादि । जयति जयति देव ॥

(१७०) राजेति । खलु प्रश्ने । अन्तरे पथिमध्ये त्वया किं देवी न दृष्टा ॥

(१७१) प्रतीति । देवेत्यादि । देव दृष्टा मत्तइत्थं मा मेक्ष्य प्रतिनिष्क्रान्ता । मा मत्तस्तुपगच्छतीति शेष । प्रतिनिष्क्रान्ता प्रतिगता ॥

(१७२) राजेति । कार्यव्ग्रा कार्यगौरवात् । कार्योपरोधं कार्यविघ्नं । परिहरति न जनयति ॥

(१७३) प्रतीति । देवेत्यादि । देव अमात्यो विज्ञापयति अद्य राज्यकार्यस्य बहुलतया एकमेव मया पौरकार्यं प्रत्यवेक्षितं तदेव पत्रारोपितं प्रत्यक्षीकरोत्विति । पौरकार्यराज्यकार्ययोर्न्यूनाधिक्याभ्यां विभागेन प्रत्यवेक्षणीयत्वादाह अद्येति । पत्रारोपितं लिखितम् । प्रत्यक्षीकरोतु अवधारयतु । इति विज्ञापयति ॥

राजा ॥ दूतः पत्रं दर्शय । (१७४)

प्रतीहारी ॥ उपनयति । (१७५)

राजा ॥ वाचयति ॥ विदितमस्तु देवपादानां धनवृद्धिर्नाम वणिक् वारिपथोपजीवी नौव्यसनेन विपन्नः, स चानपत्यः, तस्य चानेककोटिसङ्ख्यं वसु, तदिदानीं राजस्वतामापद्यते, इति श्रुत्वा देवः प्रमाण मिति । (१७६)

---

(१७४) राजेति सुगमम् ॥

(१७५) प्रतीति । उपनयति पत्रमुपस्थापयति ॥

(१७६) राजेति । वाचयति पठति । तदेवाह विदितमित्यादि । देवपादानामित्यत्र पादशब्दः सम्मानातिरेकं सूचयति । कालुकषड्डेति वर्त्तमानकालेन कर्त्तरि षञ्ची । वणिक् पथ्याजीव । वाणिजो वणिक् । पथ्याजीव इत्यमरः । वारिणः पन्था वारिपथो नदीमार्गः । पथ्यप्र इत्य० । तेन जीवति वाणिज्येन वर्त्तत इति वारिपथोपजीवी । नौव्यसनेन नावो व्यसनेन विपदा मज्जनेनेति यावत् । व्यसनं विपदि भंगे इत्यमरः । विपन्नो मृतः । न पतति वंशो येन जातेनेत्यपत्यं सकुल्यपर्य्यन्तः । अनपत्यः सकुल्यपर्य्यन्तरहितः । अनेका कोट्य० सङ्ख्या यस्य तदनेककोटिसंख्यम् । वसु धनं अक्षीति शेष० । रिक्थम्हृक्थं धनं वसित्यमरः । तत् धनम् । राजस्वतां राजस्वामिकतामु । आपद्यते आप्नोति यस्मात् अनन्तर० सपिण्डाद्यस्तस्य तस्य धनं भवेत् । तदभावे सकुल्य० स्यादाचार्य शिष्यएव वा । सर्व्वेषामप्यभावेतु ब्राह्मणाः क्रियभागिनः । त्रैविद्या० शुचयो दान्ता एवं धर्म्मो न क्षीयते । अतोऽर्थं ब्राह्मणधनं राज्ञा नित्यमिति स्थिति । इतरेषान्तु वर्णानां सर्व्वाभावे हरेन्नृप इति मनुवचने शूद्रतयाचार्य्यशिष्ययोरसम्भवेन त्रैविद्यब्राह्मणाधिकारस्यैव ब्राह्मणधनगोचरत्वस्य पारिशेषिकत्वेन तद्धने राज्ञोऽधिकारः प्रतीयत इति भावः । देवो राजा प्रमाणं कर्त्तव्यतानिश्चयकृत् । प्रमाणं हेतुमर्य्यादाधारस्तेयत्तामप्रमाणेऽमित्यमरः । भवतीति शेष० । इति देवपादानां विदितमस्तिति योजना ॥

सविषादम् ॥ कष्टं खल्वपत्यता, वेतवति महाधनतया वङ्गपत्नी-केनानेन भवितव्यं तदन्विष्यता यदि काचिदापन्नसत्त्वास्य भार्या स्यात् । (१७)

प्रती ॥ दाणिं ज्जेव साकेदउरस्स सेट्ठिणो दुहिदा णिव्वुत्त-पुंसवणा तस्स जाआ सुणीयदि । (१८)

---

(१७) सविषादमिति । सखेदमित्यर्थः । कष्टं दुःखहेतुः । महाधनतया वङ्गधनतया । वङ्गः पत्नीको यस्य स तेन वङ्गपत्नीकेन । हतः क इति क. । भवितव्यमिति भावे तव्यः । आपन्नसत्त्वा गर्भिणी । आपन्नसत्त्वास्यादुगुर्विण्यन्तर्वत्नी च गर्भिण्योत्यमरः । नन्वस्यधारितपत्नीकङ्गादोपि स्वयं गर्भमन्विष्यति तस्य-तयैव स्वाधिकारशासनाया निरसनीयत्वात् । यदाह हरदत्तः । यस्य मोपरता भार्य्या देहार्द्धं तस्य जीवति । जीवत्यर्द्धशरीरे स्वं कथमन्यः समाप्नुयात् । सकुल्यैर्विद्यमानैस्तु पितृमातृसमाभिधैः । व्यपुत्रस्य प्रमीतस्य पत्नीतद्भागहारि-णीति । तथा । तत्पिण्डा बान्धवा वा ये तस्याः परिमन्थिनः । हिंस्युर्धनानि तान्राजा चौरदण्डेन शासयेदिति । अत्र सधार्यते । राजान्ताधिकारिदुष्टत्वाया अनुना पत्न्यधिकारो नाल्पभावित. यतो हरदत्तादिसम्मतमपि मनुविरुद्धं तदन्त-र्भावमनङ्गीकृत्य तात्कालिकं वर्णयति ऋषिः कृतयुगे मन्वनुमतधर्म्मेष्वेव धर्म्मसाधन-त्वात् सदाह परामरः । त्रेतायां तु मानवो धर्म्मस्तेतायां गौतमः स्मृतः । द्वापरे शङ्खलिखितः कलौ पाराशरः स्मृत इति । अतश्च तदानीन्तनाधिकारे नारदः । अन्यत्र ब्राह्मणात् किन्तु राजा धर्म्मपरायणः । तत् स्त्रीणां जीवनं दद्यादेष दायविधिः स्मृत इति ॥

(१८) प्रतीति । दाणिमित्यादि । इदानीमेव साकेतपुरस्य श्रेष्ठिनो दुहिता निर्वृत्तपुंसवना तस्य जाया श्रूयते । इदानीमेव श्रूयत इत्यन्वयः । श्रेष्ठिनः कुबेरदत्तस्येत्यर्थः । कुत्रचित्तु प्रथमो श्रेष्ठी कुलश्रेष्ठिनि विख्यातोति अष्टाधरः । निवृत्तं समाप्तं पुंसवनं द्वितीयसंस्कारो यस्याः सा निवृत्तपुंसवना । पुंसवनसंस्कारेण गर्भोपघातकृतो पुंसः धनं यस्मात् पुरेति बाहुवल्लोक्त षष्ठ्यै

राजा ॥ स खलु गर्भः पितरमेवमसात्यं ब्रूहि । (१७९)

प्रती ॥ जं देवो आणवेदि । इति प्रस्थिता । (१८०)

राजा ॥ एहि तावत् । (१८१)

प्रती ॥ प्रतिनिवृत्य ॥ एसाम्हि । (१८२)

राजा ॥ किमनेन सन्ततिरस्ति नास्तीति । (१८३)

येन येन विधुज्यन्ते प्रजाः स्निग्धेन बन्धुना ।
स स पापाद्दते तासां दुष्यन्त इति घुष्यताम् ॥ (१८४)

स्यन्दते तत इत्युक्तस्यन्दनमात्रमूर्ध्वत्वेन क्षतोपमाव्यवच्छेदायोपदेशादसंभवितगर्भत्व दर्शितम अथवा पुंसवनसंस्कारेण गर्भस्य पुत्रीकरणश्रुतेरिदमुक्तम ॥

(१७९) राजेति । स खलु स एव । पितरं पितृत्व चागत पितृरिदम्वा । पितृ षष्ठ्या अद्दो वे दति क्षतोरेफ । रेतोऽनिरस्येत्युक्ते मांद्यघो इति । कर्कृयं धनम् । अर्हति अधिकरोति । तथाच गौतम । उत्पत्तैवार्थे स्वामित्वाच्छमेतेति ॥

(१८०) प्रतीति । जमित्यादि । यद्देव आज्ञापयति ॥

(१८१) राजेति । एहीति पुनरागमनायादेशोयम् ॥

(१८२) प्रतीति । प्रतिनिवृत्य पुनरेत्य । एसाम्हि एषास्मि ॥

(१८३) राजेति । सन्ततिरस्तिनास्तीत्यनेन किं प्रयोजनमितिशेष । तथाच गर्भोत्पत्तिका सन्ततिरस्तीति तस्या एवास्मिन्नधिकारो न राज्ञ सन्तेरसद्भावे तु राज्ञ एवाधिकार स्यादित्येव प्रचारेणाऽऽनिति भाव ॥

(१८४) तत् किं कार्यमित्यत आह येनेति । प्रजा जना येन येन स्निग्धेन स्नेहवता । स्निग्ध स्नेहयुते चिक्कणेपि स्यादिति मेदिनी । बन्धुना स्वजनेन पित्रादिनेति यावत् । बन्धुस्वजना समा इत्यमर० । वियुज्यन्ते विरह्यन्ते पापात् कृते पाप विना यजति पाप इत्यर्थ । तासां प्रजानां स स बन्धुरुक्तल-क्षणो घुष्यता उच्चैरुच्यताम् । घुषि शब्दार्थोयंधातु शब्दे इति कविकल्पद्रुम । विशब्द

प्रती ॥ एदं णाम घोसइदव्वं । इति निष्क्रम्य पुनः प्रविश्य । (१८५)

देव काले पविट्ठं विअ अहिणन्दिदं देवस्स सासणं महा-
जणेण । (१८६)

राजा ॥ दीर्घमुष्णञ्च निश्वस्य ॥ एवं भोः सन्ततिविच्छेदनिरवलम्बना
मूलपुरुषावसाने सम्पदः परमुपतिष्ठन्ते समाप्यन्ते पुरुवंश्यश्रिय
एष वृत्तान्तः । (१८७)

प्रती ॥ पडिच्छदं अमङ्गलं । (१८८)

इच्छैः शब्दः । घुभ्योर्ञिर्नेति विकल्पाच्चञिः । घोष्यतामित्यपि क्वचित्पाठः ।
एतेनैतद्भक्ष्यति यत् स्थितायामप्यस्यसन्ततावर्थजातमधुना मदायत्तमेव यथान्यः
कोपि तन्नापहरेदिति । तथाच मनुः । बान्धवदायादिक रिक्थं तावद्राजानुपाश्नु-
येत् । यावत् स स्यात्समाद्दत्तो यावच्चातीतशैशव इति ॥

(१८५) प्रतीति । एदमित्यादि । एतच्चाम घोषयितव्यम् । नाम स्वीकारे ।
नामप्राकाश्यसम्भाव्यक्रोधोपगमकुत्सने इत्यमरः ॥

(१८६) देवेत्यादि । देव काले प्रविष्टमिवाभिनन्दितं देवस्य शासनं महाजनेन ।
काले यथाकालम् । प्रविष्टं वर्षाख्यम् । अभिनन्दितं समादृतम् । शासनमाज्ञा ।
महाजनेन साधुवर्गेण ॥

(१८७) राजेति । मूलपुरुषस्य धनिनो वयसाने निधने सम्पदोऽर्थाद्याः
सन्ततेरपत्यस्य विच्छेदात् वंशाभावात् निरवलम्बना वत्साभिकाः सत्यः परमित्यं
यथा धनमूलैरेवरक्षितास्तत्सम्पदो राजानमुपस्थायन्तीत्यतस्तथा इत्यर्थः । परमन्य-
मुपतिष्ठन्ते उपगच्छन्ति । वयसि नाशे । वयोनाशोक्षयो मृत्युरित्यमरः । पुरुवंश-
श्रियः पुरुवंशसम्पदः । वयः सम्पदि सम्पत्तिः श्रीश्च कक्षीवेत्यमरः । प्रकाराः
प्रकारः । प्रकाराः स्यात् प्रकारणे प्रकारे कारणाकारणेत्योरित्यमरः ॥

(१८८) प्रतीति । पडिच्छदं अमङ्गलं प्रतिषिद्धममङ्गलम् । प्रतिषिद्धं भवता
प्राप्तप्रतिघातमस्तिमेवः ॥

राजा ॥ धिङ्मामुपनतश्रेयोऽवमानिनम् । (१८९)

मिश्र ॥ असंसअं पिअसहीं ज्जेव हिअए कदुअ निन्दिदो अप्पेण अप्पा । (१९०)

राजा ॥

संरोपितेऽप्यात्मनि धर्मपत्नी
त्यक्ता मया नाम कुलप्रतिष्ठा ।
२६ कल्पिष्यमाणा महते फलाय
वसुन्धरा काल इवोप्तबीजा ॥ (१९१)

मिश्र ॥ अपरिच्चत्ता दाणिं दे भविस्सदि । (१९२)

चेटी ॥ जनान्तिकम् ॥ अज्जे एदं पत्तं पेसअन्तेण किं विचारिदं अमच्चेण पेक्ख दाव भट्टिणो बाहजलप्पवाहो संवुत्तो अधवा ण

---

(१८९) राजेति । उपनतसुपगतं श्रेयो मङ्गलं यस्यास्यकुन्तलारूपमित्यर्थः । अवमन्यते यस्तं मा धिक् । श्रेयो धर्मेमङ्गलेचेति विश्व० ॥

(१९०) मिश्रेति । असअमित्यादि । असअं प्रियसखीमेव हृदये कृत्वा निन्दितोऽनेनात्मा । हृदये कृत्वा अभिसन्धाय स्मृत्वा वा । अनेन राज्ञा ॥

(१९१) राजेति । संरोपितेपीति । काले यथाकालमुप्तबीजा कृतबीजवपना अतएव महते विपुलाय फलाय यशाय कल्पिष्यमाणा भविष्यन्ती वसुन्धरा भूमिरिव कुलस्य प्रतिष्ठा गौरवं स्थितिर्वा यत्त० सा तथोक्ता धर्मपत्नी धर्मतः परिणीता पत्नी आत्मनि स्वस्मिन् संरोपितेपि गर्भभावेन तस्यामाहितेपि सति । आत्मावै जायते पुत्र इति श्रुते० । मया नाम त्यक्ता । नाम कुत्सने । अत्रोपमालङ्कारः । वृत्तमुपजातिः ॥

(१९२) मिश्रेति । अपरीत्यादि । अपरित्यक्तेदानीं ते भविष्यति । पुनर्संधास्यते त्वयेति भावः ॥

एसो सोअ बुद्धिपुव्वअं पडिवज्जिस्सदि ता मेहच्छसागारट्ठिदं णिव्वाणसमत्थं अज्जमाहव्वं गेल्हिअ आअच्छ । (१८३)

प्रती ॥ सुट्ठु दे भणिदं । इति निष्क्रान्ता । (१८४)

राजा ॥ अहो दुष्मन्तस्य संश्रयमारूढा. पिण्डभाजः । कुत । (१८५)

अस्मात् परं वत यथाश्रुतिसंहितानि
को नः कुले निवपनानि करिष्यतीति ।
नूनं प्रसूतिविकलेन मया प्रसिक्तं
धौताश्रुसेकसुदकं पितरः पिवन्ति ॥ (१८६)

---

(१८३) चेटीति । अज्जेत्यादि । आर्ये एतत् पत्रं प्रेषयता किं विचारितमस्माभिर्न प्रेक्षस्व तावत् भर्तुर्बाष्पजलप्रवाहः सहसा नेत्रं शोकं बुद्धिपूर्वकं परित्यक्ष्यति तन्मेघच्छन्नागारस्थित निर्व्वाणसमर्थमार्य्यमाधाय गृहीत्वा आगच्छ । आर्ये इति प्रतीहार्य्या आमन्त्रणम् । किं निन्दायाम् । किं क्षुद्रायां वितर्के चेति मेदिनी । बाष्पजलप्रवाहोऽस्तुप्रदत्ति । प्रवाहस्तु प्रदत्तौ स्यादपि स्रोतसि वारिण इति मेदनी । अथवेति । अथशब्दोऽनन्तरार्थं वाचन्द्य सप्तम्ये तथाच अनन्तरञ्चेत्यर्थं । बुद्धिपूर्व्वकमात्मविवेचनया । परित्यक्ष्यति निराकरिष्यति । निर्व्वाणसमर्थं शोकनिर्व्वाणक्षमम् ॥

(१८४) प्रतीति । सुट्ठु इत्यादि । सुष्ठु त्वया भणितम् ॥

(१८५) राजेति । अहो इति शोके विषादेवा । अहोधिगर्थं शोकेष कष्टार्थविषादयोरिति मेदिनी । दुष्मन्तस्य पिण्ड भक्षने क्षेत्रे इति पिण्डभाज पितर । दाङ्गजति क्षिप । अथय मेतत्मत्मर्थं पिण्डो क्षयक्षुते न गति उन्देहमारूढाः म म्रा । तद्दर्शयति कुत इति ॥

(१८६) अस्मादिति । वत खेदे अस्मादुर्ध्वान्तरं शोकार्त कुले यथाश्रुति यथाविधि संहितानि चतुसंहितानि निवपनानि पिण्डोदकदानानि । विस्तरेण

मिश्र ॥ हद्धी हद्धी सदि क्खु दीवे ववधाणदोवेण अन्धआरं अणुहोदि राएसी । (१६७)

चेटी ॥ भट्टा अलं सन्दाविदेण वच्चलो ज्जेव पहु अवरासु देवीसु अणुरूवपुत्तजम्मेण पुव्वपुरुसाणं अणिणो भविस्सदि । (१६८)

आत्मगतम् ॥ ण मे वअणं पडिच्छदि अणुरूवं वि ओसधं आदङ्कं णिअत्तेदि । (१६९)

निषाप स्वादित्यमर । क करिष्यति इति एवं चिन्तयित्वा पितरो मम पूर्वजा प्रसूतिविकलेन तनयरहितेन । प्रसूति स्वनयोत्पत्त्योस्तथा दुहितरिस्वतेति विश्व । मया प्रक्षिप्तं स्वकमुदकं तर्पणजलं नूनं निश्चित धौत क्षालितोऽस्रुसेको वाष्पबिन्दुर्येन, तत् यथास्यात्तथा पिबन्ति । अधरपतितो नयनविगलिताश्रुबिन्दु र्येनोदकपानेन क्षालितो भवति तादृशं पिबतीत्यर्थ । उदकविशेषणत्वे तथाभूतं कृत्वा पिबतीत्यर्थ । वसन्ततिलकं वृत्तम् ॥

(१६७) हिअयेति । हद्धीत्यादि । हा धिक् हा धिक्सति खलु दोषे व्यवधानदोषे-णान्धकारमनुभवति, राजर्षिं । एतेनैतदुक्तम्भवति यत् सत्यप्यात्मजे स्थानान्तरगतत्वेन अनपत्यता मन्यते भट्टाराज इति ॥

(१६८) चेटीति । भट्टेत्यादि । भर्तरलं सन्तापितेन कथ स्वयम प्रभुरपरासु देवीषु अनुरूपपुत्रजन्मना पूर्वपुरुषाणामन्धणो भविष्यति । सन्तापितेन सन्तप्तीकृतेन आत्मनेति शेष । कथ स्योयुक्त । कथ स्यात्करणो युक्तमित्यर्थ । प्रभुभवानित्यथ । अपरासु अकु-लजेतरासु । देवीषु कृताभिषेकमहिषीष । अनुरूपपुत्रजन्मना आत्मसदृशपुत्रोत्पत्त्या । पूर्वपुरुषाणा पितृणाम् । अन्धण ऋणशून्य । तदाह यङ्खिखितपटीनखियमा । यत्र कचन जातेन पिता पुत्रेण नन्दति । तेन चान्धणता याति पितृणा पिण्डदेन चैकति । विष्णुधर्मोत्तरश्च । आद्येन प्रजयाचैव पितृणामन्धणोभवदिति ॥

(१६९) आत्मगतमिति । अन्तरितस्वमित्यर्थं । णेत्यादि । न मे वचन प्रतीच्छति । अनुरूपमपि औषधमातङ्कं निवर्त्तयति । प्रतीच्छति गृह्णाति ।

राजा ॥ मोक्षमाटितकेन । (२००)

आमूलशुद्धसन्तति कुलमेतत् पौरवं प्रजायन्येत्र ।
मय्यस्तमितमनार्य्ये देव दृश्य सरस्वतीस्रोतः ॥ (२०१)

इति मोहमुपागतः ॥ (२०२)

अपिरत्र सम्भावनायाम् । तथाच सम्भावयामि अत्युत्कटपुण्यमौषधमातङ्कं रोगं निवर्त्तयति निराकरोतीत्यर्थः । रुक्तापयद्धाख्यातङ्क इत्यमरः । अत्रायमाशयः । अयोग्यतया मद्वचनं न प्रतीष्टं माधव्यवचनन्तु मत्तंयुपयुक्तं सम्भावयामि तत्खलुत्वेन सन्तापं शमयितु मलमिति ॥

(२००) राजेति । मोक्षनाटितकेन मोक्षरूपपथ्यया ॥

(२०१) आमूलेति । प्रजायन्येत्र सन्ततिरक्षिते देशपक्षे जनशून्ये पर्वतारण्यादिभागे इति यावत् । प्रजा स्यात्सन्ततौ जने इत्यमरः । अतएव अनार्य्ये अप्रयत्ने पक्षे अगम्ये । सङ्गिगत्यागित्यस्य रूपम् । मयि आमूलमादितः शुद्धा अविच्छिन्ना सन्ततिः पुत्रपौत्रादिपरम्परा पक्षे धारा यस्य तत् । सन्ततिः षड्क्तौ गोत्रे पारम्पर्य्ये पुत्रपौत्रायामिति मेदिनी । पौरवं पुरुसम्बन्धि पक्षे भूयिष्ठमेव । प्रभूतं पुरुभूयिष्ठमित्यमरः । स्वार्थे ष्णः । एतत्कुलं तथाभूते देशे तथाभूतं सरस्वत्या नद्या स्रोत इव अस्तमदर्शनं मितं गतम् । अस्तमदर्शनं इत्यमरः । अत्रालङ्कार उपमा सा च पूर्णा श्रौती च । तद्धर्म्म दर्शने । साम्यं वाच्यमनेधर्म्मं वाक्यैक्ये उपमा द्वयोः । सा पूर्णा यदि सामान्यधर्म्मो धोयस्यचिच्च । उपमेयञ्चोपमानं भवेद्वाच्यमियं पुनः । श्रौती यथेवशब्दा दृषार्थे यत्र वा तिरिति । आर्य्या जातिः ॥

(२०२) इतीति । मोहं मूर्च्छाम् । मूर्च्छा तु करणन मोह इत्यमरः । एतेनोपान्त्यदया वर्णिता । चरमदयायास्तु प्रत्युज्जीवनसम्भावनानन्तरेयावर्णनीयत्वाच्चाटके प्रविवेशात्र इतएव विरहवर्णनानिवृत्तिः । तद्धक्षम् । चक्षूरागस्तदनु मनसः सङ्कल्पभावना च व्यावृत्तिः स्यात्तदनु विषयव्यापारचेष्टोपि । निद्राच्छेदस्तदनु तनुता निष्प्रभत्वं ततोऽनुन्मादो मूर्च्छा तदनु मरणं स्युर्दशा प्रक्रमेणेति । अपरञ्च । रसविच्छेदहेतुत्वान्मरणं नैव वर्ण्यते । जानप्रायन्तु तद्वाच्यं चेतसा काङ्क्षितं तथा । वर्ण्येतेपि यदि प्रत्युज्जीवनं स्यादूरत इति ॥

चेटी ॥ सम्भ्रमम् ॥ समस्सस दु समस्सस दु भट्टा । (२०३)

मिश्र ॥ किं दाणिं ज्जेव णिव्वुदं करेमि अधवा सुदं मए सउन्तलं समस्सासन्तीए देवजणणीए सुहादो जण्णभाअसमुक्कआओ देवाओ ज्जेव तह अणुचिट्ठिस्सन्ति जह सो भट्टा अइरेण धम्मपदिणीं तुमं अहिणन्दिस्सदि त्ति ता ण जुत्तं मे एत्थ विलम्बिदुं जाव इमिणा वुत्तन्तेण पियसहीं सउन्तलं समस्सासेमि ।

इत्युद्भ्रान्तकेन निष्क्रान्ता । (२०४)

नेपथ्ये ॥ भो अव्वहणं अव्वहणं (२०५)

राजा ॥ प्रत्यागतचेतनः स्वयं दृष्ट्वा ॥ अये माधव्यस्येवार्क्षनादः । (२०६)

चेटी ॥ सो ण्हु माधव्वो तवस्सी पिङ्गलिआमिस्सिआहिं चेडिआहिं चित्तफलअहत्थो पाविदो भवे । (२०७)

---

(२०३) चेटीति । सम्भ्रमं सत्वरम् । समेत्यादि । समाश्वसितु समाश्वसितु भर्त्ता ॥

(२०४) मिश्रेति । किमित्यादि । किमिदानीमेव निर्वृतं करोमि अथवा श्रुतं मया यत्कुलपतिः समाश्वासयन्त्या देवजनन्या सुखात् यज्ञभागसमुत्सुकाः देवा एव तथा अनुष्ठास्यन्ति यथा स भर्त्ता अचिरेण धर्मपत्नीं त्वामभिनन्दिष्यतीति तत्र युक्तं मे अत्र विलम्बितुं यावदनेन वृत्तान्तेन प्रियसखीं शकुन्तलां समाश्वासयामि । निर्वृतं सुखम् । करोमि शकुन्तलावृत्तान्तनिवेदनेनेति शेषः । देवजनन्या अदितेः । यज्ञभागाय समुत्सुकाः समुत्कण्ठिताः । एतेन सत्यराजके मयूखले स्वभोग्ययज्ञभागलोपाशङ्कया तदनुष्ठानसम्भावना दर्शयति । अभिनन्दिष्यति आदरिष्यते । अनेन यावदुद्भ्रान्तं ... मय । उद्भ्रान्तकेन चाकाशपथोद्गमनाभिनयन ॥

(२०५) नेपथ्य इति । भो इत्यादि । भो अवध्नावध्नम् । अवधमवध्नमित्यर्थः । अवध्नावध्नमवधीत्यमरः ॥

(२०६) राजेति । प्रत्यागतचेतनः पुनरागतचेतनः निर्गतमोहः इत्यर्थः । अये इति सम्भ्रमे । आक्रन्दाद् आपद्यपद् ॥

(२०७) चेटीति । सोऽहमित्यादि । स नाम माधव्यनपस्वी पिङ्गलिकाभिश्रमालि-

राजा ॥ चतुरिके गच्छ मद्वचनादनिषिद्धपरिजना देवी-सुपालभस्व । (२०८)

चेटी ॥ निष्क्रान्ता । २०९)

नेपथ्ये ॥ भूयः स एव शब्द । (२१०)

राजा ॥ परमार्थतो भीतिभिन्नस्वरो ब्राह्मण । कः कोऽत्र भोः । (२११)

प्रविश्य कञ्चुकी ॥ आज्ञापयतु देवः । (२१२)

राजा ॥ निरूप्यतां किमेवं माधव्यब्राह्मणः क्रन्दतीति । (२१३)

कञ्चु ॥ यावदवलोकयामि । इति निष्क्रम्य सवेगम् पुन प्रविष्ट । (२१४)

राजा ॥ माव्यतायन न खलु किञ्चिदत्याहितम् । (२१५)

चेटिकाभिश्चित्रफलकहस्त प्राप्तो भवत् । नाम सम्भावनायाम् । तपस्वी अनुकम्प्यः । पिङ्गलिकाभिश्चिताभि पिङ्गलिकाभिश्चिताभि ॥

(२०८) राजेति । मद्वचनात् राजा यतीत्यनुषं । अनिषिद्धा विप्रपीडनरूपादकार्य-करणादनिवारिता परिजना यया सा तथोक्ता देवीसुपालभस्व क एष ते आचार इति उपालभ्य पद । उपालभ आक्षेपपूर्वक य स्तुतिपूर्वक । सोऽनुष्ठन सनिन्दस्तु यस्तत्र परिभाषणमिति जटाधर ॥

(२०९) चेटीति । सुगमम् ॥

(२१०) नेपथ्य इति । भूय पुन स एव शब्द आक्षेपयमाक्षेपयमितिशब्दः ॥

(२११) राजेति । परमार्थतो वस्तुत । भीतिभिन्न भीत्या पृथग्विध स्वरो यस्य स तथोक्त । ब्राह्मणो माधव्य । भोः कष्ट क क अस्तीति शेषः ॥

(२१२) प्रविश्येति । सुगमम् ॥

(२१३) राजेति । निरूप्यतां निर्णीयताम् । किं कथम् । एवं क्रन्दतीति सम्बन्ध ॥

(२१४) कञ्चुरिति । यावत् यङ्कवति ॥

(२१५) राजेति । खलु मन्ये । अत्याहितं महाभयम् । अत्याहित महाभीति-रित्यमरः ॥

कञ्चु ॥ नैवम् । (२१६)

राजा ॥ ततः श्रुतोऽयं वेमयु । तथाहि (२१७)

प्रागेव जरसा कम्रः सविधेषस्तु सम्प्रति ।

*आविष्करोति सर्वाङ्गमश्वत्थमिव मारुतः ॥ (२१८)

कञ्चु ॥ परित्रायतां सुहृदं महाराजः । (२१९)

राजा ॥ कस्मात् परित्रातव्यः । (२२०)

कञ्चु ॥ मरुतः कक्षात् । (२२१)

राजा ॥ अये भिन्नार्थमभिधीयताम् । (२२२)

कञ्चु ॥ योऽसौ दिगवलोकनप्रासादो मेघच्छन्नो नाम । (२२३)

---

(२१६) कञ्च इति । नैवं न किञ्चिन्मरुद्भयमित्यर्थः ॥

(२१७) राजेति । ततो महाभीत्यभावात् । अयं सातिशय । वेमय कम्र । तथा दर्शयितुमाह तथाहीति ॥

(२१८) प्रागिति । जरसा वार्द्धक्येन । जरस जरेति जरायब्दस्य जरसादेश । प्रागेव कृत पूर्वमेव कम्रोऽवयवस्सन्दो जात इतिशेष । सम्प्रति अधना तु सविशेष सातिशय सन् मारुत प्रबलो वायुरश्वत्थं महावृक्षमिव सर्वाङ्गमाविष्करोति प्रकाशते अश्वत्थमिति सर्वाङ्गमितिच देशाध्वकालभाव वाटैरित्यधिकरणस्य कर्मत्व मारुतोऽश्वत्थ कृत कम्र. सञ्जयिष्यते प्रकाशत इत्यर्थ । कर्मविवक्षया धातोर्व्यापारपरत्वानङ्गीकारे चाकर्मकत्वात् । यथोक्तं विक्लित्तिर्विक्लेदना च पचेर्यं करोतेच निष्पत्तिनिष्पादनाच आदौ तण्डुल पचतीत्यादीति । अत्रैवोक्तम् । धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् । प्रसिद्धेरविवक्षात कर्मणोऽकर्मिकाः क्रिया इति । अत्रोपमालङ्कार ॥

(२१९) कञ्च इति । परित्रायतां परिरक्षतु । सुहृद माधव्यम् ॥

(२२०) राजेति । सुगमम् ॥

(२२१) कञ्च इति । कक्षात् कक्षात् । सात्कृष्टं कक्षाभोगमित्यमरः ॥

(२२२) राजेति । भिन्नार्थं सदर्थम् । क्रियाविशेषणम् ॥

(२२३) कञ्च इति । दिगवलोकनाय प्रासादो दिगवलोकनप्रासादः ॥

राजा ॥ विन्तय । (२२४)

कञ्चु ॥

तस्याग्रभागाद्गटहनीलकण्ठै-
रनेकविश्रामविकङ्कटाग्रः ।
त्वया प्रकाशेतरमूर्त्तिना ते
केनापि सत्त्वेन निगृह्य नीतः ॥ (२२५)

राजा ॥ सहसोत्थाय ॥ आः ममापि सत्त्वैरभिभूयन्ते गृहाः ।

अथवा बद्धप्रत्यवायं नृपत्वम् । (२२६)

अहन्यहन्यात्मन एव तावत्
ज्ञातुं प्रमादस्खलितं न शक्यम् ।
प्रजासु कः केन पथा प्रयाती-
त्यधोपतः कस्य पुनः प्रभुत्वम् ॥ (२२७)

---

(२२४) राजेति । तत्र किं किं वृत्तम् ॥

(२२५) कञ्चु इति । तस्येति । गटहनीलकण्ठै पाण्डिलमयूरैः । मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुगित्यमरः । अनेकविश्रामैरुत्तरोत्तरभागेषु अनेकधो विश्रामै-र्विकङ्कटप्रभासाद्यं गहनं शिखरं यस्य तस्मात् त्वयुक्तादिति यावत् । गहनं प्रभुत्वे शिखरे इति मेदिनी । तस्य मेघच्छटागारस्याग्रभागात् उपर्यवस्थानात् प्रकाशेतरमूर्त्तिना विद्याविशेषप्रच्छन्नशरीरेण केनापि सत्त्वेन पिशाचादिना । सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोरिति विश्वः । तव सखा साध्यो निगृह्य पराभूय नीतः स्थानान्तरं प्रापितः । वृत्तमुपजातिनाम ॥

(२२६) राजेति । आः कोपे । ममापि सततसदनुष्ठानपरस्यापि । अभिभूयन्ते आक्रम्यन्ते । गृहा इति पुंलिङ्गबहुवचनान्तः । गृहः पुंसि च भूम्न्रि वेत्यमरः । बद्धप्रत्यवायाः विहितानुष्ठानजनितादृष्टविशेषा यस्य स तत् बद्धप्रत्यवायम् ॥

(२२७) अहन्यहनीति । अहन्यहनि प्रत्यहमात्मन एव प्रमादेनानवधानतया स्खलितं विधेयक्रमलङ्घनं ज्ञातुं निर्णेतुं न शक्यं प्रजासु विषयवासिजनेषु पुनः को जनः केन

नेपथ्ये ॥ अभिधावेहि भो अभिधावेहि । (२२८)

राजा ॥ आकर्ण्यं गतिभेदं रूपयन् ॥ सखे न भेतव्यं न भेतव्यम् ।(२२९)

नेपथ्ये ॥ भो कधं ण भाइस्सं एसो मं कोवि पच्चामोडिअ सिरो-धरं भक्खुं विअ भग्गत्थिं करिदुमिच्छदि । (२३०)

राजा ॥ सदृष्टिक्षेपम् ॥ धनुर्धनुः । (२३१)

प्रविश्य धनुर्हस्ता प्रतीहारी ॥ जअदु जअदु भट्टा एदं सअरं सराअणं कत्थावारअोअ । (२३२)

राजा ॥ सखे धनुराधत्ते । (२३३)

पथा वर्त्मना प्रयाति गच्छति क किमाचरसीत्यर्थं । अथेयत आकल्येन इति ज्ञातुं निरूपयितुं कस्य प्रभुत्व यस्मि कस्यापि नेत्यर्थं । तथाच प्रजाहितादृष्यवैधाचरणा-च्चृपस्याधर्मभागित्वम् । यथाह मनु । सप्ततो धर्मषडभागो राज्ञो भवति रक्षत । अधर्मादपि षडभागो भवत्यस्य ह्यरक्षतदति । इत्तसुपलाति ॥

(२२८) नेपथ्य इति । अबीत्यादि । अभिधाव भो अभिधाव । अभिधाव यतोरभि सद्ध धात ॥

(२२९) राजेति । गतिभेदं धावनम् ॥

(२३०) नेपथ्य इति । भो इत्यादि । भोः कथ न भेष्यामि एष मा कोपि प्रत्यामोद्य शिरोधरामिवुमिव भग्नास्थि कर्तुमिच्छति । एष कोपि अनिर्णीत । शिरोधरां ग्रीवां प्रत्यानोद्य पश्चादुन्नमयित्वा रुन्धुमिव मा भग्नास्थि खण्डित कर्तुमिच्छति । ग्रीवायां शिरोधि कन्धरेत्यमरोत्यमर ॥

(२३१) राजेति । सदृष्टिक्षेपं धनुरर्थं दृष्टि निक्षिप्य । धनुर्धनु त्वरया धनुरान-येत्यर्थं ॥

(२३२) प्रविश्येति । जअदु इत्यादि । जयति जयति भर्त्ता एतत्सअर शराश्रमं स्कन्धावारकञ्च । स्कन्ध भाण्डिभाचार्यति ज्याबंधोन्नायन इति स्कन्धावारक ॥

(२३३) राजेति । सखगम् ॥

नेपथ्ये ॥

एष त्वामभिनवकण्ठशोणिताशी
शार्दूलः पशुमिव हन्मि चेष्टमानम् ।
आर्त्तानां शरणकृतां भवत्विदानीं
दुष्यन्तस्तव शरणं भवत्विदानीम् ॥ (२२४)

राजा ॥ सक्रोधम् ॥ कथं मामेवोद्दियति । आ सिष्ट तिष्ठ कौण-
पापसद त्वमिदानीं न भवसि । (२२५)

चापमारोप्य ॥ पार्श्वतायन सोपानमार्गमादेशय । (२२६)

कञ्चु ॥ इतो इतो देवः । (२२७)

सर्वे उत्तरतोपसर्पन्ति । (२२८)

---

(२२४) नेपथ्य इति । एष इति । अभिनवमधुनैव नि सारितं कण्ठशोणितं कण्ठ-
रुधिरमश्नातीति तथोक्त एवेदृशं शार्दूलो व्याघ्र पशुमिव चेष्टमानं पलायितुं यतमान-
त्वां हन्मि । शार्दूलद्विपिनो व्याघ्रे इत्यमरः । आर्त्तानामापन्नाना भयमपनेतुं निराकर्तुं
आर्त्तं रटन्तं धनुर्धन्वया येन स दुष्मन्त इदानीं तव शरणं रक्षिता भवतु । धनु पचेपि,
धनुरोऽन् प्रायोशात्तु नाऽन्तीति वक्तव्यात् ङन् । धनुश्चापो धन्वयरासनकोदण्डकार्मुक-
मित्यमरः । प्रहर्षिणी नाम छत्तमेतत् । तदुक्तम् । आद्यस्त्रेत्रितयमथाष्टमं नवान्त्यं
चोपान्त्यं गुरुविरतौ सभाषिते स्यात् । विश्रामो भवति महेयनेत्रदिग्भिर्विप्रेया नतु
सुदति प्रहर्षिणी सेयमिति ॥

मात ॥ आयुष्मन् । (२४५)

कृताः शरव्यं हरिणा तवासुराः
शरासनं तेन विधीयतामिदम् ।
प्रसादसौम्यानि सता सुहृज्जने
पतन्ति चक्षूंषि न दारुणाः शरा. ॥ (२४६)

राजा ॥ ससम्भ्रममुत्थाय परिक्रामन् ॥ अये मातलिः स्वागतं देवराजसारथेः । (२४७)

विदू ॥ भो मणस्सि इमिणा अहं मग्गुमारणं मारिदु पाविदो भवं खणु दूमं चाचदेण अहिणन्दहि । (२४८)

मात ॥ सस्मितम् ॥ आयुष्मन् श्रूयताम् यदर्थमस्मि हरिणा भवत्सकाशं प्रेषितः । (२४९)

---

(२४५) मात इति । आयुष्मन् आयु प्रशस्तमस्यास्तीति ॥

(२४६) कृता इति । हरिणा इन्द्रेण । यमानिलेन्दुचन्द्रार्कविष्णुशिखिवसवाश्विरुद्रकपिभेकेषु हरि नौ कपिले त्रिषित्यमरः । असुरासव शरव्यं शरमोघलक्ष्यं कृता । लक्ष्म यच्च शरव्यञ्चेत्यमरः । एकेनैव शरघातेन निर्जितानामसुराणां विनाशं प्रतिपादयितुं शरव्यमित्येकत्व क्लीवत्वञ्च निरूपयन् ततश्च एको ह्यत्र पक्षपातोऽस्तीतिवत् कृता इति बहुत्वम् । यतोऽस्मत् । प्रकृतेर्विकृतेर्व्यापि यतोऽत्व द्वयोरपि । यादृक प्रकृते सत्यां - रूपज्ञाति विकृतेर्नंविधि । इदं शरासनं धनुरेवाक्षुरेण विशेषसामान्यलक्षणया न मयीति भाव । यत सुहृज्जने मित्रजने सता प्रशस्तपुरुषाणां प्रसादेन प्रसन्नतया सौम्यानि सुन्दराणि । सौम्यन्तु सुन्दरे सोमदैवत इत्यमरः । चक्षूंषि पतन्ति दारुणा भीषणाः शराः न पतन्ति । अयमनुरन्यासोऽलङ्कारः । तमस्यधिक उक्तम् ॥

राजा ॥ अवहितोऽस्मि । (२५०)

मात ॥ अस्ति कालनेमिप्रसूतिर्दुर्जयो नाम दानवगणः । (२५१)

राजा ॥ अस्ति श्रुतपूर्वो मया नारदात् (२५२)

मात ॥

सखुस्ते स किल शतक्रतोरवध-
स्तस्य त्वं रणशिरसि स्नुषो निहन्ता ।
उच्छेत्तुं प्रभवति यत्र सप्तसप्ति-
स्तत्रैश्यं तिमिरमपाकरोति चन्द्रः ॥ (२५३)

स भवानात्तयज्ञ एवेदानीं देवरथमारुह्य विजयाय प्रतिष्ठताम् । (२५४)

---

(२५०) राजेति । अवहितः कृतावधानः ॥

(२५१) मातेति । कालनेमेरसुरविशेषस्य प्रसूतिः सन्ततिः । दुःखेन जीयत इति दुर्जयः । दंषदु-सोरिति यत् ॥

(२५२) राजेति । श्रुतं श्रवणमभूत् पूर्वमितःप्राक् यस्य स श्रुतपूर्वः । श्रुतमिति भावेऽतीते क्तः । एकदातूभयप्राप्तौ कर्मण्येव न कर्तरीति नियमात् यस्येति सत्कर्मण्येव षष्ठी न भवेति कर्तरि ॥

(२५३) मातेति । सख्युरिति । स किल दानवगणस्ते तव शतक्रतोरिन्द्रस्य यतं क्रतवोऽश्वमेधा यस्य स तस्य इन्द्रस्य । ऐन्द्रपदकाम्य-मतात्रमेधेन यजेतेति श्रुतेः । अवघो वधानर्हः रणशिरसि समरमूर्धनि तस्य दानवगणस्य त्वं निहन्ता कृतः इन्तृतया कृतकर्म यत्रेति योगः । तथाहि सप्त सप्तयोऽश्वा यस्य स सप्तसप्तिः सप्ताश्वयुक्तनः सूर्य इति यावत् । यास्किगणाश्चर्वगस्यर्क्षयस्तैश्वयशप्तम इत्यमरः । नैशं निशा सम्बन्धि यत् तिमिरमन्धकारम् न प्रभवति न यत्नोति । चन्द्रस्तदपाकरोति निराकरोति । अत्र दृष्टान्तोऽर्थान्तरः । प्रहर्षिणी नाम वृत्तम् ॥

(२५४) स इति । स भवान् सत्या कृतो भवान् । आत्तयज्ञः गृहीतास्त्रः । देवरथं व्योमयानम् । प्रतिष्ठस्व गच्छ । प्रतिज्ञानिर्णयप्रकाशे संमध्यगाङ्गस्य इत्यात्मनेपदम् ॥

राजा ॥ अनुगृहीतोऽस्मि अनया मधवतः सम्भावनया । अथ माधव्यं प्रति भवता किमेवं प्रयुक्तम् । (२५५)

माढ ॥ वञ्चितम् ॥ तदपि कथ्यते किञ्चिन्निमित्तादपि मनःसन्ता-पादायुष्मान् मया विप्लुतो दृष्टः पश्चात् कोपयितुमायुष्मन्तं तथा कृतवानस्मि । कुतः (२५६)

ज्वलति चलितेन्धनोऽग्नि र्विप्रकृतः पन्नगः फणां कुरुते ।

तेजस्वी संक्षोभात्प्रायः प्रतिपद्यते तेजः ॥ (२५७)

राजा ॥ युक्तमनुष्ठितं भवद्भिः । (२५८)

विदूषकं प्रति ॥ वयस्य अनतिक्रमणीया दिवसतेराज्ञा तन्मच्छ रणिगतार्थं कृत्वा मद्वचनादमात्यपिशुनं ब्रूहि । (२५९)

---

(२५५) राजेति । सम्भावनया बहुमानेन । अथः प्रश्ने । अनन्तरारब्धग्रन्थ-कारस्यैंप्यधो अथ इत्यमरः । किं कथम् । प्रयुक्तं कृतम् ॥

(२५६) मातेति । कथ्यते मयेति शेषः । किञ्चित् किमपि निमित्तं हेतुर्यस्य स तस्मात् मनःसन्तापात् मनस्तापात् । विप्लुतः अस्वभावस्थः । तथा कृतवानू माधव्यमतीति शेषः ॥

(२५७) ज्वलतीति । चलितानि स्पन्दितानि इन्धनानि दग्धानि यस्य सः । इन्धन-स्येध दग्धमेधः समित् स्त्रियामित्यमरः । चलितेति पन्नगतो मिश्रत्वे इतिकविकल्प-द्वयोक्तस्य अन्तस्य रूपम् । मिश्रात् हस्वः । भङ्गिर्ज्वलति निर्वाणप्रायोपीति शेषः । विप्रकृतस्ताडितः सन् पन्नगः सर्पः फणां कुरुते सुस्थोपीति शेषः । एवं संक्षोभादुत्ते-जनात् तेजस्वी पुमानू प्रायस्तेजः प्रतिपद्यते प्राप्नोति । अतस्तथाकृतवानस्मीतियोगः । तेजस्तु वह्नौ दीप्तिः पन्नगपुरुषयोस्तु प्रभावः । तेजः प्रभावे दीप्तौ चेत्यमरः । अत्र तेजः-प्रतिपत्तिरूपैककियायाः पृथक् पृथक् निर्देशात् प्रतिवस्तूपमालङ्कारः यदुक्तं दर्पणे । प्रति-वस्तूपमा तु स्याद्वाक्ययोर्गम्यसाम्ययोः । एकोपि धर्मः सामान्यो यत्र निर्दिश्यते पृथगिति । आर्येयम् ॥

(२५८) राजेति । युक्तमुचितम् । अनुष्ठितं कृतम् ॥

(२५९) विदूषकमिति । अनतिक्रमणीया अनपह्नवनीया । दिवसतेरिन्द्रस्य । परिगतः परिष्वक्तोऽर्थो येन स तम् । अमात्यपिशुनमित्यस्य विशेषणम् । अर्थं परिणामेत्यर्थः ।

त्वन्मतिः केवला तावत् प्रतिपालयतु प्रजाः ।
अधिज्यमिदमन्यस्मिन् कर्मणि व्याप्तं धनुः ॥ (२६०)
विदू ॥ जं भवं आणवेदि । इति निष्क्रान्तः । (२६१)
माल ॥ आयुष्मान् रथमारोहतु । (२६२)
राजा ॥ तथा करोति । (२६३)

इति निष्क्रान्ताः सर्वे । षष्ठोऽङ्कः । (२६४)

---

(२६०) रक्षितव्यमाह त्वदिति । राजमन्त्रिणोर्धनुर्मौर्व्योः प्रजापालकत्वादाह केवला सहायनिरपेक्षा त्वन्मतिस्तव बुद्धिस्तावत् प्रजाः प्रतिपालयतु अधिज्यं सगुणमिदं मदीयं धनुरन्यस्मिन् कर्मणि व्याप्तमासक्तम् ॥

(२६१) विदू इति । जमित्यादि । यद्भवानाज्ञापयति ॥

(२६२) मातेति । सुगमम् ॥

(२६३) राजेति । सुगमम् ॥

(२६४) इतीति । इति एवं उक्ते सतीत्यर्थः ॥

इति श्रीलक्ष्मणसूरिविरचितायामभिज्ञानशाकुन्तलटीकायाम्

प्रवेशिकाख्यायां षष्ठोऽङ्कविवरणम् ॥

अभिज्ञानशाकुन्तलम् ।

सप्तमोऽङ्कः ।

ततः प्रविश्याकाशयानेन रथारूढो राजा मातलिश्च । (१)

राजा ॥ मातले अनुष्ठितनिर्देश्योऽपि भवतः सत्क्रियाविशेषा-दनुपयुक्तमिवात्मानं समर्थये । (२)

मातलिः ॥ अमितम् ॥ आयुष्मन्नुभयतोऽप्यसन्तोषमवगच्छ ।

कुतः (३)

उपकृत्य हरेस्तथा भवान् लघु सत्कारमवेक्ष्य मन्यते ।
गणयत्यवदानसम्मिता भवतः सोऽपि न सत्क्रियामिमाम् ॥ (४)

---

(१) तत इति । आकाशयानेन आकाशयानेन । रथारूढो व्योमयानारूढः ॥

(२) राजेति । अनुष्ठितः पालितो निर्देश्य आज्ञा येन सः । प्रेष्यादेयनिर्देश्या नियोग्य आज्ञप्तव्येति धनञ्जयः । भवतो महेन्द्रस्य । सत्क्रियाविशेषात् सुमाजाति-शयात् आत्मानमनुपयुक्तं तथाभूतसत्कारानुपयुक्तं समर्थये अवधारयामि ॥

(३) मातलिरिति । उभयत्र नमति शक्रे च । असन्तोषमसन्तोषम् । एकत्र सत्कारानुरूपोपकाराकरणावधारणात् अपरत्र उपकारानुरूपसत्काराकरणावधारणादिति भावः । तदवगमयितुं हेतुं स्थापयति कुत इति ॥

(४) उपेति । भवान् हरेरिन्द्रस्य तथा अवध्यासुरवधात्मकमतिमहत् उपकृत्य अमोघं साधयित्वा सत्कारं महेन्द्रविहितसन्मानमवेक्ष्य आलोक्य लघु अल्पं मन्यते महदुपकारमपीति शेषः । । स हरिरपि दमागमनवेलावसरलतां भवतः सत्क्रियां अवदानस्य

राजा ॥ मातलेः मा मैवं स खलु मनोरथानामपि दूरवर्त्ती यो विसर्ज्जनावसरे सत्कारः । मम हि दिवौकसां समक्षमर्द्धासनोपवेशिनस्य । (५)

अन्तर्गतप्रार्थनमन्तिकस्थं
जयन्तमुद्दीप्य दृतस्मितेन ।
आघट्टवक्षोपरिचन्दनाङ्का
मन्दारमाला हरिणा पिनद्धा ॥ (६)

मात ॥ किमिव नायुष्मानमरेश्वरादर्हति । पश्य (७)

सुखपरस्य हरेरुभयैः कृतं
त्रिदिवमुद्भृतदानवकण्टकम् ।

अवलूनतकर्म्मण० धम्मिलां परिमिलामतुरूपमिति यावत् न गणयति न बध्नते । अवदान कर्म्मेति चामरः । एतद्वृत्तं सुन्दरीनाम । तदुक्तम् अयुजोर्यदि षो जगौ समे भभराजो यदि सुन्दरी तदेति ॥

(५) राजेति । विसर्ज्जनस्य अवसरे अवकाशे य० सत्कार० कृत इति शेषः । स खलु सत्कारो मनोरथानामभिलाषाणामपि दूरवर्त्ती अविषय० अनभिलषितपूर्व्वं इत्यर्थः । हि यस्मात् दिवौकसां देवानां समक्ष प्रत्यक्षमर्द्धासने आसनार्द्धे उपवेशितस्य मम मन्दारमाला हरिणा पिनद्धेति श्लोकीयेन योग ॥

(६) अन्तर्गतेति । अन्तिकस्थं समीपस्थं जयन्तं निजतनयम् । जयन्त पाकशासनिरित्यमरः । अन्तर्गता मनोगता प्रार्थना मातृअभिलाषो यस्य स तथाभूतमुद्दीप्य निश्चित्य कृतस्मितेन कृतमृदुहासेन हरिणा भगवता आघट्टस्य स्पृष्टस्य वक्षो हरिचन्दनस्य उरसि विन्यस्य सुरलोकसुलभचन्दनविशेषस्य अङ्कचिह्नं यस्यां सा तथोक्ता मन्दारमाला मम सम्बन्धे पिनद्धा परिधापिता । हरिचन्दनन्तु दिव्यं स्निग्धं तदिहदुर्लभं मनुजै रिति राजनिर्घण्टे । इत्तमिदमुपजातिनाम ॥

(७) मातेति । अमरेश्वरादिन्द्रात् । किमिव कथमायुष्मान् नार्हति नाधिकरोति मन्दारमालामिति शेष ॥

तव शरररघुना नतपर्व्वभिः
पुरुषकेशरिणश्च पुरा नखैः ॥ (८)

राजा ॥ तत् खलु शतक्रतोरेव महिमा । पश्य (९)

सिध्यन्ति कर्म्मसु महत्स्वपि यन्नियोज्याः
सम्भावनागुणमवेहि तमीश्वराणाम् ।
किं प्राभविष्यदरुणस्तमसां वधाय
तच्चेत् सहस्रकिरणो धुरि नाकरिष्यत् ॥ (१०)

---

(८) तवेति । अधुना इदानीं नतानि परिणतानि पर्व्वाणि ग्रन्थयो येषां नखपक्षे तु नतानि कुञ्चितानि पर्व्वाणि अङ्गुलिपर्व्वाणि यैस्ते तथोक्तैः । अस्मिंस्तु कुञ्चितं नतमित्यमरः । तव शरैर्बाणैः । द्रुलंयदानवगणदलनादिति भावः । पुरा पूर्व्वस्मिन् पुरुषकेशरिणो नृसिंहस्य नतपर्व्वभिर्नखैश्च । हिरण्यकशिपोर्विदारणादिति भावः । इत्युभयैः कर्त्तृभिः सुखपरस्य सुखपरायणस्य सुरेन्द्रस्य त्रिदिवं स्वर्गम् उद्धतमपधारिणं दानवरूपं कण्टकं यस्मात् तत् तथाभूतं कृतम् । अतः कथमायुष्मानमरेश्वराचरितं दानवरूपं कण्टकं यस्मात् तत् तथाभूतं कृतम् । अतः कथमायुष्मानमरेश्वराचरितं हन्तीति । इदं द्रुतविलम्बितं नाम वृत्तम् ॥

(९) राजेति । शतक्रतोरिन्द्रस्य । महिमा गौरवम् ॥

(१०) सिध्यन्तीति । नियोज्याः किङ्कराः । नियोज्यकिङ्करप्रैष्यशुश्रूष्यपरिचारका इत्यमरः । महत्सु दुष्करेष्वपि कर्म्मसु यत् सिध्यन्ति । कार्य्याय भवन्ति तं ईश्वराणां प्रभूणां सम्भावनाया बहुमानस्य गुणमुत्कर्षमवेहि अवगच्छ । अरुणः काश्यपिस्तमसां तिमिराणां वधाय नाशाय किं प्राभविष्यत् प्रभुरभविष्यत् वेत् यदि सहस्रं किरणा यस्य स दिवाकरत्वमरुणं धुरि यानसुखे न अकरिष्यत् । धूः स्त्री क्लीबे यानसुखमित्यमरः । उभयत्र भवार्थे सम्भवे योति धी । अत्र परार्द्धगतविशेषार्थेन पूर्व्वार्द्धगतः सामान्योर्थः समर्थ्यते तस्मादर्थान्तरन्यासोऽलङ्कारः स चात्र वैधर्म्म्येण । तदुक्तम् । सामान्यं वा विशेषेण विशेषस्तेन वा यदि । कार्य्यञ्च कारणेनेदं कार्य्येण च समर्थ्यते । साधर्म्म्येणेतरेणार्थान्तरन्यासोऽष्टधा तत्र कृति । वसन्ततिलकं वृत्तम् ॥

मात ॥ सदृशमेवैतत्। (११)

श्लोकमन्तरमणीत्य ॥ आयुष्मन् दूतः पश्य नाकपृष्ठप्रतिष्ठितस्य सौभाग्यमालक्ष्यशसः। (१२)

विच्छित्तिश्लेषैः सुरसुन्दरीणां वर्णैरमी कल्पलतांशुकेषु।
सञ्चिन्त्य गीतिचमर्थबन्धं दिवौकसस्त्वच्चरितं लिखन्ति ॥ (१३)

राजा ॥ मातले बहुरसंप्रहारोत्सुकेन पूर्वेद्युरद्दिवमधिरोहता न लक्षितोऽयं प्रदेशो मया तत्कृतमस्मिन् पथि वर्त्तामहे मरुताम्। (१४)

---

(११) मात इति। एतत् वचनं तव सदृशमुपयुक्तम्। गुरोरेव नम्रीभावौचित्यादिति भावः ॥

(१२) श्लोकमिति। नाकपृष्ठे सुरलोकोपरि प्रतिष्ठितस्य वर्त्तमानस्य। सौभाग्यं समधिकभाग्यवत्त्वम्। स्वर्लोकवासस्य भाग्याधीनत्वादिति भावः। इन्द्रेऽधिकभाग्येन दुर्दिनेतरवासरे तुरीयांशे श्रीमति च सुभग इति यद्वाणवः। आत्मनो यशसः साधुवादस्य। जनोदाहरणं कीर्त्तिं साधुवादं यशो विदुः। वर्णं गुणावलिं ख्यातिमिति धनञ्जयः ॥

(१३) विच्छित्तीति। अमी दिवौकसो देवा गीतौ गाने चमा योग्यता यस्य स तं गानार्हं अर्थं बध्नाति धारयतीति अर्थबन्धं पदोच्चयं गीतमिति यावत्। सञ्चिन्त्य रचयित्वा सुरसुन्दरीणां सुरनारीणां विच्छित्तिश्लेषैरङ्गरागावशिष्टैर्वर्णैः रङ्गैः करणैः। विच्छित्ति रङ्गरागेऽपि हारविच्छेदयोरपीति विश्वः। कल्पलतायाः अंशुकेषु तदुद्भूत-निवसनेषु त्वच्चरितं तव चरित्रं लिखन्ति। वृत्तमुपजातिः ॥

(१४) राजेति। आत्मप्रशंसामन्तरयन्नाह मातले इति। असुराणां संप्रहारेषु युद्धेषु बहुलकेन उद्यमेन सता। सम्प्रहाराभिसम्पातकलिसंस्फोटसंयुगा इत्यमरः। दिवं स्वर्गमधिरोहता आरोहता मया पूर्वेद्युः पूर्वस्मिन्नहनि अयं प्रदेशो न लक्षितो निरीक्षित श्रतृ मरुता मारुतादिसप्तकायूनां कतमस्मिन् कस्मिन् पथि वर्त्मनि वर्त्तामहे वर्त्तमाना भवः। तथाचोक्तम्। आवहः प्रवहश्चैव तथैवानुवहः परः। संवहोविवहश्चैव सप्तमः स्यात् परावहः। तथा परिवहश्चोक्तं वायोर्वै सप्त नेमय इति ॥

मात ॥

त्रिस्रोतसं वहति यो गगनप्रतिष्ठां
ज्योतींषि वर्त्तयति चक्रविभक्तरश्मिः ।
तस्य व्यपेतरजसः प्रवहस्य वायो-
र्मार्गो द्वितीयहरिविक्रमभूत एषः ॥ (१५)

---

(१५) मातेति । त्रिस्रोतसमिति । य. प्रवहोवायुर्गगनप्रतिष्ठा व्योमस्थाम् । प्रतिष्ठा गौरवे स्थितौ । स्थानेच यागनिष्पत्तिचतुरध्वरपद्ययोरिति मेदिनी । त्रिस्रोतसं गङ्गां मन्दाकिनीमिति यावत् । मन्दाकिनी वियद्गङ्गेत्यमरः । वहति धारयति । तथाच वायु-पुराणम् । विभज्यमानसलिला । तैजसेनाग्निनेन सा । मेरोरुत्तरकूटेषु निपपात चतु-र्धेपीति । तैजसेन ज्योतिर्वहेन प्रवहेनेति यावत् । तथा चक्रेण भावर्त्तनेन विभक्ताः सेविता गृहीता इति यावत् रश्मय. प्रभवो इव रश्मय किरणा येन स तथोक्त. सन् ज्योतींषि नक्षत्राणि भचक्रमिति यावत् वर्त्तयति वहति । चक्रञ्चावर्त्तनं भवमित्यने-कार्थध्वनि. । ' ज्योति. प्रकाशे दधि तारकाद्य ज्योतिर्दिनेद्यानलयोरपि स्यादिति विश्व. । रश्मिपदेनाभिधामूलव्यञ्जनया प्रवहोऽपि बोध्यते । तथाच पश्चादिरज्जुबद्धश्येनान् गृहीत्वा ज्योतिषा याडध्विकगतिं व्याहन्ति सुतरामवरबद्धज्योतींषि तस्यावर्त्तनमयात् भूमण्डलं भ्रमन्तीति भाव. । चक्रं हि अनेकार्थेषु मण्डल संयोगादौनिगद्यन्ते । एक-त्रार्थेऽन्यबोधेतुव्यञ्जना साभिधाश्रयेति । किरणप्रभवो रश्मी इत्यमर. । अत्र सूर्य सिद्धान्त. । भचक्रं ध्रुवयोर्नद्धमाक्षिप्तं प्रवहानिलै. । पर्य्येत्यनघ तच्चापि प्रवहक्षा यथाक्रममिति । आक्षिप्तमाकृष्टम् । पर्य्येति भ्रमति । सिद्धान्तशिरोमणौ च । भूमे-र्यद्विद्धयोजनानि भूवायुरभ्राम्बुदविद्युदाद्यम् । तदूर्ध्वगो य. प्रवह. स नित्यं प्रत्यग-तिस्तस्य तु मध्यसंस्था । नक्षत्रकक्षा खचरै. समेता यस्मादतस्तेन समाहृतोयम् । भपञ्जर. खेचरचक्रयुक्तो भ्रमत्यजस्रं प्रवहानिलेनेति । विष्णुपुराणे च । यस्माज्ज्योतींषि वहति प्रवहरूपेण सम्मत इति । व्यपेतानि अपगतानि रजांसि धूलयो यस्मात् स तथो-क्त. । भूवायोरुपरि वर्त्तमानत्वादिति भाव. । रजोयं रजसा सार्द्धं स्त्रीपुम्भगुणधूलि-ष्वित्यजय । तस्य प्रवहस्य तथाम्भोवायो द्वितीयेन हरेर्वामनस्य विक्रमेण पादविक्षे-पेण पूत पवित्र एष मार्ग । तदुक्तं वामनपुराणे । कृत्वा तु रूपं दिविजार्थ कृत्वा

राजा ॥ अतः खलु मे सर्वाह्लादकरणोऽन्तरात्मा प्रसीदति ।(१६)

रथाङ्गमवलोक्य ॥ अहो मेघपदवीमवतीर्णोऽस्मि । (१७)

मात ॥ आयुष्मन् कथमवगम्यते । (१८)

राजा ॥

अयमगविवरेभ्यश्चातकैर्निष्पतद्भि-
र्हरिभिरचिरभासा तेजसा चानुलिप्तैः ।
गतमुपरि घनानां वारिगर्भोदराणां
पिशुनयति रथस्ते शीकरक्लिन्ननेमिः ॥ (१९)

प्रणम्य चर्षीन् प्रयतप्रणेण । अहो महोर्ध्वैः सहिता महार्णवा जहार रत्नाकरपत्तनै-
र्युतान्। ततः सनाकं त्रिदशाधिराजं सोमार्कसञ्चैरभिमण्डितं नभः। देवो द्वितीयेन
ययौ मनोरथेन वेगात् क्रमेण्य देवप्रियलोकमीश्वरः। क्रमक्रतीयो न यदास्य पूरितस्तदानिकोपा-
त्तपृष्ठवस्य। ययौ पुरः सूर्य इवाखिविक्रमो मेरुप्रमाणे न तु विष्टपेऽपीति। वसन्त-
तिलकं वृत्तम् ॥

(१६) राजेति। अतो मन्दाकिनीवाहिरजःशून्यवायुसम्पर्कात्। करणानीन्द्रि-
याणि। बाह्यकरणैश्चक्षुरादिभिरन्तःकरणैर्मनःप्रभृतिभिश्च सहितः सवाह्यान्तःकरणः।
मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरमिति वैदान्तिकाः। करणं साधकतमम् चेत्यगाते-
न्द्रियेष्वपीत्यमरः ॥

(१७) रथाङ्गमिति। अहो अन्ये। मेघपदवीं मेघानां गमनपथम्। प्रवहादयो-
ऽष्टौनमावहापरपर्यायं भूवायुमित्यर्थः। तदाह सिद्धान्तशिरोमणिः। भूमेर्यच्छिद्रादय-
योजनानि भूवायुरब्दाम्बुदविद्युदाद्याम्। तद्बुद्धंगो यः प्रवहः स नित्यं प्रत्यग्गतिरित्यादि ॥

(१८) आयुष्मन्निति। सुगमम् ॥

(१९) राजेति। अयमिति। शीकरैरम्बुकणैः क्लिन्ना आर्द्रा नेमिर्यस्यान्तभागो
यस्य स तथोक्तस्ते तव रथः। आर्द्रं स्वार्द्रं क्लिन्नं क्लिन्नमिति। चक्रं रथाङ्गं तस्यान्तो
नेमिः स्त्री स्यात्परिधिः पुमानिति धामरः। अगविवरेभ्यः शैलरन्ध्रेभ्यो निष्पतद्भिर्निर्गच्छद्भिः।
अगविवरेभ्य इत्यत्र अरविवरेभ्य इति पाठे तु अराणाम नाभिनेमिवेधिनः
अक्षाकालसिकाजादिमवच्छायमविभेद्यावेधा मन्तरान्तरा ये अवकाशास्तान्यरविवराणि

मात ॥ अथवा । क्षणाच्चायुष्मान् स्वाधिकारभूमौ वर्त्तिष्यते । (२०)

राजा ॥ अधोऽवलोक्य ॥ मातलेः वेगादवतरणादाश्चर्यदर्शनः संवृत्तो मनुष्यलोकः । तथाहि (२१)

शैलानामवरोहतीव शिखराद्उन्मज्जतां मेदिनी
पर्णाभ्यन्तरलीनता विजहति स्कन्धोदयात् पादपाः ।
सन्धानं तनुभागनष्टसविताव्यक्त्या व्रजन्त्यापगाः
केनाप्युत्क्षिपतेव मह्य भुवनं मत्पार्श्वमानीयते ॥ (२२)

तेभ्यो निष्पतद्भिर्निगच्छद्भिरित्यर्थः । चक्रधीकरितनीरबिन्दुलोभादिति भावः । चातकैः तथा अचिरभासा तडिता तेजसा दीप्रा अक्षुब्धिन्नैः सम्पूर्णैरंशुभिः स्वाङ्गभिर्यकरणैः वारीणि गर्भे मध्ये यस्य तत् वारिगर्भं तथाभूतमुदरं येषां ते तेषाम् । गर्भो ना भ्रूणे पुनर्भवकरण्डके । कुक्षौ सन्धौ बालके च मध्ये गङ्गोषितस्थले इति शब्दाम्बुधिः । घनानां मेघानामुपरि गतं गमनं पिशुनयति सूचयति । पिशुनो खलसूचकावित्यमरः । इदं मालिनीनाम वृत्तम् ॥

(२०) मातेति । स्वाधिकारभूमौ मर्त्यलोके ॥

(२१) राजेति । अवतरणादधोगमनात् । आश्चर्यं दर्शनं यस्य स आश्चर्यदर्शनः ॥

(२२) शैलानामिति । उन्मज्जतोऽप्युन्नमतां शैलानां गिरीणां शिखरात् शृङ्गात् मेदिनी भूमिरवरोहतीव अवतरतीव । प्राक्शैलानामपि मेदिनीमयत्वयत्व आसीदिति भावः । स्कन्धाना मूलाच्छाखावधिभागानामुदयात् दर्शनात्पादपाः द्रुमाः पर्णानां पत्राणामभ्यन्तरेषु मध्येषु लीनतां प्रविष्टतां विजहति सञ्चन्ति प्राक्पत्राच्छादितत्वदृष्टिरासीदिति बोध्यम् । तथा तनुभागेषु अविस्तृतभागेषु नष्टस्य दूरतया मार्गानुपलक्ष्यस्य सवितुः सवस्य व्यक्त्या क्रमशः सामीप्यात् प्रकाशेन । आपः पत्रायनेपि स्त्रियामनात्पुंस्त्वमेवेति मेदिनी । आपगाः सरितः स्रवन्ती निम्नगापगा इत्यमरः । विद्यादगारमपगामापगामपीति द्विरूपकोषः । सन्धानं संधकुनं योगमिति यावत् मञ्जन्ति प्राप्नुवन्तीव । प्राक्तनुभागेषु सन्धिलादर्शनात् विच्छिन्नप्राया सन्धिता इति भावः । सन्धानं स्यादभिषवे तथा सङ्कुनेपिचेति विश्वः । तथा उत्क्षिप्तमा उन्नयता

वा० । आयुष्मन् साधु दृष्टम् । (२२)

बाढमाकर्णयामि ॥ अहो उदारारमणीया पृथिवी । (२४)

राजा ॥ मातले कतमोऽयं पूर्वापरसमुद्रावगाहः कनकरसनिष्यन्दी
इवान्ध्र इव मेघः सानुमानालोक्यते । (२५)

मात ॥ आयुष्मन् एष खलु हेमकूटो नाम किंपुरुषपर्वतः परं
तपस्विनां चेत्रम् । (२६)

स्वायम्भुवान्मरीचेर्यः प्रजज्ञे प्रजापतिः ।
सुराऽसुरगुरुः सोऽस्मिन् सपत्नीकस्तपस्यति ॥ (२७)

चेऽपि अनेन भुवनं भूयोऽपि पत्नार्धं मन्मथोपमार्जीयत एव पश्य । उत्प्रेक्षा-
लङ्कारोऽयम् । मादृङ्मविष्कीर्त्तितं वचनम् ।

(२२) आयुष्मन्निति । छेदमम् ॥

(२३) बाढमाकर्णयामीति । सादरमित्यर्थः । उदारारमणीया अतिरमणीया ॥

(२५) राजेति । पूर्वापरयोः पूर्वपश्चिमयोः समुद्रयोरवगाहो मग्नः । अतिदीर्घ इति यावत् । कनकरसं सुवर्णद्रवं निष्यन्दयितुं स्रावयितुं शीलं यस्य
स । गुणे रागे द्रवे रस इत्यमरः । सान्द्रः सन्द्राकारोऽयं आरक्षाम इति यावत् ।
मेघ इवायं सानुमान् पर्वतः कतमः पर्वतेषु मध्ये क आलक्ष्यते दृश्यते ॥

(२६) आयुष्मन्निति । हेममयाः कूटाः शृङ्गाणि यस्य स हेमकूटसंज्ञामा । किंपु-
रुषपर्वतः किंपुरुषवर्षपर्वतः । परमतल्लजम् । चेत्रं स्थानम् । पद्मपुराणम् ।
दक्षिणे भारते वर्षे उत्तरे सवणोदधेः । शूकादेव महाभाग तस्य सीमा हिमालयः ।
ततः किंपुरुषं वर्षं हेमकूटादधःस्थितः । हरिवर्षं ततो ज्ञेयं निषधोऽवधिरुच्यते
इति ।

(२७) स्वायम्भुवादिति । स्वयमात्मना भवतीति किप् । स्वयम्भूर्ब्रह्मा तस्मादपत्य-
मिति स्वायम्भुवः । संज्ञापूर्वकत्वेन विधेरनित्यतया नोर्वीप इति अकारस्य
न लोपाट । धोरियुवेति उवङादेशः । तस्मात् ब्रह्मणो मानसपुत्रान्मरीचेर्यः
प्रजापतिः प्रजासर्गकः कश्यपऋषिर्यावत् । सपत्नीको महाभाग कश्यपश्च प्रजा-

राजा ॥ सादरम् ॥ तेन ह्यनतिक्रमणीयानि श्रेयांसि प्रदक्षिणीकृत्य भगवन्तं गन्तुमिच्छामि । (२८)

माल ॥ आयुष्मन् प्रथमः कल्पः । (२९)

अपतरणं नाटयन् ॥ एतावतीर्णौ स्वः । (३०)

राजा ॥ सविस्मयम् ॥ मातले । (३१)

उपोढ़रथ्दा न रथाङ्गनेमयः
प्रवर्त्तमानं न च दृश्यते रजः ।
अभूतलस्पर्शतया निरङ्घ्रति-
स्तवापतीर्णोऽपि न लक्ष्यते रथः ॥ (३२)

पतिरिति पाद्मम् । प्रभुश्च जगतो चराचराणां देवासुराणां गुरुः पिता जगदोकः पत्नीसहितः स प्रजापतिरस्मिन् हेमकूटे तपस्यति तपः करोति । जगत्पत इति जगत्यर्थे कः । तथाच विष्णुपुराणम् । यदासौ नाः प्रजाः सर्ज्जो नाभ्यपद्यन्त वोभतः । ध्यायान्यान् मानसान् पुत्रान् सदृशानात्मनोऽसृजत् । भृगुं पुलस्त्यं पुलहं क्रतुमङ्गिरसं तथा । मरीचिं दक्षमत्रिञ्च वशिष्ठञ्च मानसानिति । महाभारतम् । मरीचेः कश्यपः पुत्रः कश्यपात्तु इमाः प्रजाः । प्रजज्ञिरे महाभागा दक्षकन्याश्चतुर्दशेति ॥

(२८) राजेति । अनतिक्रमणीयानि अनवहेलनीयानि । श्रेयांसि मङ्गलानि । प्रदक्षिणीकृत्येति । दक्षिणो दक्षिणभागगतः । अभिमुखप्रदक्षिणाहिंसनेपि यक्षया भवति स प्रकर्षेण दक्षिणतया प्रदक्षिण उच्यते अतथाभूतं सतथाभूतं कृत्वा दक्षिणावर्त्तेन परिवेष्ट्येत्यर्थः । भगवन्तं मारीचमाश्रमपदम् ॥

(२९) मातेति । प्रथमः कल्पो शुल्यकल्पः ॥

(३०) अवेति । अवतरणं नभसो भूमेः । यंतौ यावामिति शेषः ॥

(३१) राजेति । सविस्मयं रथावतरणगुणविशेषजातविस्मयम् ॥

(३२) गुणविशेषं दर्शयति । उपोढेति । नास्ति भूतले मूढ़ेऽसौ यस्य सतथाभूततया रथस्य व्योमगामितयेत्यर्थः । रथाङ्गस्य चक्रस्य नेमयः प्रान्ताः ।

मात ॥ एतावानेव यतमन्योरायुष्मतश्च रथस्य विशेषः । (२३)

राजा ॥ मातले कतमस्मिन् प्रदेशे मारीचाश्रमः । (२४)

मात ॥ इदेश दर्शयन् ॥ पश्य । (२५)

वल्मीकार्द्धनिमग्नमूर्त्तिरुरगत्वग्वल्कलान्तरः
कण्ठे जीर्णलताप्रतानवलयेनात्यर्थसंपीडितः ।
अंसव्यापि शकुन्ननीडनिचितं बिभ्रज्जटामण्डलं
यत्र स्थाणुरिवाचलो मुनिरसावभ्यर्कबिम्बं स्थितः ॥ (२६)

चक्र रथ इ तयान्तो नेमि स्त्री स्यादित्यमर । उपोढगद्धा जातयद्धा न तया प्रवर्त्तमानस्तत्पतद्रजो धूर्ब्बिश्च न दृश्यते तदुक्तमेवमस्त्रिति भाव । एतच्च विस्मयकरं यत्तव रथोऽतीर्णोऽधुना जातभूयोगोपि न लक्ष्यते क्वातीर्णतया नानुभूयते यतो निरुद्धति वगेनावतरणादपि सद्यदुद्धतिरहित । वयस्यविलं दृत्तम् ॥

(२२) मातेति । यतमन्यो यतक्रतो । मन्युर्दैन्ये क्रतौ क्रुधीत्यमर ॥

(२४) राजेति । कतमस्मिन् एषु स्थानेषु कस्मिन् । मरीचेरपत्य मारीचः । तस्याश्रमो मठ ॥

(२५) मातेति । दर्शयन् श्राश्रम निर्द्दिशन् ॥

(२६) वल्मीकेति । वल्मीके उपिकाकृतमृत्तूपे श्रर्द्धनिमग्ना श्रर्द्धावगढा मूर्त्तिर्यस्य स । तथा उरगस्य भुजङ्गस्य त्वक् निर्म्मोको यत्र तत्वल्कलान्तरमपर यत्रछलं यद्वा यत्तत्कलत्रस्य यस्य स । जीर्णं यज्ञोपवीत ब्रह्मसूत्र द्विजायनीति त्रिकाण्डशेष श्रन्तरमवकाशावधिर्व्यवधानाभ्यन्तर्भेदसादर्थे । छिद्रात्मीयविलावहिरवसरमध्यात्मवद्यमिति मेदिनी । तथा जीर्णस्य परिशुष्कस्य लताप्रतानस्य लताविस्तारस्य वलयेण वेष्टनेन कण्ठे श्रत्यर्थमतिशयेन सम्पीडित तथा श्रंसौ स्कन्धौ व्याप्नोतीति श्रंसव्यापि । श्रर्कं शकुन्तानां पक्षिणा नीडे कुलायं निचित व्याप्तम् । कुलायो नीडमस्त्रीयामित्यमर । जटाना मण्डल बिभ्रत् धारयन् तथा स्थाणु कील इव श्रचलो निष्पन्द । स्थाणु कीले

राजा ॥ विलोक्य ॥ नमोऽस्मै कष्टतपसे । (३७)

माल ॥ संयतप्रपञ्चं दृष्ट्वा ॥ एतावदितिपरिवर्द्धितमन्दार-वृक्षं प्रजापतेराश्रमं प्रविष्टौ स्वः । (३८)

राजा ॥ अहो स्वर्गादिदमधिकतरं निर्वृतिस्थानम् अमृतह्रद-मिवावगाढोऽस्मि । (३९)

माल ॥ रथं स्थापयित्वा ॥ अवतरत्वायुष्मान् । (४०)

राजा ॥ सारथीयं ॥ भवान् किमिदानीम् । (४१)

माल ॥ समयवन्तित एवायमास्ते रथः तद्दयमप्यवत-रामः । (४२)

हरे पुमानिति मेदिनी । अथो सुनिर्यस्य यत्कविम्बं रविमण्डलं अभिव्याप्यो-त्थितत्विषति तस्य मारीचाश्रम इति शेषः । यीशेत्यस्मादविभक्तेभिरित्युदादा-त्तात् विकल्पमयेति द्वितीया । मात्रूक्तविक्रोशितं उक्तम् ॥

(३७) राजेति । विलोक्य उक्तं तपस्विनिशेषमिति शेषः । कष्टमतिदुःखा-वहं तपो यस्य स तस्मै ॥

(३८) मातेति । संयतप्रपञ्चं वशरज्जुकम् । एतावानिति शेषः । अदि-तीति । अदित्या भारीषवहधर्म्मपत्न्या परिवर्द्धितो मन्दारवृक्षो यस्मिन् स तपो-वनम् ॥ प्रजापतेः कश्यपस्य ॥

(३९) राजेति । निर्वृतिस्थानं सुखस्थानम् । निर्वृतिः सुखतायां स्थादनं गमनमोक्षयोरिति विश्वः । अमृतस्य सुधाया ह्रदमगाधजलाशयमवगाढोऽन्तरा-निमग्न इवास्मि ॥

(४०) मातेति । स्थापयित्वा स्थिरीकृत्य ॥

(४१) राजेति । अवतीर्णोऽपि केनचिदनावेदितमार्गो मन्युमयत्वादु-मातरेवमतरप्यायाह भवानित्यादि । अत्र अवतरिष्यतीति शेषोऽन्वयः तत्र यस्मानभङ्गभिदा अटं भकटिम. ॥

(४२) मातेति । सुमदेन बहुगविमेवेष यस्मिन्तः बहोधित एव । यस्मिन् बहोधव इति कविकल्पद्रुम. । अयं रथ आस्ते तिष्ठति न कदाचित् पदमपि

तथा कृत्वा ॥ इत इत आयुष्मन् दृश्यन्तामद्भुतभक्तास्त्वदीया तपोवनभूमयः । (४३)

राजा ॥ ननु विस्मयादुभयमप्यवलोकयामि । (४४)

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चनपद्मरेणुकपिशे पुण्याभिषेकक्रिया ।
ध्यानं रत्नशिलाग्रहेषु विबुधस्त्रीसन्निधौ संयमो
यद्वाञ्छन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी ॥ (४५)

चलतीति भावः । समयः यथाचारसिद्धान्तेषु तथा विधौ । क्रियाकारे च निर्देशे सङ्केते कालभावयो रिति मेदिनी ॥

(४३) तथेति । सुगमम् ॥

(४४) राजेति । ननु भो उभयं तपोवनभूमयस्तव कर्तृभूमयश्चेत्युभयम् ॥

(४५) निरुपाधिकेच्छाविषयत्वेन स्वर्गस्य तप फलत्वादेतदृष्यानस्य तत्प्राप्तीर्दर्शयन् तपोऽनुष्ठाने विस्मयमुपपादयति प्राणानामिति । सन्तो विद्यमाना कल्पवृक्षा यत्तपोमहिम्ना विविधभोगकल्पनक्षमद्रुमा देवतरविशेषा वा यस्मिन् तत् तथोक्ते वने अनिलेन वायुना प्राणाना वृत्ति स्थिति रुचिता अभ्यस्ता । अभ्यस्तेष्वुचितं न्याय्यमिति यावत् । काञ्चनपद्मानां काञ्चनानां पद्मानाञ्च हेमन्तपद्मानां वा रेणुभिः रजोभि- कपिशे पिङ्गले तोये पुण्या धर्म्याय सङ्कल्पिता अभिषेकक्रिया स्नानक्रिया । कङ्कारः कपिश- पिङ्गपिशङ्गो कद्रु पिङ्गलो हरिद्वर । अभिषेक- स्नानमित्यपीति त्रिकाण्डशेषः । अत्र पद्मपुराणम् । विरजस्कङ्क- समकानू दिव्यो मणिमयो गिरि । तस्य पार्श्वे महद्दिव्यं शुभकाञ्चनवालुकम । रत्नं चिन्तुरसो नामेति । रत्नशिलानां मणिमयोपलाना गर्तेषु गुहाकन्दरेषु कङ्कादिभाकृतेषु वा । ध्यानमन्यनिरपेक्षाध्यात्मचिन्तनम् । तदुक्तं विष्णु- पुराणे । मनुष्यलक्षणैरेकपत्नीत्वाद्यनि पृहा । तद्वानं प्रथमैरङ्गैर्यमभिर्नि- गद्यते ॥ इति । विबुधानां देवयोनीनां देवसम्बन्धिनीनां वा स्त्रीणां सन्निधौ सन्निकर्षे सत्यम इन्द्रियनिग्रहं । अन्यत्रान्यदा तपोभिर्यंस्तीव्रैर्यानि यद्यद्वाञ्छन्ति

मात ॥ उत्सर्पिणी खलु महता प्रार्थना । (४३)

परिक्रम्य आकाशे ॥ इन्द्रसाकल्य किंव्यापारः सम्प्रति भगवान् मारीचः । (४७)

आकर्ण्य ॥ किं ब्रवीषि दाक्षायण्या पतिव्रतापुण्यमधिकृत्य दृष्टस्तदर्थे महर्षिपत्नीगणसंहिताये कथयतीति । तत्प्रतिपाल्यावसरः खलु प्रस्तावः । (४८)

राजानमवलोक्य ॥ अस्यामशोकच्छायाया तावदास्तामायुष्मान् यावत्त्वामहमिन्द्रगुरवे निवेदयामि । (४९)

शमयन्ते । अमी तपस्विनस्तस्मिन् स्थाने तपस्यन्ति तप कुर्वन्ति । इतरेषां तपस्विना काङ्क्षनीयभोगेष्वेतेषामनादर इति भाव । अत्र स्वर्गधर्मप्रदर्शनात्तुल्ययोगिताऽलङ्कारः । यदुक्तं कर्त्रर्थानामितरेषाम्वा धर्मैक्यं तुल्ययोगितति । साहित्यविक्रीडिते दृत्तम् ॥

(४६) मात इति । उत्सर्पिणी उत्तरोत्तरमधिकाधिकश्रेयोविषया ॥

(४७) परीति । आकाशे शून्ये अप्रविष्टद्वयाकल्यायामपि रङ्गभूमौ तद्ग्रहेत्यर्थः । एतेन कटमाकाशे दूरादेव सम्भावयमानोदिति रूपयति मत्रेयः । विष्कम्भादिषु दृश्येषु तदाकाशस्यैव सूचकत्वात् । इन्द्रसाकल्य सम्बन्धदाय । किं व्यापार किंकर्मा । मरीचेरपत्य मारीच काश्यप ॥

(४८) आकर्ण्येति । स्मृतिमभिनीयेत्यर्थः । किमिति । किम् "इति मपीपी"-सम्बध । दृष्टस्य आवर्तं दाक्षायणी । गर्गादित्वात् यञ । तया अदित्या तस्याः प्राधान्यात् । पतिव्रतापुण्यं साध्वीना धर्मम् अधिकृत्य विषयीकृत्य । पूर्वः कोऽपि विघ्नादिक । तत्प्रतिपाल्यम् । अस्मं दाक्षायण्यै । उद्देश्यतासामानाधिकरण्यात् चतुर्थी । यद्वा अस्मै कर्मविशेषव्याप्यतत्वादिति यावत् । प्रतिपाल्यः प्रतीक्षणीयोऽवसरोऽवकाशो यस्य प्रस्तावस्य स । प्रस्तावो वस्तुविषयप्रकरः ॥

(४९) राजानमिति । सानुमतमिति शेष । इन्द्रस्य गुरु विना इन्द्रगुरुः तस्मै बार्हस्पत्यायेत्यर्थः । निवेदयामि विज्ञापयामि ॥

राजा ॥ यथा भवान् मन्यते । इति स्थितः ।* (५०)

मातलि र्निष्क्रान्तः ॥ (५१)

राजा ॥ निमित्तं सूचयित्वा । (५२)

मनोरथाय नार्शंसे किं बाहो स्पन्दसे मुधा ।
पूर्वावधीरितश्रेयो दुःखं हि परिवर्त्तते ॥ (५३)

नेपथ्ये ॥ मा खलु चपलतां करेहि जहिं तहिं ज्जेव अत्तणो पडिदिं दंसेसि । (५४)

राजा ॥ कर्णं दत्त्वा ॥ अभूमिरियमविनयस्य तत् को नु खल्वेवं निषिध्यते । (५५)

यद्दान्तुसारेणावलोक्य सविस्मयम् ॥ अये को नु खल्वयमवरुध्यमान-तापसीभ्यामबालत्त्वो बालः । (५६)

---

(५०) राजेति । यथेत्यादि । यथा भवतो मतमित्यर्थः ॥

(५१) मातलिरिति । सुगमम् ॥

(५२) राजेति । निमित्तं शुभशकुनविधेयम् । दक्षिणबाहुस्पन्दनमित्यर्थः । निमित्तं हेतुशकुनोरित्यमरः । सूचयित्वा कथयित्वा ॥

(५३) मनोरथेति । मनोरथाय अभिलषिताय वस्तुने शकुन्तलासमागमायेति यावत् । न शार्शसे न मार्थये । तस्याप्राप्यत्वादिति भावः । हे बाहो त्वं मुधा वृथा किं स्पन्दसे स्फुरसि । व्यर्थके तु वृथा मुधेत्यमरः । तदुक्तं वसन्तराजे । स्पन्दो भुजक्षेष्ट-समागमाय स्पन्दः करस्य दक्षिणास्निहेतुरिति । हि यस्मात् पूर्वं प्राक् अवधीरितमव-ज्ञातं श्रेयः शुभं दुःखं सत्परिवर्त्तते प्रवर्त्तते न पुनः श्रेयोरूपेणेत्यर्थः । परिवर्त्तो निर्ऋते कूर्मराजे प्रवर्त्तने इति मेदिनी ॥

(५४) नेपथ्य इति । मेत्यादि । मा खलु चपलतां कुरु यत्र तत्रैवात्मन. प्रकृतिं दर्शयसि । चपलतां पञ्चलताम् । प्रकृतिं स्वभावम् ॥

(५५) राजेति । अभूमिरस्थानम् । अविनयस्य दौर्जन्यस्य । इयं निषिध्यते मा खलु चपलता कुर्वित्यनेन निषार्ध्यते ॥

(५६) यद्दान्तेति । अवरुध्यमानोऽवष्टभ्यमानः । अवाङ्मुख मरुणस्येव यत्तत् पदं प्रभावो

अर्द्धपीतस्तनं मातुरामर्द्दक्लिष्टकेशरम् ।
प्रक्रीडितुं सिंहशिशुं करेणैवाकर्षति ॥ (५७)

तत प्रविशति यथानिर्दिष्टकर्म्मा तापसीभ्यां सह बालः । (५८)

बाल ॥ जिह्म ले सिंहसावआ जिह्म दन्ताइं दे गणइस्सं । (५९)

प्रथमा ॥ अविणीद किं णो अवच्चणिव्विसेसाइं सत्ताइं विप्पअरेसि इन्त वड्ढइ विअ दे संरम्भो ट्ठाणे क्खु दूसिजणेण सव्वदमणो त्ति किदणामहेओसि । (६०)

राजा ॥ किं नु खलु बालेऽस्मिन्नौरस एव पुत्रे स्पृशति मे हृदयम् । (६१)

वा यस्य सः । सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोरिति विश्वः । बाल इति क्वरेणेयाकर्षतीति श्लोकोक्तक्रियायामन्वेति ॥

(५७) अर्द्धेति । मातु केसरिण्या अर्द्धनसम्पूर्णं पीतः स्तनो येन स तम् । आमर्द्देन विमर्द्देन क्लिष्टाः स्रस्ता केसरा. यटा यस्य स तम् । सिंहयटास्तु पुन्नागे बकुले नागकेसरे । केसरः पुंसीति विकाण्डशेष. । सिंहशिशुं केसरिणापकं प्रक्रीडितुं केसरिणमेव आकर्षति आकर्षति ॥

(५८) तत इति । यथानिर्दिष्टं सिंहशावकाकर्षणं कर्म्म यस्य सः ॥

(५९) बाल इति । जिह्मेत्यादि । जृम्भस्व रे सिंहशावक जृम्भस्व । दन्तान्ते गणयिष्यामि । जृम्भस्व मुखं व्यादेहि ॥

(६०) प्रथमेति । तापसीत्यर्थ. । अविनीत इत्यादि । अविनीत किं नोऽपत्यनिर्विशेषाण्यपि सत्त्वानि विप्रकरोषि इन्त वर्द्धत इव ते संरम्भ. । स्थाने खलु अपिसनेन् सर्व्वदमन इति तवनामधेयोसि । अविनीत अशिक्षित । अपत्येभ्यो निर्गतः विशेषो येषां तानि अपत्यसदृशानीत्यर्थः । सत्त्वानि जन्तून् । सत्त्वमस्त्रीत्व जन्तुप्रित्यमरः । विप्रकरोषि पीडयसि । इन्तशब्दो विषादे । संरम्भ आटोपः दर्प इति यावत् । आत्मयाटोपसंरम्भा इति विकाण्डशेषः । स्थाने युक्तम् । सर्व्वान् दमयते इति सर्व्वदमन इति योगादिति भाव. ॥

(६१) राजेति । क्रोडे अङ्कस्थत्वादिति । तथाच मनुः । ये केचे संभृताश्च

विचिन्त्य ॥ नूनमनपत्यता मा वत्सलयति । (६२)

द्वितीया ॥ एसा तुमं केसरिणी खड्डइस्सदि जइ से पुत्तअं ण मुंचिस्सदि । (६३)

बाल० ॥ बलितम् ॥ अम्हहे बलिअं खु भीदम्हि । एत्थरं दर्शयति । (६४)

राजा ॥ सविस्मयम् । (६५)

अहतस्तेजसो बीजं बालोऽयं प्रतिभाति मे ।
स्फुलिङ्गावस्थया वह्निरेधोऽपेक्ष ध्रुव स्थितः ॥ (६६)

अयमुत्पादयेदि यम् । तमौरसं विजानीयात् पुत्रं प्रथमकल्पितमिति । स्निह्यति वत्सलं भवति ॥

(६२) विचिन्येति । विचार्येत्यर्थः । अनपत्यता सन्ततिविरहः । वत्सलयति सस्नेहीकरोति । स्निग्धस्तु वत्सलोवत्स स्नेहयुक्तजने भवेदिति शब्दरत्नावली ॥

(६३) द्वितीयेति । तापसीत्यर्थः । एसेत्यादि । एषा त्वा केसरिणी खड्डयिष्यति । यदयं पुत्रकं न मोक्ष्यसि । केसरिणी सिंही । खड्डयिष्यति अभिभविष्यति । अलं पुत्रं पुत्रकम् ॥

(६४) बाल इति । अम्हेत्यादि । अहो बलीयः खलु भीतोस्मि । अतिशयेन बलवदिति बलीय० । बलवद्भिना मिति बलोर्लोपः । क्रियाविशेषणम् । अधरं निम्नोदकम् ॥

(६५) राजेति । सुगमम् ॥

(६६) अहत इति । एषः समिधमपेक्षते स्नेहोपेक्षः सन् । एषः समित्स्निग्धानित्यमरः । स्फुलिङ्गावस्थया कणमात्ररूपेण स्थितः । विप्रुट् स्फुलिङ्गोऽग्निकण इत्यमरः । अग्निः प्रणीतोनल इव अयं बालो मे मम सम्बन्धे अहतोऽनलस्य तेजसः प्रभावस्य पक्षे दीप्ते बीजं कारणं प्रतिभाति प्रकाशते हेतुर्नीकारणं बीज मित्यमरः । अत्रोपमालङ्कारः ॥

प्रथमा ॥ वच्छे एदं सुअ बालमइन्दअं अवरं ते कीलणअं दाइस्सं । (६७)

बाल ॥ कहिं देहि णं । इति हस्तं प्रसारयति । (६८)

राजा ॥ बालस्य हस्त इव ॥ कथं चक्रवर्तिलक्षणसमन्वितेन धार्यते । (६९)

प्रलोभ्यवस्तुप्रणयप्रसारितो
विभाति जालग्रथिताङ्गुलिः करः ।
अलक्ष्यपत्रान्तरमिद्धरागया नवोपया भिन्नमिवैकपङ्कजम् ॥ (७०)

---

(६७) प्रथमेति । वच्छेत्यादि । वत्स एतं सुअ बालमृगेन्द्रकं अपरं ते क्रीडनकं दास्यामि । बालमृगेन्द्रक सिंहशिशुम् । मृगाणां मध्यूनामिन्द्रो मृगेन्द्र । प्रथमोपि मृगा इति सिंहो मृगेन्द्र इति धामर । अपरमन्यत् । क्रीडत्यनेनेति क्रीडनम् । तदेवति क्रीडनकम् ॥

(६८) बाल इति । कहिमित्यादि । कुत्र देहि एनत् । कुत्र क्रीडनकं कुत्रास्तीत्यर्थः । एनत् क्रीडनकम् । प्रसारयति जिघृक्षयेति शेषः ॥

(६९) रा ेति । चक्रवर्तिलक्षणं राजलक्षणम् । अनेन न केवलं शौर्यातिशय इति सम्भाव्यते । अनेन बालेन ॥

(७०) प्रलोभ्येति । प्रलोभ्यस्य शोभनीयस्य वस्तुन क्रीडनस्येति यावत् प्रणयेन प्रार्थनया प्रसारित प्रेरित । प्रणयाम्बुमी विश्रम्भयाच्ञाप्रेमाण इत्यमर । जालेन समूहेन संहत्या इति यावत् ग्रथिता निर्म्मिता अङ्गुलयो यस्मिन् स तथोक्त । अङ्गसाङ्गुलि रिति यावत् । जालं समूह आनाय इत्यमर । करः पाणि इव सदृशो रागोरक्तिमा यस्या सा तया नवोदया प्रवृत्तमात्रया अप्रसन्धयाया भिन्नं विघटितम् अतएव अलब्धान्तरि आलोकातिशयाभावादनुभवनीयानि पत्राणा दलानामन्तराणि अवकाशा यस्य तत् एकमविलीनं पङ्कज पद्ममिव प्रतिभाति प्रकाशते । तथाच यथाप्रसन्धयाया प्रथमप्रस्थितायामेव विकचभाव मापन्न एकमात्रपङ्कजस्य निरन्तर एवाकारः प्रकाशते तथा-

द्वितीया ॥ सुव्वदे सुअ णं ण एसो सक्को वाचामेत्तेण समइपुं ता गच्छ मम केरए उड्ए सङ्कोचणअस्स इत्थिकुमारअस्स वण्णचित्तिदो मट्टिआमोरओ चिट्ठदि तं से उवहर। (७१)

प्रथमा ॥ तह । इति निष्क्रान्ता ॥ (७२)

बाल ॥ दाव दूमिणा ज्जेव कीलिअं। (७३)

तापसी ॥ विलोक्य हसन्ती ॥ णं सुअ णं। (७४)

राजा ॥ स्पृहयामि खलु दुर्ललितायास्मै । (७५)

कोकातिशयाभावेन दलानामवकाशो ऋषायमपि करः प्रकाशते, नखकुलिशक्षय इति तात्पर्यम्। जालेत्यादिना संहताङ्गुलित्वं पद्मसादृश्येनच रक्तत्वमायातम्। तथोच चक्रवर्त्तिलक्षणत्वम्। तदाह गरुडपुराणम्। घनाङ्गुलिश्च सधनस्निग्धो रेखाश्च यस्य वै। शस्यते करतलगा मणिबन्धे समुत्थिता इति। तथा लाक्षाभैरोश्वरात्मजैरिति। सामुद्रकम्। यस्य पाणितलौ रक्तौ तस्य राज्यं विनिर्दिशेदिति। अत्र यद्यपि उषा रात्रेरवसाने इत्यव्यय एव अमरसम्मतत्वेनापि अनव्ययोपि स्त्रीलिङ्ग उषाशब्दोऽन्यत्र दृष्टव्यः तथाच उषा प्रभातं गोषगं इति खगंवगं त्रिकाण्डशेष । मेदिन्याञ्च। रात्रिशेषे उषायान्तु केचिदाहुरदव्ययमिति। नवोप्सेति पाठो दुष्ट एव उष-शब्दस्य नित्यस्त्रीत्वात्। अत्रोपमालङ्कारः। वशस्थिलं वृत्तम् ॥

(७१) द्वितीयेति। सुव्वदे इत्यादि। सुव्रते सङ्केनैव मयको बालत्वेन यमयितुं सङ्कोच सदोषे घटजे सङ्कोचनस्य ऋषिकुमारस्य वर्णचित्रितो मृत्तिकामयूरस्तिष्ठति तमेवोपहर, एनं बालम्। यमयितुं नियन्त्रयितुम्। सङ्कोचनस्य तपसः। मृत्तिकामयूर इति सम्बन्धः। वर्णचित्रितो विविधवर्णचित्रितः। अस्य सम्बन्धे उपहर उपनय ॥

(७२) प्रथमेति। तह तथा ॥

(७३) बाल इति। दावेत्यादि। तावदनेनैव क्रीडिष्यामि। तावत् तेन पर्यन्तम्। अनेन सिंहशावकेन ॥

(७४) तापसीति। इदानीमेकस्या निष्क्रमात् प्रथमाद्वितीयापदपरित्यागः। एमित्यादि। नन्तु सुव्रतेनम्। नन्वस्तुनवे ॥

(७५) राजेति। दुर्ललिताय दुर्दान्ताय स्पृहिषा सतृष्णा ॥

निश्वस्य ॥

आलक्ष्यदन्तमुकुलाननिमित्तहासै-
रव्यक्तवर्णरमणीयवचः प्रवृत्तीन् ।
अङ्काश्रयप्रणयिनस्तनयान् वहन्तो
धन्यास्तदङ्गरजसा पुरुषीभवन्ति ॥ (७६)

तापसी ॥ सासूयितर्जनम् ॥ भो ण मं गणेसि । (७७)

पार्श्वमवलोक्य ॥ को एत्थ इसिकुमारआणं । (७८)

राजानं दृष्ट्वा । भद्दमुह एहि दाव मोआवेहि इमिणा दुम्मोक्खु-
हत्थग्गहेण डिम्भएण बाधीअमाणं बालमइन्दअं । (७९)

---

(७६) निश्वस्येति । दीर्घमिति शेषः । आलक्ष्येति । अनिमित्तहासैरकारणहासैः आलक्ष्याणि दृश्यमानानि दन्तानां मुकुलानि कुड्मलता येषां ते तान् तथा अव्यक्तैरस्फुटैर्दत्तैः वर्णैः रमणीया मनोहरा वचसां वाक्यानां प्रवृत्तयो येषां ते तान् तथा अङ्काश्रयस्य अङ्कवासस्य प्रणयिनः प्रार्थिनः स्तनयान् आत्मजान् वहन्तो धन्या सुकृतिनः । सकृतौ पुण्यवान् धन्य इत्यमरः । तदङ्गानां तनयाङ्गानां रजसा पांशुना पुरुषीभवन्ति अपुरुषा पुरुषा भवन्ति । पांशुर्नडुयो रज इत्यमरः । अजातस्तनयसम्बन्धा पुरुषाकारा अपि स्त्रीया इवेति भावः । पुरुषीभवन्तीति पाठे ये पुरुषीभवन्ति ते धन्या इत्यर्थः । अत्र स्वभावोक्तिरलङ्कारः । वसन्ततिलका वृत्तम् ॥

(७७) तापसीति । सेति सासूयं जल्पन्तीत्यर्थः । भो इत्यादि । भो न मां गणयसि । गणयसि मन्यसे ॥

(७८) पार्श्वमिति । को इत्यादि । कोऽत्र ऋषिकुमाराणाम् । ऋषिकुमाराणामिति निर्धारणे षष्ठी ।

(७९) राजानमिति । भद्रेत्यादि । भद्रमुख एहि तावत् मोचय अनेन दुर्मोक्षहस्ता-ग्रहेण डिम्भकेन बाध्यमानं बालमृगेन्द्रकम् । दुर्मोक्षेति । दुर्मोक्षश्चासौ हस्ताग्रहश्च मोचनीयो बलेन यो ग्रहः ग्रहणं यस्य स तेन । डिम्भकेन शिशुना । पोतः पाकोऽभको डिम्भः शावक शिशुरित्यमरः । बाध्यमानं पीड्यमानम् ॥

राजा ॥ तथेत्युपगम्य स्थितम् ॥ अयि भो महर्षिपुत्रक । (८०)

एवमाश्रमविरुद्धवृत्तिना संयमी किमिति जन्मदस्त्वया ।
सत्त्वसंश्रयगुणोपि दूष्यते कृष्णसर्पणिमुनेव चन्दनः ॥ (८१)

तापसौ ॥ भद्दमुह ण क्खु एसो इसिकुमारओ । (८२)

राजा ॥ आकारसदृशं चेष्टितमेवास्य कथयति स्थानमत्ययात्तु वयमेवं तर्किणः । (८३)

यथाऽभ्यर्थितमनुतिष्ठन् बालकस्य स्वयंमुपलभ्य सुगतम । (८४)

अनेन कस्यापि कुलाङ्कुरेण सृष्टस्य गात्रे सुखिता ममैवम् ।
का निर्वृतिं चेतसि तस्य कुर्याद्यस्यायमङ्गात्कृतिनः प्रसूतः ॥ (८५)

---

(८०) राजेति । सुगमम् ॥

(८१) अय मिति । अयमिदम्प्रकारा आश्रमविरुद्धा आश्रमानुपयुक्ता वृत्तिराचारो यस्य तेन त्वया किमिति किं हेतुकम् इति हेतौ । जन्मद उत्पादक संयमो मुनि सत्त्व-संश्रय आत्मनिष्ठो गुणो विद्याशौजन्यादि चन्दनपक्षे शैत्यसौगन्ध्यादिर्यस्य स तथोक्तोपि स्वयं गुणवानपीत्ययं । सत्त्वं द्रव्ये गुणान्तरे । पिशाचादौ बले चित्ते स्वभावात्मतत्त्वयोः । आत्मनि व्यवसाये स्वे धने प्राणेषु सत्त्वमिति यद्दाक्षि । कृष्णसर्पस्य विषुना अमंकेण चन्दनो मलयतरुरिव दूष्यते दोषं नीयते । चन्दनद्रुमकोटरेषु काकियसर्पविषमिव तिष्ठन्त सुगरलैकसंदोषमुत्पादयन्तीति लोकप्रसिद्धम् । अत्रोपमालङ्कारः । यदुक्तम् । साधर्म्यमुपमाभेद इति । इदं रथोद्धता नाम वृत्तम् । तदुक्तम् । आद्यमक्षरमतस्तृतीयकं पञ्चमस्य नवमं तथान्तिमम् । दीर्घमिन्दुसखि यत्र जायते ता वदन्ति सुनयो रथोद्धता मिति ॥

(८२) तापसौति । भद्रेत्यादि । भद्रमुख न खलु एष ऋषिकुमारः । सुगमम् ॥

(८३) राजेति । आकारसदृशमाकारानुरूपम् । चेष्टितं कर्म । कथयति नायमृषि-कुमार इति प्रकाशयति । तदा कथं महर्षिपुत्रकेत्युच्चार इत्यत आह स्थानेति । स्थान प्रत्ययात् अमानुषोयं भूमिरस्या नैव मानुषकुमार. सम्भवतीति विश्वासात् । एवतर्किण. ऋषिकुमारतया विचारिण ॥

(८४) यथेति । यथाभ्यर्थितं दुर्मोचिहरिणपोतबालसिंहमोचनम ॥

(८५) अनेनेति । कस्यापि अन्यस्येत्ययं । कुलाङ्कुरेण वंशप्ररोहेण अनेन बालेन

तापसी ॥ उभौ विलोक्य ॥ अज्जरीअं अज्जरीअं (८६)

राजा ॥ आर्ये किमिव । (८७)

तापसी ॥ दुमस्स बालअस्स असम्बद्धेवि भद्दसुहे सम्बादिणी आकिदि त्ति विहिदहि अविअ वामसीलोवि भविअ अवरिचिद-सवि दे वअणेण पडिदिओ संवुत्तो । (८८)

राजा ॥ बालकमुपलालयन् ॥ आर्ये न चेन्मुनिकुमारोऽयं तत् कोऽस्य व्यपदेशः । (८९)

तापसी ॥ पौरवो त्ति । (९०)

राजा ॥ स्वगतम् ॥ कथमेकान्वयायोयमस्माकम् । अतः खलु मदनुकारीणमेनमत्रभवती मन्यते । (९१)

गात्रे स्पृष्टस्य मम एवमित्यसत्कारा अनिर्वचनीयेति यावत् दुखिता । अयं बाहो यस्य लतिनो अङ्गात् प्रसूत इत्यत्रस्य चेतसि का निर्वृतिं किं सुखं भुज्यात् । निर्वृतिस्तु सुखे ओव्ये इति धरणिः । दत्तमुपलालयति ॥

(८६) तापसीति । उभौ राजानं वालञ्च । अज्जरीअं आर्यमं ॥

(८७) राजेति । सुगमम् ॥

(८८) तापसीति । दुमस्सेत्यादि । अस्य बालकस्यासम्बद्धेपि भद्रसुखे संगादिनी आकृतिरिति विज्ञायापि अपि च वामशीलोऽपि भूत्वा अपरिचितस्य ते वचनेन पक्षतिस्थः संवृत्तः । असम्बद्धे सम्बन्धशून्ये । संगादिनी सुखदायी । वामशीलः आत्मविरुद्धस्वभावः । प्रकृतिस्थः स्वस्थः । वामो वक्रमृगोपथोरिति । ओकं स्वभावे सद्वृत्ते इति चामरः ॥

(८९) राजेति । उपलालयन् पाणिना स्पृशन् । व्यपदिश्यते विख्यायते अनेनेति व्यपदेशो वंश. ॥

(९०) तापसीति । पौरवोत्ति पौरव इति । व्यपदेश इति भेदः ॥

(९१) राजेति । स्वगतमनतिश्रुतम् । एकान्वयायं एकवंशः । वंशोऽन्वयाय इत्यमरः । मदनुकारिणं मत्सदृशमनेनम् । मन्यते अनुभवति ॥

प्रकाशम् ॥ अस्त्येतत् पौरवाणामन्यं कुलव्रतम् । (९२)

भवनेषु सुधासितेषु पूर्वं
क्षितिरक्षार्थमुपयन्ति ये निवासम् ।
नियतैकपतिव्रतानि पश्चात्
तरुमूलानि गृहीभवन्ति तेषाम् ॥ (९३)

कथं पुनरात्मगत्या मानुषाणामेव विषयः । (९४)

तापसी ॥ जधा भट्टुणो भणादि किन्तु अच्छरासम्बन्धेण उण भूमस्स बालअस्स जणणी दूअजेव देवगुरुणो तवोवणे पच्छदा । (९५)

---

(९२) प्रकाशमिति । एतत् गच्छसामान्यम् । अन्त्य येषामस्योचितम् । कुलव्रत कुल-क्रमागतो नियम ॥

(९३) तरुमूलेत्यादि । ये पौरवा पूर्वं प्रथमे वयसि सुधाधूसरादि-वेषसेन सितेषु धवलेषु भवनेषु सौधेष्वित्यर्थ । सुधा भवते सुष्ठीभूयालेपगच्छेत्यस्य चेति शेषः । क्षितिरक्षार्थं भुव पालनार्थं निवासमुपयन्ति कालयन्ते तेषा पौरव-क्षितिपाना पश्चाद्वयसि नियतमावश्यकतया विच्छिन्नैकं केवल यन्नियत तापसव्रतं येषु तानि तरुमूलानि वृक्षमूलानि गृहीभवन्ति जन्तर्हाणि गृहाणि भवन्ति वानप्रस्था भवन्तीत्यर्थ । एतत् कुलव्रतमस्तीत्यर्थ । उपजाति नाम वृत्तम् ॥

(९४) पूर्वोक्तसामान्याभ्रा पौरवाणां वानप्रस्थव्रतं तेन च पुत्रेषु भार्यां निक्षिप्य वन गच्छेत् सर्वेषवेति शास्त्रवाक्यश्रवणे रागनिवृत्त्यनिवृत्तिभ्रा विकल्पोपदेशात् कस्य-चिद्वार्धक्या वृद्ध प्रपितामह सन्तानपरम्परया धर्मारण्येऽपि पौरवसङ्गतिरुत्कण्ठावता दर्शयित्वा अस्मान्तु धर्मारण्यभूमौ तदयोग्यतया साध्वसं पृच्छति कथमिति । पुनस्तथ तेन किन्तु एष भूभाग कथ मानुषाणामात्मगत्या निजगमनेन निजगमनस्य वा विषय । सुरलोक सुखभविमानयानमात्रावसादनीयत्वात् कथमयमिमा भूमिभागमिति भाव ॥

(९५) तापसीति ॥ जधेत्यादि । यथा भट्टुणो भणति किन्तु अप्सर सम्बन्धेन पुन-रस्य बालकस्य जननी दूतैव देवगुरोस्तपोवने प्रच्छन्ना । भट्टुणो यथा भणति मानुषाणा-मात्मगत्या अविषय एवैष भूभाग इत्यर्थः । अप्सर सम्बन्धेन अप्सर सङ्गमादेव तामिरान्

राजा ॥ स्वगतम् ॥ हन्त द्वितीयमिदमाशाजननम् । (९६)

प्रकाशम् ॥ अथ सा तत्भवती किमाख्यस्य राजर्षेः पत्नी । (९७)

तापसौ । को तस्य धर्मदारपरित्याडुयो नाम कीर्त्तयिष्यति । (९८)

राजा ॥ स्वगतम् ॥ कथमियं कथा मामेव लक्ष्यीकरोति । यावदस्य शिष्योनीतरं नामतः पृच्छेयम् । (९९)

विचिन्त्य ॥ अथवा अनार्यः खलु परदारपृच्छाव्यापारः । (१००)

प्रविश्य 'मुञ्चयूरइमा तापसी ॥ सव्वदमण पेक्ख सउन्तलावसं । (१०१)

वनेनेति यावत् । देवगुरोर्मारीचस्य । प्रसूता गर्भं मुक्तवती । प्रसवो गर्भमोचने इत्यमर । अत्रार्थस्यैव कर्मणभक्तत्वात्तोरकर्मकत्वेन कर्त्तरि क्त ॥

(९६) राजेति । हन्तो हर्षद्योतक । द्वितीयमिति पौरवत्वमेव प्रथममाशाजनकं इदमधुर सङ्कारेणास्य मातृत्व प्रसवन द्वितीय माशाजननम् । आशा जायतेऽनेनेति आशाजनन मनोरथसञ्चारकमित्यर्थं ॥

(९७) प्रकाशमिति । अथशब्द प्रश्ने । सङ्गतानन्तरारम्भप्रश्नकानूर्द्धंवयोऽवस्थेत्यमर । सा अस्य जननी ॥

(९८) तापसीति । कोऽत्यादि । फलस्य धर्मदारपरित्यागिनो नाम कीर्त्तयिष्यति । धर्मदारेति धर्मपत्नीत्यर्थं ॥

(९९) राजेति । इय कथा कथ किं मामेव लक्ष्यीकरोति मामत्यैव प्रवर्त्तते उतान्यमिति भेदः । अस्य शिष्योर्जितस्य मातर नामतो नाम्ना पृच्छेय ज्ञातुमिच्छेयम् ॥

(१००) विचिन्त्येति । विचार्य्यत्यर्थ । अनार्यं अप्रशस्त । उत्तरवधारणार्थं । परेति । परपत्नीविषयकप्रश्नश्चियेत्यर्थ ॥

(१०१) प्रविश्यति । सव्वेत्यादि । सर्व्वदमन पेक्षस्व मुञ्चैनमार्यपुत्रम् । मुञ्चतस्य पक्षिणो शावस्य सान्निध्येम् ॥

बाल ॥ सदृष्टिविक्षेपम् ॥ कहिं सा मे अम्बा । (१०२)

सभ ॥ प्रहसत । (१०३)

प्रथमा ॥ णामसारिस्सेण उवच्छन्दिदो मादिवच्छलो । (१०४)

द्वितीया ॥ दूमस्स मोरस्स रमणीअदं पेक्खन्ति भणि-
दोसि । (१०५)

राजा ॥ स्वगतम् ॥ किं अकुन्तलेत्यस्य मातुराख्या अथवा सन्ति पुनर्नामधेयसादृश्यानि अपि नाम स्वगतृष्णिकेव नाममात्रप्रस्तावो मे विषादाय कल्पते । (१०६)

बाल ॥ अन्तिए रोअदि मे चडुलके एसे' मउले । इति क्रीडनकमादत्ते । (१०७)

---

(१०२) बाल इति । सदृष्टिविक्षेपमित्यतो दृष्टिविक्षेपेण सह । कहिमित्यादि । कुत्र सा मे अम्बा । अम्बा माता ॥

(१०३) सभे इति । प्रहसत. सञ्जैहंसत ॥

(१०४) प्रथमेति । नामेत्यादि । नामसादृश्येन उपच्छन्दितो मातृवत्सल । नामसादृश्येनाभिधानसाम्येन । उपच्छन्दित प्रलोभित. । मातृवत्सलो मातरि स्नेहवान् । स्निग्धस्तु वत्सल इत्यमर ।

(१०५) द्वितीयेति । दूमस्सेत्यादि । अस्य मयूरस्य रमणीयतां प्रेक्षस्वेति भणितोसि । इति भणितोसि एवमुक्तोसि ॥

(१०६) राजेति । स्वगतमस्वडम् । अपि शङ्कायाम् । नाम सम्भावनायाम् । स्वगतृष्णिका जलवत्प्रतीयमाना मरीचिका । पिपासो रोति शेष । नाममात्रप्रस्ताव. नाममात्रोल्लेख । विषादाय खेदाय कल्पते भवति ॥

(१०७) बाल इति । अन्तिए इत्यादि । अन्तिके रोचते मे चटुलक एष मयूर । अन्तिका ज्येष्ठा भगिनी । अन्तिका भगिनी ज्येष्ठेति नाट्योक्तावमर । रोचते प्रीतिरुत्पद्यते । मे मह्यम् । यत्नैरुचिरिति चतुर्थी । चटुलक चञ्चल । एतेन बालत्वा दविवेकस्य तात्त्विकत्वविश्वासो जात इति । दर्शितम् । चटुलश्चञ्चले मोक्ष चटुला विद्युति स्त्रियामिति मेदिनी ॥

प्रथमा ॥ विलोक्य सावेगम् ॥ अम्मो रक्खाकाण्डओ से मणिबन्धे ण दीसदि (१०८)

राजा ॥ आर्ये अलमावेगेन नन्वयमस्य सिंहशावकस्य विमर्दात् परिभ्रष्टः । कथादातुमिच्छति । (१०९)

उभे ॥ मा खलु मा खलु एदं । (११०)

विलोक्य ॥ कधं गहिदोज्जेव । विस्मयादुरोनिक्षिप्तहस्ते परस्पर-मवलोकयत । (१११)

राजा ॥ किमर्थं भवतीभ्यां प्रतिषिद्धोस्मि । (११२)

प्रथमा ॥ सुयादु महाभागो एसा महाप्पहावा अवराजिदा णाम सुरमहोसही दूमस्स दारअस्स जादकम्मसमए अम्मएहिं बारी-

---

(१०८) प्रथमेति । सावेगं ससम्भ्रमम् । अम्मेत्यादि । अम्म रक्षाकाण्डोऽस्य मणि-बन्धे न दृश्यते । विस्मये अत्यन्ते अम्म नित्यं स्त्रीभि. प्रयुज्यत इति भरत. । रक्षा-काण्डो रक्षार्थंवटो वलयाकारनाड़ीविशेष. । काण्डः स्तम्बे नरुस्तम्बे बाणेऽवसर-नीरयो. । क्लृप्तिते दृढभिन्नाड़ीबन्धे रक्षसि न स्त्रियामिति मेदिनी । मणिबन्धे पाणिपन्यो ॥

(१०९) राजेति । आवेगेन सम्भ्रमेण । नन्वस्यारण्यार्थं. अयं रक्षाकाण्डः । विमर्दात् सङ्घर्षात् । आदातुं ग्रहीतुम् ॥

(११०) उभे इति । मेत्यादि । मा खलु मा खलु एतम् । एतं रक्षाकाण्डम् । गृह्यतामेति शेष. ॥

(१११) विलोक्येति । गृहीतमवलोक्येत्यर्थः । कथमित्यादि । कथं गृहीत एव । न तु प्रतिषेध श्रुत इति शेष । उर इति । उरसोः स्व स्व वक्षसोर्निक्षिप्तावर्पितौ हस्तौ याभ्यां ते । अवलोकयत उभे तापस्यौ इति सम्बन्ध. ॥

(११२) राजेति । प्रतिषिद्ध. रक्षाकाण्डग्रहणस्य इति शेष. ॥

एष दिष्ट्या एदं किल मादापिदरो अप्पाणञ्च वञ्चिअ अवरो भूमि-पदिदं ण गेह्णादि । (११३)

राजा ॥ अथ गृह्णाति । (११४)

प्रथमा ॥ तदो रुप्पो भविअ तं दंशइ । (११५)

राजा ॥ अतभवतीभ्यां कदाचिदन्यत्र प्रत्यवीक्षितमिदम् । (११६)

उभे ॥ अणेअसो । (११७)

---

(११३) प्रथमेति । एषादित्यादि । एषोऽत्र षष्ठाभागः एषा षष्ठ्यामभावा अपरा-जिता नाम शल्लकोमधी अस्य दारकस्य जातकर्मसमये भगवता मारीचेन दत्ता एतां किल मातापितरौ आत्मानञ्च वञ्चयित्वा अपरोभूमिपतितां न गृह्णाति । षष्ठ्यामभावो षष्ठ्यभावः । शल्लकोमधौ शल्लकसुखमलतानिषेधः । दारकस्य बालकस्य । दारको बालकेपि स्यादिति मेदिनी । जातकर्म नाडीच्छेदनात् प्राक् कर्त्तव्यसंस्कारविशेष । यथा- मनुः- नाङ्नाभिवर्द्धनात् पुंसो जातकर्म विधीयत इति । यद्यपि कर्त्तो संस्कार-कर्म्मोक्ति गर्भाधान मिव स्वयम् । पिता कुर्य्यात्तदन्यो वा तदभावे तु तत् क्रमादिति क्रतौ संस्कारेषु पितुरेवाधिकारोऽस्ति तु तत्रिमन्येषामिति लभ्यते तथापि ऋत्विक् च त्रिविधो दृष्टः पूर्वजुष्टः स्वयं कृतः । यदृच्छयापि यः कुर्य्यादर्त्विज्यं प्रीतिपूर्वकमिति नारदेन स्वयमकृतस्यापि ऋत्विकत्वाभ्युपगमात् तनूजस्य च ऋत्विक् पुत्रोगुरुर्भ्राता भागिनेयोऽथ शिष्यति । यमिरेव श्रुतं यत्तु मन्त्रतं स्वयमेव होति दर्शेष स्वयं जात-तूष्णीत्वर्त्तिग्रादरणचिह्निते राज्ञि सूचयन्नेव मन्त्रर्त्तिगयं संस्कारः ॥

(११४) राजेति । अथ यदि । प्रश्नं द्योतयति ॥

(११५) प्रथमेति । तदो इत्यादि । ततः सर्पो भूत्वा तं दशति । भूत्वा अप-राजितेति शेषः । तं बालकम् ॥

(११६) राजेति । अन्यत्र मदितरस्मिन् पक्षीगरि । प्रत्यवीक्षितं दृष्टम् । इदं रत्ना बालस्य सर्पभावेन दंशनम् ॥

(११७) उभे इति । अनेअसो अनेकशः । अनेकस्मिन्नेकस्मिन्वनेकशः । संज्ञै-काधीनोयाया मिति शसन् ॥

राजा ॥ सहर्षमात्मगतम् ॥ तत् किं खल्विदानीं पूर्णमात्मनो मनोरथं नाभिनन्दामि । इति बालकं परिष्वजते । (११८)

द्वितीया ॥ सुव्वदे एहि दूमं वृत्तन्तं णियमवावडाए सउन्तलाए णिवेदेस्सं । इति निष्क्रान्ते । (११९)

बालः ॥ सुञ्च मं सुञ्च मं अव्वाए सआसं गमिस्सं । (१२०)

राजा ॥ पुत्र मयैव सह मातरमभिनन्दिष्यसि । (१२१)

बाल० ॥ दुस्सन्तो मम तादो ण क्खु तुमं । (१२२)

राजा ॥ एष विवाद एव मा प्रत्याययति । (१२३)

ततः प्रविश्यैकवेणीधरा शकुन्तला । (१२४)

शकु ॥ सवितर्कम् ॥ विअारकाले वि पडूदिअं सव्वदमणस्स ओसहिं सुणिअ ण मे आसंसो अत्तणो भाअधेएसु अधवा जधा

---

(११८) राजेति । पूर्णं फलोन्मुखम् । नाभिनन्दामि खल्वीत्यानन्दामि । परिष्वजते आलिङ्गति ॥

(११९) द्वितीयेति । सुव्वदेरित्यादि । शृणुते एहि दूमं वृत्तान्तं नियमव्याकुलतायाः शकुन्तलाया निवेदयामः । दूमं वृत्तान्तं भूमिपतितेन रक्षाकाण्डेन दष्टस्तोऽयमपरस्य संभ्रमभावेनादंशनम् । नियमव्याकुलताया व्रतपरायणायाः ॥

(१२०) बाल इति । सुञ्चेत्यादि । सुञ्च मां सुञ्च मां अम्बायाः सकाशं गमिष्यामि । सगमम् ॥

(१२१) राजेति । सगमम् ॥

(१२२) बाल इति । दुस्सन्तो इत्यादि । दुष्मन्तो मम तातो न त्वम् । सगमम् ॥

(१२३) राजेति । विवाद एवेत्युक्तस्य नायं ते पुत्रः किन्तु दुष्मन्तस्येति विकारः । प्रत्याययति नि यें विश्वासयति ॥

(१२४) तत इति । सगमम् ॥

सिंहकेसीए मे आचक्खिदं तधा सम्भावीअदि एदं इति परिक्रामति। (१२५)

राजा॥ अकुन्तला विलोक्य सहर्षखेदम्। अये सेयमत्तभवती अकुन्तला। (१२६)

वसने परिधूसरे वसाना
नियमक्षामसुखी धृतैकवेणिः।
अतिनिष्करुणस्य शुद्धशीला
मम दीर्घं विरहव्रतं बिभर्त्ति॥ (१२७)

---

(१२५) अकु इति। सवितर्कं तर्काभिनयेन सह विचारेत्यादि। विचारकालेपि प्रकृतिस्थां सन्दमनस्यौषधीं श्रुत्वा न मे आशंसा आत्मनो भागधेयेषु कथना यथा मिश्र केश्या मे आख्यातं तथा सम्भाव्यते एतत्। विकारकाले प्रकृतेरन्यथाभावकाले सर्पिभावोचितसमये इति यावत्। प्रकृतिस्था यथापूर्वमवस्थिताम। ओषधीमधराजितां नाम सुरसद्दौषधीम्। आशंसा प्रत्याशा। भागधेयेषु भाग्येषु सन्दमनजीवनमूलेष्विति यावत्। कल्पान्तरमाह अथवेति। यथा स्मृतिवशादधुना राज्ञो व्याकुलत्वमित्यर्थः। तथा तत् प्रयुक्तागमननिबन्धनम्। सम्भाव्यते मन्यते। एतत् ओषधा. स्वभावेनावस्थानम्॥

(१२६) राजेति। अये इति विषादे। अये स्त्रीषे विषादेच सम्भ्रमे स्मरणेपि चेति मेदिनी। अकुन्तलेति स्त्रीकीयबिभर्त्तीति क्रियायामन्वितम्॥

(१२७) वसने इति। परिधूसरे धूलिभि कपोतवर्णे। ईषत्पाण्डुस्तु धूपर इत्यमर। वसने वाससो वसाना परिदधाना। वसतेऽशुतावितिं कविकल्पद्रुम.। नियमेन सर्वभोगपरित्यागकष्टेन क्षामं शुष्कता गतं सुखं यस्या सा। धृता विरहेति शेष.। एकैववेणिर्यया सा अतएव शुद्धं दोषवेषहीनं शीलं चरित्रं यस्या सा तथोक्ता पतिव्रतेति यावत्। अत्र हारीतः। आत्तौर्ध्वं सुदिते हृष्टा प्रोषिते मलिना कृशा। मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रतेति। अत्र मण्डनं वर्ज्यमेकाहारी तथा प्रोषितभर्तृका। देवताराधनपरा तिष्ठेच्छयनं क्षिते रतेति विष्णुधर्मोत्तरे क्रीड़ा शरीरसंस्कारं समाजोत्सवदर्शनम्। पानं परगृहे वासं त्यजेत् प्रोषितभर्तृकेति गरुड़पुराणे चाकल्पकल्पनामात्रनिषेधेपि न

मनु ॥ पश्चात्तापविषण्णं राजानं दृष्ट्वा सवितर्कम् ॥ अय कथ्रु अक्खं-उत्तो अअं ता को एसो किदरक्खामङ्गलं दारअं मे गत्तसंसग्गेण दूसेदि । (१२८)

माढवः ॥ सावरमुपगम्य ॥ अम्बको एसो मं पुत्तकेत्ति सस्सिणेहं आलिङ्गदि । (१२९)

राजा ॥ प्रिये कौर्यमपि मे त्वयि प्रयुक्तमनुकूलपरिणामं संवृत्तम् । तदहमिदानीं त्वया प्रत्यभिज्ञातमात्मानमिच्छामि । (१३०)

यक्ष ॥ स्वगतम् ॥ हिअअ समस्सस समस्सस पढरिअ परिच्चत्त-मच्छरेण अणुकम्पिदह्मि देव्वेण अज्जउत्तो च्चेव एसो । (१३१)

जात विधवायेव कथञ्चिदपि धारयेदिति विष्णुधर्मोत्तरे वैधव्यकृच्छ्रप्रतिषेधात्तथा-विधानाच्चैकवेणीधारणसमाचारः । अनयाऽवस्थाप्रकाशिकाः । प्रवासोऽभिज्ञेयत्वं कार्यो-च्छ्वासाच्च सम्भ्रमात् । तत्राङ्गवैलक्षण्यमेकवेणीधरं शिरः । निःश्वासोच्छ्वासरुदित-भूमिपातादि जायते । अकृतज्ञा अतिनिष्करुणस्य अतिनिर्दयस्य मम दीर्घमतिचिरोद्वा-हनं विरहव्रतं वियोगरूपं व्रतं विभर्त्ति पालयति । दीर्घकालीनधर्माद्यनुष्ठानस्थितायां अपि पूर्वोक्तविशेषणार्थो द्रष्टव्यः । विरहव्रतमिति रूपकालङ्कारः । तद्रूपं दक्षिणा अमैव तिरोभूतभेदा रूपकमित्यन्ये इति । उपहत्तं नाम वृत्तम् ॥

(१२८) अय्य इति । पश्चादिति । पश्चात्तापेन अनुतापेन विषण्णं मलिनं । एतदेव वितर्के हेतुः । णेत्यादि । न खल्वार्यपुत्रोऽयं तत्क एष हतरक्षामङ्गलं दारकं मे गात्र-संसर्गेन दूषयति । न खलु नैव । हतेति । हतं रक्षायै मङ्गलं यस्मिन् तम् । दारकं बालकम् । दूषयति दोषं नयति । रक्षाकार्यङ्गस्य यक्षस्यागमादित्याशयः ॥

(१२९) माढ इति । अम्बेत्यादि । अम्ब क एष मां पुत्रकेति सस्नेहमालिङ्गति । अम्ब मातः । सुभ्रूर्दीक्षाजम्बायोनामिति सम्भ्रमो हर्षः । पुत्रकेति सम्बुद्धेति शेषः ॥

(१३०) राजेति । प्रिये त्वयि प्रयुक्तमाचरितं क्रौर्यं क्रूरत्वमपि मे मम सम्बन्धे अनु-कूलः सुखहेतुः परिणामः शेषो यस्य तत् तथोक्तं संवृत्तम् । सम्पन्नायास्ते कालेन समागमा-दिति भावः । तत् तस्मादिदानीमात्मानं त्वया प्रत्यभिज्ञातं परिचितमिच्छामि ॥

(१३१) यक्ष इति । स्वगतमनतिस्पष्टम् । हिअएत्यादि । हृदय समाश्वसिहि समा-श्वसिहि प्रहृष्य परित्यक्तमत्सरेण अद्यकम्पितास्मि दैवेन । आर्यपुत्र एवैषः । यक्षस्य

राजा ॥ प्रिये (१२)

क्षतिभिन्नमोहतमसो दिष्ट्या प्रमुखे स्थितासि मे सुमुखि ।
उपरागान्ते शशिनः समुपगता रोहिणी योगम् ॥ (१३)

मकु ॥ जयदु अज्जो ॥ जयदु अज्जो मज्जउत्तो । एव्वहिं वाअरणवक्खो विरमति । (१४)

राजा ॥ प्रिये (१५)

प्रकाशान्तरम् । परीति । परित्यक्तो मत्सरः । शुभहेयः क्रोधो वा येन तथोक्तेन । मत्सरोऽस्यशुभहेय इत्यमरः । क्वचित् क्रोधोपि मत्सर इति रत्नकोशः ॥

(१२) राजेति । प्रिये इति स्त्रीजीवितेशत्वेन सह क्रियायामन्वेति ॥

(१३) क्षतीति । दिष्ट्या आनन्दे । हे सुमुखि प्रिये क्षत्या पूर्वदक्षाम-अत्येन भिन्नं खण्डितं मोहरूपं तमो यस्य स तथोक्तस्य मे मम प्रमुखे पुरतः स्थितासि तादृशोहिणी उपरागान्ते राहुयोगावसाने शशिनश्चन्द्रमसो योगं सम्बन्धमुपगता । कार्त्तिक्याश्चोपरागे सतीति भावः । उपरागो ग्रहोराहुपर्वणि स्त्रीषु क्षयि चेत्यमरः । यत्र प्रकृत्याद्यायासेन सूक्ष्मराजयक्ष्मयोगो रोहिण्या सम सूक्ष्मचन्द्रक्षयोगश्च दृश्यते इति विम्बातिविम्बतप्रदर्शनाविदर्शनाद्धारः । व्याधात्र यक्ष्मवस्तुसम्बन्धनिबन्धना । यद्वा यक्ष्मवत् वस्तुसम्बन्धोऽपि भवत्येव । यत्र बिम्बातिबिम्बं दर्शयेत् सा विदर्शनेति । व्याख्या स्पष्टा ॥

(१४) मकु इति । जयदु इत्यादि । जयति जयति आर्यपुत्र । व्याख्येव स्पष्टो ह्यं ग्रन्थो यद्वा वा । संयोगोपधप्राङ्गणविरेफो निदेशात् षष्ठ्यन्तात् प्राङ्नलेनोपमाप्राप्तावि अङ्गाद्यलोपात्संयोगादौ पठितत्वेन योगादिलादीव । अङ्गाश्रयस्तु आङ्गाश्रयत्वषष्ठ्या मङ्गलपर्वोक्तमित्यपि । उपमानेनलक्षणया गानमङ्ग मङ्गादिरीदिति दत्तुल्लाः । विरमति अन्यव्याहरणव्यादिति मेघ ॥

(१५) राजेति । प्रिये इति पूर्वोदाहरणवत् ॥

वाष्पेण प्रतिरुद्धेऽपि जयशब्दे जितं मया ।
यत्ते दष्टमसंस्कारपाटलोष्ठपुटं मुखम् ॥ (१२६)

बाल० ॥ अम्ब को एसो । (१२७)

शकु ॥ भाग्धेआइं पुच्छ । इति रोदिति । (१२८)

राजा ॥

सुतनु हृदयात् प्रत्यादेशव्यलीकमपैतु ते
किमपि मनसः सम्मोहो मे तदा बलवानभूत् ।
प्रबलतमसामेवंप्रायाः शुभेषु हि वृत्तयः
स्वजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया ॥ (१२९)

---

(१२६) वाष्पेणेति । जयशब्दे वाष्पेण नेत्रजलेन प्रतिरुद्धे स्तम्भितेपि मया जितं मम जयोभूत् यत् यस्मात् ते तव असंस्कारेण अलङ्करणविरहेण पाटल ईषद्रक्तवर्ण ओष्ठपुट ओष्ठपुटको यत्र तथाभूत मुख दृष्टम् । श्वेतरक्तस्तु पाटल इत्यमर । "अरोरसंस्कारनिषेधानुपालनात् साध्वाचारत्वनिश्चयादिदमुक्तम् । पाटलोष्ठेति वौष्ठोलोरित्यकारलोप ॥

(१२७) बाल इति । अम्ब को एसो अम्ब कः एषः ॥

(१२८) शकु इति । भाग्यइत्यादि । भागधेयानि पृच्छ । भागधेयानि भाग्यानि । तथाच भार्य्यैवायमिङ्गितज्ञ इति तान्येव प्रष्टुमुचितानीति भाव ।

(१२९) राजेति । सुतन्विति । हे सुतनु प्रत्यादेशेन मत्कृतप्रत्याख्यानेन व्यलीक पीडा ते मम हृदयादपैतु अपसरतु पीडार्थेपि व्यलीक स्यादित्यमर । तदा तत्काले किमपि अनिर्वचनीयो बलवान् मे मनस सम्मोहो भ्रमोऽभूत् । हि यस्मात् प्रबलं बलवत् तमो मोहो ध्वान्तं वा येषा तेषा शुभेषु भद्रेषु विषयेषु वृत्तय प्रवृत्तय । हस्तिनिवरणाजौ च कौशिक्यादिप्रवर्त्तन इति मेदिनी । एवंप्राया प्रायेण बाहुल्येन एवमिदम्प्रकारा । प्रायोभूत्प्रान्तगमन इत्यमर० । व्य भूर्व्वमित्येषद्वारस्य पूर्व्वनिपात । अत्र दृष्टान्तयति स्वजमित्यादि । तथाहि

इति पादयोः पतति । (१४०)

मङ्ग । उत्थेदु उत्थेदु अज्जउत्तो णूणं मे सुहप्पडिबन्धअं पुराकिदं णेसुं दिअएसुं परिणामसुहं आसी जेण साणक्कोसोवि अज्जउत्तो मंदू विरत्तो संवुत्तो । (१४१)

अज्जो नाम प्रवहतमा गिरसि क्षिप्तामर्पितां स्तन मात्रामपि अङ्किअद्वया सप्रश्रयमारोपेय सुनोति कम्पयति । अत्र प्रवहतमशब्दादित्वादिमाऽर्थान्तरन्यास ष च स्तनमित्यादिदृष्टान्तात्मा । इदं हरिणी नाम वृत्तम् ॥

(१४०) इतीति । इत्यनुवर्त्यम् । पादयोरिति । क्षोपशान्त्यर्थमिदम् । तद्रुक्षम् । सामभेदोऽथ दानञ्च नत्युपेक्षे रसान्तरम् । तद्रुक्षाय पतिः कुर्यात् षड्गुणायानिति क्रमात् । तत्र प्रियवाक्यं साम भेदस्तवस्तुपाञ्जनम् । दानं व्याजेन भूमादेः पादयो पतनं नतिः । सामादौ तु परिक्षीणे स्वादुमेवावधारणम् । रसशब्दस्यादे क्षोपभ्रंशो रसान्तरमिति ॥

(१४१) मङ्ग इति उत्थेदुरित्यादि । उत्तिष्ठतु उत्तिष्ठतु चार्यपुत्रः नूनं मे सुखप्रतिबन्धकं पुराकृतं तेषु दिवसेषु परिणामसुखमासीत् येन सानुक्रोशोऽप्यार्यपुत्रो मयि विरक्त संवृत्तः । नूनमित्यादि । परिणामे परिपाकदशाया सुखयतीति परिणामसुखमयच तेषु अतीतेषु दिवसेषु सुखप्रतिबन्धकं सुखव्याघातकं मे पुराकृतं पौर्वदेहिककर्मजन्यपापं नूनमवश्यमासीत् । अन्यथोभूतेऽपि मदीयदोषदृष्टे मयि सुखप्रतिबन्धके सति स्वपुराकृतानुमानमिति राजप्रश्नपरिजिहीर्षयाह येनेत्यादि येन हेतुना । सानुक्रोशोऽपि अनुरागातिशयेन सानुक्रोशोऽपि । अनुकम्पा क्षादनुक्रोश इत्यमरः । विरक्तो विगतरागः । ग्रहणादौ विधे पौर्वे गुणे रागे द्वेषे रक्त इत्यमरः । तथाच दृष्टायामपि सुखप्रतिबन्धहेतुस्थाने अवश्यमनुरागघातको निर्निदानायाकस्मा उत्पादाद्यभवेन मत्पुराकृतानुमानमावश्यकमिति भावः । यदाह मल्लिनाथः । पुराकृतानि पापानि फलन्त्यभिप्रायेणेति । रोगदीर्घत्वहेतोः तच्चेदकर्मणेति ॥

राजा ॥ उत्तिष्ठति । (१४२)

यक्ष ॥ अथ कथं अज्जउत्तेण सुमरिदो दुक्खभाइ अम्हं जणो । (१४३)

राजा ॥ उद्धृतविषादशल्यः कथयिष्यामि । (१४४)

मोहान्मया सुतनु पूर्वमुपेक्षितस्ते
यो वाष्पविन्दुरधरं परिबाधमानः ।
तस्यावदाकुटिलपक्ष्मविलग्नमद्य
कान्ते प्रमृज्य विगतानुशयो भवामि ॥ (१४५)

इति यथोक्तं करोति ॥ (१४६)

---

(१४२) राजेति । सुगमम् ॥

(१४३) यक्ष इति । अथवादि । अथ कथमार्यपुत्रेण स्मृतो दुःखभागी अयं जनः । अयमन्द्र प्रत्ये ॥

(१४४) राजेति । उद्धृतमुन्मूलितं विषादशल्यं हृदयनिहितशोकयन्त्रेण यथोक्तं यत् कथयिष्यामि आमूलं वक्ष्यामि । या भूमिः यस्य यक्षो नो इत्यर्थः ॥

(१४५) विषादशल्योद्धारप्रकारमाह मोहादिति । हे सुतनु अधरं परिबाधमानः परिपीडयन् ते तव यो वाष्पविन्दुरश्रुविन्दुर्मया मोहात् प्रमादभावात् पूर्वं प्रत्यादेशकाले उपेक्षितः न प्रोञ्छितः हे कान्ते अद्य आकुटिलेषु ईषत् कुञ्चितेषु पक्ष्मसु अक्षिलोमसु विलग्नं स्थितम् । कुञ्चितं नतम् । आविद्धं कुटिलमित्यमरः । तं वाष्पविन्दुं प्रमृज्य प्रोञ्छ्य तावत् विगतानुशयो गतानुतापो भवामि । अथानुशयो दीर्घहेत्वानुतापयोरित्यमरः । वसन्ततिलकं नाम वृत्तम् ॥

(१४६) इतीति । यथोक्तभश्रुविन्दुमपमार्जनम् ॥

यक्षः ॥ प्रस्तुतकार्या खङ्गुरीयकं विलोक्य ॥ अज्जउत्त तं एदं अङ्गुलीअअं । (१४७)

राजा ॥ अथकिम् अस्मादद्भुतोपलम्भान्मया स्मृतिरूपलब्धा । (१४८)

यक्षः ॥ विसमं किदं क्खु भूमिणा जं तदा अज्जउत्तस्स पच्चाअणकाले दुल्लहं आसी । (१४९)

राजा ॥ तेन हि ऋतुसमागमचिह्नं प्रतिपद्यतां खता कुसुमम् । (१५०)

---

(१४७) यक्षः इति । प्रस्तुतकार्या राज्ञेति शेषः । अज्जउत्तेत्यादि । आर्य-अत्र तदिदमङ्गुलीयकम् । तदिति यदर्थायान्नमेयं दुर्लभेति भावः ।

(१४८) राजेति । अथादङ्गुलीयात् । अद्भुत आश्चर्ये उपलब्धो लाभो यस्य तत् तस्मात् । उपलब्धा जाता ॥

(१४९) यक्षः इति । विषममित्यादि । विषमं क्रूरं खल्पेन यत् तदा आर्य-प्रस्तुतस्य प्रत्यायनकाले दुर्लभमासीत् । विषममन्याय्यम् । यत् अङ्गुलीयकम् । तदा मणयविक्रीतौ । प्रत्यायनकाले विश्वासनकाले । दुर्लभम् अनासाद्यम् ॥

(१५०) राजेति । तेन तदानीमाशादित्वेन खता यक्षो ऋतुसमागमस्य खल्पेन एव सम्बन्धेन चिह्नं चिह्नभूतं कुसुमं पुष्पं प्रतिपद्यतां धारयतु । यतोऽयं अनाङ्गुलीयकेऽपि यक्षस्याङ्गुलीयकस्येदं कुसुममिवेति दर्शितम् । तथाच खता यथा यक्षस्यायोगात् कुसुमं धारयति तथा त्वमपि मत्स्यायोगात् इदमङ्गुलीयं धारयेत्यर्थः । अस्माप्रस्तुतेः ऋतुसमागमसूचकाकुसुमैः यक्षयैरसुभिः प्रस्तुतस्य त्वं मत्समागमोचितमङ्गुलीयकं प्रतिपद्यस्वेत्यर्थस्य गम्यमानत्वादप्रस्तुतप्रशंसाव्यवहारः । यदुक्तं दर्पणे । क्वचित् विशेषः सामान्यात् सामान्यं वा विशेषतः । कार्यात्तिमित्तं कार्यं च हेतोरथ समात्मकम् । अप्रस्तुतात् प्रस्तुतस्य गम्यते यत्र वा तदः । अप्रस्तुतप्रशंसा सादिति ॥

शकु ॥ ण खे विस्सेसेमि अज्जउत्तो ज्जेव णं धारेदु । (१५१)

तत प्रविशति मातलिः । (१५२)

मात ॥ दिष्ठा धर्मपत्नीसमागमेन पुत्रमुखदर्शनेन चायुष्मान् वर्द्धते । (१५३)

राजा ॥ सुहृत्सम्पादितत्वात् साधुतरफलो मे मनोरथः मातले न खलु विदितोऽयमाखण्डलस्यार्यः । (१५४)

मात ॥ सस्मितम् ॥ किमीश्वराणां परोक्षम् एष भगवान् मारीचस्ते दर्शनमिच्छति । (१५५)

राजा ॥ प्रिये अवलम्बतां पुनः त्वां पुरस्कृत्य भगवन्तं द्रष्टुमिच्छामि । (१५६)

---

(१५१) शकु इति । पेत्यादि । नास्य विश्वसिमि आर्यपुत्र एवंनं भारयात । न विश्वसिमि शकुन्तिगतं स्यास्यतीति न प्रत्येमि ॥

(१५२) तत इति । सुगमम् ॥

(१५३) मातेति । दिष्ट्या आनन्दे । वर्द्धते अभ्युदेति इद्धिरभ्युदयोऽस्त्रियामित्यमरः । पत्नीदाभस्य पुत्रमुखदर्शनस्य चाभ्युदयरूपत्वादिति भावः ॥

(१५४) राजेति । सुहृदा भवता सम्पादितत्वात् परिणमितत्वात् मे मम मनोरथोऽभिलाषः साधुतरमतिशयेन साधु फलं यस्य स तथाभूतः । यतः शकुन्तलाभिलाषात् सपुत्रशकुन्तलालाभ इति भावः । खलु प्रश्ने । अयमर्थः शकुन्तलासमागम आखण्डलस्य न विदितः । अत्र वर्त्तमाने क्तः ॥

(१५५) मातेति । ईश्वराणामैश्वर्यवतां किं परोक्षमगोचरम् किमपि नेत्यर्थः ॥

(१५६) राजेति । अवलम्बतामङ्कमारोप्यताम् । पुरस्कृत्य अग्रे कृत्वा भगवन्तं मारीचम् ॥

अदितिः ॥ सम्भावणीअप्पहावा खे आकिदी (१६३)

मात ॥ आयुष्मन् एतौ पुत्रप्रीतिपिशुनेन चक्षुषा दिवौकसां पितरावायुष्मन्तमवलोकयतः तदुपसर्पं । (१६४)

राजा ॥ मातले (१६५)

प्राङ्न्यादधा स्थितस्य मुनयो यत्तेजसः कारणं
भर्त्तारं भुवनत्रयस्य सपुवे यद्दक्षयज्ञभागेश्वरम् ।
यस्मिन्नात्मभुवः परोऽपि पुरुषश्चक्रे भवायास्पदं
द्वन्द्वं दक्षमरीचिसम्भवमिदं तत् स्रष्टुरेकान्तरम् ॥ (१६६)

---

(१६३) अदितिरिति । सम्भेत्यादि । संभावनीयप्रभावास्याकृतिः । सम्भावनीयो मन्तव्यः प्रभावः यस्यिंस्याः सा ॥

(१६४) मातेति । पुत्रेति । पुत्रस्य प्रीतिः स्नेहः पुत्रप्रीतिस्तत्पिशुनेन तत्सूचकेन । पिशुनो सूचकस्त्रिष्वसरः । दिवौकसां देवानाम् । माता च पिता च तौ पितरौ अदितिमारीचौ । उपसर्पं उपगच्छ ॥

(१६५) रातेति । सुगमम् ॥

(१६६) प्राङ्निति । मातले मुनयो मन्तव्यो यद् द्वन्द्वं मिथुनं कर्म द्वादशधा द्वादशप्रकारेण द्वादशत्वकतयेति यावत् । स्थितस्य वर्त्तमानस्य तेजसः सूर्यस्य कारणमुत्पत्तिस्थानं प्राङ्नः । उक्तं महाभारते । अदित्यां द्वादशादित्याः समृता धनेश्वरा इति । तथा यद् द्वन्द्वं कर्तृ भुवनत्रयस्य स्वर्भूर्भुवःस्वरात्मकस्य भर्त्तारं ब्रह्मादिभिः पालयितारं यज्ञस्य भागो येषां ते यज्ञभागा देवास्तेषामीश्वरं प्रभुं यज्ञं सुषुवे अदृपादि । तथा यस्मिन् द्वन्द्वे आत्मभुवः स्वयम्भवात् ब्रह्मणः परोऽपि । परमधिकोऽपि । ब्रह्मविष्णुशिवेषु विष्णोर्ब्रह्मणः परत्वात्वादिति भावः । श्रेयोऽपीति ध्वनिः । पुरुषः पुमान् । पुंसि चात्मनि ब्रह्मणि विष्णौ च तिलकद्रुमे इति यद्दाभ्विः । भवाय जन्मने आस्पदं पदं स्थानमिति यावत् । आस्पदं पदस्थानयोरिति यद्दाभ्विः । चक्रे कृतवान् । तदाह विष्णुपुराणम् । तत्र विष्णुश्च ब्रह्मा च जज्ञाते पुनरेकतः इति । दक्षमरीचिसम्भवम् आत्मना स्रष्टुश्चैव एकान्तरमेकेन पुरुषेण व्यवस्थितमिदं तत् द्वन्द्वं अदितिमारीचात्मकयोर्युग्मं । स्त्रीपुंसोर्मिथुनं द्वन्द्वमित्यमरः । ब्रह्मणश्चायं श्लोकः । ब्रह्मणः

मात ॥ अयकिम् । (१६७)

राजा ॥ मणिपत्य ॥ उभाभ्यामपि वा घासवनियोज्यो दुष्यन्तः भक्षमति । (१६८)

मारीष ॥ वत्से चिरं जीवन् पृथिवीं पालय । (१६९)

अदिति ॥ अप्पदिरूपो होहि । (१७०)

मकुलवडा पुत्तसहिदए पादेसु पडदि । (१७१)

मारीष ॥ वत्से । (१७२)

एतावत् दक्षादुत्पत्त्येयमदितिः मारीचचायं ब्रह्मसुतासम्भवीचे सम्भूत इति पौत्री पौत्रदुहित्रो रदितिमारीचयोर्द्वयोरेव सप्तर्षिपत्नीत्वं मागभिहितविष्णुपुराणमहाभारत प्रमाणादवगन्तव्यम् । यादृच्छविक्रीडितं दृष्टम् ॥

(१६७) मातेति । सुगमम् ॥

(१६८) राजेति । मणिपत्य नम्रीभूय । वां युवाभ्याम् । उद्देश्यतावच्छेदकविवक्षायां षष्ठी । घासवनियोज्यो मद्येन्द्रकिङ्कर । नियोज्यकिङ्करप्रेष्यभुजिष्यपरिचारका इत्यमर । दक्षिणेन दाक्षिण्येनेति न्यायात् एकासनगतयोस्तयोः दाक्षिण्येनैव नमस्कारो न्याय-प्राप्त इति दर्शयितुं पादग्रहणमाधादभिवादन मनूद्य उभयोरेव मणिपातः कृत । तदुक्तं मनुना । गुरुपत्नीतु युवतिर्नाभिवाद्याऽऽह पादयो । पूर्णविंशतिवर्षेण युवतीदोषो विजानता । तथा । कामन्तु गुरुपत्नीनां युवतीनां युवा भुवि । विधिवद्वन्दनं कुर्यादसावहमिति ब्रुवन्निति । अतएव मकुलवडा पादग्रहणमनूद्यपदमेव वक्ष्यति ॥

(१६९) मारीति । सुगमम् ॥

(१७०) अदितिरिति । अप्पदीत्यादि । अमतिरूपो भव । अमतिरूप मात्मि मतिरूप मतियोग्यो यस्य स ॥

(१७१) मकुलवडेति । सुगमम् ॥

(१७२) मारीति । सुगमम् ॥

आखण्डलसमो भर्त्ता जयन्त्यप्रतिमः सुतः ।
आशीरन्या न ते योग्या पौलोमीमङ्गला भव ॥ (१७३)

अदितिः ॥ जादे भत्तुणो वङ्कमदा होहि अअञ्च दीहाउ उहअ-
मक्खं अलङ्करेदु एअ उवविसध । (१७४)
सव्वे पजापतिमभित उपविशन्ति । (१७५)
भारीअ ॥ एकैकं निर्दिशन् । (१७६)
दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान् ।
अङ्का यिक्षं विधिश्चेति त्रितयं तत् समागतम् ॥ (१७७)

---

(१७३) आखण्डलेति । भर्त्ता ते आखण्डलसमो वासवसमः सुतो जयन्तस्य पाक-
शासनेः प्रतिमा सादृश्यं यस्य स तथोक्तः । अतस्ते तव सम्बन्धे अन्या वक्ष्यमाणेतरा आशीर्न
योग्या उपयुक्ता त्वं पैलम्याः पुलोमदुहितुः अप्यादृक् सदृशमवैधव्यं यस्याः सा तथोक्ता
भव । पुलोमजा शचीन्द्राणीत्यमरः ॥

(१७४) अदितिरिति । जादे इत्यादि । जाते भर्त्तुं वङ्कमता भव अयञ्च दीर्घायुरुभय-
पक्षमलङ्करोतु एत उपविशत । अयं सर्वदमनः । उभयपक्षं मातापितृकुलम् । अलङ्करोतु
शोभयतु । यतेति सर्वाभिप्रायेण ॥

(१७५) सर्वे इति । प्रजापतिं भारीषम् । अभ्युभयपरिवर्त्तेत इति द्वितीया । अभितः
अभिमुखे ॥

(१७६) भारीति । निर्दिशन् अङ्गुल्या दर्शयन् ॥

(१७७) दिष्ट्येति । दिष्ट्या आनन्दे । इयं साध्वी पतिव्रता शकुन्तला इदं सदपत्यं
सत्पुत्रः अयं भवान् तत् तस्मात् अहो आश्चर्ये दृढप्रत्ययः । प्रत्ययो धर्म्मकार्य्येषु तथा-
श्वेतादाहृतेति देवलः । यिक्षं धनं विधिः प्रक्षेकर्त्तव्यमिति कर्त्तव्यता यं कर्म्मानुष्ठानं
वा इति त्रितयं समागतं सम्पन्नितम् । प्रागुक्तत्रितयमेलनत्रितयसदृशमित्यर्थः । तथाच
शकुन्तला यथा सदपत्यमिदं यिक्षं भवान् विधिरिवेति भावः । यद्यपि यद्वेदमत्यं शकु-
न्तलादुष्मन्तसम्यं तथा यिक्षं अर्थादिधिभ्यो न लभ्यत इति महदैषम्यं भवति तथापि यथा
यथा विधयोगात् विधिर्नान्यविधेयः कर्म्मानुष्ठानं वा लोकप्रसिद्धते तथायं शकुन्तलादुष्मन्त

राजा ॥ भगवन् प्रागभिप्रेतार्थसिद्धिः पश्चाद्दर्शनमित्यपूर्वः खलु योऽनुग्रहः । कुतः (१७८)

उदेति पूर्वं कुसुमं ततः फलं
घनोदयः प्राक् तदनन्तरं पयः ।
निमित्तनैमित्तिकयोरयं क्रम-
स्तव प्रसादस्य पुरस्तु सम्पदः ॥ (१७९)

माल ॥ आयुष्मन् एवं प्रसीदन्ति विश्वगुरवः । (१८०)

राजा ॥ भगवन् इमामाज्ञाकरीं वो गान्धर्वेण विवाहविधिनो-
पयम्य कस्यचित् कालस्य बन्धुभिरानीता स्मृतिशैथिल्यात् प्रत्यादि-

---

सम्बन्धाङ्गवानेपि भागुपतिश्वशुरत्वमवेक्ष्यं द्रष्टव्यम् । तथाचोक्तं देवलेन । नास्ति ह्यश्रद्धानस्य धर्मफलमे प्रयोजनमिति । यद्यपाणिपरिगृहीतेन च । विवेहि सम्प्रदि-ष्टेति ॥

(१७८) राजेति । अभिप्रेतस्य अभिलषितस्य सिद्धिर्निष्पत्तिः । सिद्धिर्निष्पत्तियोगयो-रिति विश्वः । दर्शनं युष्माकमिति शेषः । कुतः केनो वो युष्माकमनुग्रहोऽनुग्र्यो निर्वित्व* ॥

(१७९) वैचित्र्यं दर्शयति उदेतीति । पूर्वं प्राक् कुसुमं पुष्पमुदेति उद्गच्छति ततोनन्तरं फलं भवतीति शेषः । तथा प्राक् पूर्वं घनोदयो मेघोदय स्तदनन्तरं तत्पश्चात् पयो वारि आयत इति शेषः । निमित्तं हेतुः नैमित्तिकं निमित्तजन्यं तयोः कारणकार्यभावयोरयं क्रम पौर्वापर्यक्रम सर्वत्र दृष्ट इति शेषः । तव प्रसादस्य त्वदनुग्रहस्य तु पुरो अग्रे सम्पदः प्रकृष्टफलत्वादिलाभरूपाः सम्पत्तयो भवन्तीति शेषः । अत्र दृष्टान्तोऽलङ्कारः । संसृष्टिर्वा मतम् ॥

(१८०) मातेति । प्रसीदन्ति अनुग्रहं कुर्वन्ति । विश्वगुरवो विश्वेषां निखिलानां गुरवो अग्र-गण्याः । उक्तञ्च कण्वपात्रकर्त्वं जगदिति ॥

यन्मयरात्तोऽपि तत्रभवतो दुष्मन्तगोत्रस्य कण्वस्य पश्चादेनामङ्गुरीयक-
दर्शनाच्छ्रुतिरूढपूर्वामिवगतोऽर्थं तच्चित्रमिव मे प्रतिभाति । (१८।)

यथा गजे साधुमदप्रदर्पे
कस्मिन्नपि क्रामति संशयः स्यात् ।
पदानि दृष्ट्वा भवेत् प्रतीति-
रयाविधौ मे मनसो विकारः ॥ (१८२)

भारीव ॥ यस्य बलमालापराधगङ्ख्या सम्मोहोऽपि व्युपपन्न एव भूयताम् । (१८२)

(१८।) राजेति । आपाण्डुरौ दाढौ शकुन्तलाविम्बम् । गाम्भीर्येण कथोन्द-
घनपूर्वकेन । विषादविधिना विषादेतिकर्तव्यतया । उदयस्य परिशेष कस्मिन्
कालेति घनन्तरमिति शेष । वस्तुनिर्णयस्य । स्मृतिमोषिरूपात् स्मृतिध्वंसात् ।
अपराध. अलाघव. । कस्य दुष्मन्तस्य इत्यत आह युष्मदित्यादि । युष्मद्गोत्रस्य
भवतुल्यस्य । दुष्मन्तगोत्रजननकुलानीत्यमर । अत्र युष्मद्गोत्रस्येति पैठुरन्ये
तदयुक्तापयति यद्वाभारतम् । यथा दुष्मन्तोपाख्याने मद्रर्षि काश्यपं प्रति
कण्वं तपोधनम् । अस्मिनोमत्वसंबोधनं पदात्तिगजसङ्ख्यानम् । अवस्थाय वनद्वारि
सेनामिदमुवाच च इति । अत्र अलमापत्वमवगते यस्मात् गोत्रमादिपुरुषोऽस्येति
सगोत्रमन्वाचोपक्रमितः । एतां मयूनजां कठपूर्वामिवगत इत्यन्वयः । कठपूर्वां परि
क्षीणपूर्वाम् । तत् स्मृतिवैचित्र्यं पुनरङ्गुरीयदर्शनात् अरण्यमित्येतत् । चित्रमिव
आश्चर्यमिव । प्रतिभाति प्रकाशते ॥

(१८२) यथेति । साधुमदश्च प्रशस्तप्रत्यूषं दृप्तं यश्च स तस्मिन् कस्मिंश्चित्
गजे दन्तिनि क्रामति गच्छति इति संशयो गजोऽयं न वेति सन्देह. स्यात् व्यवधानन्तरं गते
सतीत्यर्थ. । पदानि पदविन्यासानि दृष्ट्वा यथा प्रतीतिर्गजतया प्रत्ययोभवेत् मम मनश्-
चेतसो विकार स्मृत्यविधत्वप्रकार. । उपजातिर्वृत्तम् ॥

(१८१) भारीति । प्रकृष्टा भरम् । सम्मोहो भ्रम । उपपन्नो युक्त । भूयता सम्मोह
औजमिति शेष ॥

राजा ॥ अवहितोऽस्मि । (१८४)

मारीष ॥ यदैवाप्सरस्तीर्थावतरणात् प्रत्याख्यानविक्लवा शकुन्तला मादाय दाक्षायणीमुपगता मेनका तदैव ध्यानादवगतवृत्तान्तोऽस्मि दुर्वासस: शापादियं तपस्विनी सद्धर्मचारिणा त्वया प्रत्यादिष्टा स चाङ्गुरीयदर्शनावसान: शाप इति । (१८४)

राजा ॥ श्रोष्यामि तावत्प्रगतम् ॥ एष वचनीयान्मुक्तोऽस्मि । (१८६)

शकु ॥ सगतम् ॥ दिट्ठिआ अकारणपच्चादेसी ण अज्जउत्तो अ एण वुत्तं आत्ताणं सुमरेमि अधवा ण खुदो सुअदिअहाए मए अअं सावो जदो एदीहिं अच्चाअरेण सन्दि

---

(१८४) राजेति । अवहित- सावधान- ॥

(१८५) मारीति । अप्सरस्तीर्थावतरणात् अप्सरस्तीर्थात् तदभिन्नो भावो द्रव्यवत् प्रकाशत इति न्यायात् । भूमिभवतीर्थादप्सरोयोनेरित्यर्थ । तीर्थं योनौ जलावतारेऽपीति हलायुध: । आदायेत्यनेनान्वय । तथाच मेनकादेशात् काश्यपाप्सरोयोनि भवत् सखी प्रत्याख्यान समये भूमिभवतीर्थं शकुन्तलामानीय मेनकाप्रेषितपतिमेनकातस्तस्या सकाशात् तामादाय दाक्षायणीमुपगतेतितात्पर्यम् । अतएव वयस्य क पतिव्रतां तामन्य परामर्शं सहसहते मेनका किल सख्यास्ते कल्याणमिच्छेति तत्सखीजनादभिज्ञ श्रुतवान् तत्कथरीभिरुक्तवानीतेति हृदयमायच्छते इति राज्ञा अनुमिता । सम्प्रति विविक्त अणोरीक्षणस्य मतिबोधो हस्तेन मिश्रकेश्यापि राजकतानुरागस्य तत्त्विकत्व सङ्गीकर्ता । प्रत्याख्यानेन भवत्कृतनिराकरणेन विक्लवां विक्लवताम् शकुन्तलामादाय मेनका यदैव दाक्षायणीमदितिमुपगता तदैवध्यानात् चिन्तनात् अवगतवृत्तान्तो विदितसाकल्योऽस्मि किमित्याकाङ्क्षायामाह दुर्वासस इत्यादि । तपस्विनी अकृतकन्याहौ । सद्धर्मचारिणा भर्त्रा । प्रत्यादिष्टा प्रत्याख्याता । अङ्गुरीयेति अङ्गुरीयदर्शनादवसानं समाप्तिर्यस्य स: ॥

(१८६) राजेति । सोष्यामं सहीर्घनिश्वासम् । एषोऽहम् । वचनीयाविश्वासादात् ॥

दिट्ठिआ सो राआ जइ तुमं ण सुमरेदि तदा एदं अङ्गुलीअअं दंसेस्सिदि । (१८७)

मारीष ॥ शकुन्तलां विलोक्य ॥ यत्ते विदितार्यास्ति तदिदानीं सहधर्मचारिणं प्रति न त्वया मन्युः करणीयः । पश्य (१८८)

यामादस्य प्रतिहता स्मृतिलोपहेतो-
र्भर्त्र्यपेततमसि प्रभुता तवैव ।
छाया न मूर्च्छति मलोपहतप्रसादे
शुद्धे तु दर्पणतले सुलभावकाशा । (१८९)

राजा ॥ यथाह भगवान् ।

---

(१८७) दिट्ठिआ इति । दिष्ट्या इत्यादि । दिष्ट्या अकारणप्रत्यादेशो नार्य-पुत्र । न पुनः शप्तमात्मानं स्मरामि यथा न शुत शून्यहृदयया मयार्य मापः । यत सखीभ्यामत्यादरेण सन्दिष्टासि स राजा यदि त्वां न स्मरिष्यति तदा एतदङ्गुलीयकं दर्शयिष्यसीति । अकारणेति । अकारणपरित्यागीत्यर्थः । शप्तं मापप्रदविषयम् । शून्यहृदयया अवधिचित्तहृदयया । भर्तृप्रेरितमनसेत्यर्थः । न शुत इति । शुतोऽवधारितमित्यस्य व्याख्या यत इति । सन्दिष्टा उपदिष्टा तत्प्रकारश्चित्यन्वयः ॥

(१८८) मारीति । विदितार्था विदितवाक्यार्था । सहधर्मचारिणं भर्तारम् । मन्युः क्रोधः मन्युर्हि न्ये क्रतौ क्रोधीत्यमरः ॥

(१८९) मापादिति । मापात् दुर्व्वाससः मापात् भर्तरि स्मृतिलोपात् विस्मरणात् स्मृते स्नेहशून्ये सति त्वं प्रतिहता प्राप्तप्रतिघातासि तत्र नक्षिप्तासीत्यर्थः । भर्तरि त्वयेतमपगतं तमो मोहो यस्य स तथोक्ते सति तवैव प्रभुता योग्यता भर्तृसहवासविषये इति शेषः । तथाहि मद्येन उपहतो विनष्ट प्रसादः स्वच्छता यस्य तत् तथोक्ते दर्पणतले दर्पणसदृशे । अत्र स्वरूपयोरभेदो रूपकमलंकारः । छाया प्रतिबिम्बं । छाया सूर्यप्रिया कान्ति प्रतिबिम्ब मनातप इत्यमरः । न मूर्च्छति न पतति शुद्धे निर्मले तु दर्पणतले छाया सुलभावकाशा सुखभोऽव्याघातलब्धो ऽवकाशः स्थानं यस्या सा तथोक्ता भवति । अत्र ऽर्थान्तरोऽलङ्कारः । वसन्ततिलकं वृत्तम् ॥

मारीषः ॥ वत्स कच्चिदभिनन्दितस्त्वया अस्माभिर्विधिवदनुष्ठित-जातकर्मादिक्रियः पुत्र एष शाकुन्तलेयः । (१२१)

राजा ॥ भगवन् अत्र खलु मे वंशप्रतिष्ठा । इति शावकं कण्डेन गृह्णाति । (१२२)

मारीषः ॥ आविनं चक्रवर्त्तिनमेनमवगच्छतु भवान् । मन्यते । (१२३)

रथेनानुद्घातस्थिमितगतिना तीर्णजलधिः
पुरा सप्तद्वीपां जयति वसुधामप्रतिरथः ।
दृढायं सत्त्वानां प्रसभदमनात् सर्व्वदमनः
पुनर्यास्यत्याख्या भरत इति लोकस्य भरणात् ॥ (१२४)

राजा ॥ भगवत्कृतसंस्कारेऽस्मिन् सर्व्वमाश्वंसे । (१२५)

---

(१२०) राजेति । सुगमम् ॥

(१२१) मारीति । कच्चिदितीष्टप्रश्ने । कच्चित् कामवेदन इत्यमरः । अस्माभिर्विधिवत् यथाविधि अनुष्ठिता कृता जातकर्मादि क्रियायस्य स एष शाकुन्तलेयः भरतनामकस्तव पुत्रस्त्वया अभिनन्दितः कच्चित् ॥

(१२२) राजेति । अत्र खलु अत्रैव पुत्रे इत्यर्थः । वंशप्रतिष्ठा कुलस्य गोरत्नम् । प्रतिष्ठा गोरत्ने चिताविति मेदिनी ॥

(१२३) मारीति । आविनं तविष्यन्तम् । चक्रवर्त्तीं भविष्यतीत्यवगच्छतित्यर्थः ॥

(१२४) रथेनेति । अनुद्घातेन अभूतपूर्वस्खलनेन स्थिमिता अक्षुब्धा गतिर्यस्य स तेन रथेन । स्थिमितोऽक्षुब्धे क्लिन्ने इति विश्वः । विमानेनेति यावत् । तीर्णजलधिर्लङ्घितार्णवः अप्रतिरथोऽप्रतिद्वन्द्वीव सन् अयं शाकुन्तलेयः पुरा अग्रे सप्त-द्वीपां वसुधामष्टमीं जयति । यावत् पुराभ्या भव्य इति भविष्यसि स्त्री । अथ दृढ सत्त्वानां प्राणिनां प्रसभदमनात् बलेन शासनात् सर्व्वदमनः सर्व्वदमनसंज्ञोयं पुनर्लोकस्य भुवनस्य भरणात् भरत इति आख्यां संज्ञां यास्यति प्राप्स्यति । इदं विश्वरिणी नाम छन्दः ॥

यदिति ॥ दुमाए दुहिदिमनोरहसम्पत्तीए कण्णो दाव सुदवित्थारो करीयदु दुहिदिवच्छला मेणआ उण इध मं परिअरन्ती सञ्चिहिदा ज्जेव । (१९६)

यद्यु ॥ यत्नगतम् ॥ मणोगदं मे वाहरिदं भअवदीए । (१९७)

मारीच ॥ तप.प्रभावात् सर्वमिदं प्रत्यक्षं तवभवतः कण्वस्य । (१९८)

राजा ॥ अतः खलु समानतिक्रुद्धो मुनिः । (१९९)

मारीच ॥ तथाप्यसौ दुहितृ· स्वपुत्रायाः पत्या परिग्रहमिय-मवगामि. आवधितव्यः । क. कोऽत्र भोः । (२००)

---

(१९५) राजेति । भगवता भवता तपःसंस्कारे सफले अस्मिन् पुत्रे सर्वं भवद्भ आयंसे सम्भावये ॥

(१९६) यदितिरिति । दुमाए इत्यादि । अस्या दुहितृमनोरथसम्पत्ते कण्व-स्तावत् श्रुतविस्तारं क्रियताम् । दुहितृवत्सला मेनका पुनरिह मां परिचरन्ती सन्निहितैव । दुहितुर्मनोरथस्य प्रियसमागमाभिलाषस्य सम्पत्ते परिणामस्य श्रुतो विस्तारो येन स तथोक्तं क्रियताम् । अस्या दुहितृमनोरथसम्पत्ते विस्तारः श्राव्यतामित्यर्थः । दुहितृवत्सला दुहितृस्नेहवती परिचरन्ती शुश्रूषमाणा सन्निहिता समीपस्थिता ॥

(१९७) यद्यु इति । मणो इत्यादि । मनोगतं मे व्याहृतं भगवत्या । भगवत्या अदित्या ॥

(१९८) मारीचेति ॥ तप प्रभावात् तप शक्त्या । प्रत्यक्षमनुभूयमानम् । अस्मभ्यतो नैष्ठिकब्रह्मचारित्वेन श्लाघ्यस्य ॥

(१९९) राजेति । अतः तप प्रभावविदिताखिलवृत्तान्तत्वात् । खलु सम्भवे । अनतिक्रुद्ध दुर्व्यांस प्रापकतत्वेन मदपराधाभावादिति भाव ॥

(२००) मारीचेति । तथापि तप प्रभावप्रत्यक्षीकृतायेपवृत्तान्तत्वेऽपि । दुहितृ मद्भ-वत्सलाया । पत्येत्यादि । भर्तृकुलपरिग्रहरूप मियमित्यर्थः । क क इति । भोः अत्र क क वर्तते इति शेष ॥

प्रविश्य शिष्य ॥ भगवन्नयमस्मि । (२०१)

मारीच ॥ वत्स गालव मद्वचनादिदानीमेव वैहायसयागत्या तत्रभवते कण्वाय प्रियमावेदय तया पुत्रवती शकुन्तला दुर्वासस: शापनिवृत्तौ ऋतिमता दुष्यन्तेन परिगृहीतेति । (२०२)

शिष्य ॥ यथाज्ञापयन्ति गुरव: । इति निष्क्रान्त । (२०३)

मारीच ॥ राजान मति ॥ वत्स त्वमपि सापत्यदार: सक्षुरा-प्वण्डलस्य रथमारुह्य स्वां राजधानीं प्रतिपद्यस्व । (२०४)

राजा ॥ अनुगृहीतोऽस्मि ॥ यदाज्ञापयति भगवान् । (२०५)

मारीच ॥ सम्प्रति हि (२०६)

तव भवतु विभोजा: प्राज्यवृष्टि: प्रजासु
त्वमपि विततयज्ञो वज्रिणं प्रीणयास्तम् ।
युगशतपरिवृत्तैरेवमन्योन्यकृत्यै-
र्जयतसुभयलोकानुग्रहश्लाघनीयै. ॥ (२०७)

---

(२०१) प्रविश्येति । अस्मि अहमिति शेष ॥

(२०२) मारीति । वैहायसया आकाशोचितया । पुंस्याकाशविहायसी इत्यमर । आवेदनीयमाह यथेत्यादि इत्यन्तम् ॥

(२०३) शिष्य इति । सुगमम् ॥

(२०४) मारीति । सापत्यदार अपत्यदारै सहित । आखण्डलस्य इन्द्रस्य । राजधानी प्रधाननगरीम् । प्रधाननगरी राज्ञा राजधानीति कथ्यते इतिशब्दार्णवे । प्रतिपद्यस्व गच्छ ॥

(२०५) राजेति । सुगमम् ॥

(२०६) मारीति । सम्प्रति एवमेवं भवतीति लोकोक्तेनान्वय ॥

(२०७) तवेति । वेवेष्टीति विट् विष्ट व्याप्तकमोजस्केतो यस्य स विभोजा इन्द्र । इन्द्रो मरुत्वान् मघवा विभोजा: पाकशासन इत्यमर । तव प्रजासु प्राज्या प्रचुरा वृष्टियस्मात् स तथोक्तो भवतु । प्रभूत प्रचुर प्राज्यमित्यमर । त्वमपि विततो विस्तृतो यज्ञो येन स तथाभूत सन् वज्रिण शक्रस्य यत्र मर्त्यांश्च प्रीणय यज्ञभागैरिति शेष ।

राजा ॥ भगवन् यथायक्ति श्रेयसे यतिष्ये । (२०८)

मारीष ॥ वत्स । किन्ते भूयः प्रियमुपहरामि । (२०९)

राजा ॥ अतः परमपि प्रियमस्ति तथाप्येतदस्तु । (२१०)

प्रवर्त्तता प्रकृतिहिताय पार्थिव-
सरस्वती श्रुतिमहतां न हीयताम् ।
ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः ॥ (२११)

इति निष्क्रान्ता सर्व्वे । यवनिका पतति ॥ (२१२)

इति महाकविकालिदासविरचितमभिज्ञानशकुन्तलं नाम
नाटकं समाप्तम् ॥

युगपत् व्याप्य परिवृत्तैर्जातविनिमयैरहया उभय लोकयो स्वर्गमर्त्ययोरुत्पद्येण स्थितचेष्टया श्लाघनीयै प्रशंसनीयैः । तत्र कृत्यै स्वर्गस्थितचेष्टया यज्ञिय तु मर्त्यस्थितचेष्टया श्लाघनीयैरित्यर्थः । एवमुक्त प्रकारैरन्योन्यकृत्यैः परस्परकर्म्माभिजयतस्तत्कर्मेण वर्त्तेथा युधामिति शेष । मालिनि नाम वृत्तमिदम् ॥

(२०८) राजेति । यक्तिमनतिक्रम्य यथायक्ति । अनतिक्रमार्थेऽव्ययीभावः । श्रेयसे कल्याणाय ॥

(२०९) मारीति । भूय पुनस्ते तव सम्बन्धे किं प्रियमुपहरामि उपनयामि ॥

(२१०) राजेति । अत सापत्न्यदारसमागमात् परमितरत् । अपि मन्ये । इदानीं गृहीतराजभूमिक एव निजवचनमाह तथापीत्यादि । एतदारभ्य वस्तुतो दुष्मन्तएव तदानीमेवमुक्तवानिति न मन्तव्यम । तथापि दुष्मन्तेनेतर प्रियस्यानभ्यर्थनीयत्वेपि । एतत् वक्ष्यमाणम् ॥

(२११) प्रवर्त्ततामिति । पार्थिवः क्षितिप प्रकृतीनां प्रीरवर्गाणा हिताय प्रवर्त्तता प्रवृत्तिमान् भवन् । प्रकृतिर्गणसाम्ये स्यादमात्यादिस्वभावयो । योनौ स्त्रिये प्रीरवर्गे इति मेदिनी । तथा श्रुतौ श्रवणविषये महति प्रधाना सरस्वती वाणी कविकृतभारतीत्यर्थः । न हीयता लोकर्नात्यज्यताम् । अपिएवं आत्मना भवतीत्यात्मभूरब्रह्मजन्मपरित्यक्त. अत परिगतो प्राप्त शक्तिर्जन्मनिवारणसामर्थ्यं यस्य स । परिगत त्रिषु प्राप्ते विष्णुपुराण

वेष्टिते इति मेदिनि । अथवा परिगताः परितःस्थिताः भक्तयोमाश्चाद्या यस्य सः । यद्वा परिगतभक्तिर्गौरीयुक्तः । भक्तिरन्यान्तरे गौर्यामिति मेदिनि । नीलकोऽपि यिो नम स्पुनरंशं पुनरुल्लिखितं समयत् आत्मवदिवाचरेत् । नान्दिवदेतेनापि भरत. कविध्वाभि-प्रेतार्थमाघात्तेऽपीति द्रष्टव्यम् । रुचिरा नाम छन्दोमेतत् । तदुक्तम् । सभौ सजौ गिति रुचिरा चतुर्भिरिति । यद्वेतस्तु मल्लिनाथकल्पितवृत्तनामकारो भादिगुरु. प्लुतादिवद्गुरुं. । जोगुरु-मध्यगतोलघुमध्य. सोऽन्तगुरु कथितोऽन्त लघुश्च. । गुरुरेको गकारस्तु लकारो लघुरेकक

* स्तु कः ॥

(२१२) इतीति । एवञ्चो यत्याभिनयं. । सर्वे भरताः । षष्ठ परिच्छेदः ॥

नवाष्टसप्तषड्भांशुमिताब्दे यक्षभूपते. ।
यज्ञानवम्यां टीकेयं समाप्तिपदमागता ॥ ३
यद्वीपाख्यभूमौ श्रीमद्भागीरथीतटे ।
पार्श्वे पूर्वस्थलौ नाम विदि पाश्वस्थलौ मम ॥
इति श्रीलक्ष्मणनाथ यज्वसूनोराभिज्ञानशकुन्तलटीकायां
मत्तेषिकाख्यायां सप्तमाङ्कविवरणम् ।
समाप्तोऽयं ग्रन्थ. ।

शुद्धिपत्रम् ।

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
२	...	४ ..	मन्योऽपि ..
२	...	१८ ..	सूर्येन्द्र ...
२	...	२४ ...	वर्त्तमाने ...
२	..	१९ ...	वाभिस्तरेण ...
२	...	२९ ...	तस्मादमी ...
४	...	११ ...	वध ...
५	...	११ ...	नले ...
५	...	१४ ...	नले ...
६	...	२७ ...	पुष्पङ्गे ...
१४	...	३ ...	समो ...
१४	...	९ ...	यार्षा ...
१७	...	१२ ...	दीर्घो ...
१७	...	२४ ...	मङ्क्त ...
१८	...	१६ ...	रत्नाल्प ..
१९	...	२७ ..	यन्वयसे ..
१९	..	२९ ...	नित्यमरः ...
१९	...	२९ ...	साध्य ...
२०	...	११ ...	सङ्ग ...
२०	...	१८ ...	यमे ..
२२	...	१८ ..	यणस्थि ...
२२	...	१३ ...	सभय ...
२५	..	११ ..	योवन ..
२९		१३	भ्रमर

५७		पञ्चो	अयुक्तम्		युक्तम्
१०	...	१७	अद्यमां		अद्यणां
११	.	२०	पहेदि	..	पहेलि
११		२१	आमनन्त		आमनु
१२		८	ओय	..	ओये
११	...	२६	इतिविषयं	...	इतिविषयं
१६		१२	विरोधयं		विरोधयं
१७		१२	अवयव.	..	अवयव.
१७		२४	मङ्ग	.	मङ्गं
१७		२४	घघो	.	घघो
५०		१	घघो		अनन्तगंत.
५०	...	२७	... अनन्तगंत.		
५१	...	१६	विवेदि		विवेदि
५३	...	१७	नाभ्यां		नाभ्यां
५३	...	१७	अपाणि		अपाणि
५६	...	२४	नक्षि		नक्षि
५७	...	२५	नक्षि		नक्षि
५१	...	७	मङ्गे	.	मङ्गे
५३	...	१७	उन्ना	..	उन्ना
५४	...	२५	अधोद्यमे	.	अधोद्यमे
५५		२१	अन्यतामु		अन्यतामु
५५	...	२१	अधोक्षेन		अधोक्षेन
५५	.	२८	अधाभू	...	अधाभू
५६	..	१	अ छता	..	अछता
५६	...	६	गमनः		गमन
५६	...	२८	दमिता		दमिता
६०		१५	पैशुखं		पैशुन्यं
६१		१५	खूयाय		खूयार्थं
६१	..	१०	विखर्थं	.	विश्वर्थं
६१		१०	विखरूप	...	विश्वरूप
६१		१२	मखवत्त	..	मखवत्त

पृष्ठ	पङ्क्तौ	अशुद्धम्	शुद्धम्
६१	२४	उपेन्द्र	इन्द्र
६२	१२	स्वनियोग	स्वनियोग'
६३	३	षडंदयिस्य'	षडंदस्य
६३	१३	तिदू	विदू
६६	२१	समुस्या	समुपस्या
६७	२	स्वभावा	स्वभावा
६७	१६	निमित्तेन	निमित्तेन
६७	२१	माव	भाव
६८	४	दत्तया	दत्त्या
७१	२६	भूजे	भुजे
७२	१२	षत्वापा	षत्वापा
७४	७	आणत्तिष्ठदो	आणत्तिष्ठते
७५	२६	मलम	मूलम्
७८	२८	समदान	समदना
८१	१२	इन्द्र	इन्दु
८३	७	मवितव्यम्	भवितव्यम्
८३	२२	ननून	नणून्
८३	२३	ऽभ्यचता	ऽभ्युचता
८५	१८	स्थिर	स्थिर
८५	१८	निध्वान	निधान'
८७	१०	मण	मण
८८	२२	रूपद्रुत	रूपद्रुस
८९	१	वधु	कधु
९४	२६	स्थाने	स्थाने
९७	२१	इत्यादि	इत्यादि
९८	१५	मायान	मायस
९८	२९	षभ्युप	अभ्युप
९९	२	षवरुद्धेन	उपरुद्धेण

शुद्धिपत्रम् ।

पृष्ठे		पङ्क्तौ		अशुद्धम्		शुद्धम्
१०७	...	१	...	मे	...	नः
१००	...	२६	...	तन्मषेयतु	...	मर्षयतु
१०२	...	८	...	दति	...	इति
१०७	...	४	...	कटिनं	...	कठिनं
१०८	...	१०	..	चन्धुको	...	चन्धुको
१०८	...	२०	...	पिय	...	प्रिय
१०८	..	२१	...	दचन	...	दर्शन
१०८	..	२१	...	पिपाष	...	पिपासा
१०७	...	३	..	दवेन	...	दैवेन
११०	...	२२	...	दवेन	...	दैवेन
१११	..	२२	...	सक्षा	...	सक्षा
१११	...	२४	...	गगण	...	गगन
११५	...	५	...	एढं	...	एदं
११५	...	७	...	दाणि	...	दाणिं
११५	...	२५	...	कोपगर्भो	...	कोपगर्भो
११५	...	२३	...	चानन्वये	...	चामन्वये
११६	...	२३	...	सुनादिना	...	सुष्ठनादिना
११७	...	२५	.	रङ्गमे	...	रङ्गभूमे
११८	...	२२	...	निरङ्गयन्ति	...	निरङ्गयन्ति
१२१	...	१२	...	प्रतिपत्तृस्यते	...	प्रतिपत्तृस्यते
१२१		१४	..	नीमेत्यथं	...	नीयेत्यर्थं सापत्
१२१	...	२१	...	मोड	...	मोड
१२१	...	१	...	कथमिति	...	कथमतिथिं
१२१	..	२	...	दङ्गोष्यति	...	यङ्गोष्यति
१२५	...	१३	...	चाग्रथिड	..	यमाग्रथिड
१२६		३	..	क्रामति		क्रामतः
१२६	..	६	...	एष	..	यथएव
१२६	...	१७		यमाद्राथिड	...	यमाद्रथिड
१२६	.	१७	.	अमेति	...	अमेति
१२७		१२		यदि		यदि
१२८		२३	...			

पृष्ठे		पङ्क्तौ		अशुद्धम्		शुद्धम्
१२८	...	२८	...	वंधा	...	वंधा
१३०	...	२४	...	दण्ड	...	दण्ड
१३१	...	३	...	दति	...	इति
१३४	...	४	...	सविषयम्	...	सविषय
१३५	...	१३	...	नलिनी	...	नलिनी
१३७	...	२०	...	कथ	...	कथ्
१३८	...	८	...	सछोषी	...	सछिषी
१३८	...	१८	...	निषीदतम्	...	निषीदतम्
१४१	...	१४	...	काष्ठादि	...	काष्ठादि
१४१	...	१५	...	पुष्कारा	...	पुष्कारा
१४२	...	११	...	ग्टङ्गिणी	...	ग्टङ्गिणी
१४३	...	१६	...	भूषण	...	भूषण
१४४	...	८	...	यस्मिंछेत्र	...	यस्मिंछेव
१४४	...	१७	...	नियतेव	...	नियतेष्ट
१४५	...	१	...	क्लृप्त	...	क्लृप्त
१४५	...	७	...	क्लृप्तानि	...	क्लृप्तानि
१४५	...	८	...	समिद्धन्तो	...	समिद्धन्तो
१४५	...	२१	...	कणोल्लसा	...	कणोल्लसा
१४६	...	१	...	वत्से	...	वत्से
१४६	...	४	...	वत्सो	...	वत्सो
१४६	...	०	...	भोभो	...	भोभोः
१४७	...	५	...	सविस्मया	...	सविस्मयमा
१४८	...	१२		सत	...	मत
१५०	...	२३	...	पन्यन	...	पन्थान
१५१	...	१	...	युपेत्य	...	युपेत्य
१५२	...	१२	...	एँधा	...	एषा
१५१	.	१५		वचनम्	...	वचनम्
१५२	...	१०		तुमं	...	तुमं

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१५२	१७	यिस्याभि	यिस्याभि
१५३	१	यत्मे	यत्ते
१५३	१३	तथा	तया
१५४	२३	नालिकिनी	नालीकिनी
१५५	१०	पुरस्कृत्य	पुरस्कृत्य
१५६	५	शुन्यूषस्व	शुन्यूषस्व
१५६	२२	जनश्चेति	जनयेति
१५६	२४	प्रतिपौन्य	प्रतीपोन्य
१५७	१३	घ्यउन	व्यउन
१५७	१८	एत	एत
१६०	७	मान्य	मान्यै
१६२	६	मीक्षा	मोक्षा
१६२	१२	स्वीकार	स्वीकार
१६३	१५	प्रस्थेष्ट	परिष्ठेष्ट
१६५	१६	निश्चयो	निश्चय
१६५	१८	युद्धि	बुद्धि
१६५	२२	रुपमति	रुद्रपति
१६७	२०	प्रपते	प्रुपते
१६८	११	जन्य	जन्यु
१६८	१२	दे खो	द्र खो
१६८	२१	उत्तर्षेण	पतृष्वेण
१६८	२१	नाम्	नाम्
१७०	१	विद्यमन्त्र	विद्यमन्त्र
१७०	१७	स्वास्त्र	स्वास्त्र
१७१	२	अन्यायस्त्रो	अम्बायस्त्रो
१७१	१८	द्रास्त्र	द्रास्त्र
१७२	१२	भूत	भूत
१७२	१८	निर्देशं	निर्देशो

पृष्ठे		पङ्क्तौ		अशुद्धम्		शुद्धम्
१०१	...	४	...	तत्र	...	भत्र
१७१	...	६	...	गटकीत	...	गटकीतः
१७७	...	३	...	विरधा	...	वीरधा
१७७	...	२१	...	द्रष्ट	...	द्रष्टु
१७८	...	२०	...	तथापि	...	तथापि
१७३	...	४	...	विष-	...	त्रिप-
१७६	...	३	...	व्ययमो	...	व्ययमि
१७८	...	२४	...	देद	...	देह
१८०	...	१४	...	त्यन्	...	त्यम्
२८०	...	१६	...	भूसे	...	भूमे
१८१	...	१	...	सिद्धि	...	सिद्धि
१८१	...	१५	...	प्रकागम्	...	प्रकाग्यम्
१८५	...	५	...	माद्धर्यं	...	माद्धर्यं
१८५	...	१६	...	त्यादी	...	त्यादि
१८५	...	२२	...	ग्रप	...	ग्रप
१८७	...	६	...	व्यवस्यन	...	व्यवस्यन्
१८७	...	१३	...	म्यंयाः	...	य्यंयाः
१८८	...	६	...	भचत्रिय	...	भचत्रिय
१८८	...	१६	...	तनं	...	नसं
१८८	...	१६	...	ऊच	...	ऊढ
१८८	...	२३	...	यस्या	...	यस्याः
१८८	..	२४	...	पतूसे	...	पतूसे
१८६	..	१८	...	दस्य	...	दसु
१८६	...	१८	...	सुता	...	सुता
१६०	...	६	...	खुगत	...	स्वगत
१६०	...	२६	...	व्यय	...	व्यय
१६१	...	१२	...	याशे	...	याशे
१६१	...	१७	..	मत्री		मत्री

शुद्धिपत्रम् ।

पृष्ठे		पङ्क्तौ		अशुद्धम्		शुद्धम्
१८१	...	२३	.	अन्या	...	शून्या
१८२	..	२५		तवात	...	तावत्
१८३	.	१४	.	दीर्घापाङ्गो	..	दीर्घापाङ्गो
१८३	.	२३	.	अधु	..	मधु
१८३	..	२४	..	भृतं	...	मृतं
१८३	..	८	.	उर्व्वं	..	उर्व्वं
१८४	...	२२	.	मत्यंत्य	..	मपत्य
१८६	_	१६	..	मङ्ग	..	माङ्ग
१८६	.	२१	..	यस्या	...	यस्याः
१८८	..	१	..	साहूपम्	..	साहश्यम्
१८८	...	७	..	सम्पाय	..	सन्धाय
२००	...	२४	...	मित्यर्थं	...	मित्यर्थः
२०१	...	२	...	यौवनै	..	यौवने
२०१	...	२४	...	स्वातन्त्र्य	...	स्वातन्त्र्या
२०२	...	८	..	पराङ्मणी	...	पराङ्मुखी
२०३	...	२०	...	विकल्प	..	विकल्पे
२०४	..	१९	..	व्यक्तै	...	व्यक्तै
२०५	..	१	...	मनुन्नषा	:	मनुन्नता
२०५	...	१	..	चिन्तन्यसि	..	चिन्तयसि
२०५	...	१९	...	कर्णं	...	कर्णं,
२०७	...	८	...	सिद्य	...	सिद्य
२०८	..	१८	..	'न्नया	...	न्नुया
२०८	.	१४	..	गत्वि	...	गात्वि
२०८	..	१०	..	धुम्वि	..	धुम्वि
२१५	..	१६	..	आधीनिनि	...	आधीदिनि
२१५	...	२५	...	षडस्र	...	षडस्र
२१६	.	११	.	डरेम्र	..	डरेम्र
२१६		१३		सरेडः	..	सारेडः

पृष्ठे		पङ्क्तौ		अशुद्धम्		शुद्धम्
२१८	...	१	...	मसन्ना	...	सन्ना
२१८	...	११	...	तथा	...	तया
२१४	...	११	...	शक्तपूर्व	...	शक्तं पूर्व
२१८	...	२७	...	प्रच्छन्न	...	प्रच्छन्ना
२१९	...	१	...	दृष्टे	...	दृष्टे
२१९	...	१६	...	दृत्तं	...	दृत्तं
२२१	...	२०	...	अकौतूहलं	...	सकौतूहलं
२२५	...	८	...	प्रश्चत्तापसाहय	...	पश्चात्तापसहय
२२५	...	१७	...	उन्मस्कत्वात्	...	उन्मनस्कात्वा
२२६	...	९	...	हेतु	...	हेतु
२२६	...	११	...	स्वयं	...	स्वयं
२२६	...	१४	...	धारयन्	...	धारयन्
२२८	...	८	...	प्रति	...	इति
२३०	...	२४	...	दृष्टि	...	दृष्टि
२३०	...	२६	...	आदिश	...	आदिष्टा
२३१	...	८	...	प्रतिदृति	...	प्रतिदृति
२३१	...	१०	...	लेखम	...	लेखन
२३१	...	१६	...	स्वप्न	...	स्वपन
२३१	...	२१	...	तयाच	...	तया
२३१	...	२१	...	मारुतेन	...	मारुतेन च
२३५	...	१	...	परामष्टु	...	पराक्रष्टु
२३५	...	१३	...	परामष्टु	...	पराक्रष्टु
२३५	...	१८	...	प्रतिबधो	...	प्रतिबोधो
२३५	...	२०	...	समाश्वासित	...	समाश्वसित
२३५	...	२५	...	यचिर	...	चिर
२३५	...	२५	...	तदूपत्र	...	तदुपत्र
२३६	...	१६	...	स्वतत्रो	...	स्वतत्रो
२३७	...	५	...	यत्न	...	यत्न

शुद्धिपत्रम् ।

पृष्ठे		पङ्क्तौ		अशुद्धम्		शुद्धम्
२१७	...	११	..	गमागम	.	ऽगागम
२१७	...	१८	..	ष्ठभवि	...	ष्ठभवि
२१७	...	२२	...	मऽीति	..	ऽऽीति
२१७	...	२६	...	ममापि	..	ममापि
२१८	...	१५	...	अवष्ठियते	...	अवष्ठियते
२१७	..	१	..	नानुष्ठितम्	..	नानुष्ठितम्
२१९	...	७	..	ऽदस्य	...	ऽमस्य
२४०	...	६	...	भयभीतस्य	...	भयभीतस्य
२४०	...	१२	...	कोप	..	कथ
२४०	...	२१	...	निमग्न'	..	निमग्न'
२४१	...	१	...	अचतनं	..	अचेतनं
२४१	...	१८	..	सर्व्वं	..	सर्व्वं
२४२	..	२५	...	देवेष कि	..	देवेषु किं
२४३	...	१०	..	स्वदु	..	स्वादु
२४३	...	१२	...	वद्धा	..	बद्धा
२४३	...	१९	...	द्रुप'	..	द्रूप'
२४४	...	२३	..	लक्ष्मा	..	लक्ष्मा
२४५	...	१६	..	खेलवेषः	..	खलवेषः
२४६	...	८	...	पक्षय	..	पक्षय
२४६	..	१२	..	विति ।	..	विति
२४६	...	१८	..	निंवेद्या	..	विनिवेद्या
२४७	..	६	..	श्रूयताम्	.	श्रूयताम्
२४८	..	४	.	लेखित	..	लेखितं
२४९	...	१९	...	आचार्य	..	आचार्यं
२५०	...	२४	..	'प्रतिपयो		प्रतीपयो
२५१	...	१६	..	भ्रगर	..	भ्रमर
२५१	..	२४	..	एव,	..	एव
२५२	..	१२	..	विप्रलब्धो	.	विप्रलब्धो

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
२५२	... २१	... स्तम्	... स्तम्
२५२	... २३	... कर्म्मणामनु	... कर्म्मणानु
२५३	... १८	... वाप्यस्तु	... वाप्यस्तु
२५३	... २२	... सर्व्वंया।भ्रयम्	... सर्व्वंयाभ्रयम् ।
२५३	... २३	... प्रय	... प्रिय
२५४	... ४	... वेदिष्वाऐ	... वेदिष्वाए
२५४	... १०	... मियुक्त	... नियुक्त
२५४	... ११	... भत्वा	... भत्वा
२५४	... २२	... लताविटपोलताविटपो	... लताविटपो
२५६	... १७	... कार्य्योपि	... कार्य्योपि ।
२५७	... १६	... वक्षुः	... वक्षुः
२५७	... २२	... पिप्पयो	... पिप्पयो
२५८	... ७	... वक्षुः	... वक्षुः
२५८	... १२	... ऽनिर	... ऽनिल
२५८	.. १३	... ऽतृपत्तै	... ऽतृपत्त्यै
२६०	... १	... धोष	... घोष
२६१	... १४	.. असंसय	... असंसय
२६१	... १६	... ऽम्र	... ऽम्र
२६२	... ८	... ऽदक'	... ऽदक'
२६३	... ४	... भविष्यदि	... भविष्यदि
२६३	... १५	... भङ्गा	... भङ्गा
२६३	... १६	... पिनेन	... पिनेन
२६४	... ३	... ऽग्र	... ऽग्र
२६४	... ७	... भर्त्तं	... भर्त्तं
२६४	... ७	... खल्वेनं	... खल्वेनं
२६४	... १५	... स्रोत	... स्रोत
२६४	.. २०	.. कथमन	... कथमनं
२६४	... २१	... प्रतिषे	... प्रतिषे

शुद्धिपत्रम् ।

पृष्ठे		पङ्क्तौ		अशुद्धम्		शुद्धम्
२६५	...	१४	...	मित्येति	...	मिथ्येति
२६५	...	२१	...	पद्योद्गम	...	पद्मोद्गम
२६७	...	१८	..	निष्पा	...	निष्पा
२६८	...	७	...	भूतन्ते	...	भूयन्ते
२६८	...	१५	..	नीष	...	नीश
२७०	...	१२	...	एवेङ्गं	...	एषोऽङ्गं
२७१	..	६	...	स्थिरो	...	स्थिरो
१७१	...	२४	.	यस्तं	...	यस्तं
२७१	...	१७	...	मिलल्य	...	मिलस्य
१७६	..	८	...	यथा	...	रथा
२७८	...	१	...	यर	...	यर्
२७८	...	१२	...	रिन्द्रिय	...	रिन्द्रिय
२७९	...	२	...	सौभाग्य	...	सौभाग्य
२७९	...	१६	...	सुर	...	सुर
२८१	...	१८	...	ऽत्तिन	...	यत्तिन
२८२	...	५	...	शिखरा	...	शिखरा
२८३	...	१६	...	सर्व्वतः	...	पर्व्वतः
२८५	...	१२	...	क्रुतोः	...	क्रतोः
२८८	...	१५	...	दृष्टैवे	...	दृष्टेवे
२८८	...	२१	...	दाक्षा	...	दाक्षा
२८९	...	५	...	परिवर्त्तते	...	परिवर्त्तते
२८९	...	१५	...	खच्चणो	...	खच्चमणो
२९०	...	९	...	एव	...	इव
२९२	...	१	..	समदपु	...	समद्रुं
२९२	...	२२	...	तेत्	:	तत्
२९५	...	५	...	कथयति .	...	कथयति
२९५	..	९	..	निर्द्दितिं	...	निर्द्दतिं
२९५	.	२६	.	मरोहेण	.	प्ररोहेण
२९६	..	१०	...	कारीण	.	कारिण

पृष्ठे		पङ्क्तौ		अशुद्धम्		शुद्धम्
२८७	...	१४	...	यतिरत्नं	...	यतिरत्नं
२८८	...	१	...	यतृत्वे	...	यतृत्वे
२८८	...	२०	...	रोति	...	रिति
३००	...	११	...	यणाया	...	यणया
३०१	...	१७	...	यद्भतं	...	यद्भुतं
३०२	...	२०	...	न त्वम्	...	न यद्भुतम्
३०१	..	२४	...	या ध्वो	...	याध्वो
३०७	...	१	...	याण	...	याणु
३०७	...	१०	...	याषः	..	यषः
३०८	...	११	...	यल्पनेन	...	यत्नेन
३१०	...	१	...	विम्बे सेन्नि	...	विम्बसेन्नि
३११	...	१८	...	सोयन	...	सोक्य
३१३	...	१	...	अयन्य	..	अयन
३१३	...	११	...	पैलम्याः	...	पोक्षोम्याः
३१३	...	२०	...	तधा	...	तया
३१४	...	२५	...	विधि	...	विधि
३१५	...	११	...	यम्मं	...	धम्मं
३१५	...	१३	...	ध्वर्वोदि	...	ध्यूर्व्वोक्ति
३१५	...	१८	...	सम्यक्षयोः	...	सम्यक्तयो
३१६	...	१०	...	तयाः ।	...	तया ।
३१७	...	१	..	तोऽखि	...	तोऽस्मि
३१७	..	१५	...	यति	...	यती
३१७	...	१६	.	परामर्ष्टुं	.	पराम्रष्टु
३१७	...	१८	..	मितां ।	..	मितम् ।
३१७	...	१८	..	ज्ञतां ।	...	ज्ञातम् ।
३१८	..	८	:	यद्धे	..	युद्धे
३१८	...	२०	. .	लिम्ना	.	खम्ना
३१८	..	१८	..	तत्रि		अत्रि

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
२१८ ...	२३ ...	सज ...	सखा
२२० ...	१६ ...	शुम्भमाणा ...	शुम्भमाणा
२२१ ...	२ ...	तथा ...	यथा
२२१ ...	६ ...	सक्यु ...	सखुः
२२१ ...	११ ...	यत्नो ...	यत्नो
२२२ ...	३ ...	भस्ति ...	नस्ति
२२२ ...	३ ...	तधा ...	तथा
२२२ ...	५ ...	क्षीयताम् ...	क्षीयताम्
२२२ ...	२१ ...	प्रौर ...	पौर
२२२ ...	२२ ...	प्रविक्ति ...	प्रवृत्ति
२२२ ...	२२ ...	पलदि ...	प्रलति
२२२ ...	२२ ...	मात्तादि ...	मात्यादि
२२२ ...	२३ ...	श्रतौ ...	श्रुतौ
२२२ ...	२५ ...	घात ...	घ्रात
२२३ ...	१ ...	मेदिनि ...	मेदिनी
२२३ ...	३ ...	नान्दि ...	नान्दी
२२३ ...	३ ...	कविश्या ...	कविया
२२३ ...	५ ...	घुर्खः । ...	घुर्यः ।
२२३ ...	६ ...	गुरू ...	गुरुः
२२३ ...	८ ...	मित्यर्थः । ...	मित्यर्थः